था

रघुनाथायनाथायसीतायाःपतयेनमः॥१२॥वेदवेद्येपरेपुंसिजातेदशरथात्मजे॥वेदःप्राचेतसादासीत्साक्षाद्रामाय
णात्मना॥१३॥पठरावन्रामायणंभक्त्यायःपादंपदमेववा॥सयातिब्रह्मणःस्थानंब्रह्मणापूज्यतेसदा॥१४॥
यःकरांजलिसंपुटैरहरहःसम्यक्पिबत्यादराद्वाल्मीकेर्वदनारविंदगलितंरामायणाख्यंमधु॥जन्मव्या
धिजराविपत्तिमरणैरत्यंतसोपद्रवंसंसारंसविहायगच्छतिपुमान्विष्णोःपदंशाश्वतम्॥१५॥वाल्मीकिगि
रिसंभूतारामसागरगामिनी॥पुनातिभुवनंपुण्यारामायणमहानदी॥१६॥श्लोकसारसमाकीर्णंसर्गक
ल्लोलसंकुलं॥कांडग्राहमहामीनंवंदेरामायणार्णवम्॥१७॥रामंरामानुजंसीतांभरतंभरतानुजं॥सुग्रीवं
वायुसूनुंचप्रणमामिपुनःपुनः॥१८॥जितंभगवतातेनहरिणालोकधारिणा॥अजेनविश्वरूपेणनिर्गुणगुणा
त्मना॥१९॥इतिलवकुशयोर्मंगलस्तवंपठित्वारामायणंपठेत्॥उद्यद्भानुसपलरत्नखचितस्तंभालिसंभा
वितेसोमस्तोमसमानमौक्तिकलसल्लीलद्वितानोन्नते॥तिष्ठन्मंडलिकेप्रकाशपटलैरज्ञानतन्द्रेदिवेऽयो
ध्यामंडनमंडपेदशरथोसंगेहसंतंभजे॥सीतारमणायपादाब्जप्रविष्टदृष्टिंकृतांजलिंप्रणतं॥मारुतसुतमहमीशं
स्मरामिखलकक्षपावकंवीरम्॥२॥नत्वाश्रीरघुवीरंसीतासौमित्रिसेवितंरामं॥कोकिलमुनिभणितानांवि
षमपदानांबुधेविवृतिम्॥३॥क्वचित्संगतयेपदव्याख्याक्वाप्यविरोधनं॥क्वचिन्मतभेदंचक्वचित्किंचिद्द्र
श्रीमद्रुमतरेर्वबीजममलंयस्यांकुरःचिन्मयः काण्डैस्सप्तभिरन्वितोतिविततोऽरण्यालवालोहितः पत्रैस्तत्वसहस्रकैःसुविलसच्छाखाशाखाशतैःपंचभि
श्चात्मप्राप्तिफलप्रदोविजयतेरामायणाख्यस्तरुः॥१॥

रोतगु

सानुगम् ॥ ४ ॥ इहखलुब्रह्मलोकप्रसिद्धंशतकोटिप्रविस्तरंश्रीमद्रामचरितंभूलोकवर्तिनांचतुर्वर्णानांतापत्र
यविमोचनायसंक्षिप्यरचयितुमुद्युक्तःपरमकारुणिकोब्रह्मावाल्मीकिरूपेणाभूमौस्वांशेनसमभवत् ॥ तथा
चस्कांदेपार्वतींप्रतिशिववचनं ॥ वाल्मीकिरभवद्ब्रह्मावाणीवाक्तस्यरूपिणी ॥ चकाररामचरितंपावनंच
रित्रव्रतइति ॥ मात्स्येचोक्तंब्रह्मणानिर्मितंयच्चशतकोटिप्रविस्तरम् ॥ वाल्मीकिनाचतत्प्रोक्तंरामोपाख्यान
मुत्तममिति ॥ ततश्चतुर्विंशत्यक्षरगायत्र्यात्मपरब्रह्मविद्याविलासभूतंश्रीमद्रामायणंचतुर्विंशतिसहस्र
श्लोकैश्चकार ॥ तदुक्तमभियुक्तैः श्लोकेचप्रतिसाहस्रंप्रथमेप्रथमेक्रमात् ॥ गायत्र्यक्षरमेकैकंस्थाप
यामासवैमुनिः ॥ १ ॥ गायत्र्यक्षरीणिचत्वारिद्वेद्वेत्रीणिपंचषट्क्रमात् ॥ चत्वारिसप्तकांडेषुस्थापितान्य
क्षराणिवैति ॥ २ ॥ ॥ २ ॥ इहतावदाचार्यवान्पुरुषोवेदेत्यादिश्रुत्याचार्योपदेशस्यैवपरमात्मज्ञानहेतुत्वे
नाचार्यसमाश्रयस्याव २ ध कर्तव्यत्वपन्न यदृच्छयासमागतंतपःस्वाध्यायपोनिरतंनिरंतराशक्तंवाग्वि
दांवरम् अनादिनिधनाह्येषावागुत्सृष्टास्वयंभुवेतिवाकुशब्दस्यवेदेप्रयोगात्तांविदंतिजानंतीतिवाग्विदस्तेवे
दार्थज्ञास्तेषांमध्येवरंश्रेष्ठंमुनिपुंगवम्मननजन्यपरिपाकवत्सुचश्रेष्ठंनारदंनरस्येदंनारमज्ञानंद्यतिखंडय

शब्दप्रयोगेनदे
वतानमस्काररू
पंमंगलमाचरितं
तथोक्तं देवतावा
चकाशब्दायेचभ
द्रादिवाचका तेस
र्वेमंगलार्थास्यु।
र्लिपितोगणतो
पिच॥॥ —

तीतिनारदः यद्वानरतिशांतिंप्रापयतीतिनरःपरमात्मान्नयेद्यस्माद्धातोःपचाद्यच तदुक्तंभारते नरतीति
नरःप्रोक्तःपरमात्मासनातनइति नरएवनारस्तंरहस्यमुपदिशतीतिनारदः वेदसंपन्नत्वेशार्थतत्वस
माहितत्वाश्रितातानखंडकत्वपरमात्म प्रापकत्वाद्यावार्यगुणगणसंपन्नस्तंतपोस्यास्तीति तपस्वी
वाल्मीकस्यापत्यंवाल्मीकिर्वक्ष्यमाणंपप्रच्छ यद्वातपइतिभिन्नंपदंब्रह्मवाचि तपोब्रह्मब्रह्मैतत्तपइ
तिश्रुतेः नारदंब्रह्मपप्रच्छेत्यर्थः पृच्छेर्द्विकर्मकत्वात् नन्वसौकथंवाल्मीकापत्यंयतोभृगुपुत्रः प्रती

तपःस्वाध्यायनिरतंतपस्वीवाग्विदांवरं॥ नारदंपरिपप्रच्छवाल्मीकिर्मुनिपुंगवं॥१॥ ॥ ॥ ॥ ॥

पतेभार्गवेणतपस्विनेत्याद्युक्तेः क्वचित्प्रचेतोपत्यत्वमभिधीयते चक्रेप्रचेतसःपुत्रःवेदःप्राचेतसाह्वसीदित्यादे
उच्यते निश्चलतरतपोविशेषेणास्यवाल्मीकाकृतौजातायांप्रचेतसावरुणेनकृतनिरंतरवर्षेणप्रादुर्भा २
वोभूदितिभृगुपुत्रस्यैवास्यप्रचेतोपत्यत्वंवाल्मीकापत्यत्वंचसंगच्छतेवल्मीकःप्रभवोयस्माद्वाल्मीकिरु
च्यतइतिब्रह्मवैवर्तोक्तिश्चात्रप्रमाणमिति २ श्रीसीताराम

कथंपरिपप्रच्छेत्याकांक्षायांप्रश्नप्रकारंदर्शयतिकोन्वस्मिन्निमादिश्लोकत्रयेणानुप्रश्नो अस्मिन्लोकेसांप्रतंअस्मिन्का
ले लोकांतरेविष्णोर्विद्यमानत्वात्त्रेवकालांतरेश्रीनृसिंहादेः प्रसिद्धत्वाच्चैतद्यावत्स्वरूपमेवमुक्तम् अस्मिन्लोकेऽस्मिन्कालेको
वासकलकल्याणगुणैःसंपन्नइत्यर्थः एवंसामान्येनगुणसमुदायंपृष्ट्वाविशिष्यतत्तद्गुणाश्रयंपृच्छतिकश्चवीर्यवानित्यादिना
यद्वागुण्यतेआवर्त्यतेपुनःपुनराश्रितैरनुसंधीयतइतिगुणाःसौशील्यंमहतोमन्दैःसहनिरंध्रेणसंश्लेषस्तद्वान् दिव्यास्त्रबला
दिजशक्तिविशेषेणपराभिभवसामर्थ्यंवीर्यंतद्वांश्चकः धर्मःअलौकिकंश्रेयःसाधनंतंसामान्यरूपंविशेषरूपंजानातीतिध
र्मज्ञः कृतमुपकारंस्वल्पंप्रासंगिकमपिबहुतयाजानातीतिकृतज्ञः सत्यंकष्टेप्यनृतशून्यंवाक्यंवचनंयस्यसः दृढव्रतः
निश्चलसंकल्पः २ चारित्रेणेतिचरित्रमेवचारित्रमाचारस्तेनयुक्तःसर्वदाप्यनुज्झितकुलाचारइत्यर्थः
[illegible]
[illegible]

रि

कोन्वस्मिन्सांप्रतंलोकेगुणवान्कश्चवीर्यवान्॥ धर्मज्ञश्चकृतज्ञश्चसत्यवाक्योदृढव्रतः॥२॥
चारित्रेणचकोयुक्तःसर्वभूतेषुकोहितः॥ विद्वान्कःकःसमर्थश्चकश्चैकप्रियदर्शनः॥३॥

सर्वभूतेषुस्वपरतारतम्याभावेनसापराधेष्वपिहितकरः विद्वान्आत्मानात्मसकलपदार्थतत्वज्ञः समर्थःसर्वकार्यधुरंधरः
एकश्चद्वितीयःसचासौप्रियदर्शनश्चसः अयमिवनान्योलोकेप्रियदर्शनोऽस्तीतिभावः यद्वाएकप्रियदर्शनःएकरूप
प्रियदर्शनः लोकेहिकस्यचिद्दर्शनंकदाचित्प्रियंभवतिकदाचिदप्रियंभवतिअयंतुनतथाकिंतुक्षणेक्षणेयन्नवतामुपै
तितदेवरूपंरमणीयताया इत्युक्तरीत्यासदानुभवेप्यपूर्ववद्विस्मयमादधानइत्यर्थः २ श्रीजानकीरमणायनमोनमः

आत्मवान्वशीकृतांतःकरणःजितक्रोधःनिंदाहिंसादिजनकचित्तवृत्तिविशेषरहितः द्युतिमान्सर्वलोकस्पृहाजनक
देहकान्तिमान्अनसूयकःपरोन्नत्यासहनरहितः जातरोषस्यकस्यसंयुगेयुद्धकालेदेवादयःसर्वेविभ्यतिभयंप्राप्नुवंती
त्यन्वयः अतोनभीत्रार्थानामितिकिंशब्दात्पंचमी ४ एतदिति एतदिव्यपुरुषगुणजातंकस्यास्तीतिश्रोतुमिच्छामि

आत्मवान्कोजितक्रोधोद्युतिमान्कोनसूयकः॥कस्यविभ्यतिदेवाश्चजातरोषस्यसंयुगे॥ ४॥
॥ एतदिच्छाम्यहंश्रोतुंपरंकौतूहलंहिमे॥महर्षेत्वंसमर्थोसिज्ञातुमेवंविधंनरं॥ ५॥ ॥॥

तादृशगुणानामेकस्मिन्दुर्लभत्वात्तादृशपुरुषविशेषज्ञानेमेपरंकौतुकंवर्तते एवंविधपुरुषोमयापिदुर्ज्ञेयइतिभावः
हियस्मान्महर्षेत्वपरोक्षीकृताशेषार्थः त्वमेवंविधंनरंदिव्यपुरुषंज्ञातुंसमर्थोसितस्मात्त्वत्तएवश्रोतुमिच्छामि ५

ल

ननु कोन्वस्मिन्निति प्रश्नो वाल्मीकेर्न संभवति तस्य महर्षित्वेन विदितसकलवृत्तांतत्वेन निश्चिते संशयायोगात्‌ परं कौतूहलं हि मे
इत्यथापाततः शतकोटिप्रविस्तररामायणनिर्मातृब्रह्मणोवतारत्वेन करतलामलकवद्विदितरामवृत्तांतस्य कौतूहलासंभवा
दिति चेदुच्यते आचार्याद्धि विदिताविद्यासाधिष्ठं प्रापदाचार्यवान्पुरुषो वेदेति सदाचारसंरक्षणाय वेदांतेषु नानाविद्या
सु तत्तद्गुणविशिष्टतया गम्यमानं परं तत्त्वं किं राम उतान्य इति प्रश्नार्थः तदिदं वाल्मीकेर्हृदयमाकलय्य भगवान्नारदोयः
कश्चिदेकः पूर्वं ब्रह्माणं सृजतीति श्वेताश्वतरोपनिषद्गीतसर्वकारणं सर्वेशरणं परतत्त्वं सर्वलोकपरित्राणाय चक्रव

॥ श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः ॥ श्रूयतामिति चामंत्र्य प्रहृष्टो वाक्यमब्रवीत्‌ ॥ ६ ॥

॥ [illegible]

र्त्तिपुत्रत्वेनावतीर्णो रामब्रह्मादयः सर्वेपि तद्भ्रुकुटिभंगिविधेयास्तस्य[illegible]रमंत्राद्यस्यैव माशवेन सकलवेदांतोदितगुणजातं
रामे योजयन्नुत्तरयति श्रुत्वा चैतदिति त्रयाणां लोकानां समाहारस्त्रिलोकं यात्रादित्वान्न ङीप्‌ यद्वा त्रयो लोका यस्मिन्‌
तत्त्रिलोकं ब्रह्मांडं तज्जानातीति त्रिलोकज्ञो नारदः एतत्पूर्वोक्तं वाल्मीकेर्वचः श्रुत्वा पद्यप्रशस्तसकलगुणापूर्त्तेरन्यत्रासंभवा
त्सकलजगद्रक्ष्यार्थं भूपरूपेणावतीर्णो परमपुरुष एव संभवादिष्यातद्गुणसंकीर्त्तनं लब्धमिति प्रहृष्टः श्रूयतामित्या
मंत्र्याभिमुखीकृत्य वाक्यमुत्तररूपमब्रवीदुक्तवानित्यर्थः ६

वहवइतियेवहवोगुणास्त्वयाकीर्त्तितास्तेएकत्रप्राकृतपुरुषमात्रेदुर्लभाएव अथापिहेमुनेयस्तैर्गुणैर्युक्तोनरःपुरुषोत्तमो
स्तितंबुध्वाश्रुत्वावक्ष्यामिमत्पित्राब्रह्मणाशतकोटिप्रविस्तररामायणंकृतमस्तितन्मुखेनविदित्वा वक्ष्यामि यद्वा
श्रीरामगुणानुसंधानचिंत्येनेशानींनकिंचित्प्रतिभातिक्षणानुध्यावक्ष्यामीतिरहस्यं ७ उक्तप्रशस्तसमस्तगुणाविशि
ष्टत्वेनानिश्चितपरमपुरुषमुपदिशतिइक्ष्वाकुवंशेत्यादिना इक्ष्वाकुवंशात्प्रभवअविर्भावोयस्यसः प्रभवइत्यत्रअ

वहवोदुर्लभाश्चैवयेत्वयाकीर्त्तितागुणाः॥मुनेवक्ष्याम्यहंवुध्वातैर्युक्तःश्रूयतांनरः॥७॥ई॥ ॥ ॥
क्ष्वाकुवंशप्रभवोरामोनामजनैःश्रुतः॥नियतात्मामहावीर्योद्युतिमान्धृतिमान्वशी॥ ८॥ ॥॥

सेरविति भावेऽप इक्ष्वाकुवंशप्रभवआविर्भावोपादानंयस्यसइत्यर्थोवा अत्रापादानेऽप रामोनामरामइतिनाम्ना
प्रसिद्धः जनैश्चश्रुतःविश्वामित्राध्वरत्राणाहल्याविमोक्षेश्वरधनुर्भंगपरशुरामनिग्रहादिभिरवधारितपरतरभावः
संतिचतस्मिन्दिव्यकल्याणगुणाइतिशेषः तानेवगुणानाहनियतात्मानियतस्वभावःनिर्विकारइत्यर्थः द्युतिमान्
आपत्संपदोश्चित्तस्याविकृतिर्धृतिस्तद्वान् वशीजिताशेषवहिरिंद्रियः ८ राम

वाग्मी प्रशस्तवाक् श्रीमान्सर्वातिसायिसौन्दर्यैश्वर्यादियुक्तः विपुलांसइत्यादिनासामुद्रिकलक्षणंकथ्यते विपुलौमां
सलोन्नतौअंसौभुजशिरसीयस्यसः स्कंधोभुजशिरोंसोस्त्रीतिकोशः कंबुग्रीवःकंबुवद्रेखात्रयविविशिष्टग्रीवः महाहनुः
मांसलकपोलापरभागः ९ महोरस्कःमहद्विशालमुरोयस्यसः महेष्वासःमहानिष्वासोधनुर्यस्य गूढजत्रुः गूढेमांस

बुद्धिमान्नीतिमान्वाग्मीश्रीमाछ्त्रुनिवर्हणः ॥ विपुलांसोमहाबाहुःकंबुग्रीवोमहाहनुः ॥९॥ महोरस्को
महेष्वासोगूढजत्रुररिंदमः ॥ आजानुबाहुःसुशिराःसुललाटःसुविक्रमः ॥१०॥ ॥ ॥

लाग्निमग्नेजत्रुणीवक्षोंससंधिगतेअस्थिनीयस्य अरिंदमःनिजभक्तानामरीन्कामादीन्दमयतीत्यरिंदमः आ
जानुबाहुःजानुपर्यंतदीर्घबाहुः सुशिराःसमवृत्तशिराःसुललाटःरेखाधिकललाटः सुविक्रमःगजसिंहादिगतिस
दृशगति १०

समः नातिदीर्घो नातिह्रस्वः समानि अन्यूनानधिकपरिमाणानि विभक्तानि पृथग्भूतान्यंगानि नेत्रादीनि यस्य सः स्निग्धवर्णः स्निग्धश्यामलवर्णः प्रतापवान् प्रतापः स्मृतिमात्रेणारिपुहृदयविदारणक्षमं पौरुषं तद्वान् पीनवक्षाः मांसलोन्नतवक्षाः विशालाक्षः विस्तृतायतनेत्रः लक्ष्मीवान् जानकीरूपलक्ष्मीशक्तिमान् सर्वावयवसौंदर्यवान्वा शुभलक्षणः शुभानि सामुद्रिकशास्त्रोक्तानि लक्षणानि यस्य सः ११ एवमाश्रितविभावनीयदि

समः समविभक्तांगः स्निग्धवर्णः प्रतापवान् ॥ पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः ॥ ११ ॥
॥ धर्मज्ञः सत्यसंधश्च प्रजानां च हिते रतः ॥ यशस्वी ज्ञानसंपन्नः शुचिर्वश्यः समाधिमान् ॥ १२ ॥ ॥

व्यमंगलविग्रहशालित्वमुक्त्वाऽऽश्रितरक्षणोपयोगिगुणानाह धर्मज्ञ इत्यादिना धर्मं शरणागतिरूपं जानातीति धर्मज्ञः सत्यसंधः सत्याश्चामोघाः संधाः प्रतिज्ञा सकृदेव प्रपन्नायेत्यादिरूपा यस्य प्रजानां प्राणिनां हिते हितकरणे रतस्तत्परः यशस्वी भक्तरक्षणैककीर्तिः तस्य नाम महद्यशः इति श्रुतेः ज्ञानसंपन्नः स्वरूपतः स्वभावतश्च सर्वविषयज्ञानशीलः शुचिः पावनः वश्यः पित्राचार्यदेवेषु विनीतः समाधिमान् समाधिः आश्रितरक्षणचिन्ता तद्वान् १२ श्रीसीताराम

॥६॥ प्रजापतिसमःजगद्रक्षणायप्रजापतितुल्यस्तथावतीर्णःसर्वकर्मसुसहायभूतयाश्रियाऽविनाभूतः धातापिदेवस
र्वप्रजाधारणपोषणसामर्थ्ययुक्तः जीवलोकस्यप्राणिसमूहस्यसकलव्यवहारप्रवर्त्तकत्वेनरक्षिता धर्मस्यतत्तद्व

॥प्रजापतिसमःश्रीमान्धातारिपुनिषूदनः।रक्षिताजीवलोकस्यधर्मस्यपरिरक्षिता॥१३॥ ॥
॥रक्षितास्वस्यधर्मस्यस्वजनस्यचरक्षिता॥वेदवेदांगतत्वज्ञोधनुर्वेदेचनिष्ठितः॥१४॥ ॥

र्णाश्रमधर्मस्यमर्य्यादापालनद्वारारक्षिता १३ स्वस्यधर्मस्ययज्ञाध्ययनदंडग्रहणादिरूपस्यरक्षितासादरमनु ष्ठा
ष्ठाता स्वजनस्यस्वभक्तजनस्यावश्यभाविनोऽनिष्टस्यनिरासपूर्वकपरमेष्टदानेनरक्षिता निष्ठितःसम्यग्ज्ञा हे ॥६॥

सर्वेति सांख्ययोगतर्कपूर्वोत्तरमीमांसासूत्राणिसव्याख्यानानिशास्त्राणिसर्वेषामेषामर्थतत्त्वज्ञः स्मृतिमान्
ऊक्ताधीतवेदशास्त्रार्थविस्मरणरहितः प्रतिभानवान् व्यवहारेकालेश्रुतस्याश्रु तस्यचोचितार्थस्यशीघ्रंप्रतिभा
सः प्रतिभानंतद्वान् सर्वलोकप्रियःकुतस्मात्लोकानामिहामुत्रहितावहः साधुःमृदुमधुरस्वभावःअदीनात्मा

सर्वशास्त्रार्थतत्त्वज्ञःस्मृतिमान्प्रतिभानवान् ॥ सर्वलोकप्रियःसाधुरदीनात्माविचक्षणः ॥ १५ ॥
॥ सर्वदाभिगतःसद्भिःसमुद्रइवसिंधुभिः ॥ आर्यःसर्वसमश्चैवसदैवप्रियदर्शनः ॥ १६ ॥ ॥

सहजासाधारनक्षात्रभावेनादीनस्वभावः विचक्षणःयथोचितलौकिकालौकिकसर्वक्रियाकुशलः १५
सद्भिर्भक्तैःसदासेवितःभगवद्भजनेकालनियमाभावात् कइवसिंधुभिर्नदीभिःसमुद्रइव आर्यःसर्वपूज्यः
सर्वसमःसर्वेषुसुखदुःखादिकेषुसमोहर्षविषादरहितः सदैवप्रियदर्शनःसदैवसर्वावस्थासुमुहुर्मुहुरनुभवेपि
अननुभूतपूर्ववद्विस्मयनीयदर्शनः १६

अथ इषुक्षयान्निवर्त्तते नांतरिक्षक्षितिक्षयात् मतिक्षयान्निवर्त्तते न गोविंदगुणक्षयादिति भगवद्गुणानां वर्णा
॥७॥ युतेनापि वर्णयितुमशक्यत्वेन संग्रहेणावदन्नुपसंहरति सचेति स च इक्ष्वाकुवंशप्रभवो रामः सर्वगुणोपेतः सर्वैर्दि
व्यगुणैर्युक्तः कौसल्येत्युपलक्षणं तच्च निरीक्षकाणां सर्वेषामानंदं वर्द्धयतीति तथा बभूवेति शेषः अथास्यानिःसमाभ्य
धिकत्वं वक्तुं लोके प्रकृष्टवस्तूनां तदेकैकगुणसाम्यमाह समुद्र इवेत्यादि श्लोकद्वयेन गांभीर्यं नाम स्वांतर्गतप

॥ स च सर्वगुणोपेतः कौसल्यानंदवर्द्धनः ॥ समुद्र इव गांभीर्ये धैर्येण हिमवानिव ॥ १७ ॥ ॥ ॥

दार्थाप्रकाशकत्वं यथा समुद्रः स्वांतर्गतं रत्नादिकमप्रकाशयन्नेव वर्त्तते तथायमपि स्वं परत्वमप्रकटयन्नेवा
स्ते इत्यर्थः वस्तुतोऽत्र समुद्रादेरुपमानत्वाभावेपि परिवृढमुपमानत्वं संभवतीत्येवमुक्तम् इषुवद्गच्छति सवितेति ॥७॥
वत् धैर्यमप्रच्याव्यत्वं तेन हिमवत्सदृशः १७

विष्णुनेति यद्यपिरामोविष्णुरेवसर्वरूपस्तथापिमानुषनाट्योपाधिभेदात्सर्वत्रसादृश्यंप्रदर्शितम् यद्वा
विष्णुनास्वेनैववीर्येसदृशाइत्यन्वयालंकारःसोमवत्प्रियदर्शनःप्रजाव्यवहारनिरीक्षणकालेचंद्रवत्सौम्यद

विष्णुनासदृशोवीर्येसोमवत्प्रियदर्शनः॥कालाग्निसदृशःक्रोधेक्षमयापृथिवीसमः॥१८॥ ॥ ॥

र्शनः क्रोधेतुऽकालिकेकालाग्निसदृशः अपराधसहोपिस्वविषयापराधमेवस्वयंसहतेस्वभक्तापराधकर
रेतुज्वलज्ज्वलनइवकोपमावहतीत्यर्थः क्षमाप्रतीकारसामर्थ्येप्यपकारसहिष्णुतातयापृथिवीतुल्यः १८

॥८॥

न

धनदेनेति त्यागे धनत्यागे धर्मार्थे धनव्ययविषये अपेक्षितधनसंपत्तावित्यर्थः धातूनामनेकार्थत्वात् धनदेन निधी-
शेन समः तुल्य उपमाने धनदव्यतिहारस्तु कतिपयविशेषेभ्यो भगवद्दात्/पाकतिपयधनदानमात्रादिति बोध्यम् य-
द्वा धनं ददातीति धनदा धनदातारस्तेषां इना अधिपतयश्चिंतामणिकल्पवृक्षप्रभृतयस्तैः समः अत्रापि सेवामनपेक्ष्य स-
न्निधिमात्रेणाभिलषितदाने सामर्थ्यं न तु रघुनाथैकप्रसादापेक्षित्वेन राज्याद्यभिलाषशून्यैर्बहुमानपूर्वकबहुदानेपि जड-
त्वेन तत्र तत्र तदसंभवात् सत्ये सत्यवचने अपरो धर्म इव धर्मस्य मूर्त्यंतरमिवेत्युत्प्रेक्षा एवं वेदांतोदितजगत्कारणत्वस-
र्वेश्वरत्वसर्वशक्तित्वसर्वांतर्यामित्वप्रभुत्वसमस्तकल्याणगुणगणाकरत्वब्रह्मत्वादिकं राम एव उक्तान्यइति वाल्मीकिना वेदोपबृं-

॥ धनदेन समस्त्यागे सत्ये धर्म इवापरः ॥ तमेवं गुणसंपन्नं रामं सत्यपराक्रमं ॥१९॥ ॥ ॥

हणाय पद्ये वेदांतोदितगुणानां तदन्येष्वसंभवाद्विभुत्वेन तस्यैव संभवात्स एव वेदांतोदितं परं तत्त्वमित्युपदिष्टे क्वचिदन्यत्र ज-
गत्कारणत्वादिश्रवणात्तु स शिवः स ब्रह्म इत्यादिश्रुतिसिद्धाभेदविषयम् ननु वेदोपबृंहणं रामायणमित्युक्तं धर्मादिरपि
वेदार्थः सकलं नोपबृंहितइति चेद्रामादिपरवेदभागोपबृंहणं च रामायणीयमहर्षिकपीठादिपुरुषाचारमुख्येन कृतमेवेत्य-
वहि एतदंते बालकांडीयार्थसंग्रहः तत्र इक्ष्वाकुवंशप्रभव इत्यनेन भगवदाविर्भावः सूचितः [redacted] महा-
वीर्यः शत्रुनिबर्हणा इत्यादिना शस्त्रास्त्रसंपत्तिताटकावधादि सूचितम् लक्ष्मीवानित्यनेन जानकीपरिणयः सूचितः

सत्यपराक्रममित्यनेन भार्गवजयादि सूचितं एवमु-
क्तित्वात्सकलकल्याणगुणायुक्तं सत्यपराक्रममग्र-
॥८॥ अमोघपराक्रमम् १९

श्रेष्ठगुणैर्यौवराज्याभिषेकार्हगुणैर्युक्तं प्रकृतीनां प्रजानां हितैरिहामुत्रहितावहैर्युक्तं ज्येष्ठं सुतं रामं प्रकृतिप्रियकाम्य
या प्रकृतीनां प्रियं कर्तुमिच्छया यौवराज्येन पितरि राज्यं कुर्वत्येव सर्वराज्यव्यापारे संयोक्तुं महीपतिः प्रीत्यारैच्छत २०
अथ तस्य रामस्य यौवराज्याभिषेकेऽपेक्षितान्संभारान्दृष्ट्वा मंथरावचनात्तत्तात्वकेकयीति वक्तव्ये कैकयीति छन्दोनु

ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतं ॥ प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ॥ यौवराज्येन संयोक्तु
मैच्छत प्रीत्या महीपतिः ॥ २० ॥ तस्याभिषेकसंभारान्दृष्ट्वा भार्याथ कैकयी ॥ पूर्वं दत्तवरा देवी वरमेनमया
चत ॥ २१ ॥

रोधात् पूर्वं दत्तवरा पूर्वं पूर्वस्मिन्काले इंद्रसहायार्थं युध्यमाने दशरथे परप्रयुक्तां मायुरीं मायां धवलांगमुनिदत्तविद्या
जा निवारयित्री कैकेये तुषेन दशरथेन दत्तौ वरौ यस्यै सा देवी वरं वक्ष्यमाणं तालसतां एनं राजानमयाचत २१

वरद्वयमाहविवासनंचेति राज्याद्द्वासनमित्यर्थः २२ संयतःबद्धः प्रियंसुतमपिविवासयामास २३ सवीरःमहायोद्धा
पिरामःपितुःप्रतिज्ञांस्वविवासनेनसत्यतयानुपालयन्पितृवचनरूपान्निर्देशाद्धेतोःमातुश्चकैकेय्याःप्रियकारणा

विवासनंचरामस्यभरतस्याभिषेचनं॥२२॥ससत्यवचनाद्राजाधर्मपाशेनसंयतः॥विवासयामाससुतंरा
मंदशरथःप्रियम्॥२३॥सजगामवनंवीरःप्रतिज्ञामनुपालयन्॥पितुर्वचननिर्देशात्कैकेय्याःप्रियकार
णात्॥२४॥

तत्प्रीतिनिमित्तंवनंजगाम तदेवमिक्ष्वाकुवंशेत्यादिनासमस्तकल्याणगुणपरिपूर्णत्वोक्त्यापरत्वमुक्तंतमेवमित्या
दिनाभिषेकप्रवृत्तिकथनात्सौलभ्यमावेदितम् २४

अथपरत्वसौलभ्यानुगुणांलक्ष्मणाकृतसमाश्रयमाहतंव्रजंतमिति यद्वा भगवन्निषेवैर्लक्ष्मणावत्कैंकर्यपरैर्भवित
व्यमितिव्यंजयन्नाहतंव्रजंतमिति भ्रातरमित्यन्वयः प्रीणातीतिप्रियः श्रीरामेप्रीतिमानअनेनानुगतिहेतुर्भक्ति
रुक्ता भ्राताह्यापरमूर्त्तिभूतः विनयसंपन्नःकैंकर्यहेतुविनयसंयुक्तः सुमित्रायाआनंदंवर्द्धयतीतिसुमित्रानंद
वर्द्धः भ्रातुर्दयितःरामस्येष्टतमः श्रीरामकैंकर्यलक्ष्मीसंपन्नोलक्ष्मणःसुभ्रातुर्भावःसौभ्रात्रंरामंविनासत्ताम

तंव्रजंतंप्रियोभ्रातालक्ष्मणोनुजगामह ॥ स्नेहाद्विनयसंपन्नःसुमित्रानंदवर्धनः ॥ भ्रातरंदयितोभ्रातुःसौ
भ्रात्रमनुदर्शयन् ॥२५॥ रामस्यदयिताभार्यानित्यंप्राणसमाहिता ॥ जनकस्यकुलेजातादेवमायेवनिर्मिता ॥२६॥

पिजीवनासमत्वमनुदर्शयन्स्नेहाद्रामभक्तेरेवहेतोरनुजगाम अपूर्वोयंकश्चिद्वृत्तिविशेषइतिदेवर्षिर्विस्मयते
हइति तदुक्तमभियुक्तैः सुमित्रांमित्राणिद्रविणानिभवंतातचरणान्नुतंहित्वारामंत्वमनुसृतवान्यातमटवीतर
स्मात्सर्वस्मादपिपरमेवप्रियइतिश्रुतेरर्थंव्यक्तंजगतिकृतवान्लक्ष्मणभवानिति २५ अथसीतायानित्ययोग
दर्शयतिरामस्येत्यादिश्लोकद्वयेन रामस्याभिरामस्यापिदयितानिरतिशयप्रेमास्पदा नित्यंभार्यातेहृदिसंततंवि
भर्त्ति प्राणसमाउक्तार्थद्वयेहेतुरयं जनकस्यकुलेजाताआचारप्रधानेत्यर्थः देवमायेवनिर्मिताकृतामूर्त्तिर्देव
स्यभगवतोरामभद्रस्याश्चर्यशक्तिरिवस्थिता अनेनसौंदर्यस्यपराकाष्ठोदिताभवति २६

सर्व[redacted]रुत्तमस्त्रीलक्षणैःसंपन्ना नारीणांपरमसाधुरीभ्यतामुत्तमापुरुषोत्तमरामानुरूपानारीवधूः अचिरेण
सीताप्यंतःपुरस्थवस्तुयोग्यापिरामंरमणीयराजकिशोरमनुगतानिरवधिकसौंदर्यात्कृच्छ्रदृश्यतयानुगतवती
२७ लक्ष्मणसीतावत्पौराणामप्यनुवृत्तिंदर्शयतिपौरैरिति दूरमनुगतइत्यनेनविरहासहिष्णुत्वोक्त्यापौराणाम
रामभक्तिरुक्तापुनर्विश्लेषभीरुत्वंपरमाभक्तिरुच्यतइतिवचनात् पित्रेत्यनेनवात्साल्यादनुगतइत्युक्तम् एवंपात्र
सौलभ्येदर्शिते २८ अथसौशील्यवात्सल्येदर्शयति शृंगीति धर्मात्माधर्मौवात्सल्यसौशील्येप्रात्मात्यभावोपपत्य

सर्वलक्षणसंपन्नानारीणामुत्तमावधूः॥ सीताप्यनुगतारामंशशिनंरोहिणीयथा॥२७॥ पौरैरनुगतोदूरं
पित्रादशरथेनच॥२८॥ शृंगिवेरपुरेसूतंगंगाकूलेव्यसर्जयत्॥ गुहमासाद्यधर्मात्मानिषादाधिपतिं
प्रियं॥२९॥

सः शृंगिणांकुत्सासारहीनांवेराणिकृत्तिमशरीराणिसजातीयमृगग्रहणाययस्मिंस्तत्पुरे गुहंगृहपतिंगोपपतिंपर
त्वमितिगुहस्तं जातितोवर्जितंकुलतोहीनमविद्यस्मिन्निरुपाधिकानुरक्तिमात्रेणासाद्यबंधुभावेनगृहीत्वेत्य
नेनसौशील्यमुक्तं सूतंसुमंत्रंपारंपर्येणानुवर्तमानमप्यस्मदर्थेश्रमीमाभूदितिगंगाकूलेव्यसर्जयदितिवात्स
ल्यातिशयउक्तः २९

गुहेनेति स रामः लक्ष्मणेन सीतया च सह गुहेन हितः सहितः गंगां तारित इत्यर्थः ते वने नेति श्लोकद्वयमेकं वाक्यम् तेश्रीरा
मादयः वनेन पंचम्यर्थे तृतीया वनान्नूतनेन वनं गत्वेत्यर्थः यद्वा अवनेनेति छेदः लोकरक्षणहेतुनेत्यर्थः यद्वा तेवृदे
वन इति धातोर्भावे ल्युट् तेवनेन देवनेन लीलया अनायासेनेत्यर्थः अनयैव व्युत्पत्त्या तेवने पादसंचार इति लभ्यते सू
तव्यसर्जनानंतरं रथादवरुह्य पादसंचारेण वनं गत्वेत्यर्थः [illegible] ३० भरद्वाजस्य शासनान्नियमानाचि
त्रकूटमनुप्राप्य गत्वा रम्यं रमणीयमावसथं पर्णशालरूपं गृहं कृत्वा निर्माय तत्र वने चित्रकूटोपांतवने रममाणा।

गुहेन सहितो रामो लक्ष्मणेन च सीतया॥ ते वने न वनं गत्वा नदीस्तीर्त्वा बहूदकाः॥३०॥ चित्रकू
टमनुप्राप्य भरद्वाजस्य शासनात्॥ रम्यमावसथं कृत्वा रममाणा वने त्रयः॥ देवगंधर्वसंकाशा
स्तत्र ते न्यवसन्सुखं॥३१॥ चित्रकूटं गते रामे पुत्रशोकातुरस्तदा॥ राजा दशरथः स्वर्गं जगाम विल
।पन्सुतं॥३२॥

लीलारसमनुभवंतो देवगंधर्वसंकाशाः देवीश्च देवश्च देवौ लक्ष्मीनारायणौ गानं धारयतीति गंधर्वः पृषोदरादिः
एतत्सामगायन्नास्त इति श्रुतेः सर्वदा सामगानपरोऽनंतस्तत्संकाशास्तद्वदुपमेयाः सुखं न्यवसन्निति अन्वयः सी
तारामभद्रयोः पुष्पोपचयजलक्रीडादिकं रतिर्लक्ष्मणस्य तु विशिष्टकैंकर्यलाभजा प्रीतिः वक्ष्यति च भवांस्तु स
ह वैदेह्या गिरिसानुषु रंस्यति अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते इति वर्त्तमानार्थकस्यापि रममाणा इत्य
स्य न्यवसन्निति भूतप्रत्ययांतविशेषणान्वयाद्धातुसंबंधे प्रत्यया इत्यनुशासनात् ३१ ३२ श्रीकोशलेंद्रं भजेत

एवंलक्ष्मणस्यरामानुयायित्वंप्रतिपाद्यभरतस्यभगवत्पारतंत्र्यंदर्शयतिमत्तेनुतस्मिन्नित्यादिना ३३ ततोरामपा
दप्रसादकः पूज्यंरामंप्रसादयितुंवनंजगाम पादशब्दः पूज्यवाची ३४ सभरतः महात्मानंसत्यप्रतिज्ञमित्यादिधर्मैर्म
॥११॥ हावैभवंभ्रातरंरामंगत्वा आर्यभावपुरस्कृतः पुरस्कृतार्यभावोविनीतवेषस्तंरामंराज्यायप्रतिनिवृत्तिमयाचत् ३५
ननुपितृमातृदत्तराज्यंतवैवयोग्यमितिममप्रतिनिवृत्तिरनुचितेत्यत्राहत्वमेवेति धर्मज्ञः ज्येष्ठेविद्यमानेनकनिष्ठोरा
ज्यमर्हतीतिधर्मंजानन्त्वमेवराजानान्यइतिरामंवचोब्रवीदित्यर्थः ३६ ननुभरतकृताविज्ञप्तिःकुतोनाफलत् अ

मतेतुतस्मिन्भरतोवसिष्ठप्रमुखैर्द्विजैः॥ नियुज्यमानोराज्यायनैच्छद्राज्यंमहाबलः॥३३॥ सजगाम
वनंवीरोरामपादप्रसादकः॥३४॥ गत्वातुसमहात्मानंरामंसत्यपराक्रमं॥ अयाचद्भ्रातरंराममार्यभा
वपुरस्कृतः॥३५॥ त्वमेवराजाधर्मज्ञइतिरामंवचोब्रवीत्॥३६॥ रामोपिपरमोदारःसुमुखःसुमहाय
शाः॥ नचैच्छत्पितुरादेशाद्राज्यंरामोमहाबलः॥३६॥ ॥ ॥

धिकारिवैगुण्याच्छारापवैगुण्याद्वा नाद्यःभरतस्यश्रीरामप्रसादातिरिक्तापेक्षाभावात् नान्त्यःतस्यसर्वगुणपरिपूर्णत्वा
दित्याशंक्य प्रबलप्रतिबंधकस्यसत्त्वान्नफलितेत्याह रामोपीति अपिशब्दःप्रतिविशेषणमन्वेति रामोपिस्वीय
दिव्यगुणैराश्रितचित्तरंजनस्वभावोपिपरमोदारोपिसर्वपर्यंतापेक्षितार्थप्रदोपि यद्वात्वाश्रितमनोरथपूरणनिपु
णोपिसुमुखोपिअर्थिजनलाभेनप्रसन्नमुखोपिसुमहायशाअपिप्रसिद्धकीर्तिरपि पितुरादेशात्प्रबलप्रतिबंधका ॥११॥
न्नैच्छत् चशब्दात्तद्वचमानेत्वेच्छादि[illegible]त्यर्थः तथाचविज्ञप्तेर्वैफल्यंनास्तीतिभावः ३६ श्रीराम

प्रतिबंधकनिवृत्तिफलकं प्रतिनिधिं दद्यावित्याह पादुकेति ततः स्वस्य भरतस्य राज्यापराज्यं कर्त्तुं स्वपदस्थे पादुके
न्यासं स्वप्रतिनिधिं दत्वा भरताग्रजो भरतं पुनः पुनर्निवर्त्तयामास पुनः पुनरित्यनेन भरतस्य रामविरहासहिष्णुत्वं
द्योत्यते ३७ सकाममिति स भरतः सकामं स्वनाथकैंकर्यं लप्स्ये इति मनोरथमप्राप्यैव रामपादौ रामपादुके उपस्प
शन् प्रत्यहं सेवमानः सन् रामगमनकांक्षया कदा रामस्त्वागमिष्यति कदा तच्चरणसेवनं लप्स्ये इति मनोरथमभि

पादुके चास्य राज्याय न्यासं दत्वा पुनः पुनः ॥ निवर्तयामास ततो भरतं भरताग्रजः ॥३७॥ स काममनवाप्यैव राम
पादावुपस्पृशन् नंदिग्रामेऽकरोद्राज्यं रामागमनकांक्षया ॥३८॥ गते तु भरते श्रीमान्सत्यसंधो जितेंद्रियः
॥३९॥ रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ॥ तत्रागमनमेकाग्रो दंडकान्प्रविवेश ह ॥४०॥ ॥ ॥

वर्तयदित्यर्थः रामरहिततन्निवासस्यातिदुःखावहत्वात्पाऽयोध्यां विहाय नंदिग्रामे राज्यमकरोत्तरात्तापालनमकरोत् ए
वं लक्ष्मणस्य भरतस्य च क्रमेण श्रीरामकैंकर्यं तत्पारतंत्र्यं च प्रदर्शितम् शत्रुघ्नवृत्तांत प्रदर्शनेन तस्य भागवतपा
रतंत्र्यं सूचितम् ३८ एवमयोध्याकांडार्थं प्रतिपाद्य पितृवचनपरिपालनसिद्धिं निगमयन्नारण्यकांडवृत्तांतं प्रस्तौति गते
त्विति भरते गते तु श्रीमान् प्रतिज्ञाभंगभयजनितविषादविगमादुत्पन्नाखिलक्षराकांतिमान् सत्यसंधः भरतनिर्बंधेना
प्यविचाल्यप्रतिज्ञः जितेंद्रियस्मात् भरतादिप्रार्थनव्याजेन सत्यपि राज्यभोगलौल्यरहितः ३९ एवं गुणविशिष्टो रामस्तु अ
त्रासन्नतया नागरस्य मंत्रिवृद्धादिपौरजनस्य तत्र चित्रकूटे पुनरागमनमालक्ष्य संभाव्य दंडकान्दंडकारण्यं
निराकांक्षः समाहितो भूत्वा प्रविवेश हेति प्रसिद्धो ४०

रामोमहारण्यंप्रविश्यंतुराजीवलोचनः अपूर्वसंस्थानविपिनविलोकनजनितकुतूहलेनविकसितनयनारविंदःस
न्नेनैवोत्साहेनविराधंराक्षसंहत्वाशरभंगादीन्ददर्श अगस्त्यभ्रातरमितिअगस्त्यभ्रातासुदर्शनाख्यः तदुक्तंस
नत्कुमारसंहितायामगस्त्येन ज्यवीयातेषमेभ्रातासुदर्शनइतिस्मृतइति कुंभसंभवस्यागस्त्यस्यभ्रातासहपो
षणादितिबोध्यम् ४१ [illegible]ः अगस्त्यवचनाच्चैवैंद्रं इन्द्रादगस्त्यस्यागतं पूर्वैर्भार्गवंजित्वाततःप्राप्तंयद्वैष्णवं
धनुर्भार्गवतारामेणावरुणोन्यस्तंतद्वरुणादानीयैंद्रेणागस्त्यस्यार्पितमित्यारण्यकांडेस्फुटंऐंद्रंधनुःपरमेश्वरोविष्णुस्त
स्येदमैंद्रमितिवा ऐंद्रंशरासनंखड्गंचअक्षय्यसायकौतूणीनिबंधौचअप्रतुल्यनिजायुधलाभात्परमप्रीतोजग्राह

प्रविश्यतुमहारण्यंरामोराजीवलोचनः॥विराधंराक्षसंहत्वाशरभंगंददर्शह॥सुतीक्ष्णंचाप्यगस्त्यंचअगस्त्य
भ्रातरंतथा॥४१॥अगस्त्यवचनाच्चैवजग्राहैंद्रंशरासनं॥खड्गंचपरमप्रीतस्तूणीचाक्षयसायकौ॥४२
वसतस्तस्यरामस्यवनेवनचरैःसह ऋषयोऽभ्यागमन्सर्वेवधायासुररक्षसां॥सतेषांप्रतिशुश्राववराक्षसा
नांतदावने॥४४॥

स्वीकृतवान् ४२ वनेशरभंगवनेतस्यरामस्यवसतःतस्मिन्रामेवसतिसतिसर्वेवैखानसा
वालखिल्यादयोऋषयः शरभंगाश्रमवासिनोवनचरैश्चित्रकूटपंपावनप्रभृतिवनवासिभिःसहअसुरराक्षसांअ
सुराःकबंधादयःरक्षांसित्वितादयस्तेषांवधायवधंप्रार्थयितुंअभ्यागमन् ४३ सरामःतेषांराक्षसानांवधंचतस्मिन्
वनेतेभ्योऋषिभ्यःप्रतिशुश्राववाढमितितद्वचोंऽगीकृतवानित्यर्थः ४४ ४५ श्रीजनकनन्दिनीश्रीरघुनन्दन

रामेणाग्निकल्पानामग्निसदृशानां ऋषीणांअपेक्षित इति शेषः संयति युद्धेअविंष्यामि ता निजशक्तिवैभवेन रक्ष
सांवधः प्रतिज्ञातश्चेति संबन्धः ४५ अथ प्रतिज्ञानिर्वाहबीजमुपक्षिपति तेनेति तत्रैव जनस्थाने वसता तेन रामेण ज
नस्थाने निवसतीति जनस्थाननिवासिनी कामेन रूपमस्यास्तीति कामरूपिणी शूर्पतुल्यानखा यस्याः सा शूर्पनखा

प्रतिज्ञातश्च रामेण वधः संयति रक्षसां ॥ ऋषीणामग्निकल्पानां दंडकारण्यवासिनां ॥४५॥ तेन तत्रैव वस
ता जनस्थाननिवासिनी ॥ विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥ ४६ ॥ ततः शूर्पणखावाक्यादुद्यु
क्तान्सर्वराक्षसान् ॥ खरं त्रिशिरसं चैव दूषणं चैव राक्षसं ॥ निजघान रणे रामस्तेषां चैव पदानुगान्
॥४७॥ वने तस्मिन्निवसता जनस्थाननिवासिनां ॥ रक्षसां निहतान्यासन्सहस्राणि चतुर्दश ॥ ४८ ॥

राक्षसी विरूपिता कर्णनासाछेदनेन वैरूप्यं प्रापिता शूर्पनखेत्यत्र नखमुखात्संज्ञायामिति ङीष्निषेधः पूर्वपदात्
संज्ञायामितिणत्वम् ४६ ततः शूर्पनखाविरूपकरणानंतरं तद्वाक्यादुद्युक्तान् युद्धार्थं सन्नद्धान्सर्वराक्षसान् चतु
र्दशसंख्याकप्रधानराक्षसान्तेष्वपि प्रधानं खरं त्रिशिरसं चैव तेषां पदानुगाननुचरांश्च रणे रामो निजघान हत
वान् ४७ तस्मिन्वने निवसता रामेण जनस्थाननिवासिनां रक्षसां चतुर्दशसहस्राणि निहतान्यासन्निति संबन्धः ४८

एवंश्रीरामस्यसत्यप्रतिज्ञत्वेदर्शिते श्रीजानक्यास्तत्साधकत्वंवक्तुंबीजमुपक्षिपन्तिततोज्ञातीति ततःखरादिवधानं
तरंज्ञातिवधंखरादिवधंश्रुत्वाअकंपनशूर्पनखामुखेनज्ञात्वारावणःक्रोधेनमूर्छितोमूढःसन्मारीचंनामराक्षसं
सहायंवरयामास ४९ सरावणःमारीचेनबहुशोबहुवारंहेरावणबलवतातेनरामेणतवविरोधोनक्षमोनयुक्तइति

ततोज्ञातिवधंश्रुत्वारावणःक्रोधमूर्छितः॥सहायंवरयामासमारीचंनामराक्षसं॥४९॥वार्यमाणःसुबहुशो
मारीचेनसरावणः॥नविरोधोबलवताक्षमोरावणतेनते॥५०॥अनादृत्यतुतद्वाक्यंरावणःकालचोदितः
जगामसहमारीचस्तस्याश्रमपदंतदा॥५१॥तेनमायाविनादूरमपवाह्यनृपात्मजौ॥जहारभार्यांरामस्य
गृध्रंहत्वाजटायुषं॥५२॥

वार्यमाणोऽभूत् ५० कालचोदितोमृत्युप्रेरितोरावणस्तद्वाक्यंत्वनादृत्यमारीचसहि
तस्तस्यरामस्याश्रमपदंआश्रमस्थानंजगाम ५१ ततस्तेनमायाविनामारीचेननृपात्मजौरामलक्ष्मणौदूरमपवा
ह्यअपसार्यगृध्रंजटायुषंहत्वाकंठगतप्राणंकृत्वारामभार्यांजहारेतिसम्बन्धः ५२ जैश्रीराजीवलोचनकी ●

निहतंनिहतप्रायंगृध्रंदृष्ट्वामैथिलींहृतांश्रुत्वागृध्रमुखादितिशेषः राघवःशोकसंतप्तोविललापपर्यदेवयत् आकुलें
द्रियः ननुविष्णववतारस्यास्यकथंशोकमोहौसंभवतः सत्यं अज्ञानमूलयोस्तयोरसंभवेपिनिरुपमप्रेमकरुणाप्रसूतौतौ
संभवतस्तावानुकूल्यनायकस्यपुरुषोत्तमस्य यदिलोकोत्तरगुणविशिष्टवस्तुविनाशेपितौनस्यातांतर्हिकथंपुरुषोत्तमः
स्यात्तत्त्वंकथमात्तिसुंदरंस्यात् वक्ष्यतिव्यसनेषुमनुष्याणांभृशंभवतिदुःखितइति माहतिष्ठ्य इष्वाकंकृतवान्रामोहि
नोपदेष्टनयाप्रभुः धारयत्यात्मनोदेहंनशोकेनावसीदतीति ५२ तेनशोकेनगृध्रहननजनितेनसीताहरणौत्कण्ठ्याधि

न
गृध्रंचनिहतंदृष्ट्वाहृतांश्रुत्वाचमैथिलींराघवःशोकसंतप्तोविललापाकुलेंद्रियः॥५३॥ ततस्तेनैवशोकेन
गृध्रंदग्ध्वाजटायुषं॥मार्गमाणोवनेसीतांराक्षसंसंददर्शहकवंधंनामरूपेणविकृतंघोरदर्शनं॥५४॥
तंनिहत्यमहाबाहुर्ददाहस्वर्गतश्चसः॥५५॥सचास्यकथयामासशवरींधर्मचारिणीं॥श्रमणींधर्मनिपु
णामभिगच्छेतिराघव॥५६॥

केननिवृत्तिहेतुमप्राप्तेनततःव्याघ्रस्वरूपगृध्रंदग्ध्वाविधिवत्संस्कृत्यसीतांमा
र्गमाणः मार्गयमाणोरूपेणविकृतंकवंधंनामराक्षसंददर्श ५४ स्वर्गतःस्वर्गगमनयोग्यंस्वीयंगंधर्वरूपंप्राप्त
वान् ५५ सचतेनरूपेणशवरींशवरस्त्रियंधर्मचारिणींश्रवणकीर्तनादिभगवद्धर्माचरणशीलांतपसाश्राम्यतीतिश्रम
णीं केचित्तुरित्युर् धर्मनिपुणांधर्मेणमार्गवनरूपेबहुकालमभिनवफलपुष्पकिसलयादिसंपादनेचतुरांहेराघवता
मभिगच्छेत्यस्यकथयामास ५६

महातेजाःसराघवःशत्रुसूदनःस्वभक्तानांस्वप्राप्तिप्रतिबंधकनिवर्त्तकःशबरींनीचत्वसीमाभूतामभ्यगच्छदितिसौ
शील्यातिशयोक्तिः ५७ आगमिष्यतितेरामःसुपुण्यमिममाश्रममितिगुरुवचनमवधार्यानुदिनंस्वादूनिफलान्या
हृत्यापरीक्ष्यनिक्षिप्रवत्यासयाशब्यासम्यक्पूजितोदशरथात्मजःपंपातीरेहनुमताभूतपूर्वेणाहृष्टेणप्रेम्णावानरेण
संगतोमिलितः पंपेत्यादिनाकिष्किंधाकाण्डकथासंग्रहः ५८ हनुमतवचनात्सुग्रीवेणसमागतश्च चैवेतिवि

सोभ्यगच्छन्महातेजाःशबरींशत्रुसूदनः ॥५७॥ शबर्य्यापूजितःसम्यग्रामोदशरथात्मजः ॥ पंपातीरेहनुम
तासंगतोवानरेणह ॥५८॥ हनूमद्वचनाच्चैवसुग्रीवेणसमागतः ॥५९॥ सुग्रीवायचतत्सर्वंशंसद्रामोम
हाबलः ॥ आदितस्तद्यथावृत्तंसीतायाश्चविशेषतः ॥६०॥ सुग्रीवश्चापितत्सर्वंश्रुत्वारामस्यवान
रः ॥ चकारसख्यंरामेणप्रीतश्चैवाग्निसाक्षिकं ॥६१॥

पातसमुत्पन्नःसमुच्चयार्थः ५९ अप्रपसख्यहेतुंरहस्यो
दंतंदर्शयतिसुग्रीवायेति महाबलोतिधीरोरामः आदितोजन्मनआरभ्यतत्प्रसिद्धंसर्वंवृत्तंसीतायाश्चविशेषतो
यथायथावद्वृत्तंसुग्रीवायशंसत्अकथयत् अडभावश्छांदसः यद्यपिमहाबलत्वादिनापिसहायंसर्वंनिर्वोढुक
स्तथापिलोकरीतिमनुसृत्यसुग्रीवमैत्रीमुद्दिश्यसर्वमकथयदितिबोध्यम् ६० वानरःसुग्रीवोपिरामस्यसंबंधित
त्सर्वंवृत्तांतंश्रुत्वाप्रीतःरामस्यप्रयोजनापेक्षित्वाज्जुष्टःसन्नग्निसाक्षिकंरामेणसख्यंचकारकृतवान् ६१

ततःसख्यकरणानंतरंदुःखितेनपरमसुहृद्रामसन्निधानाद्दुड्डुःखेनवानरराजेनसुग्रीवेणवैरानुकथनं
प्रतिवालिनस्तवचवैरेकिंकारणमितिरामकृतप्रश्नेप्रतिवक्तव्यंसर्वंप्रणयात्स्नेहाद्रामायावेदितंकार्त्स्न्येनो
क्तमित्यर्थः रामेणचतच्छ्रावेदनानंतरकालेवालिवधंप्रतिवालिवधमुद्दिश्यवालिनंवधिष्यामीतिप्रतिज्ञा

ततोवानरराजेनवैरानुकथनंप्रति ॥ रामायावेदितंसर्वंप्रणयाद्दुःखितेनच ॥ प्रतिज्ञातंचरामेणतदा
वालिवधंप्रति ॥ ६१ ॥ वालिनश्चबलंतत्रकथयामासवानरः ॥ सुग्रीवःशंकितश्चासीन्नित्यंवीर्येण
राघवे ॥ ६३ ॥ राघवप्रत्ययार्थंतुदुंदुभेःकायमुत्तमं ॥ दर्शयामाससुग्रीवोमहापर्वतसंनिभं ॥ ६४ ॥
॥ उत्स्मयित्वामहाबाहुःप्रेक्ष्यचास्थिमहाबलः ॥ पादांगुष्ठेनचिक्षेपसंपूर्णंदशयोजनम् ॥ ६५ ॥

तम ६२ तत्रऋष्यमूकपर्वतेवानरःसुग्रीवोवालिनोबलंपौरुषंश्रीरामस्योत्साहवर्द्धनार्थमकथयत् अपिचसुग्रीवो
राघवेराघवविषयेवीर्येणहेतुनानित्यंशंकितश्चासीत् रामस्यवालिहननसामर्थ्यमस्तिनवेतिनित्यमशंकिष्टेत्य
र्थः ६३ राघवप्रत्ययार्थंराघवबलपरिज्ञानार्थम् ६४ उत्स्मयित्वाईषत्स्मितंकृत्वादशयोजनंसंपूर्णंयथाभवतितथा
चिक्षेपप्रक्षिप्तवान् ६५ श्रीसिवजीवन

विभेदेति अत्रराम इत्यनुषज्यते पुनश्चसप्तसालान्तत्समीपस्थंगिरिंरसातलंचअधोलोकेषुषष्ठलोकंचप्रत्ययं
विश्वासंजनयन्प्रत्ययंजननार्थंएकेनमहेषुणाविभेद एकशालमात्रभेदेनअस्यवालिसाम्यशंकाजायततन्नि
वृत्त्यर्थमनुक्तानामपिअन्यशालगिरिप्रस्थादीनांभेदनमितिमन्तव्यम् ६६ ततःशालादिभेदनानंतरंतेनाति
मानुषचरित्रेणाविश्वस्तः अयमवरंपवालिहननक्षमइतिविश्वासंप्राप्तःप्रीतमनाःअचिरादेवरामेणसहइतिसं

विभेदचपुनःसालान्सप्तैकेनमहेषुणा॥ गिरिंरसातलंचैवजनयन्प्रत्ययंतदा॥६६॥ ततःप्रीतमनास्ते
नविश्वस्तःसमहाकपिः किष्किंधांरामसहितोजगामचगुहांतदा॥६७॥ ततोगर्जद्धरिवरःसुग्रीवोहेम
पिंगलः॥तेननादेनमहतानिर्जगामहरीश्वरः॥६८॥ अनुमान्यतदातारांसुग्रीवेणसमागतः॥ निजघान
चतत्रैनंशरेणैकेनराघवः॥६९॥

तुष्टचित्तोसमहाकपिःरामसहितःसन्तदातस्मिन्कालेकिष्किंधां
गुहान्तस्थवर्त्तिनींपुरींजगाम ६७ ततःकिष्किंधागमनानंतरंहरिवरोहेमपिंगलः स्वर्णवत्पिंगलवर्णःसु
ग्रीवोऽगर्जत सिंहनादंकृतवान् तेनपूर्वविलक्षणेनमहतानादेनहेतुनाहरीश्वरोवालीनिर्जगाम ६८
तदानिर्गमनकालेतारांअनुमान्यनिर्गमनंवारयंतींतारांसान्त्ववचनैरनुमतिंप्राप्यसुग्रीवेणसमागतः
संगतोऽभवत् एकेनशरेणनिजघान द्वितीयशरप्रयोगेनहाभिर्लक्ष्येनतद्वधोदुर्लभइतिभावः युद्धेऽभिमुख
स्वबलंवालिनमेवगच्छतीतिवरप्रसिद्धिः ॐ

मु

सुग्रीववचनाद्वालिनंजहिकाकुत्स्थमयाबद्धोयमंजलिरित्येवंरूपात्आहवेसुग्रीवस्ययुद्धेवालिनंहत्वातद्राज्ये
सुग्रीवप्रत्यपादयत्प्रतिष्ठापितवान्सुग्रीववचनादित्यनेनअनुपकारिवालिवधस्यायुक्तत्वेपि।मित्रापका
रित्वेनहननमितिध्वनितम् ७० अथसुग्रीवस्यप्रत्युपकारंदर्शयतिसचेति वानरर्भे त्वेनाभिषिक्तःसच
सुग्रीवोपिजनकात्मजांदिदृक्षुःद्रष्टुमिच्छुःसन्सर्वान्तत्तद्देशवासिनोवानरान्समानीयदिशश्चतस्रःप्र

ततःसुग्रीववचनाद्धत्वावालिनमाहवे॥सुग्रीवमेवतद्राज्येराघवःप्रत्यपादयत्॥७०॥सचसर्वान्समा
नीयवानरान्वानरर्षभः॥दिशःप्रस्थापयामासदिदृक्षुर्जनकात्मजां॥७१॥ततोगृध्रस्यवचनात्सं
पातेर्हनुमान्बली॥शतयोजनविस्तीर्णंपुप्लुवेलवणार्णवं॥७२॥तत्रलंकांसमासाद्यपुरीं
रावणपालितां॥ददर्शसीतांध्यायंतीमशोकवनिकांगताम्॥७३॥

स्थापयामासशीघ्रंसीतांदृष्ट्वागच्छतेत्यादिष्टवानित्यर्थः ७१ अथसंहरकालात्कथांसगमयतिततइति
ततोवानरप्रस्थापनानंतरंबलीअपरिक्षीणबलोहनूमान्संपातेर्गृध्रस्यवचनाच्छतयोजनैर्विस्तीर्णंलवणा न
र्णवंपुप्लुवेप्लुत्वाततारेत्यर्थः ७२ हनूमान्रावणपालितांलंकांसमासाद्यतत्रलंकायामशोकवनिकामतः
पुरोध्यानंगतांतत्रस्थितांध्यायंतींराममेवनैरंतर्येणस्मरंतींसीतांददर्श ७३

ततोहनुमानभिज्ञानंअंगुलीयकरूपंरामचिह्नंनिवेदयित्वासमप्रत्ययितांरामसुग्रीवसख्यादिसर्ववृत्तांतं
रामस्यसीतैकपरायणत्वादिकंचनिवेद्यवैदेहींसमाश्वास्यसचतेप्रियतमःसमागमिष्यतीतिसांत्वयित्वा
तोरणमशोकवनिकावहिर्द्वारमर्दयामास ७४ सेनाग्रगान्सैन्यपतीन्पिंगलनेत्रप्रभृतीन्पंचहत्वाजंबु
माल्यादीन्सप्तमंत्रिसुतानपिहत्वाशूरमक्षंरावणसुतंनिष्पिष्यचूर्णीकृत्यग्रहणायइन्द्रजित्प्रयुक्तब्रह्मास्त्र

निवेदयित्वाभिज्ञानंप्रवृत्तिंचनिवेद्यच॥समाश्वास्यचवैदेहीमर्दयामासतोरणं॥७४॥ ॥ ॥ ॥
पंचसेनाग्रगान्हत्वासप्तमंत्रिसुतानपि॥शूरमक्षंचनिष्पिष्यग्रहणांसमुपागमत्॥७५॥
अस्त्रेणोन्मुक्तमात्मानंज्ञात्वापैतामहाद्वरात्॥मर्षयन्राक्षसान्वीरोयंत्रिणस्तान्यदृच्छया॥७६॥

कृतबंधनंसमुपागमत्प्राप्तः ७५ वीरःसुरासुराद्यव्योमहाकपिः पैतामहाद्वरात्महदस्त्रस्यामोघत्वात्तेनबंधन
मात्रंपंचघटिकानंतरंपुनर्मोक्ष्यसेतिब्रह्मदत्तवरात्तावताकालेनब्रह्मास्त्रेणामुक्तमात्मानंज्ञात्वापियदृच्छया
कार्यांतरप्रसंगेनरावणदर्शनापेक्षयापाशयंत्रितःबध्वानेतॄन्राक्षसान्हंतुंसमर्थोपिमर्षयन्क्षमांकुर्वन्
रावणसमीपंप्राप्तवानितिशेषः ७६

ततोरावणसंभाषणानंतरंसीतांऋतेतदवस्थानप्रदेशंविनालंकांदग्ध्वारामायप्रियंसीतादर्शनरूपप्रियवार्तां
माख्यातुंपुनरारामांतिकंमहाकपिरायात्आगतः ७७ सहनुमान्अप्रमेयात्माअपरिच्छेद्यबुद्धिःमहात्मानंसीता
वियोगज्वरेप्यवार्य्यधैर्यंराममभिगम्यप्रदक्षिणांकृत्वातत्वतोयथावत्दृष्टासीतेतिन्यवेदयत् दृष्टेतिप्रथमप्र
योगोरामस्यसीतादर्शनविषयसंशयोमाभूदिति ७८ अथयुद्धकांडकथांसंगृह्णातिततइति ततःहनुम

ततोदग्ध्वापुरींलंकामृतेसीतांचमैथिलीं।।रामायप्रियमाख्यातुंपुनरायान्महाकपिः।।७७।। ।।
सोभिगम्यमहात्मानंकृत्वारामंप्रदक्षिणां।।न्यवेदयदमेयात्मादृष्टासीतेतितत्वतः।।७८।।ततःसुग्री
वसहितोगत्वातीरंमहोदधेः।।समुद्रंक्षोभयामासशरैरादित्यसन्निभैः।।७९।।दर्शयामासचात्मानंस
मुद्रःसरितांपतिः।।समुद्रवचनाच्चैवनलंसेतुमकारयत्।।८०।।

वाक्यश्रवणानंतरंसुग्रीवसहितःसन्महोदधेःशतयोजनविस्तीर्णसिंधोस्तीरंगत्वाआदित्यसन्निभैःशरैः
समुद्रंक्षोभयामासमार्गदानेऔदासिन्यात्समुद्रमापातालमाकुलीचकारेत्यर्थः ७९ सरितांनदीनांपतिःस
मुद्रआत्मानंनिजरूपंदर्शयामासरामायेतिशेषःसमुद्रवचनादेवनलंसेतुमकारयच्चनलेनसेतुंकारयामा

१८

पूँ
टि
पि

रामस्तेन सेतुना लंकां पुरीं गत्वाऽथाहवे युद्धे रावणं हत्वा सीतां प्राप्याऽप्रत्युपश्चात्मरं व्रीडा रक्षोगृहे चिरोषितां पुनर्गृ
हीतवानिति लोकापवादशंकया तिरपितां लज्जामुपागमत् ८१ तां भगवतीं जनसंसदि वानरराक्षससभा
यां परुषं वचनमुवाच सा सीता सती ऽअमृष्यमाणा पातिव्रत्यसंशयजनितमुक्तवचनमसहमाना ज्वलनं ल

तेन गत्वा पुरीं लंकां हत्वा रावणमाहवे ॥ रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥ ८१ ॥ तामुवाच ततो
रामः परुषं जनसंसदि ॥ अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥ ८२ ॥ ततोऽग्निवचनात्सीतां ज्ञा
त्वा विगतकल्मषां ॥ बभौ रामः संप्रहृष्टः पूजितः सर्वदैवतैः ॥ ८३ ॥ कर्मणानेन महता त्रैलोक्यं सचराच
रं ॥ सदेवर्षिगणं तुष्टं राघवस्य महात्मनः ॥ ८४ ॥

क्ष्मणानीतमग्निं प्रवेश ८२ ततोऽग्निप्रवेशानंतरं
अग्निवचनात्सीतां विगतकल्मषां ज्ञात्वा रामः संप्रहृष्टः सन् बभौ अहो रामस्य धर्मापेक्षितेति सर्वैर्दैवतैः
पूजितश्च बभूवेत्यन्वयः क्वचित्पुस्तके पाठव्यत्ययस्तु लेखकप्रमादात् ८३ महात्मनो राघवस्य तेन कर्मणा
रावण वधनेत्यर्थः देवर्षिगणसहितं चराचरप्रजासहितं त्रैलोक्यं तुष्टं तुतोष अथ चरग्रहणांतरधिष्ठात्
देवतापरम् ८४ श्रीराम

चोवधारणे लंकायांविभीषणमभिषिच्यैवकृत्योनतुरावणंहत्वैवेत्यर्थः विज्वरइति यन्मयाकृतोराजाराक्षसानांविभीषणाइतियोपमंतत्तापःसइदानींनिवृत्तःप्रकर्षेणामोदंप्राप्तइत्यर्थः ८५ देवताभ्यःरामविजयश्लाघनयमानताभ्यःवरंप्राप्यतेनवरेणवानरान्समरेमृतान्समुत्थाप्यसुहृद्भिः ~~प्रकर्षेणमोदंप्राप्तइत्यर्थः देवताभ्यःवरम~~ सुग्रीवविभीषणादिभिर्वृतःपुष्पकेणायोध्यांप्रस्थितइत्यर्थः ८६ सत्यपराक्रमःसत्यविषयेपराक्रमवान् रामइतिक्रियाभेदादुक्तिः भरद्वाजाश्रमंगत्वाभरतस्यांतिकेसमीपे हनूमंतंव्यसर्जयत्

अभिषिच्यचलंकायांराक्षसेंद्रंविभीषणं॥कृतकृत्यस्तदारामोविज्वरःप्रमुमोदह॥८५॥देवताभ्योवरंप्राप्यसमुत्थाप्यचवानरान्॥अयोध्यांप्रस्थितोरामःपुष्पकेणसुहृद्वृतः॥८६॥भरद्वाजाश्रमंगत्वारामःसत्यपराक्रमः॥भरतस्यांतिकेरामोहनूमंतंव्यसर्जयत्॥८७॥पुनराख्यायिकांजल्पन्सुग्रीवसहितस्तदा॥पुष्पकंतत्समारुह्यनंदिग्रामंययौतदा॥८८॥॥॥

भरतप्रतिज्ञामनुसंधायभरद्वाजवचनेनएकदिनविलंबस्यप्राप्तत्वात्स्वागमनबोधनायहनुमद्विसर्जनम् ८७ रामस्तत्पुष्पकंसमारुह्यसुग्रीवसहितःभरतदागमनकालेप्राख्यायिकांपूर्वकथांपुनःपुनःजल्पन्कथयन्नंदिग्रामंभरतस्थानंतदातस्मिन्नेवकालेययौप्राप्य ८८ श्रीरामायनमः

ऽनघःसम्यगनुष्ठितपितृवचनोरामोभ्रातृभिःसहितोनंदिग्रामेजटांहित्वाशोधयित्वाउपलक्षणमेतत्स्ना
नवस्त्रोपलेपनभूषणानांसीतामनुप्राप्यमुनिवेषत्यागेनसीतानुरूपंरूपंप्राप्येत्यर्थः राज्यंपुनरवाप्तवानप्राप्त
विसृष्टराज्यंपुनरवाप्तवानित्यर्थः ८९ एतद्वृत्तंचरितंवक्तृत्वेनोपदिश्यदेवर्षिरतःपरमुत्तरकांडविषयंभवि
ष्यत्वेनोपदिशतिप्रहृष्टेत्यादिना लोकःसर्वजनःप्रहृष्टःसंजातरोमांचः मुदितःमुदितोंतःकरणतुष्टःसम

नंदिग्रामेजटांहित्वाभ्रातृभिःसहितोनघः ॥ रामःसीतामनुप्राप्यराज्यंपुनरवाप्तवान् ॥ ८९ ॥ प्रहृष्ट
मुदितोलोकस्तुष्टःपुष्टःसुधार्मिकः निरामयोह्यरोगश्च दुर्भिक्षभयवर्जितः ॥ ९० ॥ नपुत्रमरणं
केचिद्द्रक्ष्यंतिपुरुषाःक्वचित् ॥ नार्यश्चाविधवानित्यंभविष्यंतिपतिव्रताः ॥ ९१ ॥

स्तकामलाभजनितप्रीतियुक्तःपुष्टःश्रीरामसंश्लेषणापरिपुष्टसर्वांगःसुधार्मिकःसुधर्मोरामभक्तिपूर्वकं
कर्मतच्चरतीतिसः निरामयःमनःपीडारहितः अरोगःव्याधिरहितः दुर्भिक्षेति भिक्षासमृद्धेरभावोदु
र्भिक्षंतद्भयेनावर्जितःभविष्यतीतिशेषः ९० केचित्पुरुषाःक्वचित्कुत्रापिदेशेपुत्रमरणंनद्रक्ष्यंति
नार्यश्चाविधवानित्यंपतिव्रताश्चभविष्यंति ९१

तत्र राज्ये तापत्रयजं दोषोपि न भविष्यतीत्याह नचेत्यर्द्धत्रयेण । अग्निजं भयं किंचिन्न भविष्यति जंतवो नाप्सु मज्जंति वातजं भयमपि किंचिन्न ष्यमाधिदैविकनिवृत्तिरुक्ता । अथाध्यात्मिकनिवृत्तिमाह नापि ज्वरकृतं तत येति ९२ अधिभौतिकदुःखाभावमाह नचापीति क्षुद्भयं क्षुदुपशमोपायाभावजं भयं नच नैव भविष्यतीत्यनुषंगः एवं रामराज्ये निष्टनिवृत्तिमुक्त्वेष्टसिद्धिमाह नगरेति नगराणि धनयुतानि राष्ट्राणि धान्ययुतानि च भविष्यंति ९३ नित्यमिति सर्वे नागरिकाः जानपदाश्च यथा कृतयुगे तथा त्रेतायामपि नित्यं प्रमुदिताः भविष्यं-

नचाग्निजं भयं किंचिन्नाप्सु मज्जंति जंतवः ॥ नवातजं भयं किंचिन्नापि ज्वरकृतं तथा ॥ ९२ ॥ नचापि क्षुद्भयं किंचिन्न तस्करभयं तथा ॥ नगराणि च राष्ट्राणि धनधान्ययुतानि च ॥ ९३ ॥ नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा ॥ अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ॥ ९४ ॥ गवां कोट्ययुतं दत्वा विद्भ्यो विधिपूर्वकम् ॥ असंख्येयं धनं दत्वा ब्राह्मणेभ्यो महायशाः ॥ ९५ ॥

ति कृतयुगे स्वाभाविकाद्धर्मोसंभवं धानान्नित्यप्रजामोदः त्रेतायामधर्मस्य पादांशेन संबंधेपि रामपालनवैभवेन तदनाक्रमणान्निप्रमोदस्त्वम् अथ रामस्य भाविवृत्तांतरमाह अश्वेति अश्वमेधशतैरनेकाश्वमेधैस्तथा तथा बहुसुवर्णकैः यागविशेषैरिष्ट्वा देवताः पूजयित्वा गवां कोट्ययुतं दशसहस्रोत्तरकोटिपरिमिताः विद्वद्भ्यो ब्राह्मणेभ्यो विधिपूर्वकं दत्वा असंख्येयं धनं ब्राह्मणेभ्यो दत्वा महायशाः रामो ब्रह्मलोकं प्रयास्यती

गुरुटीकाख्वः ९४ ९५

राजवंशानिति कामरूकान्यकुब्जादित्ति राज्यपदस्थान्राजवंशान्शतगुणान्अनेकगुणान्वृद्धिर्यथाभवतित
थास्थापयिष्यति शाश्वततत्तद्राज्यप्रदानेनेतिशेषः चातुर्वर्ण्यंचतुर्वर्णान्स्वेस्वेधर्मेस्ववर्णाश्रमोचि
तधर्मे नियोक्ष्यति प्रवर्तयिष्यति ९६ दशवर्षेति एकदशसहस्राणिउपासित्वापरिपाल्यब्रह्मलोकंब्र
ह्मणःस्वस्यलोकंवैकुंठाख्यंप्रयास्यति भगवदवताराणांपुराणादिशिवंधस्यसर्वतंत्रविरुद्धत्वादस्वमे

राजवंशाञ्छतगुणान्स्थापयिष्यतिराघवः॥चातुर्वर्ण्यंचलोकेस्मिन्स्वेस्वेधर्मेनियोक्ष्यति॥९६॥द
शवर्षसहस्राणिदशवर्षशतानिच॥रामोराज्यमुपासित्वाब्रह्मलोकंप्रयास्यति॥९७॥इदंपवित्रंपापघ्नं
पुण्यंवेदैश्चसंमितं॥यःपठेद्रामचरितंसर्वपापैःप्रमुच्यते॥९८॥

धाद्यनुष्ठानंलीलामात्रंलोकोपदेशायेतिबोध्यम् ॐ अथनारदःस्वोपदिष्टसंक्षिप्तरामायणपाठ
फलमुपदिशतिइदमिति पूयतेअनेनेतिपवित्रंपरिशुद्धिसाधनमित्यर्थः नकेवलंशुद्ध्यापादकंपाप
घ्नं पुण्यंपुण्यसाधनंअनेनप्रायश्चित्तव्यावृत्तिरुक्ता तद्धिपापमेवनिवर्तयते उक्तार्थत्रयहेतुमाहवेदै
श्चसम्मितमिति सर्ववेदसदृशमित्यर्थः इदंसंक्षेपरूपंरामचरितंवेदवत्सनियमंप्रतिदिनंयःपठेत्सस
र्वपापैःप्रमुच्यतेइत्यर्थः

एवं रामचरितपाठस्य सर्वपापनिवृत्तिफलमुक्त्वा परपदप्राप्तिमाह एतदिति आयुःप्रयोजनमस्यायुष्यं
आख्यानमाख्यायिकारूपमेतद्रामायणं बालरामायणं रामस्यायनं प्रतिपाद्यो यस्य तद्रामायणं
अत्र समासान्तर्गतपदभेदेन अखंडपदत्वाभावात् रषाभ्यां नो णः समानपदे इत्यादिना णत्वाभा
वेपि पूर्वपदात्संज्ञायामगः इत्यनेन संज्ञात्वात् णत्वम् पठन्नरः सपुत्रपौत्रः सगणः गणो दासीदासादि
भिः सह इहदैहिकान्भोगान्भुक्त्वा प्रेत्य मृत्वा स्वर्गे परमपदे महीयते मोदते इत्यर्थः पठन्निति हेतौ शता ९९

एतदाख्यानमायुष्यं पठन्रामायणं नरः ॥ सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥९९॥ पठन्द्विजो वा
गृषभत्वमीयात्स्यात्क्षत्रियो भूमिपतित्वमीयात् ॥ वणिग्जनः पण्यफलत्वमीयाज्जनश्च शूद्रोपि मह
त्त्वमीयात् ॥१००॥ इत्यार्षे रामायणे आदिकाव्ये वाल्मीकीये बालकांडे नारदवाक्यसंक्षेपो नाम प्रथमः सर्गः ॥२॥

वर्णानां प्रतिनियतफलमाह पठन्निति स्यादित्यव्ययं यद्यर्थे इदं बालरामायणं पठन् द्विजो यदि स्यात्तदा वागृषभत्वं
वाचि श्रेष्ठत्वं वेदवेदांगपारगत्वं ईयात् प्राप्नुयात् पठन्क्षत्रियो यदि स्यात्तदा भूमिपतित्वं ईयात् पठन्वणि
ग्जनो यदि स्यात्तदा पण्यफलत्वं पण्यं मूल्यमर्हतीति पण्यं क्रयार्हं वस्तु तदेव फलं लाभो यस्य स पण्यफलः त
स्य भावः पण्यफलत्वं ईयात् पठन् शूद्रोपि जनो यदि स्यात्तदा महत्त्वं स्वजातिश्रेष्ठत्वं ईयात् यद्वा चेदेवं ह
तो शूद्रस्यानधिकाराच्छूद्र इत्यत्र पठन्निति नानुषज्यते किंतु श्रुत्वेत्यध्याह्रियते श्रावयन्रामायणं भक्त्ये
ति शूद्रस्यापि महाफलत्वं श्रवणात् अस्य
गायत्र्यर्थप्रतिपादकत्वध्वननाय गायत्र्या आदि
माक्षरेणोपक्रम्य यादिति गायत्र्यन्तिमाक्ष
रेण समापितवान् १०० इत्यार्षे रामायणे बाल
काण्डे विषमपदवृत्तौ प्रथमः सर्गः १ श्रीराम

॥२०॥ त्र्यपरमकारुणिकोवाल्मीकिःसंक्षेपेणोक्तंरामचरितंविस्तरेणप्रतिपादयिषुस्तत्रप्रेक्षावत्प्रवृत्त्यर्थंवक्तृवैलक्ष
ण्यंप्रबंधवैलक्षण्यंप्रतिपाद्यवैलक्ष्यंचेतिवैलण्यत्रयंनिदिदर्शयिषुर्वक्तृवैलक्षण्यमादौदर्शयतिद्वितीयसर्गेण
तेतुपरमार्षत्वंआर्षत्वंचयाथार्थदर्शित्वमिति।याथार्थवादित्वंतस्यपरमार्षत्वंतुपितामहवरप्रसादलब्धतम् तदेतदु
पदर्शयितुमुपोद्घातत्वेनाहनारदस्येत्यादि तुशब्दोवैलक्षण्यंवदन्पूर्वोत्तराभ्यामन्वेतित्रैलोक्यत्ततपेतरविल

नारदस्यतुतद्वाक्यंश्रुत्वावाक्यविशारदः॥पूजयामासधर्मात्मासहशिष्योमहामुनिं॥१॥यथावत्पूजि
तस्तेनदेवर्षिर्नारदस्तदा॥आपृच्छ्यैवाभ्यनुज्ञातःसजगामविहायसं॥२॥समुहूर्तंगतेतस्मिन्देवलोकं
मुनिस्तदा॥जगामतमसातीरंजाह्नव्यास्त्वविदूरतः॥३॥

क्षणस्यनारदस्यशक्तोर्थतश्श्रोत्रवाक्यविलक्षणंतद्वाक्यंस्वप्रश्नानुरूपोत्तरंश्रुत्वावाक्येविशारदोविद्वान्वा
ल्मीकिःसहशिष्यःमहामुनिंशतकोटिविस्त[illegible]रामायणमननशीलंनारदंपूजयामासप्रदक्षिणनमस्कार
दिभिरर्चयतिस्म १ देवर्षिर्नारदस्तेनवाल्मीकिनायथावत्यथार्हंपूजितःसन्तत्पूजायस्यानेगत्वापृच्छ्यैवसाधुया
मीत्युक्तेवचाभ्यनुज्ञातःयथासुखंविहरतामितिवाल्मीकिनानुगमनपूर्वकंकृताभ्यनुज्ञातोविहायसमाकाशंज
गाम २ सवाल्मीकिस्तस्मिन्नारदेदेवलोकंगतेसतिमुहूर्तंस्वाश्रमेस्थित्वापश्चान्माध्याह्निककार्येजाह्नव्याःप्र
विदूरतःसमीपेवर्तमानंतमसातीरंजगाम ३ ॥२०॥

समुनिस्तमनिस्तमसमायाविलक्षणातीरमासाद्यतत्स्नानकालेअकर्दममपंकंतीर्थंजलावतरणात्दृष्ट्वापार्श्वेस्थि
तंशिष्यमाह ४ हेभरद्वाज इदंतीर्थमकर्दमंप्रसन्नांबुप्रसन्नसलिलमतएवरमणीयंनिशामयपश्यसन्मनु
ष्यचित्तस्यकामादिदोषरहितत्वेनप्रसन्नत्वात्तीर्थसादृश्यंअकर्दममपंकंअन्यत्रपापरहितम् ५ इदमेव अत्रा

सतुतीरंसमासाद्यतमसायामुनिस्तदा शिष्यमाहस्थितंपार्श्वेदृष्ट्वातीर्थमकर्दमं ॥४॥ अकर्दममिदंती
र्थंभरद्वाजनिशामय॥ रमणीयंप्रसन्नांबुसन्मनुष्यमनोयथा॥५॥ न्यस्यतांकलशस्तातदीयतांवल्क
लंमम॥ इदमेवावगाहिष्येतमसातीर्थमुत्तमं॥६॥ एवमुक्तोभरद्वाजोवाल्मीकेनमहात्मना॥ प्रायच्छत
मुनेस्तस्यवल्कलंनियतोगुरोः॥७॥ सशिष्यहस्तादादायवल्कलंनियतेंद्रियः॥ विचचारहपश्यंस्तत्सर्व
तोविपुलंवनं॥८॥ तस्याभ्याशेतुमिथुनंचरंतमनपायिनं॥ ददर्शभगवांस्तत्रक्रौंचयोश्चारुनिस्वनं॥९॥

सन्नमपिगंगातीर्थंमध्यान्हकालातिक्रमास्नात्वेतिशेषः ६ वाल्मीकेनेतितस्येदमित्यण् प्रायच्छतप्रादात्
आत्मनेपदमार्षं नियतःसेवापरः ७ विचचारअनुष्ठानयोग्यदेशनिरीक्षणायेतिशेषः ८ तस्यवनस्यअ
भ्यासेसमीपेअनपायिनंआधिव्याधिरहितंक्रौंचयोर्मिथुनंददर्श ९

॥३१॥

तस्मान्मिथुनादेकमेकं पुमांसं पापनिश्चयः तद्वननरूपपापनिश्चयः अतएव वैरनिलयो निषादः तस्य पश्यतः
पश्यन्तं तं मुनिमनादृत्य जघान १० भार्या क्रौंची करुणां गिरं रुराव दीनशब्दमकरोत् ११ सहचारिणाग्रहौत्रमितिशे ग
षः ताम्रशीर्षेण कुक्कुटादिवत्ताम्रवर्णशीर्षगतचूडायुक्तेन मत्तेन कामभोगरसादिति शेषः अतएव पत्रि
णा संभोगकालत्वादिततपक्षवता सहितेन संगतेन १२ तथाविधं कामभोगावेशं निषादेन निपातितं हि

तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः ॥ जघान वैरनिलयो निषादस्तस्य पश्यतः ॥१०॥ तं शोणितपरीतांगं
चेष्टमानं महीतले ॥ भार्या तु निहतं दृष्ट्वा रुराव करुणां गिरं ॥११॥ वियुक्ता पतिना तेन द्विजेन सहचारिणा
ताम्रशीर्षेण मत्तेन पत्रिणा सहितेन वै ॥१२॥ तथाविधं द्विजं दृष्ट्वा निषादेन निपातितं ॥ ऋषेर्धर्मात्म
नस्तस्य कारुण्यं समपद्यत ॥१३॥ ततः करुणवेदित्वादधर्मोयमिति द्विजः ॥ निशम्य रुदतीं क्रौंची
मिदं वचनमब्रवीत् ॥१४॥

मितं द्विजं दृष्ट्वा स्थितस्य धर्मात्मनो दयार्द्रसिरणाहिंसादिधर्मप्रवणचित्तस्य
ऋषेः वाल्मीकेः कारुण्यं करुणा समपद्यत समजायत १३ ततः क्रौंचीविषयकारुण्योदयानंतरं द्विजः सह
जकारुण्यस्वभावो मुनिः रुदतीं क्रौंचीं निशम्य दृष्ट्वा करुणावेदित्वात्संजातकरुणात्वात् एवं काममोहितं प
क्षिवधरूपोऽधर्म इति मत्वा इदं वक्ष्यमाणं वचनमब्रवीत् १४

॥३१॥

तदेववचनमाहमानिषादेति हेनिषादत्वंशश्वदेवशाश्वतीरनारतमित्यर्थः समाःसंवत्सरान्प्रतिष्ठांक
चित्स्थानंमागमःमाप्राप्नुहि एवंपूर्वार्द्धेनशापमुक्त्वातत्रहेतुरुत्तरार्द्धेनोच्यते यत्यस्मात्कारणात्क्रौंचमि
थुनात्क्रौंचमिथुनमध्यादेकंकाममोहितंअवधीःहिंसितवानसितस्मादेवप्रतिष्ठांमागमः अडाग
मश्छांदसइत्युक्तानार्थः वस्तुतस्तुचतुर्मुखप्रसादेनवाल्मीकिमुखात्प्रथमोद्भिन्नोयंश्लोकेनकेवलंशा
पपरोभवितुमर्हतीतिभगवन्मंगलशासनपरतयामंगलाचरणपरोयंप्राथमिकःश्लोकइतिपूर्वाचार्या
वर्णयंति तथाहि निषीदंत्यस्मिन्नितिनिषादोनिवासःमालक्ष्मीःतस्यानिषादोमानिषादःश्रीनिवासःत

॥ मानिषादप्रतिष्ठांत्वमगमःशाश्वतीःसमाः॥ यत्क्रौंचमिथुनादेकमवधीःकाममोहितम्॥१५॥ ॥ ॥

त्रसंबुद्धिःहेश्रीनिवासजानकीपतेत्वंशाश्वतीःसमाःसर्वकालंप्रतिष्ठांमाहात्म्यंअगमःगाछछांदसत्वात्
लोडर्थेत्वंयस्मात्क्रौंचमिथुनात्राक्षसमिथुनाद्रावणमंदोदरीरूपात्कामेनमन्मथेनमोहितंसीतापहर्तारमे
कंरावणमवधीःरावणंहत्वाकृतत्रैलोक्यत्राणस्त्वंयावत्कालंविजयीभवेत्यर्थः एवमनेनश्लोकेनेष्टदे
वतास्मरणरूपंमंगलमाचरितंकाव्यार्थसूचनंकेचिन्नांघामेवनिरूप्यतइतिवचनादस्मिन्नेवश्लोके
वक्ष्यमाणकाव्यार्थसंक्षेपःदर्शितःतथाहि मानिषादेत्यनेनसीतापरिणयपर्यवसायिनीबालकांडकथो
द्बोधिता प्रतिष्ठांत्वमगमइत्यनेनपितृवचनपरिपालनप्रतिष्ठाभिधायिन्ययोध्याकांडकथावेदिता

शाश्वतीःसमाःइत्यनेनअरण्यवनविषयप्रतिज्ञानिर्वाहनेनरामस्यप्रतिष्ठानुयत्तिमभिदधत्यारण्यकाण्ड
कथासूचिता क्रुंचकौटिल्यीभावयोरित्यस्मात्क्विन्नंतात्स्वार्थेऽणाकुंडेवक्रौंचः तयाचक्रौंचयोःकुटिलयोस्तार
वालिनोर्मिथुनादेकंकाममोहितंसुग्रीवभार्यापहर्त्तारंवालिनमवधीरितिकिष्किंधाकांडकथाभिहिता
क्रौंचौऽल्पीभूतौकृशावितियावत्तयोरन्योन्यविरहक्लेशकृशीयसोःसीतारामयोरेकमवयवंसीताहरणमव
धीः भृशंपीडितवानसीतिसीताविरहदुःखातिशयवर्णनपरासुंदरकांडकथाबोधिता क्रौंचौकुटिलौरा
क्षसौतन्मिथुनादेकंकाममोहितंरावणमवधीरितियुद्धकांडकथासूचिता दंडकारण्यवासिऋषिपत्नी

तस्यैवंब्रुवतश्चिंताबभूवहृदिवीक्षतः ॥ शोकार्त्तेनास्यशकुनेःकिमिदंव्याहृतंमया ॥१६॥ ॥ ॥ ॥

दर्शनाभिलाषमोहितसीतापीडाभिधानेनोत्तरकांडासंक्षिप्तइति १५ वीक्षतःमिथुनेयीक्षमाणस्य
मानिषादेत्येवंब्रुवतस्तस्यवाल्मीकिर्हृदिअस्यशकुनेर्हेतोःशोकार्त्तेनशोकपीडितेनमयाव्याहृतमि
दंवाक्यंकिंकिंरूपंगद्यंपद्यंवेतिचिंताबभूवेतिसंबंधः यद्यप्येतत्सर्ववाल्मीकिकृतमेवतथापिकुश
लवगेयतयाऽस्यकाव्यस्यकारणात्तदुक्तितयैवमुक्तिः अन्यथास्यचिंतायाःस्वापरोक्षत्वाद्बभूवेति
लिंडसंगतिःस्यात् १६

महाप्राज्ञोमतिमान्सवाल्मीकिःमतिमुत्तरश्लोकेवक्ष्यमाणांनिश्चयंचकार समुनिपुंगवःशिष्यमिदंवाक्य
मब्रवीत् अयंयोगाव्यवच्छेदएवकारः १७ क्रौंचीशोकेनार्त्तस्यमेमत्तःप्रवृत्तोयंसंदर्भःपादबद्धः अक्षरानुपू
र्व्यादैर्बद्धः अक्षरसमःछन्दःशास्त्रोक्तगुरुलघु स्वरवैषम्यरहितः तथातंत्रीवीणा लयपत्तालमृदंग

चिंतयन्समहाप्राज्ञश्चकारमतिमान्मतिं ॥ शिष्यंचैवाब्रवीद्वाक्यमिदंसमुनिपुंगवः ॥१७॥ पादबद्धो
ऽक्षरसमस्तंत्रीलयसमन्वितः ॥ शोकार्त्तस्यप्रवृत्तोमेश्लोकोभवतुनान्यथा ॥१८॥ शिष्यस्तुतस्य
ब्रुवतोमुनेर्वा' क्यमनुत्तमं ॥ प्रतिजग्राहसंहृष्टस्तस्यतुष्टोभवद्गुरुः ॥१९॥ सोभिषेकंततःकृ
त्वातीर्थेतस्मिन्यथाविधि ॥ तमेवचिंतयन्नर्थमुपावर्त्ततवैमुनिः ॥२०॥ ॥ ॥

वैर्गुहस्तानामेककालविरामः ताभ्यांसमन्वितःयुक्तः तेञ्चमारोह्यवाद्येसहगानंयोग्यइत्यर्थः श्लोको
भतु श्लोकत्वेनप्रथतां नान्यथाकेवलपदसंदर्भोमाभूदित्यर्थः १८ शिष्योभरद्वाजस्तस्यमुनेर्ब्रुवतः
तस्मिन्मुनौब्रुवतिसतिअनुत्तमंसर्वरामायणार्थसंग्रहरूपत्वेनसर्वोत्तमंवाक्यंमानिषादेत्यादिकंसंप्रहृ
ष्टःसन्प्रतिजग्राहवाग्विधेयंचकारेत्यर्थः गुरुर्वाल्मीकिस्तस्यतुष्टोभवत्स्वश्लोकधारणात्तस्मिन्प्रीतोभव
दित्यर्थः १९ ततःशिष्यविषयसंतोषानंतरंसमुनिस्तस्मिन्तीर्थेयथाविधिअभिषेकंमध्याह्निकस्नानंकृ

त्वातमेवार्थंश्लोकोत्पत्तिरूपमेवार्थंचिंतय

न्नुपावर्त्तत आश्रमामागच्छत् २० २०

ततोमुनेस्तपावर्त्तनानंतरंविनीतोविनयसंपन्नःश्रुतवान्शास्त्रवान्मुनिर्मननवान्भरद्वाजोजलपूर्णंक
लशमादायपृष्ठतःपश्चादनुजगाम। २१ सवाल्मीकिःशिष्येणसहाश्रमपदमाश्रमस्थानंप्रविश्य
धर्मवित्कृतदेवपूजादिधर्मःउपविष्टःकृतसुखासनःसन्ध्यानंश्रवशोत्पन्नश्लोकविषयचिंता
मास्थितःप्राप्तएवसन्नन्याःकथाःपुराणपरायणानिचकार २२. ततस्तदनंतरंलोक॥कर्त्ताप्रभुः

भरद्वाजस्ततःशिष्योविनीतःश्रुतवान्मुनिः॥ कलशंपूर्णमादायपृष्ठतोनुजगामह॥२१॥सप्रविश्या
श्रमपदंशिष्येणासहधर्मवित्॥ उपविष्टःकथाश्चान्याश्चकारध्यानमास्थितः॥२२॥ आजगा
मततोब्रह्मालोककर्त्तास्वयंप्रभुः॥ चतुर्मुखोमहातेजाद्रष्टुंतंमुनिपुंगवं॥२३॥वाल्मीकिरथतंद
ृष्ट्वासहसोत्थायवाग्यतः॥प्रांजलिःप्रयतोभूत्वातस्थौपरमविस्मितः॥२४॥

स्वामीचतुर्मुखोवेदचतुष्टयोच्चारणोपयोगिमुखचतुष्कःमहातेजामहाप्रभावोब्रह्मामुनिपुंगवंवाल्मी
किंद्रष्टुंकुतूहलात्स्वयमाजगाम स्वस्थानस्थितएवतमाचरणप्रवर्त्तनसमर्थोप्याद्दरतिसयात्स्वयमेवाजगा
मेत्यर्थः २३ अथब्रह्मागमनानंतरंब्रह्माणंदृष्ट्वासहसाउत्थाय उर्द्धंप्राणाउत्क्रमंतिपूनःस्थविरआगा
ते प्रत्युत्थानाभिवादाभ्यांपुनस्तान्प्रतिपद्यतइतिवचनात्स्वप्राणाउत्क्रमेयुरितिसहसोत्थायेत्यर्थः परम

विस्मितःसन्वाग्यतोयतवाक्प्रयतोनियत

मनस्कःप्रांजलिर्भूत्वातस्थौउत्थितवान् २४

ज

नित्य

मुनिस्तमेनं देवं विधिवत्प्रणम्यानामयं अनामयोपलक्षितमव्ययं सिद्धं कुशलं पृष्ट्वा पाद्यार्घ्यासनवंदनैः पा
द्यं पादोदकं प्रसन्नं अर्घ्यो अर्घ्यजलं समर्पणं आसनं विष्टरं वंदनं स्तुतिः एतैरुपचारैः पूजयामास २५ अथ पूजा
नंतरं भगवान्ब्रह्मा परमार्चिते परमं यथा भवति तथा वाल्मीकिनार्चिते प्रसोपवेशनार्थं पूजिते आसने उप

पूजयामास तं देवं पाद्यार्घ्यासनवंदनैः ॥ प्रणम्य विधिवच्चैनं पृष्ट्वाऽनामयमव्ययं ॥ २५ ॥ अथोपवि
श्य भगवानासने परमार्चिते ॥ वाल्मीकये महर्षये संदिदेशासनं ततः ॥ २६ ॥ ब्रह्मणा समनुज्ञातः
सोप्युपाविशदासने ॥ २६ ॥ उपविष्टे तदा तस्मिन्साक्षाल्लोकपितामहे ॥ तद्गतेनैव मनसा वाल्मीकि
र्ध्यानमास्थितः ॥ २७ ॥ पापात्मना कृतं कष्टं वैरग्रहणबुद्धिना ॥ यस्तादृशं चारुरवं क्रौंचं हन्यादकारणा
त् ॥ २८ ॥ शोचन्नेव मुहुः क्रौंचीमुपश्लोकमिमं पुनः ॥ जगावंतर्गतमना भूत्वा शोकपरायणः ॥ २९ ॥

विश्य स्थित्वा महर्षये वाल्मीकये आसनं संदिदेश आज्ञापयामास २६ सोपि ब्रह्मणा समनुज्ञातः सन् आ
सने उचितनीचासने उपविशत् २६ लोकपितामहे तस्मिन्साक्षात्प्रत्यक्षतया उपविष्टे सति तद्गतेन
क्रौंचहननगतेन मनसा ध्यानमास्थितः तद्विषयचिंतामकरोत् २७ वैरग्रहणबुद्धिना वैरं गृह्णातीति सा चा
सौ बुद्धिश्च तद्वता व्याधेनेति शेषः कष्टं कुत्सितं कर्म कृतं यो व्याधस्तादृशं रतिलालसं चारुरवं क्रौंचं अकार

णात् निष्कारणं हन्यात् हतवानित्यर्थः छांदसं २८
शोकपरायणः क्रौंचवधदर्शनेन दुःखपरवशः

पुनः क्रौंचीं मुहुः शोचन्नेव इमं मा निषादेत्यादि
श्लोकं अंतरमनासिऽपजगौ गायति स्मेत्यर्थः २९

॥२६॥ ततोमनसिगानानंतरंमुनिपुंगवंप्रहसन्नन्यियोगेनत्वजिह्मायेऽवतीर्णांसरस्वतीमयंनजनातीतिप्रहसन्नुवाच
त्वयाबद्धोमानिषादेत्यादिश्लोकएव अत्रश्लोकविषयेविचारणाचिंतानकार्या ३० अप्रकारणकपौत्पत्तिकृतविस्मयं
वारयतिमच्छंदादेवेति हेब्रह्मन्तेऽयंसरस्वतीमच्छंदादेवमदभिप्रायादेवनतुकारणांतरात्प्रवृत्ता प्रवर्तनप्रयोजन
माहरामस्येतिहेऋषिसत्तमकृत्स्नंसर्वंरामस्यचरितंरामचरितविषयंप्रबंधंकुरुइदशेःश्लोकेरितिशेषः ३१ धर्मा
त्मनोधार्मिकस्यधीमतः पंडितस्यधीरस्यवसुंधराधीशस्यलोकेलोकमध्येगुणवतः वहुगुणस्यरामस्यवृत्तंचरि

तमुवाचततोब्रह्माप्रहसन्मुनिपुंगवं ॥ श्लोकएवत्वयाबद्धोनात्रकार्याविचारणा ॥ ३० ॥ मच्छंदादेवते
ब्रह्मन्प्रवृत्तेयंसरस्वती ॥ रामस्यचरितंकृत्स्नंकुरुत्वमृषिसत्तम ॥ ३१ ॥ धर्मात्मनोगुणवतोलोकेरामस्य
धीमतः ॥ वृत्तंकथयवीरस्ययथातेनारदाच्छ्रुतं ॥ ३२ ॥ रहस्यंचप्रकाशंचयद्वृत्तंतस्यधीमतः ॥ रामस्य
सहसौमित्रेराक्षसानांचसर्वशः ॥ ३३ ॥

त्रंयथायेनप्रकारेणनारदात्त्वयाश्रुतंतेनप्रकारेणविस्तरेणाक
३२ थयेत्यर्थःऽप्रयतद्विषयज्ञानलाभमनुगृह्णातिरहस्यमित्यादिश्लोकद्वयेनसहसौमित्रेःसौमित्रिसहितस्यधीमतस्त
स्यरामस्यरहस्यमन्यैरविदितंचप्रकाशमितरैर्विदितंचयद्वृत्तंराक्षसानांरावणादीनांचसर्वशःसर्वप्रकारंयद्वृत्तंत
सीतायाश्चअपिशब्दात्भरतादीनांचप्रकाशंरहोवायद्वृत्तंयच्चसर्वमविदितमपि नारदमुखोनाज्ञातमपिविदितंभ
विष्यति ३३ ३४ ॥२६॥

स्यंचयथायार्थेरशिवमनुगच्छयथार्थ्यवादित्यमनुगच्छन्तातिनतइति अत्रकरिष्यमाणकाव्येतेवा क्वचिदपिअनृतावाधिता
पीनभविष्यतिअतोरामकथांरामविषयप्रबंधकल्याणंकुरु काव्यनिर्माणप्रयोजनमाहपुण्यंपापहरं प्रयोजनांतर
माहमनोरमांशब्दश्रवणानंतरमेवपरमानंदंजनयंतीमित्यर्थः ३५ यशोपिकाव्यनिर्माणप्रयोजनमित्याहयावदिति
३६ यशसःफलमाहतावदिति ऊर्ध्वंअधश्चयेमयासृष्टालोकास्तेषुनिवत्स्यसिततःपरंमुक्तिंप्राप्स्यसीत्याशयः ३७

॥ वैदेह्याश्चैवयद्वृत्तंप्रकाशंयदिवारहः॥यच्चाप्यविदितंसर्वंविदितंतेभविष्यति॥३४॥नतेवागनृ
ताकाव्येकाचिदत्रभविष्यति॥कुरुरामकथांपुण्यांश्लोकबद्धांमनोरमां॥३५॥यावत्स्थास्यंतिगिरयः
सरितश्चमहीतले॥तावद्रामायणकथात्वत्कृताप्रचरिष्यति॥३६॥तावदूर्ध्वमधश्चत्वंमल्लोकेषुनिव
त्स्यसि॥३७॥इत्युक्त्वाभगवान्ब्रह्मातत्रैवांतरधीयत॥ततःसशिष्योभगवान्मुनिर्विस्मयमाययौ॥३८॥
तस्यशिष्यास्ततःसर्वेजगुःश्लोकमिमंपुनः॥मुहुर्मुहुःप्रीयमाणाःप्राहुश्चभृशविस्मिताः॥३९॥समा
क्षरैश्चतुर्भिर्यःपादैर्गीतोमहर्षिणा॥सोनुव्याहरणाद्भूयःशोकःश्लोकत्वमागतः॥४०॥ ॥ ॥

तत्रैवअप्रासनस्यविस्मयंप्राप्तवान् ३८ ततोमुनिविस्मयप्राप्त्यनंतरंसर्वेतस्यवाल्मीकेःशिष्यामुहुर्मुहुःप्रीयमाणाःसंतः
इमंमानिषादेतिश्लोकंपुनर्जगुःभृशविस्मिताः आश्चर्यमिदमस्मद्गुरोःपद्यंयद्दृष्टलोकाप्यनुभावितमित्यत्यंतंविस्मिताः
प्राहुश्चवक्ष्यमाणमितिशेषः अव्ययमात्रस्यसमासेतुलोपइतिमलोपः ३९ यःश्लोकःमहर्षिणासमाक्षरैश्चतुर्भिः
पादैर्गीतःक्रौंचविषयःसअनुश्रुतिसंपादितशोकोत्पत्त्यनंतरंव्याहरणाद्भूयोयःशोकःसएवश्लोकत्वंप्राप्तइतिवयं
मन्यामहेइत्यर्थः ४०

अथमुनेःश्रावणविषयसंकल्पमाहतस्येति भावितात्मन्निति परमात्मनःकृतमंगलाचरणस्यवाल्मीकेरियंबुद्धि
॥२५॥ र्जाता ईदृशार्थमाहकाव्यमिति सर्वेरामायणाख्यंकाव्यमीदृशैर्मानिषादेतिश्लोकप्रकारैःश्लोकैःकरवाणीतिप्रा
यिकाभिप्रायमेतद्वृत्तांतराणामपितत्रप्रयोगात ४१ अथयथासंकल्पंकाव्यरचनामाहउदारेति कीर्त्तिरस्यास्तीति
कीर्त्तिमान्उदारामहतीधीरस्यास्तीतिउदारधीः मुनिर्मननशीलोवाल्मीकिर्यशस्विनोप्यस्यरामस्ययशस्करंतत्का
व्यंसर्गबद्धोमहाकाव्यमितिलक्षणालक्षितं रमणीयार्थप्रतिपादकशब्दसंदर्भरूपंश्लोकशतैश्चतुर्विंशतिसहस्र
श्लोकैरवयवैश्चकारः कीदृशैश्लोकशतैःउदारवृत्तार्थपदैःउदाराणिमहांतिवृत्तार्थपदानियेषांतैः वृत्तानिप
द्यासरणिःपद्धति पद्यावर्त्मन्येकपदीतिचेत्यमरः वंशस्थजात्यादीनितेषामुदारत्वंतत्तद्रसाभिव्यंजकत्वं अर्था

तस्यबुद्धिरियंजातामहर्षेर्भावितात्मनः॥कृत्स्नंरामायणंकाव्यमीदृशैःकरवाण्यहं॥ ४१॥उदारवृत्तार्थ
पदैर्मनोरमैस्तदस्यरामस्यचकारकीर्तिमान्॥समाक्षरैःश्लोकशतैर्यशस्विनोयशस्करंकाव्यमुदार।
धीर्मुनिः॥४२॥ वाचलक्ष्यव्यंग्याःतेषामुदारत्वंद्राक्षापाकनारिकेलपाकरसालपाकेषुद्राक्षापाकवत्वं द्राक्षापा
कः सकथितोवहिरंतःस्फुरद्रसइतिलक्षणात् पदानिवाचकलक्ष्यव्यंजकानितेषामुदारत्वंपदानामन्यो
न्यमैत्रीवत्वंपुनःकीदृशैःमनोरमैःरमणीयैः अनेनवैदर्भीगोडीयंपाचालीचेत्युक्तासुरीतिषुवैदर्भीरीतिमत्वमुक्तं
तल्लक्षणंचवंधपारुष्यरहिताशब्दकाठिण्यवर्जिता नातिदीर्घसमासाचवैदर्भीरीतिरिष्यतइति समाक्षरैः
प्रतिपादसमानाक्षरैः अनेनविषमवृत्तादिरूपताव्यावृत्ता ४२ ॥२५॥

एवंकाव्यनिर्माणमुक्त्वाप्रेक्षावत्प्रवृत्तयेतस्योत्तमत्वप्रदर्शनायनिर्दोषत्वमाह तदिति तद्रघुवरचरितंनिशामयध्वं अत्यन्तमत्वान्निशामयेत्यर्थः क्रियासमभिहारइतिलोटोध्वमादेशः तत्कीदृशं उपगतसमाससंधियोगं उपगताः संगताः समासाः संधिसंबंधाश्चयस्मिन्तादृशासमैः अन्यूनानतिरिक्तैः मधुरैर्मनोहरैः उपनतार्थैः प्रसन्नतयाउपलभ्यमानार्थकैर्वाक्यैर्बद्धं मुनिप्रणीतंब्रह्मानुग्रहप्राप्तसत्यवागृषिप्रणीतंदशशिरसश्चवधं वधप्रतिपादकं रघुवरचरितं तद्दर्शनहृद्यंकाव्यमित्यर्थः अत्ररघेर्गत्यर्थान्निष्पन्नरघुवरशब्देनतस्यसर्वांतर्यामित्वंध्वनितं तेनतच्चरितस्यस्वर्गमोक्षादिसर्वपुरुषार्थसाधनमुक्तमेवदशशिरसश्चवधमित्यनेनतदंतमिदंश्रोतव्यमित्युचितं —— तेनैवसर्वफललाभात् उत्तरकांडंत्वस्यखिलंभारतस्यहरिवंशवत् अतएवाग्रिमसर्गेवनसंचरणापर्यंतवृत्तान्वेष

तदुपगतसमाससंधियोगंसममधुरोपनतार्थवाक्यबद्धं॥रघुवरचरितंमुनिप्रणीतंदशशिरस
श्चवधंनिशामयध्वं॥४३॥इत्यार्षेरामायणेवाल्मीकीयेवालकांडेद्वितीयःसर्गः॥ २ ॥ ॥ ॥

णमेवसमाधिनाऽन्वेष्यतीतिप्रांचः परेतुदशशिरसोवधंचेत्यन्वयः चेनसीतात्यागादिरूपोत्तरकांडीयवृत्तांतसंग्रहइतिसप्तापिकांडानिश्रोतव्यानीत्याहुः पुनश्चराज्याभिषेकसर्गः पठनीयइतिवैष्णवसंप्रदायः ४३ इतिविषमपद
व्याख्यानेवालकाण्डेद्वितीयःसर्गः २

॥२६॥

च

पूर्वस्मिन्सर्गेग्रंथस्यात्यंतादरणीयत्वद्योतनायपरमाश्चर्यरूपंवक्तृत्वनुवैलक्षण्यमुक्तं संप्रतितदर्थमेवविषयवै
लक्षण्यंप्रदर्शयतितत्रसम्यग्ज्ञानायधृतत्वंलोकोत्तरनायकगुणपरिष्कृतत्वंच तत्रप्रथमंसम्यग्ज्ञानावधृतत्वंविवक्षु
स्तद्धेत्वन्वेषणमाह श्रुत्वेति धर्मार्थेतित्रिवर्गोपलक्षणंफलत्वेनतत्सहितंहितंमोक्षफलकंसमग्रंवस्तुकृत्स्नं
श्रीरामचरितरूपंवस्तुनारदमुखाच्छ्रुत्वाभूयस्ततोऽधिकंधीमतोरामस्ययद्वृत्तंचरित्रमस्तितद्व्यक्तंयथाभवतित
थान्वेषतेपर्यालोचयतिस्म १ तत्प्रकारमाह उपस्पृश्येति आचम्येत्यर्थः प्राचीनाग्रेषुदर्भेषुस्थित्वानिजग

श्रुत्वावस्तुसमग्रंतद्धर्मार्थसहितंहितं॥व्यक्तमन्वेषतेभूयोयद्वृत्तंतस्यधीमतः॥१॥उपस्पृश्योदकंसम्यङ्मु
निःस्थित्वाकृतांजलिः॥प्राचीनाग्रेषुदर्भेषुधर्मेणावेक्षतेगतिं॥२॥रामलक्ष्मणसीताभीराज्ञादशरथे
नच सभार्येणसराष्ट्रेणयत्प्राप्तंतत्रतत्वतः॥३॥हसितंभाषितंचैवगतिर्यायच्चचेष्टितं॥तत्सर्वंधर्मवीर्ये
णयथावत्संप्रपश्यति॥४॥स्त्रीतृतीयेनचतथायत्प्राप्तंचरतावने॥सत्यसंधेनरामेणतत्सर्वंचान्ववेक्षितं॥५॥

हमुद्दिश्यकृतांजलिःशन्नधर्मेणयोगजेनब्रह्मप्रसादरूपेणचगतिंभगवच्चरितरूपांग्रावेक्षतेप्रतियत्नेनपश्य
तिस्म २ यत्प्राप्तंसंवृत्तंतत्सर्वंतत्रसमाधौतत्वतःधर्मवीर्येणयोगजबलेनपश्यतिस्म ३ किंप्राप्तंतत्राहहसि
तमिति यद्धसितंहासःयच्चभाषितंभाषणंयागतिर्गमनंयच्चचेष्टितंयुद्धादिकंतत्सर्वंधर्मवीर्येणब्रह्मबलप्र
सादृशतायथावत्तत्वेनसंप्रपश्यतिस्म ४ स्त्रीतृतीयायस्यतेनसीतालक्ष्मणसहितेनवनेचरितासत्यप्रतिज्ञे
नरामेणयत्प्राप्तंतत्सर्वंचान्ववेक्षितंसाक्षात्कृतंवाल्मीकिनेतिशेषः ५

॥२६॥

ततोऽवेक्षणानंतरंधर्मात्मावाल्मीकिःयोगंब्रह्मप्रसादरूपोपायमाश्रितःसन्तत्रश्रीरामादौयन्निर्वृत्तंनिष्पन्नंतत्स
र्वंपाणौआमलकमिवसम्यक्प्रत्यक्षवत्प्रपश्यदित्यर्थः ६ अथदर्शनफलंग्रंथनिर्माणंतोयोगमाहात्म्यादित्याहश्लो
कद्वयेन महाद्युतिःरामगुणानुभवहर्षजद्युतियुक्तः सवाल्मीकिःतत्सर्वंरामवृत्तांतंधर्मेणाभगदनुग्रहेणतत्त्वतो
दृष्ट्वाअभिरामस्यनिरवधिसुभगस्यरामस्यचरितंचरितंचरितविषयप्रबंधंकर्तुमुद्यतःउद्युक्तोऽभूत् ७ कीदृशं
चरितंतत्राह कामेति कामरूपोयोऽर्थःपुरुषार्थस्तद्रूपेणगुणेनफलेनयुक्तं धर्मार्थरूपपुरुषार्थफलेनविस्तारव
त् विस्तरेणतदुभयप्रतिपादकंतदात्वेचेत्यर्थः रत्नैःकाव्यगुणालंकारव्यंग्यैरासंपूर्णं सर्वश्रुतीनांमनोभूताः

ततःपश्यतिधर्मात्मातत्सर्वंयोगमास्थितः॥ पुरायत्तत्रनिर्वृत्तंपाणावामलकंयथा॥६॥तत्सर्वंतत्त्वतो
दृष्ट्वाधर्मेणासमहाद्युतिः॥ अभिरामस्यरामस्यतत्सर्वंकर्तुमुद्यतः॥७॥कामार्थगुणसंयुक्तंधर्मार्थगु
णाविस्तरं॥ समुद्रमिवर[illegible]ढ्यंसर्वश्रुतिमनोहरं॥८॥

सारभूताःउपनिषदस्तासांहरंतदर्थप्रतिपादकं
तेनमोक्षफल[illegible]युक्तंयद्वा कामश्चअर्थश्चकामार्थौताभ्यांगुणाभ्यामप्रधानाभ्यांसंयुक्तं धर्मार्थयोर्धर्ममो
क्षयोर्गुणोऽतिशयस्तंविस्तृणातीतिधर्मार्थगुणविस्तरं प्राधान्येनधर्मापवर्गप्रतिपादकमित्यर्थः अर्थःस्या
द्विषयेमोक्षेशब्दवाच्येप्रयोजनइतिवैजयंती अतएवयद्रत्नाढ्यंसमुद्रमिवस्थितं समुद्रोयथाशंखशुक्त्या
दियुक्तोपिप्राधान्येनरत्नानिवहतितद्वत् सर्वेषांजनानांश्रुतिमनसीहरतीतियथाशब्दमाधुर्याच्छ्रोत्राकर्ष
णंअर्थसौष्ठवाच्चित्ताकर्षकमित्यर्थः ८

॥२७॥

यथोद्घातं प्रबंधनिर्माणमाह सइति सभगवानृषिः रघुवंशस्य रघुवंशोद्भवस्य रामस्य चरितं पूर्वंनारदेनमाहर्षिणा
येनप्रकारेणकथितंतथाचकार ९ अप्रपंचितरेणवर्णनीयानर्थान्संक्षेपेणदर्शयतिजन्मेत्यादिना जन्म
नोमहत्त्वदशरथमहातपोबललभ्यत्वंमहाविष्णुवतारत्वंच वीर्यंधनुःखंडनादिबलंसर्वानुकूलतांसर्वानुव
र्तित्वं लोकस्यप्रियतांप्रेमस्पदत्वं क्षांतिंअपराधसहिष्णुतांरम्यतां सत्यशीलतांसत्यस्वभावतां १० विश्वा

सयथाकथितंपूर्वंनारदेनमहात्मना॥रघुवंशस्यचरितंचकारभगवानृषिः॥९॥जन्मरामस्यसुमह
द्वीर्यंसर्वानुकूलतां॥लोकस्यप्रियतांक्षांतिंसौम्यतांसत्यशीलतां॥१०॥नानाचित्राःकथाश्चान्यावि
श्वामित्रसहायने॥जानक्याश्चविवाहंचधनुषश्चविभेदनं॥११॥रामरामविवादंचगुणान्दाशरथेस्त
था॥तथाभिषेकंरामस्यकैकेय्यादुष्टभावतां॥१२॥विघातंचाभिषेकस्यरामस्यचविवासनं॥राज्ञःशोकं
विलापंचपरलोकस्यचाश्रयं॥१३॥

मित्रसहायनेविश्वामित्रेणसहगमनेचित्रानानाकथाःअन्याश्चराम
कथातश्चान्याश्चाश्चर्यावहाश्चजानक्याश्चेतिचकारेणोर्मिलादयःसमुच्चीयंते धनुषोहरचापस्यविभेदनंभं
गश्च ११ रामेणपरशुरामेणरामस्यराघवस्यविवादं दाशरथेर्गुणानयोध्याकांडादौवक्ष्यमाणान् रामस्याभि
षेकमभिषेकोद्योगंकैकेय्यादुष्टहृदयत्वंच १२ विघातंविघ्नंविवासनंवनंप्रतिप्रस्थापनं परलोकस्यचाश्रयं

परलोकगमनं १३ श्रीरामायनमः

स्प

॥२७॥

प्रकृतीनांप्रजानांयचनापूर्वकंविसर्जनमयोध्यांप्रतिपरावर्त्तनं यद्यपिसूतोपावर्त्तनानंतरमेवराज्ञःपरलोकगमनंतथापि
क्रमेतान्वयीभावाड्क्रमेणाभिधानं १४ अभ्यनुज्ञानेसंमति १५ वास्तुकर्मचित्रकूटेशास्त्रोचितक्रमेणमंदिरनिर्माणं
निवेशंवास्तुपूजादिपूर्वकंगृहेप्रविश्यावस्थानंरामस्यप्रसादनंभरतेनेतिशेषः सलिलक्रियांसलिलदानं १६ अथ
पादुकयोर्भरतेकृतमभिषेकंराज्यनिर्वर्त्तनतयास्थापनं नंदिग्रामेनिवासिनंनिवसनंस्वार्थेड्डणर् प्रजानांस्थापनंवा

प्रकृतीनांविषादंचप्रकृतीनांविसर्जनं॥निषादाधिपसंवादंसूतोपावर्तनंतथा॥१४॥गंगायाश्चापिसंतारंभरद्वा
जस्यदर्शनं॥भरद्वाजाभ्यनुज्ञानाच्चित्रकूटस्यदर्शनं॥१५॥वास्तुकर्मनिवेशंचभरतागमनंतथाप्रसादनंच
रामस्यपितुश्चसलिलक्रियां॥१६॥पादुकाग्र्याभिषेकंचनंदिग्रामनिवासनं॥दंडकारण्यगमनंविराधस्य
वधंतथा॥१७॥दर्शनंशरभंगस्यसुतीक्ष्णेनसमागमं॥अनसूयासमास्याचअंगरागस्यचार्पणं॥१८॥दर्श
नंचाप्यगस्त्यस्यधनुषोग्रहणंतथा॥शूर्पणख्याश्चसंवादंविरूपकरणंतथा॥१९॥वधंखरत्रिशिरसो
रुत्थानंरावणस्यच॥मारीचस्यवधंचैववैदेह्याहरणंतथा॥२०॥

१८ अनसूयासमास्यां अनसूयायाःसीता
यासहासनंयद्यप्येतद्विराधवधात्पूर्वमेवतथापिक्रमेतान्वयाभावाद्व्यत्ययेनाभिधानंअंगरागस्यचंदनस्य १८
धनुषोग्रहणमगस्त्यसकाशात् १९ खरत्रिशिरसोरितिदूषणादीनामुपलक्षणंउत्थानंजानकीहरणोद्योगं २०

२१. २२. प्रत्ययोत्पादनं शालभेदनादिभिः सुग्रीवस्य विश्वासजननेन विग्रहहेतुकं २३ सुग्रीवप्रतिपादनं सुग्रीवस्य राज्ये स्था
पनं समयं शरद्यात्राकर्तव्येति रामसुग्रीवयोः संकेतं च वर्षर्तुप्रसक्ता रात्रयो वर्षरात्राः तेषु निवासनं वसनांगीकर
णं २४ राघवसिंहस्य राघवाणांश्रेष्ठस्य कोपं सुग्रीवविषयक्रोधं वलानां सेनानामुपसंग्रहं समेलनं दिशः प्र

राघवस्य विलापं च गृध्रराजनिवर्हणं ॥ कवंधदर्शनं चैव पंपायाश्चापि दर्शनं ॥२१॥ शवरीदर्शनं चैव ह
नूमद्दर्शनं तथा ॥ विलापं चैव पंपायां राघवस्य महात्मनः ॥२२॥ ऋष्यमूकस्य गमनं सुग्रीवेण समागमं ॥ प्रत्य
योत्पादनं सख्यं वालिसुग्रीवविग्रहं ॥२३॥ वालिप्रमथनं चैव सुग्रीवप्रतिपादनं ॥ ताराविलापं समयं वर्षरा
त्रनिवासनं ॥२४॥ कोपं राघवसिंहस्य वलानामुपसंग्रहं ॥ दिशः प्रस्थापनं चैव पृथिव्याश्च निवेदनं ॥२५॥
अंगुलीयकदानं च ऋक्षस्य विलदर्शनं ॥ प्रायोपवेशनं चापि संपातेश्चापि दर्शनं ॥२६॥ पर्वतारोहणं
चापि सागरस्यापि लंघनं ॥ समुद्रवचनाच्चैव मैनाकस्य च दर्शनं ॥२७॥ राक्षसीतर्जनं चैव छायाग्राहस्य
दर्शनं ॥ सिंहिकायाश्च निधनं लंकामलयदर्शनम् ॥२८॥ ति वानराणां प्रस्थापनं पृथिव्याश्च निवेदनं

सुग्रीवेण वानरान्प्रति पृथिव्या द्वीपसमुद्रादिसन्निवेशकथनं २५ अंगुलीयकदानेन हनुमते इति शेषः प्रायेणा
ऽनशनेन वानराणामुपवेशनं समुद्रसमीपे वासः २६ समुद्रलंघनाय महेन्द्रपर्वतारोहणं मैनाकस्य हिमवत्सुतस्य

टिः ७ १८

एकस्यापिअसहायस्यापिकर्त्तव्यार्थविचारं आपानभूमिः अवरोधोंतःपुरम् २९ पानेगमनं ३० अभिज्ञानप्रदानंसी
तायैअंगुलीयकदानं ३१ मणिप्रदानंहनुमतेचूडामणिप्रदानं वृक्षभंगंअशोकवनिकावृक्षभंगाविद्रवपलायनं
हनुमतस्यादितिशेषः किंकराणांरावणभटानां ३२ लंकादाहाभिगर्जनं लंकादाहेनतत्रत्यानामाक्रंदनं लंका

रात्रौलंकाप्रवेशंचएकस्यापिविचिंतनं॥ आपानभूमिगमनमवरोधस्यदर्शनं॥२९॥ दर्शनेरावणस्यापि
पुष्पकस्यचदर्शनं॥ अशोकवनिकायानेसीतायाश्चापिदर्शनं॥३०॥ अभिज्ञानप्रदानंचसीतायाश्चापि
भाषणं॥ राक्षसीदर्शनंचैवत्रिजटास्वप्नदर्शनं॥३१॥ मणिप्रदानंसीतायावृक्षभंगंतथैवच॥ राक्षसीविद्र
वंचैवकिंकराणांनिबर्हणं॥३२॥ ग्रहणंवायुसूनोश्चलंकादाहाभिगर्जनं॥ प्रतिप्लवनमेवाथमधूनां
हरणंतथा॥३३॥ राघवाश्वासनंचैवमणिनिर्यातनंतथा॥ संगमंचसमुद्रेणनलसेतोश्चबंधनं॥३४॥
प्रतारंचसमुद्रस्यरात्रौलंकावरोधनं विभीषणेनसंसर्गंवधोपायनिवेदनं॥३५॥

दाहेहनुमद्गर्जनमित्यर्थोवा प्रतिप्लवनंपुनःसागरोत्तरणंमधूनांहरणंवानरैरितिशेषः ३३ मणिनिर्यात
नंरामायचूडामणिप्रदानंनलसेतोःनलनिर्मितसेतोः ३४ प्रतारंसेनायाइतिशेषः वधोपायनिवेदनंइंद्र
जिदादिवधोपायदर्शनं ३५

ऽरेःपुरेःशौर्यादिशयोक्तिः २६ अयोध्यायामागमनंतदुदेशगमनं २७ रामाभिषेकाभ्युदयंरामाभिषेकमहोत्सवम् स
र्ववचकारेत्यनुकृष्यते २८ सीताभूप्रवेशप्रभृत्युत्तरकांडकथामाह अनागतंचेति अनागतंभावियत्किंचिच्चरितम
स्तिब्राह्मणपुत्रजीवनाश्वमेधादिकंतदुत्तरकाव्येउत्तरकांडेचकारप्रतिपादितवान् यत्किंचिदित्यनेनसीताविसर्ज

कुंभकर्णस्यनिधनंमेघनादनिबर्हणं॥ रावणस्यविनाशंचसीतावाप्तिमरेःपुरे॥ २६॥ विभीषणाभिषे
कंचपुष्पकस्यचदर्शनं॥ अयोध्यायाश्चगमनंभरतेनसमागमं॥ २७॥ रामाभिषेकाभ्युदयंसर्वसै
न्यविसर्जनं॥ स्वराष्ट्ररंजनंचैववैदेह्याश्चविसर्जनं॥ २८॥ अनागतंचयत्किंचिद्रामस्यवसुधात
ले॥ तच्चकारोत्तरेकाव्येवाल्मीकिर्भगवानृषिः॥ २९॥ इत्यार्षेरामायणेवाल्मीकीयेबालकांडेतृतीयःस
र्गः॥ ३॥ प्राप्तराज्यस्यरामस्यवाल्मीकिर्भगवानृषिः॥ चकारचरितंकृत्स्नंविचित्रपदमात्मवान्॥ १॥

नात्पूर्वकालस्यभूयस्त्वमनंतरकालस्याल्पत्वंद्योत्यते २९ इतित्रितीयःसर्गः ३ पूर्वसर्गेप्रतिपाद्यवैलक्ष
ण्यमुक्तं संप्रबंधवैलक्षण्यमुच्यते तत्रपरमाप्तप्रतीतत्वपुण्यश्लोकविषयत्वमहाजनपरिगृहीतत्वमि
त्यादि प्राप्तराज्यस्येति अनेनरावणवधोत्तरमेतत्काव्यकरणमितिसूचितं प्राप्तराज्यलोकरक्षार्थेस्वीकृत

तज्ञभावस्यतमस्यसकलगुणाभिरामस्यविचित्रपदंविविधानेचित्राणांशब्दार्थालंकाराणांपदंस्थानंकृत्स्नंचरितं
चरितप्रतिपादकंग्रंथंभगवानब्रह्मप्रसादलब्धदिव्यज्ञानयान्यात्मयान्प्रबंधरचनाकुतूहलयत्नवानृषिःकु
रुतेकाव्यमितिकाव्यनिर्माणेच्छयाद्वाल्मीकिश्चकारपरोपकारायकृतयानित्यर्थः ऋषिर्वाल्मीकिस्तपःस्वाध्याये
त्याद्यतद्गुणप्रपंचमन्यतेत्वंतेनचिकीर्षितेरामायणाख्येप्रबंधेश्लोकानांचतुर्विंशतिसहस्राणिउक्तवान्
इकारलोपश्छांदसःचतुर्विंशतिसंख्याकंश्लोकांश्चकारेत्यर्थः तथेतिसमुच्चये पंचसर्गशतांश्चकृतवान्
शतापुनत्प्रवृत्ताः पुंसिचेतिलिंगानुशासनात्पुंल्लिंगत्वंषट्कांडानिउत्तरंचउत्तरकांडंचकृतवान् यद्यप्याधुनि
केपाठेश्लोकानांसर्गाणांचविपर्यासोदृश्यतेतथापिबहुचतुर्युगांतरितत्वेनविप्लवोयुक्तःयद्वासंकल्पपरोयं

चतुर्विंशत्सहस्राणिश्लोकानामुक्तवानृषिः॥तथासर्गशतान्पंचषट्कांडानितथोत्तरं ॥२॥ ॥
कृत्वातुतन्महाप्राज्ञःसभविष्यंसहोत्तरं॥चिंतयामासकोन्वेतत्प्रयुंजीयादितिप्रभुः॥३॥ ॥ ॥

श्लोकःउक्तवान्चतुर्मुखमुक्तइत्यर्थःग्रंथसमाप्तिदशायांकाचिद्वृद्धिरुपजातेतिनकोपिविरोधःवर्त्तमानसंख्यातु
वालकांडेसर्गाः ७७ अयोध्यायां ११९ आरण्ये ७५ किष्किंधायां ६७ सुंदरे ६८ युद्धे १३१ उत्तरे ९० वालकांडश्लो
कः २४१५ अयोध्या ४२०५ आरण्य २५९ किष्किंध २५०० सुंदर ३००० युद्ध ५५६० उत्तर ३३६५ तथोत्तरस्मि
न्नुत्तरकांडस्यषट्कांडैःसहोक्तकथनमात्रातिशयेनतद्बीजंतुतत्रप्राचुर्येणभगवतःपरत्वाभिव्यक्तिःकोशलानां
सर्वेषामपिभगवतासहतल्लोकप्राप्तिश्चेत्यवधेयम् २ अप्राप्यकाव्यस्यमहाजनपरिग्रहंवक्तुंपीठिकामारच
यति कृत्वेति महाप्राज्ञोनिरतिशयज्ञानसंपन्नोवाल्मीकिःसंभविष्यंमहोत्तरंभविष्येणसहितंयदुत्तरंतेनसहि

तमिदंकाव्यंकृत्वाकोनुप्रभुःसमर्थःएतत्प्रयुंजीया
त्सभासुपठन्श्रावयेदितिचिंतयामास भविष्यं च

सीताविसर्जनमारभ्यैतस्यैकेतस्याभूप्रवेशोत्तरकालि
कमित्यपरे अप्रवेशोयंकाव्यंरामायणंश्रुतइतिबल
रोक्तेः २

ततोवाल्मीकिचिंतानंतरंमुनिवेषौवस्तुतोराजकुमारौकुशीलवौ इकारश्छांदसः चिंतयमानस्यभाविता
त्मनश्चिंतितपरमात्मनस्तस्यमहर्षेः पादावगृह्णीतामित्यर्थः ४ धर्मज्ञौगुरुशुश्रूषाधर्मज्ञौ राजपुत्रौअ
समाप्तवीर्यवंतौ यशश्विनौविद्याभ्यासयुक्तौ भ्रातरौतुल्यस्वरौ स्वरसंपन्नौशरीरोत्कृष्टस्वरयंतौ आश्र

तस्यचिंतयमानस्यमहर्षेर्भावितात्मनः॥ अगृह्णीतांततःपादौमुनिवेषौकुशीलवौ॥४॥ कुशीलवौ
तुधर्मज्ञौराजपुत्रौयशस्विनौ॥भ्रातरौस्वरसंपन्नौददर्शाश्रमवासिनौ॥५॥ सतुमेधाविनौदृष्ट्वावेदे
षुपरिनिष्ठितौ॥ वेदोपबृंहणार्थायतावग्राहयतप्रभुः॥६॥

मवासिनावाश्रमवासित्वेनस्नेहवि
षयौकुशीलवौददर्शकाव्यग्रहणयोग्यतयाऽपश्यदित्यर्थः ५ मेधाविनौधारणासमर्थबुद्धिमंतौवेदे
षुपरिनिष्ठितौ जातवेदाध्यपन्नौदृष्ट्वावेदोपबृंहणार्थायवेदार्थव्यक्तीकरणायतौयतौकुशीलवौग्रंथम
ग्राहयामासप्रभुःस्वतंत्रः ६

चरितव्रतश्चरितत्वेननिरतिशयज्ञानो वाल्मीकिः काव्यं कवेः दोषवर्जितं गुणालंकारसहितं रमणीयार्थप्रति
पादकशब्दसंदर्भरूपं अस्यैव वेदोपबृंहणत्वेपि कांतासंमितत्वात्काव्यत्वव्यपदेशः तथाहि त्रिविधः संदर्भः श
ब्दप्रधानो वेदः प्रभुसंमितः अर्थप्रधान इतिहासादिः सुहृत्संमितः व्यंग्यप्रधानं काव्यं कांतासंमितं महहिति
काव्यविशेषणं सर्गबंधो महाकाव्यमित्युक्तेः ननु काव्यं नारंभणीयं काव्यालापांश्च वर्जये राम
दित्याशंक्याह रामायणमिति रमयतीति रामः यद्वा रमंतेऽस्मिन्सर्वे जना इति रामः स अत्र प्यते प्रतिपाद्यतेऽनेने

काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत् ॥ पौलस्त्यवधमित्येवं चकार चरितव्रतः ॥ ७ ॥

ति रामायणं समस्तदिव्यकल्याणगुणसंपन्नरामविषयत्वान्नास्य निषिद्धत्वं किंतूपादेयत्वमेवेत्यर्थः
अत्र च रामचरितप्रतिपादनमप्राधान्येन तु सीतायाश्चरितमेव प्रतिपाद्यत इत्याह कृत्स्नमिति कृत्स्नं रामा
यणं सीताचरितपरं अत एव करुणापाचानविकल्पन इत्याद्युक्तं सत्राधीरोदात्तनायको रामः सहसि रामायणं स
श्रुतवान् स मात्रचरितत्वेन तस्यात्सीतापरत्वे संगच्छत एव विरहिताः कांताकथात्वाभावात् एवं ज
नावत्या सीतारामयोः प्रतिपादनमुक्त्वाशक्यावैत्यासिंद्धवृत्तमाह पौलस्त्येति पुलस्त्यस्यापत्यं पौलस्त्यो राव
णस्तस्य वधमधिकृत्य कृतो ग्रंथः पौलस्त्यवधस्तन्नामकं चकार तत्ताव्याहयतेति पूर्वेणासंबन्धः ७

ततोपरेशमगायतामित्याह पाठ्ये इत्यादि श्लोकद्वयेन पाठ्यगेययोर्भीवेल्पत् पत्तोपाठेगानेचेत्यर्थः उभयत्रापिमधु
॥रा०बाध्या रंप्रमाणैस्त्रिभिर्द्रुतमध्यविलंबितैर्विशिष्टं सप्तभिर्जातिभिर्निषादर्षभगांधारषड्जमध्यमधैवतपंचमस्वरैर्बद्धं
॥३१॥ तंत्रीवीणालयस्तालयेनम्रंस्गास्तेनामेककालविरामस्ताभ्यांसमन्वितं ८ रसैरिति शृंगारस्सैवीरादिरसैस्संयुक्तं
काव्यंशृंगप्रधानंसर्गयुतंकांतासम्मितंकमेतावगायतामित्यर्थः तत्रशृंगारोद्विविधःसंयोगोविप्रलंभश्च त
त्ररामस्तुसीतायासार्द्धमित्यादिविहारवत्तातेनसंयोगोदर्शितः ततःपरेणविप्रलंभःहास्यश्चशूर्पणखायोर्दृष्टिंजाते

पाठ्येगेयेचमधुरंप्रमाणैस्त्रिभिरन्वितम् ॥ जातिभिःसप्तभिर्बद्धंतंत्रीलयसमन्वितम् ॥ ८ ॥ रसैःशृं
गारकरुणहास्यरौद्रभयानकैः ॥ वीरादिभिश्चसंयुक्तंकाव्यमेतदगायताम् ॥ ९ ॥ तौतुगांधर्वतत्वज्ञौ ॥
मूर्छनास्थानकोविदौ ॥ भ्रातरौस्वरसंपन्नौगंधर्वाविवरूपिणौ ११ सौ [illegible]
[illegible]
[illegible]
न करुणश्चदशरथ्यादिवत्तांतेन अद्भुतःश्रीरामरावणयुद्धादिषु शांतश्चाश्रमवैराग्यादिषु योध्यः अत्रकेचि
च्छोकःश्लोकत्वमागतइत्युक्त्याऽस्मिन्प्रबन्धेकरुणरसःप्रधानइत्याहुः अन्येवीरएवप्रधानःपौलस्त्य
वधइतिनामकरणात् वयंतुशृंगारएवप्रधानःसीतायाश्चरितंमहदित्युक्तेरित्यलं ९ अथकुशलवयोर्गान ॥३१॥
सामर्थ्यमाह तौत्वित्यादिश्लोकद्वयमेकान्वयं गांधर्वंगानशास्त्रंतत्तत्त्वज्ञौ मूर्छनागीतिविशेषः षड्ज
दिस्वरसंपूर्णातास्थानानिमंद्रमध्यमतारकरूपस्वरत्रयोत्पत्तिस्थानानिउरःकंठशिरांसितेषुकोविदौतद्विषयक ॥ ॥
समीचीनज्ञानवंतौ भ्रातरौस्वरसंपन्नौअतएवरूपिणौप्रशस्तरूपवंतौगंधर्वाविवस्थितौ १० श्रीराम

रूपलक्षणसंपन्नौमधुरस्वरभाषिणौ ॥ बिंबादिवोत्थितौबिंबौरामदेहात्तथापरौ ॥ ११ ॥ तौराजपुत्रौकार्त्स्न्येनधर्म्यमाख्यानमुत्तमं ॥ वाचोविधेयंतत्सर्वंकृत्वाकाव्यमनिंदितौ ॥ १२ ॥ ॥

रूपलक्षणसंपन्नौनाटकलक्षणज्ञौ रूपंस्वभावेशुक्लादौसौंदर्येनाटकेपशाविति कोशः मधुरस्वरंयथाभवति तथाभाषितुंशीलमनयोरितिमधुरस्वरभाषिणौकेवलभाषनकालेपिमधुरस्वरौकिमुतगानकालइतिभावः उक्तसकलगुणसंपत्तिमूलंरामपुत्रत्वमाहबिंबादिति रामदेहात्बिंबात्उत्थितौप्रतिबिंबाविवरामदेहाविवि[illegible]तौएवंभूतौकुशलवौएतत्काव्यमगायतामितिपूर्वेणासंबंधः ११ नकेवलंतस्याध्ययनमेवापितुधारणंप्रकाशनंचापीत्याहतावित्यादिसार्द्धश्लोकद्वयेन अनिंदितौयथोपदेशंगानेननिंदारहितौ यथोपदेशंगुरूपदेशमनतिक्रम्यतत्वज्ञौपाठशुद्धितौसमाहितौसावधानौकुत्राप्यंशेविस्मृतिरहितावित्यर्थः महात्मामहाबुद्धी महाभागौएतद्धेतुभूतमहाभाग्यवंतौसर्वशुभलक्षणलक्षितौतौकुशलवौकार्त्स्न्येनधर्म्यंधर्मादनपेतमुत्तममाख्यानंरामायणाख्यंसर्वंकाव्यंवाचोविधेयंवाग्वश्यंकृत्वाऋषीणांद्विजातीनामितिगोबलीवर्दन्यायेनसाधूनांद्विजेतराणामपिसमागमेसदसियथोपदेशंजगतुः १२, १३

अथैतस्य काव्यस्य महाजनपरिगृहीतत्वं दर्शयितुमाह तावित्यादि तौ कुशीलवौ कदाचित् रामस्याश्वमेधकाले भावि-
तात्मनां निश्चितधियां समेतानां अश्वमेधे संमिलितानां आसीनानां क्रियाकलापावसाने सुखमास्थितानां
मृषीणां समीपस्थौ इदं काव्यमगायताम् १४ सामान्यतः काव्यप्रशंसामाह तच्छ्रिति तत्काव्यं श्रुत्वा परं विस्मय-
मागताः बाष्पपर्याकुलेक्षणाः सर्वे मुनयस्तौ प्रति साध्विन्यूचुः प्रशशंसुरित्यर्थः १५ गायकप्रशंसामाह ते इति

ऋषीणां च द्विजातीनां साधूनां च समागमे ॥ यथोपदेशं तत्त्वज्ञौ जगतुस्तौ समाहितौ ॥ महात्मानौ म-
हाभागौ सर्वलक्षणलक्षितौ ॥१३॥ तौ कदाचित्समेतानामृषीणां भावितात्मनां ॥ मध्ये सभं समीपस्था-
विदं काव्यमगायतां ॥१४॥ तच्छ्रुत्वा मुनयः सर्वे बाष्पपर्याकुलेक्षणाः ॥ साधु साध्विति तावूचुः परं
विस्मयमागताः ॥१५॥ ते प्रीतमनसः सर्वे मुनयो धर्मवत्सलाः ॥ प्रशशंसुः प्रशस्तव्यौ गायमानौ कु-
शीलवौ ॥१६॥ अहो गीतस्य माधुर्यं श्लोकानां च विशेषतः ॥ चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिव दर्शितं ॥१७

धर्मवत्सला निर्म[illegible]त्सरास्ते मुनयः प्रीतमनसः सन्तः गायमानौ अत एव प्रशस्तव्यौ प्रशंसितुमर्हौ कुशी-
लवौ प्रशशंसुः १६ काव्यप्रशंसाप्रकारमाह अहो इति गीतस्य मधुर्यमहो आश्चर्यं श्लोकानां तु माधुर्यं विशे-
षतः आश्चर्यं गानतोऽपि श्लोकमाधुर्यमतिशयितमित्यर्थः तमेव विशेषमाह चिरेति एतत्काव्यप्रतिपाद्यवस्तु
कालान्निष्पन्नमपि प्रत्यक्षमिव दर्शितम् १७

ऋषिकृतप्रशंसानंतरं पुनस्तयोर्गानप्रकारमाह अहोइति ~~गीतस्य माधुर्यमहो श्लोकानां माधुर्यं विशेष~~
~~तस्याश्चर्यं जनितोऽभिश्लोकस्य माधुर्यं गीतिरसंचितामित्यर्थः~~ प्रविश्येति सहितौ समलयादियुक्तौ तावुभौ कुशीलवौ
तदामुनिजनस्यवलोकाले भावं काव्याभिप्रायं तत्तद्रसरूपं प्रविश्य तन्मयीभूय सुष्ठु श्रोतृणां रसाविर्भावो यथा

प्रविश्य तावुभौ सुष्ठु तदा भावमगायतां ॥ सहितौ मधुरं रक्तं संपन्नं स्वरसंपदा ॥१८॥ एवं प्रशस्यमानौ तौ
तपः श्लाघ्यैर्महर्षिभिः ॥ संरक्ततरमत्यर्थं मधुरं तावगायतां ॥१९॥ प्रीतः कश्चिन्मुनिस्ताभ्यां संस्थितः
कलशं ददौ ॥ प्रसन्नो वल्कलं कश्चिद्ददौ ताभ्यां महायशाः ॥२०॥ अन्यः कृष्णाजिनं प्रादाद्यज्ञसूत्रम
थापरः ॥ कश्चित्कमंडलुं प्रादान्मौंजीमन्यो महामुनिः ॥२१॥ बृसीमन्यस्तदा प्रादात्कौपीनमपरो मुनिः
ताभ्यां ददौ तदा हृष्टः कुठारमपरो मुनिः ॥२२॥ काषायमपरो वस्त्रं चीरमन्यो ददौ मुनिः ॥ जटाबंधनमन्य
स्तु काष्ठरज्जुं मुदान्वितः ॥२३॥ यज्ञभांडमृषिः कश्चित्काष्ठभारं तथापरः ॥ औदुंबरीं बृसीमन्यः स्वस्ति
केचित्तदावदन् ॥२४॥

भवति तथा मधुरं पाठतो गानतश्च अत एव रक्तं रंजनं स्वरसंपदा षड्जादिस्वरसंप
दा संपन्नं यथा भवति तथाऽगायतामिति संबन्धः १८ प्रशंसाजनितोत्साहो पुनरतिशयेनागायतामित्याह एव
मिति तपःश्लाघ्यैः श्लाघ्यतपस्कैर्महात्मभिर्महाबुद्धिभिर्विशेषतैरिति यावत्तादृशैरेवमुक्तरीत्या प्रशस्यमानौ
तौ संरक्ततरमतिशयेन समीचीनरागयुक्तमत्यर्थमत्यंतं मधुरं च यथा भवति तथा तावगायताम् क्रियाभेदात्तौ

व्हावृत्तिः १९ श्रीरामायणश्रवणाज्जनितानंदानु
भावपरवशानां चेष्टितमाह प्रीत इति संस्थितः उत्थितः

कलशं जलाहरणपात्रं प्रीत्यतिशयेनोत्थाय ददावि
त्यर्थः २० बृसी ऋषीणामासनं २१ २२ २३ २४

२५ एवंमुनिजनप्रशंसामुक्त्वातद्भिन्नसकलजनप्रशंसामाह आश्चर्यमित्यादि आख्यानंप्रबंधविशेषःमुनिनावाल्मीकिनासंप्रकीर्तितंसम्यक्लक्षणावत्तयाप्रकर्षेणविस्तरेणकीर्त्तितंकथितंकवीनांपरमाधारंस्वरचनीयार्थप्रकाशलाभेनपरमालंबनंभूतंयथाक्रमंक्रममनतिक्रम्यसमाप्तंमध्येनविच्छिन्नं२६माश्चर्यंमाश्चर्यावहमित्यर्थः २६ एवंचप्रशस्यगानतरौप्रशंसन्तिस्मअभिगीतमिति हेसर्वगीतेषुकोविदौसमर्थौपुत्राभ्यांआयुष्यंआयुर्वर्धनंपुष्टिजननंपुष्टिकरंसर्वेषांश्रोतॄणांश्रुतिर्मनांसिचहरतीतिसर्वश्रुतिमनोहरमिदंगीतमभिगीतंशोभनंगीतंअभिपूजायां २७

आयुष्यमपरेप्राहुर्मुदातत्रमहर्षयः॥ददुश्चैववरान्सर्वेमुनयःसत्यवादिनः॥२५॥आश्चर्यमिदमाख्यानंमुनिनासंप्रकीर्तितं॥परंकवीनामाधारंसमाप्तंचयथाक्रमं॥२६॥अभिगीतमिदंगीतंसर्वगीतेषुकोविदौ॥आयुष्यंपुष्टिजननंसर्वश्रुतिमनोहरं॥२७॥प्रशस्यमानौसर्वत्रकदाचित्तत्रगायकौ॥रथ्यासुराजमार्गेषुददर्शभरताग्रजः॥२८॥स्ववेश्मचानीयततोभ्रातरौसकुशीलवौ॥पूजयामासपूजार्हौरामःशत्रुनिवर्हणः॥२९॥

तत्रयत्तयारथ्यासुराजमार्गेषुचसर्वेषुत्रैस्थंप्रशस्यमानौतौकदाचिद्भरताग्रजोरामोददर्श २८ ततोदर्शनानंतरंशत्रुनिवर्हणोरामःपूजार्हौस्वप्रबंधगानत्वेनश्लाघार्हौभ्रातरौकुशीलवौतुल्यवयोरूपादिमत्त्वेनाश्चर्यकरौस्ववेश्मस्वशालागृहमानीयपूजयामासश्लाघयामासेत्यर्थः २९

अथास्यप्रवंधस्यप्रवंधनापक्रमहापुरुषपरिग्रहमाह आसीनइत्यादि श्लोकद्वयमेकंवाक्यं प्रभुः स्वामीतस्व
रूपतयाकांचनेदिव्यसिंहासनेआसीनः सचिवैर्मंत्रिभिर्भ्रातृभिश्चोपोपविष्टःपरिवृतइत्यर्थः ३० विनीतावुभौ
भ्रातरौरूपसंपन्नौदृष्ट्वारामोलक्ष्मणादीनुवाच ३१ देववर्चसोःदेवतुल्यतेजसोरनयोःकुशीलवयोःसंवे
धिविचित्रार्थपदमिदमाख्यानंश्रूयतामिति लक्ष्मणादीनुक्त्वागायकौगातुंप्रेरयत् ३२ मधुरंपाठतोगान

आसीनःकांचनेदिव्येसचसिंहासनेप्रभुः ॥ उपोपविष्टःसचिवैर्भ्रातृभिश्चपरंतपः ॥ ३० ॥ दृष्ट्वातुरूपसंप
न्नौविनीतौभ्रातरावुभौ ॥ उवाचलक्ष्मणंरामःशत्रुघ्नंभरतंतथा ॥ ३१ ॥ श्रूयतामेतदाख्यानमनयोर्दे
ववर्चसोः ॥ विचित्रार्थपदंसम्यग्गायकौसमचोदयत् ॥ ३२ ॥ तौचापिमधुरंरक्तंस्वंचितायतनिस्वनं
तंत्रीलयवदत्यर्थंविश्रुतार्थमगायतां ॥ ३३ ॥ ल्हादयत्सर्वगात्राणिमनांसिहृदयानिच ॥ श्रोत्राश्र
यसुखंगेयंतद्बभौजनसंसदि ॥ ३४ ॥

तश्चमधुरं रक्तंरागवत्स्वंचितायतनिस्वनंस्वेच्छानुरूपयतंतं
त्रीलयवत् तंत्रीशब्दसदृशं अत्यर्थंप्रशंस्यतार्थविशेषतः श्रुतिमात्रेणार्थबोधजनकंयथाभवतितथागा
यतामित्यन्वयः ३३ सर्वगात्राणिसर्वावयवान्हृदयानिगात्रांतर्वर्तीनिमनःस्थानानिमनांसिचह्लादयत्
श्रोत्रंकर्णशष्कुलीतदाश्रयंश्रोत्रेंद्रियंतस्यसुखंसुखकरं तत्कुशलवकृतंगेयंगानंजनसंसदिबभौ

२८
रामायण

उक्तमेवार्थं सर्गान्ते संगृह्णाति इमावित्यादिश्लोकद्वयेन इमौ मुनी मुनिवेषावपि पार्थिवलक्षणान्वितौ कुशील
वौ च अपि प्रबंधगायकावपि महातपस्विनौ भवतः तत्तस्मान्ममापि प्रियाविरहकृशस्यापि भूतिकरं श्रेयस्करं वि
धारकमिति यावत् महानुभावं महावैभवं चरितं सीताचरितप्रधानं काव्यं प्रवक्ष्यते आभ्यां पठिष्यते तन्निबो
धत शृणुतेत्यर्थः यद्वा प्रचक्षते इति पाठः मम चरितं मच्चरितार्थप्रतीया एकं तल्लोकोत्तरं काव्यं निबोधत यतः
तच्छ्रोतॄणां भूतिकरमपि भुक्तिकरमपि प्रचक्षतेऽनेककल्पजीविनो वृद्धाः पूर्वरामायणस्यैतैस्तत्फलत्वो

इमौ मुनी पार्थिवलक्षणान्वितौ कुशीलवौ चापि महातपस्विनौ ॥ ममापि तद्भूतिकरं प्रचक्षते महानुभा
वं चरितं निबोधत ॥२५॥ ततस्तु तौ रामवचः प्रचोदितावगायतां मार्गविधानसंपदा ॥ स चापि रामः
परिषद्गतः शनैर्बुभूषयासक्तमना बभूव ह ॥२६॥ इत्यार्षे रामायणे वाल्मीकीये बालकांडे चतुर्थः
सर्गः ॥४॥

क्त्याऽत्रस्यापि तत्फलकत्वमिति भावः ३५ तत इति ततः श्रोतृप्रोत्साहनानंतरं रामस्य वच
सा प्रचोदितौ कुशीलवौ मार्गविधानसंपदा गानं द्विविधं मार्गो देशी चेति तत्र प्राकृतावलंबि गानं देशी सं
स्कृतावलंबि तु मार्गः तयोर्मध्ये मार्गगानावलंबनसामग्र्याऽगायतां अगायतामित्यर्थः परिषद्गतः
सभामध्यगतः रामोऽपि विभूषया सीताचरितप्रधानस्वचरितस्य चिरकालं स्थितीच्छया प्रबंधस्यागी
तश्रवणेऽत्यासक्तमना बभूव शनैः परेण उत्तमपुरुषत्वात्स्वप्रशंसार्थकेऽत्र काव्ये शनैः प्रवृत्तिरिति ध्वन्यते
स्वयं श्रवणे च लोकानामुपदेशाय च तुष्ट्याऽऽश्रवणे प्रवृत्तौ तस्य स्थिरत्वं भवतीति तदाशयः ३६ इति चतुर्थः सर्गः ४

एवंसर्गचतुष्टयेनोपोद्घातमुक्त्वावस्तुनिर्देशंकुर्वन्नर्थादिविषयप्रयोजनादिदर्शयन्कर्तव्यंप्रतिजानानःसत्यादिग्रहमर्थे
यतेसर्वापूर्वमित्यादिश्लोकचतुष्टयेनकृत्स्नाइयंवसुंधराप्रजापतिंवैवस्वतमनुंउपादायउपक्रम्यजयशालिनांयेषांनृ
पाणांसर्वापूर्वंतेहिकामुष्मिकसर्वापूर्वंसाधनंयथास्यात्तथाआसीत् १ जयशालित्वंकुत्रचिदप्यहत्यदर्शयतियेषा
मिति येषांवंशेसगरोनामप्रभुःयेनसागरःस्वनामांकितः षष्टिगुणितानिपुत्रसहस्राणिषष्टिपुत्रसहस्राणीति
यंयांतंइंद्रयात्रयायागच्छंतंपर्यवारयन्परितोगच्छन् अनेनतद्द्वारार्पितवंशेनजगत्पवित्रीकरणसमर्थांगंगायद्वंशे
ऽवतारितेत्युच्यते तेनातिशयितमहिमनितद्वंशेभगवतायोग्यतासूचिता २. तेषामिक्ष्वाकूणांवंशेरामविषयेरामा

सर्वापूर्वमियंयेषामासीत्कृत्स्नावसुंधरा ॥ प्रजापतिमुपादायनृपाणांजयशालिनां ॥ १ ॥ येषांससगरो
नामसागरोयेनखानितः ॥ षष्टिपुत्रसहस्राणियंयांतंपर्यवारयन् ॥ २ ॥ इक्ष्वाकूणामिदंतेषांराज्ञांवं
शेमहात्मनां ॥ महदुत्पन्नमाख्यानंरामायणमितिश्रुतं ॥ ३ ॥ तदिदंवर्तयिष्यावःसर्वंनिखिलमादितः
धर्मकामार्थसहितंश्रोतव्यमनसूयता ॥ ४ ॥

यणमितिनाम्नाप्रसिद्धंमहदाख्यानमुत्पन्नमित्यन्वयः ३
तदिदंबुद्धिस्थंआदितःआदिमारभ्यनिखिलंउत्तरकांडांतंसर्वंवर्णपदच्युतिरहितंधर्मकामार्थाःसहितयस्मात्तत्स
हितंइत्यत्रकेनेत्याकांक्षायांमोक्षोपीतिगम्यते तेनपुरुषार्थचतुष्टयसाधनंवर्तयिष्यावःगास्यावःतच्चानसूयताअ
सूयतीत्यसूयन्नअसूयन्अनसूयन्स्वस्यान्यस्यचोपतापमकुर्वन्तेनानसूयताश्रोतव्यमित्यर्थः असुञुपतापे
इतिकंड्वादिगंतस्यशतरिरूपंअत्रतेषांवंशेइत्यनेनविषयउक्तः धर्मार्थसहितमित्यनेनप्रयोजनमुक्तं अनसू
यतोऽधिकारिणः प्रतिपाद्यप्रतिपादकभावःसंबंधइत्यनुबंधचतुष्टयंबोध्यं ४

अथतमावतरणायोग्यदेशंवैभवंदर्शयतिकोशलइति मुदितःराजभिर्धर्मतपरिपालनात् स्फीतःउत्तरोत्तरंवृद्धिं
प्राप्तः सरयूतीरेतदुपलक्षितदेशेनिविष्टःस्थितःजनपदोदेशोऽस्तीतिशेषः ५ अत्रावतारयोग्यंनगरंवर्णय
ति अयोध्येनश्लोकत्रयेण तत्रकोशलजनपदेऽयोध्यानामलोकविश्रुतानगर्यस्तियामानवेन्द्रेणमनुना
स्वयंनिर्मिताआसीत् पुरीसप्तपुर्यंतर्गता ६ दशचद्वेचयोजनानिद्वादशयोजनानिआयतादीर्घाश्रीमतीकां

कोसलोनाममुदितःस्फीतोजनपदोमहान्॥ निविष्टःसरयूतीरेप्रभूतधनधान्यवान्॥५॥ अयोध्यानामन
गरीतत्रासील्लोकविश्रुतामनुनामानवेंद्रेणयापुरीनिर्मितास्वयं॥६॥ आयतादशचद्वेचयोजनानिमहापु
री॥श्रीमतीत्रीणिविस्तीर्णासुविभक्तमहापथा॥७॥राजमार्गेणमहतासुविभक्तेनशोभिता॥मुक्तपु
ष्पावकीर्णेनजलसिक्तेननित्यशः॥८॥तांतुराजादशरथोमहाराष्ट्रविवर्द्धनः॥पुरीमावासयामासदिवंदे
वपतिर्यथा॥९॥

तीमती श्रीणियोजनानिविस्तीर्णातिर्यक्विस्तारवतीसुविभक्तामहापथावहिर्मार्गायस्याःसा ७ सुविभक्तेनसमजुतया त्वरूपेणमुक्तैर्विकसितैःपुष्पैरवकीर्णेननित्यशःजलसिक्तेनमहताराजमार्गेणशोभिता ८ अथनगर्यांमहाराजाधिष्ठितत्वरूपंगुणमाहतामिति महच्चतद्राष्ट्रंचमहाराष्ट्रंतद्वर्धयतिधर्मेणपालयतीतिमहाराष्ट्रविवर्द्धनोदशरथोराजातांपुरींतुपूर्वंनृपवैलक्षण्येनआवासयामासस्थापयांमास
स्वर्गेअमरावतीमिंद्रइव ९

वैलक्षण्यमेवदर्शयन्नयोध्यांवर्णयतिसर्गशेषेणकपाटेति तोरणंवहिर्द्वारालंकारस्ताहृवंधः प्रशस्तकपाटतो
रणांसंयुक्तंसुविभक्तंपरस्पराश्लिष्टंअंतरंयेषांतादृशाआपणायस्यांतां सर्वाणिसर्वविधानियंत्राणिशिलाक्षेपणा
प्रभृतीनिआयुधानिवाणाद्यस्तद्वतीं शिल्पिभिश्चित्रकारप्रभृतिभिरुपेतांयुक्तां १० सूताःस्तुतिपाठकाःमाग
धाःवंशावलीकथकाःतैःसंवाधांनिरंतरांश्रीमतींधनधान्यसमृद्धिमतींअतुलप्रभांनिरुपमकांतिरच्चैहृन्न

कपाटतोरणवतींसुविभक्तांतरापणां॥ सर्वयंत्रायुधवतीमुपेतांसर्वशिल्पिभिः॥१०॥ सूतमागधसंवाधां
श्रीमतीमतुलप्रभां॥ उच्चाट्टालध्वजवतींशतघ्नीशतसंकुलां॥११॥ वधूनाटकसंघैश्चसंयुक्तांसर्वतःपुरीं
उद्यानाम्रवणोपेतांमहतींशालमेखलां॥१२॥ दुर्गगंभीरपरिखांदुर्गामन्यैर्दुरासदां॥ वाजिवारणसंपूर्णां
गोभिरुष्ट्रैःखरैस्तथा॥१३॥ सामंतराजसंघैश्चवलिकर्मभिरावृतां॥ नानादेशनिवासैश्चवणिग्भिरुपशो
भितां॥१४॥

तैरट्टालध्वजैश्चयुक्तां शतघ्नीनामप्रकारसंरक्षणार्थमयोभारनिमितास्त्रायुधविशेषाः ११
वधूनांनाटकशालासमुदायैःसर्वतोयुक्तां उद्यानानिक्रीडार्थंपुष्पवाटिकाः उद्यानैराम्रवणैश्चोपेतांयुक्तां
शालःप्रकारःमेखलावद्दावरणभूतोयस्यास्तांमहतीमितिनगरीविशेषणं १२ जलदुर्गेणगंभीरअगाधापरिखा
यस्यांतां अतएवदुर्गांमित्रैरपिदुःखगम्यां अन्यैःशत्रुभिःदुरासदांअशक्यसमीपगमनामपिवारणागजाः
१२ सामंतेतिसमंतान्वर्येराजसमूहैः वलिःकरस्तद्दानरूपंकर्मयेषांतादृशैः १४

॥३६॥

त्नविकृतैःरत्ननिर्मितैःपर्वतसदृशैःप्रासादैःशोभितां कूटागारैःस्त्रीणांक्रीडागृहैः १५ अष्टापदंसुवर्णंतन्निर्मलेन
कृतःआकारःअलंकारोयस्यां विमानगृहंसप्तभूमिगृहं १६ गाढांनिबिडां अतएव अविच्छिद्रां इक्षुकांडरससमा
नत्वादुदकवतीम् १७ दुंदुभीःभेरीभिः ईकारांतत्वमार्षं भृशंनादितां पृथिव्यामत्यर्थं अत्यंतं अनुत्तमम् अमितिबहु
व्रीहिः १८ तपसाप्राप्तंदिविसिद्धानांविमानमिवपृथिव्यामनुत्तमामितिसंबंधः सुनिवेशितैःवेश्मनांअंतःबाह्यप्र

प्रासादैरत्नविकृतैःपर्वतैरिवशोभितां॥कूटागारैश्चसंपूर्णामिंद्रस्येवामरावतीं॥१५॥चित्रामष्टापदाका
रांवरनारीगणायुतां॥सर्वरत्नसमाकीर्णांविमानगृहशोभितां॥१६॥गृहगाढामविच्छिद्रांसमभू
मौनिवेशितां॥शालितंडुलसंपूर्णामिक्षुकांडरसोदकां॥१७॥दुंदुभीभिर्मृदंगैश्चवीणाभिःपणवै
स्तथा॥नादितांभृशमत्यर्थंपृथिव्यांतामनुत्तमां॥१८॥विमानमिवसिद्धानांतपसाधिगतंदिवि॥सु
निवेशितवेश्मांतांनरोत्तमसमावृतां॥१९॥येचबाणैर्नविध्यंतिविविक्तमपरापरं॥शब्दवेध्यंचवि
ततंलघुहस्ताविशारदाः॥२०॥ देशोयस्यांतां १९ येचेतिश्लोकत्रयमेकान्वयंविविक्तंस्वसमूहाद्भ्रष्टंसहायर
हितंअपरापरंपरेपित्रादयःअपरेपुत्रादयःतैर्हीनं वंशस्यैकतंतुमित्येकेस्वकीयपरकीयभिन्नंकेवलप्रेक्षकमित्य
न्ये तथाशब्दमात्रानुमितमतएववेधयोग्यंप्रच्छन्नमितियावत् तथाविधंतंचविहतमपुङ्खंकृत्वापश्चात्तंपला ॥२१॥
यितं ईदृशान्शब्दवेध्यान्येबाणैर्नविध्यंति येचलघुहस्ताःशीघ्रवेधिनःविशारदाः अस्त्रशस्त्रप्रयोगेसमर्था

स्तेषांसहस्रैःपूर्णामित्युत्तरेणासंबन्धः २०

बहुबलैरपिमत्तवृद्धैरपि २१ २२ अग्निमद्भिःआहिताग्निभिःगुणाःशमदमादयस्तद्वद्भिःवेदानांषडंगानांचपारगैः
महर्षिकल्पैःमहर्षिसदृशैःकेवलैःमुख्यैः ऋषिभिर्मंत्रद्रष्टृभिस्संप्रावृत्ताव्याप्ता २३ इतिपंचमःसर्गः ५ एवंभग
वदवतारयोग्यदेशंप्रदर्श्यतद्योग्यपुरुषंदर्शयतितस्यामिति इतःश्लोकचतुष्टयमेकान्वयः यथामनुर्वैवस्वतोलो
कस्यपरिरक्षिताआसीत् तथादशरथोराजातस्यामयोध्यायांपुर्यांवसन्लोकस्यभूलोकस्यपरिरक्षिताबभूवेति

सिंहव्याघ्रवराहाणांमत्तानांनदतांवने। हंतारोनिशितैःशस्त्रैर्बलाद्बाहुबलैरपि ॥ २१ ॥ तादृशानांसहस्रै
स्तैरभिपूर्णांमहारथैः ॥ पुरीमावासयामासराजादशरथस्तदा ॥ २२ ॥ तामग्निमद्भिर्गुणवद्भिरावृतां।
द्विजोत्तमैर्वेदषडंगपारगैः ॥ सहस्रदैःसत्यरतैर्महात्मभिर्महर्षिकल्पैरृषिभिश्चकेवलैः ॥ २३ ॥ इत्या
र्षेरामायणेवाल्मीकीयेबालकांडेपंचमःसर्गः ॥ ५ ॥ तस्यांपुर्यामयोध्यायांवेदवित्सर्वसंग्रहः ॥ दीर्घद।
र्शीमहातेजाःपौरजानपदप्रियः ॥ १ ॥ इक्ष्वाकूणामतिरथोयज्वाधर्मपरोवशी ॥ महर्षिकल्पोराजर्षि
स्त्रिषुलोकेषुविश्रुतः ॥ २ ॥ शेषः सकीदृशःवेदविद्वेदतदर्थंचवेत्तीतित्रैवर्णिकस्याद्यगुणवानुक्तःस
र्वसंग्रहःसर्वेषामपरिमितचतुरंगबलादिसामग्रीणांसंग्राहकःदीर्घदर्शीदीर्घंचिरकालभाविपदार्थंद्रष्टुं
शीलमस्यास्तीतितथातेजःप्रतापः १ अतिरथःदशसहस्रमहारथैर्योद्धा यज्वाविधिभिरिष्टवान् धर्मपु
तटाकखननारामप्रवर्तनादिषुरतः वशीस्वाधीनसर्वजनःमहर्षिकल्पःमहर्षितुल्यः २

बलवान चतुरंगसेनायुक्तः अतएव निहतामित्रः निहतशात्रवः मित्रवान्प्रशस्तमित्रयुक्तः विजितेंद्रियः निर्वि
द्वेषुशब्दादिष्वप्रवर्तेंद्रियः धनैर्हिरण्यरत्नांबराभरणादिभिरन्यैः संचयैर्निधिभिरितिपावत् यथाक्रमं श
क्रकुवेरोपमः ३ ४ एवंराजगुणान्लोकपालनंचोक्त्वापुरपालनमाहतेनेति सत्येऽभिसंधाऽभिप्रायो
यस्यतेनत्रिवर्गो धर्मार्थकामानुतिष्ठता अनुसरता सा पुरी पालिताऽभयदिति योजना ५ पालनफलं दर्शय

बलवान्निहतामित्रो मित्रवान्विजितेंद्रियः ॥ धनैश्च संचयैश्चान्यैः शक्रवैश्रवणोपमः ॥३॥ यथाम
नुर्महातेजा लोकस्य परिरक्षिता ॥ तथा दशरथो राजा लोकस्य परिरक्षिता ॥४॥ तेन सत्याभिसंधेन
त्रिवर्गमनुतिष्ठता ॥ पालिता सा पुरी श्रेष्ठा इंद्रेणेवामरावती ॥५॥ तस्मिन्पुरवरे हृष्टा धर्मात्मानो
बहुश्रुताः नरास्तुष्टा धनैः स्वैःस्वैरलुब्धाः सत्यवादिनः ॥६॥ नाल्पसंनिचयः कश्चिदासीत्तस्मि
न्पुरोत्तमे ॥ कुटुंबी योप्यसिद्धार्थोगवाश्वधनधान्यवान् ॥७॥

तितस्मिन्नित्यादिना हृष्टाः वाप्रमोत्थेन प्रीताः बहुश्रुतं शास्त्रश्रवणं येषां ते स्वैः स्वैर्धनैस्तुष्टाः परधनान
भिलाषिणा इत्यर्थः अलुब्धाः दाने प्राप्ते लोभरहिताः सत्यवादिनः सत्यवचनशीलाः ६ सतामुत्कृष्टव
स्तूनां निचयः सन्निचयः अल्पः सन्निचयो यस्य स नास्ति अभावमुखेन सर्वेषां बहुधनवत्तामूच्यते
योपि अगवश्वधनधान्यवान् अतएव असिद्धार्थः असिद्धैहिकामुष्मिकप्रयोजनः ईदृशः कुटुंबीन
कश्चिदासीदिति योजना ८ श्रीराम

कामीकामैकतत्परः कदर्यःआत्मानंधर्मकृत्यंचपुत्रदारांश्चपीडयेत् लोभाद्यःपितरौभ्रातॄन्सकदर्यइति
स्मृतः शक्यमितिसामान्येनपुंसकम् ८ सुसंयताःसुष्ठुनिगृहीतेंद्रियाः शीलंसत्स्वभावःवृत्तमाचारस्ताभ्यां
मुदिताः महर्षयइवअमलानिर्मलमनस्काइत्यर्थः ९ भोगोधर्मीविरुद्धःकामभोगः अमर्षः अविनिर्मलो

कामीवानकदर्योवानृशंसःपुरुषःक्वचित् ॥ द्रष्टुंशक्यमयोध्यायांनाविद्वान्नचनास्तिकः ॥ ८ ॥ सर्वे
नराश्चनार्यश्चधर्मशीलाःसुसंयताः ॥ मुदिताःशीलवृत्ताभ्यांमहर्षयइवामलाः ॥ ९ ॥ नाकुंडली
नामुकुटीनास्रग्वीनाल्पभोगवान् ॥ नामृष्टोननलिप्तांगोनासुगंधश्चविद्यते ॥ १० ॥ नामृष्टभो
जीनादातानाप्यनंगदनिष्कधृक् ॥ नाहस्ताभरणोवापिदृश्यतेनाप्यनात्मवान् ॥ ११ ॥ नानाहिता-
ग्निर्नायज्वानक्षुद्रोवानतस्करः ॥ कश्चिदासीदयोध्यायांनचावृत्तोनसंकरः ॥ ११ ॥ स्वकर्मनिरता
नित्यंब्राह्मणाविजितेंद्रियाः ॥ दानाध्ययनशीलाश्चसंयताश्चप्रतिग्रहे ॥ १२ ॥ ॥ ॥ ॥

ननलिप्तांगइतिसुप्सुपेतिसमासः लेपश्चंदनादिनातदाहनासुगंधइति १० निष्कउरोभूषणंअनात्मवान्
अजितांतःकरणाः ११ अयज्वासोमयागरहितः क्षुद्रःअल्पविद्यैश्वर्याभिमान् अवृत्तःसदाचाररहितःसंकरः
कुंडगोलकादिः १२ दानंनित्यप्राप्तंयथाशक्तिप्रतिग्रहःविधिनादत्तस्वीकारःतत्रसंयताःसंकुचिताःनि
षिद्धप्रतिग्रहरहिताइत्यर्थः १३ श्रीराम

॥३८॥ अनृतमसत्यंकथयतिवक्तीत्यनृतकः कैशवेऽप्रातोनुपसर्गेकः असूयतीतिअसूयकः अशक्तः ऐहिकपारलौकि
कार्यसाधनासमर्थः तदादशरथराज्यपालनकाले १४ षडंगानिशिक्षाकल्पोव्याकरणंज्योतिर्निरुक्तं
छंदः नाव्रतः एकादश्यादिव्रतरहितोन क्षिप्तचित्तःव्याकुलमनस्कः व्यथितःव्याध्यादिनापीडितः १५
अश्रीमान्कांतिरहितः अरूपवान्सौंदर्यरहितः नारीपक्षेअश्रीमतीअरूपवतीनृपेराजनिदृढसख्येअ

ननास्तिकोनानृतकोन कश्चिदबहुश्रुतः॥ नासूयकोन चाशक्तोनाविद्वान्विद्यतेतदा॥१४॥नाषडंगवि
दत्रास्तिनाव्रतोनासहस्रवान्॥नदीनःक्षिप्तचित्तोवाव्यथितोवापिकश्चन॥१५॥कश्चिन्नरोवानारी
वानाश्रीमान्नाप्यरूपवान्॥द्रष्टुंशक्यमयोध्यायांनापिराजन्यभक्तिमान्॥१६॥वर्णेष्वग्र्यचतु
र्थेषुदेवतातिथिपूजकाः॥कृतज्ञाश्चवदान्याश्चशूराविक्रमसंयुताः॥१७॥ ॥ ॥

भक्तिमान्स्नेहरहितोन १६ राजानंस्तुत्वातस्मिन्पुरवरेइत्यादिनाद्विजातिप्रशंसाकृता इदानींक्षत्रि
यादिसाधारण्येनवर्णाःप्रशंस्यन्तेवर्णेष्वितित्रिभिः अग्रेभवोऽग्र्योद्विजातयःसचतुर्थोयेषांतेषुसर्ववर्णेषु ७
वर्त्तमानानरावदान्यानशौंडाःकृतज्ञाउपकारज्ञाःब्राह्मणेषुअध्यापनशूरावाऽक्रमसंयुताश्चासन्नितिशेषः

३८

तस्मिन्पुरोत्तमेसर्वेनराःधर्मंसत्यंचसंश्रिताः अतएवहेतोर्दीर्घायुषःस्त्रीभिःपुत्रपौत्रैश्चसंयुताआसन् १८ क्षत्रं
त्रियजातिःब्रह्ममुखंब्राह्मणाःप्रधानंतदाज्ञानुवर्त्यासात् क्षत्रमनुव्रताःक्षत्रियस्यानुवर्त्तिनःउपचारिणःसे
विनःसंतःस्वधर्मनिरताः १९ २० अग्निकल्पानांशौर्यातिशयातिशयादग्नितुल्यानांपेशलानांअकुटिला

दीर्घायुषोनराःसर्वेधर्मंसत्यंचसंश्रिताः॥ सहिताःपुत्रपौत्रैश्चनित्यंस्त्रीभिःपुरोत्तमे॥१८॥ क्षत्रंब्रह्ममु
खंचासीद्वैश्याःक्षत्रमनुव्रताः॥ शूद्राःस्वधर्मनिरतास्त्रीन्वर्णानुपचारिणः॥१९॥ सातेनेक्ष्वाकुनाथेन
पुरीसुपरिरक्षिता॥ यथापुरस्तान्मनुनामानवेंद्रेणधीमता॥२०॥ योधानामग्निकल्पानांपेश
लानाममर्षिणां॥ संपूर्णाकृतविद्यानांगुहाकेसरिणामिव॥२१॥ कांबोजविषयेजातैर्बाल्हीकैश्च
हयोत्तमैः॥ वनायुजैर्नदीजैश्चपूर्णाहरिहयोत्तमैः॥२२॥

नांअमर्षिणांपराभिभवासहिष्णूनांकृतवि
द्यानांअभ्यस्तास्त्रशस्त्रविद्यानांयोधानांसंघैःसंपूर्णेतिसंबंधः २१ कांबोजविषयेकांबोजदेशेजातैःबा
ल्हीकैःतद्देश[illegible]जैःवनायुजैर्वनायुदेशजातैःनदीजैःसिंधुनदसमीपोत्थैःहरींद्रःतस्यहयःउच्चैःश्रवाःत
द्वत्तमैरश्वश्रेष्ठैःसापूर्णाभवत् २२

॥३९॥

गजसंपत्तिमाह विंध्येत्यादि वा हैमवतैर्हिमवत्पर्वतजातैः मातंगैर्गजैः २३ ऐरावतादयो दिग्गजाः अंजनाद्यस्ता
गजाद्वामनाद्यमगजान्निष्पन्नैर्द्विपैरपि सा पूर्णा आसीत् २४ भद्रैरिति भद्रा मंद्रा मृगाश्चेति त्रिविधेते पात्रि
विधा गजाः क्रमेण हिमवद्विंध्यस जाः भंद्रमंद्रमंद्रमृगाः त्रिस्वभावाः संकीर्णा गजाः भद्रमंद्रस्यादि
स्वभावाः तल्लक्षणमुक्तं वैजयंत्यां अंगप्रत्यंगाभद्रत्वं संश्लिष्टं भद्रलक्षणं तनुप्रत्यंगहीर्वोच्चप्रायो मृग

विंध्यपर्वतजैर्मत्तैः पूर्णा हैमवतैरपि ॥ महान्वितैरतिबलैर्मातंगैः पर्वतोपमैः ॥ २३ ॥ ऐरावतकुलीनै
श्च महापद्मकुलैस्तथा ॥ अंजनादपि निष्क्रांतैर्वामनादपि च द्विपैः ॥ २४ ॥ भद्रैर्मंद्रैर्मृगैश्चैव भद्रमं
द्रमृगैस्तथा ॥ भद्रमंद्रैर्भद्रमृगैर्मृगमंद्रैश्च सा पुरी ॥ नित्यमत्तैः सदा पूर्णा नागैरचलसंनिभैः ॥ २५ ॥
सा योजने च द्वे भूयः सत्यनामा प्रकाशते ॥ यस्यां दशरथो राजा वसन् जगदपालयत् ॥ २६ ॥

गुणो मतः भद्रमंद्रो भद्रमृगो भद्रमंद्रमृगोपि च मंद्रभद्रादयोप्येवमिति संकरजातयेति एवंभूतैर्म
त्तैरचलसन्निभैर्नागैः सा सदा पूर्णाभवत् २५ द्वे योजने द्वयोर्योजनयोः अत्यंतसंयोगे द्वितीया भूयः
योऽभ्यधिकं सत्यनामा योद्धुमशक्येत्यन्वर्थनामा योजनत्रयविस्तारवत्यां तस्यां मध्ये योजनद्वयम
त्यंतं योद्धुमशक्येत्यन्वर्थः अत्र हेतुमाह यस्यामिति राज्ञो मूलधामत्वात्

॥३९॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

तामिति शमितः अमित्रायेननक्षत्राणिनक्षत्रलोकान् २७ सर्गोक्तमर्थंपुनःसंक्षेपात्सर्गांतेदर्शयतितामिति
अर्गलंनामकपाटावष्टंभकतिर्यक्स्थापितदारुविशेषः शिवांमंगलवंती २८ इतिषष्ठःसर्गः ६ अथतस्य

तांपुरीसमहातेजाराजादशरथोमहान् ॥ शशासशमितामित्रोनक्षत्राणीवचंद्रमाः ॥२७॥ तांसत्यना
मांदृढतोरणार्गलांगृहैर्विचित्रैरुपशोभितांशिवां ॥ पुरीमयोध्यांनृसहस्रसंकुलांशशासवैशक्रस
मोमहीपतिः ॥२८॥ इत्यार्षेरामायणेवाल्मीकीयेवालकांडेषष्ठःसर्गः ॥६॥ तस्यामात्यागुणैरासन्नि
क्ष्वाकोःसुमहात्मनः ॥ मंत्रज्ञाश्चेंगितज्ञाश्चनित्यंप्रियहितेरताः ॥१॥ अष्टौवभूवुर्वीरस्यतस्यामा
त्यायशस्विनः ॥ शुचयश्चानुरक्ताश्चराजकार्येषुनित्यशः ॥२॥ धृष्टिर्जयंतोविजयःसिद्धार्थोह्यर्थ
साधकः ॥ अशोकोमंत्रपालश्चसुमंत्रश्चाष्टमोमहान् ॥३॥

मंत्रिसंपत्तिदर्शयति तस्येतिमहात्मनोम
तेस्तस्येक्ष्वाकेरिक्ष्वाकुवंशस्यदशरथस्यमंत्रज्ञाःकार्यविचारज्ञाः इंगितज्ञाःपराभिप्रायज्ञाःअमात्यागुणैर्वि
श्यमातामंत्रिगुणैरुपेताआसन् १ मंत्रिणःसप्तचाष्टौवाप्रकुर्वीतपरीक्षितानितिमनूक्तेरित्याहुःअष्टावि
ति शुचयःसर्वात्मनास्वामिद्रोहचिंतारहिताःनित्यशोराजकृत्येषुअनुरक्ताःतत्पराःअष्टावमात्यावभूवुः २
तेषांनामानिदर्शयतिधृष्टिरिति ३

॥ ४० ॥

वशिष्ठोवामदेवौ द्वौ ऋषिसत्तमौ अभिमतौ ऋत्विजौ मुख्यर्त्विजावास्तां तथापरे ऋत्विज इत्यर्थः मंत्रिणा
श्चेत्यस्य वशिष्ठाद्या इति शेषः अमात्याः देशादिकार्यनिर्वाहकार्यनिर्वाहकाः मंत्रिणो व्यवहारद्रष्टार इति भे
दः ४ तानेवाह सुयज्ञ इत्यादि ५ एतैर्ब्रह्मर्षिभिर्नित्यं सहिताः तस्य ऋत्विजः पौर्वकाः परंपरागताः आसन्निति
शेषः अथ मंत्र्यमात्यगुणान्यथायोगं प्रपंचयति सर्गशेषेण विद्येत्यादि विद्ययामासह विनीताः विद्यावि

ऋत्विजौ द्वावभिमतौ तस्यास्तामृषिसत्तमौ ॥ वसिष्ठो वामदेवश्च मंत्रिणश्च तथापरे ॥ ४ ॥ सुयज्ञोप्य
थजाबालिः काश्यपोप्यथ गौतमः ॥ मार्कंडेयस्तु दीर्घायुस्तथा कात्यायनो द्विजः ॥ ५ ॥ एतैर्ब्रह्म
र्षिभिर्नित्यं ऋत्विजस्तस्य पौर्वकाः ॥ विद्याविनीता ह्रीमंतः कुशला नियतेंद्रियाः ॥ ६ ॥ श्रीमंतश्च
महात्मानः शास्त्रज्ञा दृढविक्रमाः ॥ कीर्तिमंतः प्रणिहिता यथावचनकारिणः ॥ ७ ॥ तेजःक्षमायशः
प्राप्ताः स्मितपूर्वाभिभाषिणः ॥ क्रोधात्कामार्थहेतोर्वा न ब्रूयुरनृतं क्वचित् ॥ ८ ॥

नयोभयसंपन्ना इत्यर्थः ह्रीमंतः ऽकृत्यकरणेषु लज्जावंतः कुशलाः नीतौ समर्थाः नियतेंद्रियाः अ
विहितविषयेभ्यो निवृत्ताः ६ श्रीमंतो लक्ष्मीसमृद्धाः महात्मानः महाबुद्धयः शास्त्रज्ञाः नीतिशास्त्रज्ञाः
दृढविक्रमाः अप्रतिहतपराक्रमाः प्रणिहिताः राजकार्येषु सावधानाः यथावचनकारिणः राज्ञ इति शे
षः ७ तेजःक्षमायशांसि प्राप्ताः स्मितेति निर्मत्सरा इत्यर्थः क्रोधाद्वा कामहेतोरर्थहेतोर्वा अनृतमसत्यं
वचो न ब्रूयुः ८ ॥ ४० ॥

तेषां मंत्रिणां स्वेषु परेषु चरेषु शत्रुषु च कृतं क्रियमाणं चिकीर्षितं किंचिद्वृत्तं चारेण चारमुखेनाविदितं नास्ति ९
व्यवहारेषु निश्चितार्थप्रतिपादनेषु कुशलाः समर्थाः सौहृदेषु स्नेहेषु परिक्षिताः राज्ञेति शेषः ते मंत्रिणः सुतेष्व
पि प्राप्तकालं प्राप्तः सापराधत्वलक्षणः कालो यस्य ते यथायोग्यं दंडं धारयेयुः कुर्युरित्यर्थः १० कोशस्यार्थनि

तेषामविदितं किंचित्स्वेषु नास्ति परेषु च ॥ क्रियमाणं कृतं वापि चारेणापि चिकीर्षितं ॥ ९ ॥ कुशला व्य
वहारेषु सौहृदेषु परीक्षिताः ॥ प्राप्तकालं यथा दंडं धारयेयुः सुतेष्वपि ॥ १० ॥ कोशसंग्रहणे युक्ता
बलस्य च परिग्रहे ॥ अहितं चापि पुरुषं न हिंस्युरविदूषकं ॥ ११ ॥ वीराश्च नियतोत्साहा राजशास्त्रम
नुष्ठिताः ॥ शुचीनां रक्षितारश्च नित्यं विषयवासिनां ॥ १२ ॥ ब्रह्मक्षत्रमहिंसंतस्ते कोशं समपूरयन् ॥
सुतीक्ष्णादंडाः संप्रेक्ष्य पुरुषस्य बलाबलं ॥ १३ ॥ चयस्य संग्रहणे संपादने समर्थाः बलस्य चतुर्विधसेनायाः
परिग्रहे स्वार्थप्रदानेन संरक्षणे युक्ताः संतः अहितं शत्रुमपि अदूषकमनपराधिनं न हिंस्युः न पीडयेयुः ११
वीराः शत्रुनिवारणक्षमाः नियतोत्साहाः शत्रुजये नित्योत्साहाः राजशास्त्रं नीतिशास्त्रं अनुष्ठिताः अनुष्ठि
तवंतः अतएव विषयवासिनां स्वराज्यवासिनां शुचीनां साधूनां रक्षितारस्ते आसन् १२ ब्रह्म ब्राह्मणा
न् क्षत्रं क्षत्रियांश्चाहिंसंतः विनापराधं न प्रहरंतः सत्स्वप्यपराधेषु पुरुषस्यापराधिनो बलाबलं अपराधतार
तम्यं संप्रेक्ष्य अपराधगुरुत्वे सुतीक्ष्णादंडाः अपराधाल्पत्वे मृदुदंडाश्च ते कोशमपूरयन् अपूर्वं कोशपूरणे

बा॰
टी॰
८८

॥४१॥

अथमंत्रिगुणसंपत्तिफलंदर्शयति शुचीनामित्यादिश्लोकद्वयेन शुचीनामेकरूपमनोवाक्कर्मवतां एकबुद्धीनां
परस्परमेकबुद्धीनांसर्वेषांमंत्रिणांसंप्रजानतांपुरंराष्ट्रंविचारयतांपुरेवाराष्ट्रेवाक्वचिदपिमृषावादीअसत्यवादीन
रोनासीत् १४ मंत्रिणांनित्यासर्वंप्रशांतंनिर्बाधमासीदित्यर्थः १५ पुनर्मंत्रिणोविशेषयति सुवाससस्स्वस्त्रादिश्रेयेला
सुवेषाःशोभनालंकाराःनयचक्षुषाजाग्रतःजागरूकाः १६ गुणगृहीता गृहीतगुणाः विदेशेष्वपिसर्वतोविता

शुचीनामेकबुद्धीनांसर्वेषांसंप्रजानतां॥नासीत्पुरेवाराष्ट्रेवामृषावादीनरःक्वचित्॥१४॥ क
श्चिन्नदुष्टस्तत्रासीत्परदाररतिर्नरः॥प्रशांतंसर्वमेवासीद्राष्ट्रंपुरवरंचतत्॥१५॥सुवाससः
सुवेषाश्चतेचसर्वैशुचिव्रताः॥हितार्थंचनरेंद्रस्यजाग्रतोनयचक्षुषा॥१६॥गुरोर्गुणगृही
ताश्चप्रख्याताश्चपराक्रमैः॥विदेशेष्वपिविज्ञाताःसर्वतोबुद्धिनिश्चयाः॥१७॥अभितोगु
णवंतश्चनचासन्गुणवर्जिताः॥संधिविग्रहतत्त्वज्ञाःप्रकृत्यासंपदान्विताः॥१८॥ ॥

तत्वेहेतुर्बुद्धिनिश्चयाःबुद्धिसंपन्नाः १७ संधिःसामंत्रैःसमाधनंविग्रहस्तैःकलहस्तयोस्तत्वंदेशकालाद्युचितंजा
नंतीतितथा प्रकृत्याःत्रिगुणयासंपदाअन्विताः तत्रसात्त्विक्यासंपदाशिष्टपालनकालेभोगकालेराजस्यादुष्टनिग्र
हकालेतामस्यासंपदेतिविवेकः १८

॥४१॥

मंत्रोराष्ट्रकार्यचिंतातस्यसंवरणेवहिरप्रकटनेशक्ताः शूक्ष्मासुवुद्धिषुविचारेषुसक्ताअभिनिविष्टाःसद्यःप्रतिभानवंतइत्यर्थः
१९ ईदृशैःउक्तगुणविशिष्टैः अन्यैरपियोग्यगुणयुक्तैरमात्यैःसहअनघोव्यसनरहितोराजादशरथोवसुंधरांभूमिमन्व
शासत् २० चारेणचक्षुःस्थानीयेनअवेक्षमाणःस्वपरराष्ट्रवृत्तांतंपश्यन् प्रजाधर्मेणानुरक्तायथाभवतितथागृहवेरक्षयन्
प्रजानांपालनमनिष्टनिवृत्तिपूर्वकमिष्टप्रापणंकुर्वन् अधर्ममदंडदंडनादिवर्जयन्सर्वत्रहेतुतोसता २१ अतोहेतो

मंत्रसंवरणेशक्ताःसक्ताःसूक्ष्मासुवुद्धिषु॥नीतिशास्त्रविशेषज्ञाःसततंप्रियवादिनः॥१९॥ईदृशै
स्तैरमात्यैस्तुराजादशरथोनघः॥उपपन्नगुणोपेतैरन्वशासद्वसुंधरां॥२०॥अवेक्ष्यमाणश्चारे
णप्रजाधर्मेणारक्षयन्॥प्रजानांपालनंकुर्वन्नधर्मंपरिवर्जयन्॥२१॥विश्रुतस्त्रिषुलोकेषुवदा
न्यःसत्यसंगरः॥सतत्रपुरुषव्याघ्रःशशासपृथिवीमिमां॥२२॥नाध्यगच्छद्विशिष्टंवातुल्यंवा
शत्रुमात्मनः॥मित्रवान्नतसामंतःप्रतापहतकंटकः॥२३॥

त्रिषुलोकेषुविश्रुतःदयाविक्रमादिभिःप्रसि
द्धःवदान्यःदानशीलःसत्यसंगरःसत्यप्रतिज्ञःपुरुषव्याघ्रःपुरुषश्रेष्ठःसतत्रअयोध्यायांचसन्निमांपृथिवींशशास २२ वि
शिष्टमधिकंतुल्यंवाआत्मनःशत्रुंनाध्यगच्छत्नज्ञातवान् अत्रहेतुमाह मित्रवान्नतसामंतःपादानतसमानसामा
धिपतिः प्रतापेनहताःकंटकाःशत्रवोयस्यसः २३

उक्तमर्थं स्पष्टयन्नाह प्रशशासेति अर्धमेकं २४ सर्गार्थसंग्रहेणाः दर्शयन्ति सेति मंत्रो विचारस्तत्साध्यं हितं अभयत्र निविष्टैः कुशलैः सूक्ष्मार्थदर्शननिपुणैः समर्थैः कार्यकारणासमर्थैर्मंत्रिभिर्वृतो नृपः दीप्तिमवाप तेजोमयैर्गोभिः किरणैर्युक्त उदितोऽर्कः बालसूर्य इव २५ इति सप्तमः सर्गः ७ एवमतिधार्मिकत्वेन भगवदवतारयोग्यत्वं दशरथस्योक्त्वा तदुपयुक्त

प्रशशास जगद्राजा दिवि देवपतिर्यथा ॥२४॥ तैर्मंत्रिभिर्मंत्रहिते निविष्टैर्वृतोऽनुरक्तैः कुशलैः समर्थैः ॥ स पार्थिवो दीप्तिमवाप युक्तस्तेजोमयैर्गोभिरिवोदितोऽर्कः ॥२५॥ इत्यार्षे रामायणे वाल्मीकीये बालकांडे सप्तमः सर्गः ॥७॥ तस्य चैवं प्रभावस्य धर्मज्ञस्य महात्मनः ॥ सुतार्थं तप्यमानस्य नासीद्वंशकरः सुतः ॥१॥ चिंतयानस्य तस्यैवं बुद्धिरासीन्महात्मनः ॥ सुतार्थं वाजिमेधेन किमर्थं न यजाम्यहं ॥२॥ स निश्चितां मतिं कृत्वा यष्टव्यमिति बुद्धिमान ॥ मंत्रिभिः सह धर्मात्मा सर्वैरपि कृतात्मभिः ॥३॥ ततोऽब्रवीदिदं राजा सुमंत्रं मंत्रिसत्तमं ॥ शीघ्रमानय मे सर्वान्गुरूंस्तान्सपुरोहितान ॥४॥

तदाराधनोपक्रमं दर्शयति तस्येत्यादिना तप्यमानस्य तपः कुर्वतः १ चिंतयानस्य तपसाप्यसाध्यपुत्रोत्पत्त्युपायमन्वेषमाणस्य एवं वक्ष्यमाणरीत्या किमर्थमयजामि न संपश्ये २ यष्टव्यमिति मंत्रिभिः सह निश्चितां मतिं कृत्वा सुमंत्रमानयामासेति शेषः ३ ४ श्रीराम

त्वरितंतत्त्वरयास्वत्वरितविक्रमःत्वरितगमनःसमस्तान्संमिलितान्समानयतत्रराजगृहमितिशेषः ५ गुरूनेवाहमु
यतमितिसमानयेतिपूर्वेणान्वयःसुयज्ञादीनांगुरुत्वमार्त्विज्यकरणात् ६ धर्मेणार्थेनतुचहितंश्लक्ष्णंमधुरम् ८
सुतार्थंसुतमुद्दिश्यलालप्यमानस्यममशंविलपतोममराज्यादिनापिसुखंनभवति अतस्तदर्थंहयमेधेनयक्ष्यामी
तिममम्मतिर[illegible]ध्यवसायोस्ति ८ तस्मादहंशास्त्रदृष्टेनशास्त्रप्रोक्तेनकर्मणाविधिनायष्टुमिच्छामितेन

ततःसुमंत्रस्त्वरितंगत्वात्वरितविक्रमः॥समानयत्ततःसर्वान्समस्तान्वेदपारगान्॥५॥सुयज्ञंवाम
देवंचजाबालिमथकाश्यपं॥पुरोहितंवसिष्ठंचयेचाप्यन्येद्विजोत्तमाः॥६॥तान्पूजयित्वाधर्मात्मा
राजादशरथस्तदा॥इदंधमार्थसहितंश्लक्ष्णंवचनमब्रवीत्॥७॥ममलालप्यमानस्यसुतार्थं
नास्तिवैसुखं॥तदर्थंहयमेधेनयक्ष्यामीतिमतिर्मम॥८॥तदहंयष्टुमिच्छामिशास्त्रदृष्टेनकर्म
णा॥कथंप्राप्स्याम्यहंकामंबुद्धिरत्राविचिंत्यतां॥९॥ततःसाध्वितितद्वाक्यंब्राह्मणाःप्रत्यपूजयन्
वसिष्ठप्रमुखेरितं॥१०॥

मुखाःसर्वे
पार्थिवस्य

यागेनाहंकामंपुत्ररूपंकथंकेनप्रकारेणप्राप्स्यामिनिर्विघ्नभूयस्त्वादितिभावःअत्र
निर्विघ्नयागकरणेबुद्धिरुपायोविचार्यतां ९ प्रत्यपूजयन्तुष्टुवुःपार्थिवस्यमुखेरितंमाख्यासाद्गतोक्तमित्यर्थः १०

संभाराः यज्ञोपकरणानि संभ्रियंतां सम्पाद्यंतां ते प्रसिद्धाः तुरगोश्वमेधीयः ११ अभिप्रेतान्मनोभिप्रेतगुणयुक्तान्
धार्मिकी धर्माचरणविषया १२ हर्षेण हर्षाश्रुणा व्याकुले व्याप्ते ईक्षणे यस्य सः समर्थैः चतुःशता रक्षंतीति रक्षिस्त्यारक्ष
णसमर्थैश्चतुःशतराजपुत्रैरधिष्ठितो रक्षितः सोपाध्यायोऽध्वर्युप्रभृतिऋत्विक्सहितोऽश्वो विमुच्यतां अश्वमेध

उक्तश्च परमप्रीताः सर्वे दशरथं वचः॥ संभाराः संभ्रियंतां ते तुरगश्च विमुच्यतां॥ सरय्वाश्चोत्तरे तीरे
यज्ञभूमिर्विधीयतां ॥११॥ सर्वथा प्राप्स्यसे पुत्रानभिप्रेतांश्च पार्थिव॥ यस्य ते धार्मिकी बुद्धि
रियं पुत्रार्थमागता ॥१२॥ ततस्तु सोभवद्राजा श्रुत्वैतद्द्विजभाषितं॥ अमात्यानब्रवीद्राजा हर्ष-
व्याकुललोचनः ॥१३॥ संभाराः संभ्रियंतां मे गुरूणां वचनादिह॥ समर्थाधिष्ठितश्चाश्वः सोपाध्या
यो विमुच्यतां ॥१४॥ सरय्वाश्चोत्तरे कूले यज्ञभूमिर्विधीयतां॥ शांतयश्चापि वर्द्धंतां यथाकल्पं य
थाविधि ॥१५॥

स्वपदे पदे जुहोतीत्युक्तहोमनिर्वाहकाय च ऋत्विक्सहितः १४ शांतयः विघ्ननिवारकक
र्मणि वर्द्धंतां वर्द्धयंतामित्यर्थः यथाकल्पं यथाक्रमं क्रमस्तु कथ्यते कल्पे इति भागुरिः यथाविधि शास्त्रोक्तविध्यनतिक्र

अयंयज्ञःअश्वमेधःसर्वेषामपिमहिक्षितांमहींक्षयतिनिवासयतीतिमहीक्षित्क्षिनिवासगत्योरित्यस्मात्क्विप् तेनसर्वेषाम
पिराज्ञांप्राप्तुंशक्यःयत्किंचअनर्थकरः अपराधोऽपचारोनभवेत् प्रमादेसत्यनर्थःसिद्धएवेतिभीत्याक्षुद्रराजानोनकु
र्वतीत्यर्थः १६ विद्वांसःअश्वमेधस्यरूपाभिज्ञाःब्रह्मराक्षसाःयज्ञाच्छिद्रमंत्रक्रियालोपादिनाराक्षसत्वंप्राप्ताब्राह्मणाःअश्वा
श्वमेधेच्छिद्रमपराधंमृगयंतेअन्वेषयंते किंतत्रइत्यतआहविधिहीनस्येति १७ फलितमाहतत्तदिति तत्तनोहेतोर्मेएष

शक्यःप्राप्तुमयंयज्ञःसर्वेणापिमहीक्षिता॥ नापराधोभवेत्कष्टोयद्यस्मिन्क्रतुसत्तमे॥१६॥ छिद्रंहि
मृगयंतेत्रविद्वांसोब्रह्मराक्षसाः॥ विधिहीनस्ययज्ञस्यसद्यःकर्ताविनश्यति॥१७॥ तद्यथाविधि
पूर्वंमेक्रतुरेषसमाप्यते॥ तथाविधीयतांयज्ञःसमर्थाःकरणेष्विह॥१८॥ तथेतिचाब्रुवन्सर्वेमं
त्रिणःप्रत्यपूजयन्॥ पार्थिवेंद्रस्यतद्वाक्यंयथाज्ञप्तंनिशाम्यते॥१९॥ तथाद्विजास्तेधर्मज्ञावर्धयंतो
नृपोत्तमं॥ अनुज्ञातास्ततःसर्वेपुनर्जग्मुर्यथागतं॥२०॥ विसर्जयित्वातान्विप्रान्सचिवानिदमब्रवीत्
ऋत्विग्भिरुपसंदिष्टोयथावत्क्रतुराप्यतां॥२१॥

यतःभविधिपूर्वंशास्त्रोक्तप्रकारेणयथासमाप्यतेतथाविधानंय
त्नःक्रियतांइहकरणेषुसमर्थाःयूयमितिशेषः १८ तेसर्वेमंत्रिणःपार्थिवेंद्रस्यतद्वाक्यंनिशाम्ययथाज्ञप्तंआज्ञातापि
तंतथाकुर्मइत्यब्रुवन् समीचीनोमहाराजस्याध्यवसायइत्यपूजयंश्च १९ वर्द्धयंतःआशीर्भिरितिशेषः २० क्रतुः
संभारःआप्यतांसंपाद्यतां २१

२२ ताः प्रसिद्धाः कौशल्याद्याः पत्नीः पत्ताहीः पूर्वं दीक्षां दीक्षाविषयनिश्चयं विशत कुरुत अहं सुतकारणात्सुतार्थं
यक्ष्ये इत्युवाच २३ अतिकांते अत्यंतमिष्टेन मुखपद्मानि सुंदराणि मुखानीत्यर्थः इत्यष्टमः सर्गः ८ अथ भगव
इवतारा रामाधारणाकारणं पुत्रेष्टिमुपक्षिपति सर्गत्रयेणारात्तच्छ्रुत्वेति सूत१ तस्याश्वमेधविषयं राज्ञो वचनं श्रुत्वा रहः
१ एकांते इदमब्रवीत् इदं पत्तार्थं महास्पत्विग्भिरिति अयमश्वमेधप्रवृत्तिरूपः पुत्राद्योपाय ऋत्विग्भिर्वशिष्ठादिभि

इक्ष्वाकानपशार्दूलः सचिवान्समुपस्थितान् ॥ विसर्जयित्वा स्वं वेश्म प्रविवेश महामतिः ॥२२॥ ततः स गत्वा
ताः पत्नीर्नरेंद्रो हृदयंगमाः ॥ उवाच दीक्षां विशत यक्ष्येहं सुतकारणात् ॥२३॥ तासां तेनातिकांतेन वचने
न सुवर्चसां ॥ मुखपद्मान्यशोभंत पद्मानीव हिमात्यये ॥२४॥ इत्यार्षे रामायणे बालकांडे अष्टमः सर्गः
एतच्छ्रुत्वा रहः सूतो राजानमिदमब्रवीत् ॥ ऋत्विग्भिरुपदिष्टोयं पुरावृत्तो मया श्रुतः ॥१॥ सनत्कुमारो
भगवान्पूर्वं कथितवान्कथां ॥ ऋषीणां सन्निधौ राजंस्तव पुत्रागमं प्रति ॥२॥ काश्यपस्य च पुत्रो
स्ति विभांडक इति श्रुतः ऋष्यशृंग इति ख्यातस्तस्य पुत्रो भविष्यति ॥३॥ रुपदिष्टो मया पुरावृत्तः इतिहा
सरूपः श्रुतः १ कथमित्यत्राह सनत्कुमार इति भगवान्भविष्यज्ज्ञानरूपमाहात्म्यवान्कथां भविष्यद्विषयाम् २
काश्यपस्येति ख्यातो भविष्यतीत्यत्र धातुसंबंधे प्रत्ययाः इति भूते भविष्यतोः साधुत्वं ऋष्यशृंग इति ख्यायमानो भविष्य

श्रूयतांयःपुरावृत्तं
पुराणेचमयाश्रु
तम्

ऋ
शृं
मु
नि

४ ब्रह्मचर्यस्यद्वैविध्यंमेखलाजिनादिधारणरूपंमुख्यंब्रह्मचर्यं दारेष्वृतुगमनरूपमपरंगौणंलोकेषुप्रथितंविप्रैः
कथितंचतत्प्रकारद्वयमपिब्रह्मस्यभविष्यतितदाहयाज्ञवल्क्यः षोडशर्तुर्निशास्त्रीणांतस्मिन्युग्मासुसंविशेत् ब्रह्मचार्ये

सवनेनित्यसंवद्धोमुनिर्वनचरःसदा ॥ नान्यंजानातिविप्रेंद्रोनित्यंपितृनुवर्तनात् ॥ ४ ॥ द्वैविध्यंब्रह्म
चर्यस्यभविष्यतिमहात्मनः ॥ लोकेषुप्रथितंराजन्विप्रैश्चकथितंसदा ॥ ५ ॥ तस्यैवंवर्तमानस्य ।
कालःसमभिवर्तत ॥ अग्निंशुश्रूषमाणस्यपितरंचयशस्विनं ॥ ६ ॥ एतस्मिन्नेवकालेतुरोमपा
दःप्रतापवान् ॥ अंगेषुप्रथितोराजाभविष्यतिमहाबलः ॥ ७ ॥ तस्यव्यतिक्रमाद्राज्ञोभविष्यतिसुदारु
णा ॥ अनावृष्टिःसुघोरावैसर्वभूतभयावहा ॥ ८ ॥ अनावृष्ट्यांतुवृत्तायांराजादुःखसमन्वितः ॥
ब्राह्मणान्श्रुतसंवृद्धान्समानीयप्रवक्ष्यति ॥ ९ ॥ वपर्वाण्याद्याश्चतस्रश्चवर्जयेदिति ५ तथाविधस्य
ब्रह्मचर्यस्यप्रसक्तिंदर्शयतितस्येत्यादिनाअग्निंपितरंगुरुंचशुश्रूषमाणस्यतस्यकतिपयकालःसमभिवर्तत भ
विष्यतिलङ्अडभावश्चार्षः ६ एतस्मिन्तस्यब्रह्मचर्यदशायां ७ व्यतिक्रमात्विधिनिषेधोल्लंघनात्सुदारुणा
बहुकालव्यापिनीसुघोरास्वकीयसर्वराष्ट्रव्यापिनीअतएवसर्वभूतभयावहा ८ वृत्तायांजातायां श्रुतेनवेदाध्य

हरिवंशटी० ५

श्री सरस्वती पुस्तक भण्डार

॥६५॥

श्रुतकर्मणाः अज्ञानाद्वधिकरश्रुतमत्कर्मणाः यतोभवंतोलोकव्यवहारज्ञाअतअज्ञानाद्वधि मूलस्यमत्पापस्यप्रायश्चित्तंय
थाभवतितथानियममनुष्ठेयंधर्ममादिशंतु १० तेचमुख्यब्रह्मचारिणोकन्याहननंप्रायश्चित्तमूचुरित्याह इत्युक्ताइति ११२
१२ वीर्यवान्निपतद्ब्रह्मचर्यः १४ विनिश्चित्यब्राह्मणाएवनेष्यंतीतिनिश्चित्य १५ अपिचित्ताश्चिन्नाः अतएवनम्रमुखा

भवंतःश्रुतकर्माणोलोकचारित्रवेदिनः॥ समादिशंतुनियमंप्रायश्चित्तंयथाभवेत्॥१०॥ इत्युक्तास्तेत
तोराज्ञासर्वेब्राह्मणासत्तमाः॥ वस्यंतितेमहीपालंब्राह्मणावेदपारगाः॥११॥ विभांडकसुतंराजन्स
र्वोपायैरिहानय॥१२॥ आनयित्वामहीपालऋष्यश्रृंगंसुसत्कृतं॥ प्रयच्छकन्यांशांतांवैविधिना
सुसमाहितः॥१३॥ तेषांतुवचनंश्रुत्वाराजाचिंतांप्रपद्यते॥ केनोपायेनवैशक्यइहानेतुंसवीर्यवा
न्॥१४॥ ततोराजाविनिश्चित्यसहमंत्रिभिरात्मवान्॥ पुरोहितममात्यांश्चप्रेषयिष्यतिसत्कृता
न्॥१५॥ तेतुराज्ञोवचःश्रुत्वाव्यथितावनताननाः॥ नगच्छेयुऋषेर्भीताअनुनेष्यंतितंनृपं॥१६॥ वस्यं
तिचिंतयित्वातेतस्योपायाश्चतान्समान्॥ आनेष्यामोवयंविप्रंनचदोषोभविष्यति॥१७॥

ऋषेर्विभांडकाद्भीताः नचवयंगंतुंशक्ताः किंतुतत्रानयनोपायंचिंत्यवक्ष्यामइतिसांत्वयिष्यंति १६ दोषः ऋष्यश्रृंगस्यब्र
ह्मचर्यवैकल्पदोषः अस्माकंऋषिशापदोषश्चनभविष्यति १७

॥६५॥

शनत्कुमारोक्तंसमाप्यस्वयमाहएवमिति देवःइंद्रःपर्जन्यंवर्षयंस्तद्देशे शांताचास्मैप्रदीयते प्रस्तावर्तमानसमीपेल
ट् १८ ऋंगराजमित्रत्वस्यराज्ञिवस्यमारात्वेनमित्रजामातास्यस्यापिजामातैवेत्यतोजामातेत्युक्तिः एवंसनत्कुमारकथि
तपुत्रोत्पत्त्युपायरूपंवस्तुमयानुव्याहृतं १९ अथेतिहृष्टःनियतपुत्रप्राप्त्युपायलाभात्तुष्टः सोच्यतांतद्विषयाकथ्यो

एवमंगाधिपेनैवगणिकाभीऋषेःसुतः ॥आनीतोवर्षयद्देवःशांताचास्मैप्रदीयते ॥१८॥ऋष्यशृंगस्तु
जामातापुत्रांस्तवविधास्यति ॥सनत्कुमारकथितमेतावद्व्याहृतंमया ॥१९॥अथहृष्टोदशरथःसु
मंत्रंप्रत्यभाषत ॥यथर्ष्यशृंगस्त्वानीतोयेनोपायेनसोच्यतां ॥२०॥इत्यार्षेरामायणेवालकांडेनवमःसर्गः
९॥सुमंत्रश्चोदितोराज्ञाप्रोवाचेदंवचस्तदा ॥यथर्ष्यशृंगस्त्वानीतःशृणुमेमंत्रिभिःसह ॥१॥रोमपाद
मुवाचेदंसहामात्यःपुरोहितः ॥उपायोनिरपायोयमस्माभिंचिंतितः ॥२॥

रभि

च्यतामित्यर्थः २० इतिनवमःसर्गः ९ राज्ञाप्रचोदितःताहृशातपश्विनोगणिकाभिरनयनमत्याश्चर्यमितिविस्ते
राकथनायप्रेरितःसुमंत्रस्तदेदंवचउवाच सऋष्यशृंगः यथामंत्रिभिरानीतःतथामेमत्तःशृणुहप्रसिद्धो १ निर
पायःअव्यभिचारिफलः २

नारीणां नारीसंबंधविषयाणां शब्दादीनां तत्संबंधिसुखस्य चेत्यर्थ ३ अभिमतैः प्राणिमात्रस्येति शेषः इंद्रियार्थैस्तद्विषयगीत्यादिभिः अध्यवसीयतां निश्चीयताम् ४ तदाह गणिका इति प्रलोभ्य वंचयित्वा सत्कृताः अस्माभिः कृतबहुमानाः ५ राजा पुरोहितं त्वयैव तथा कर्त्तव्यमिति प्रत्युवाच अथ पुरोहितस्य विप्रत्वाद्गणिकाभिः संवादोनुचित इति

ऋष्यशृंगो वनचरस्तपःस्वाध्यायसंयुतः ॥ अनभिज्ञः स नारीणां विषयाणां सुखस्य च ॥३॥ इंद्रियार्थैरभिमतैर्नरचित्तप्रमाथिभिः ॥ पुरमानाययिष्यामः क्षिप्रं चाध्यवसीयतां ॥४॥ गणिकास्तत्र गच्छंतु रूपवत्यः स्वलंकृताः ॥ प्रलोभ्य विविधोपायैरानयिष्यंति सत्कृताः ॥५॥ श्रुत्वा तथेति राजा च प्रत्युवाच पुरोहितं ॥ पुरोहितो मंत्रिणश्च तथा चक्रुश्च ते तदा ॥६॥ वारमुख्यास्तु तच्छ्रुत्वा वनं प्रविविशुर्महत् ॥ आश्रमस्याविदूरेस्मिन्यत्नं कुर्वंति दर्शने ॥७॥ ऋषेः पुत्रस्य धीरस्य नित्यमाश्रमवासिनः पितुः स नित्यसंतुष्टो नातिचक्राम चाश्रमात् ॥८॥

सोपि मंत्रिणः प्रत्युवाच ते च तथा चक्रुः साक्षाद्गणिकाभिः पेरयन् ६ तन्मंत्रिवचः श्रुत्वा महद्वनं प्रविविशुः अस्मिन्वने शृंगवेरपुरगे आश्रमस्य विभांडकाश्रमस्याविदूरे निकटे स्थित्वा ऋषिपुत्रस्य दर्शने यत्नं कुर्वंति स्म ७ ऋषेः पुत्रस्येत्यादि विशेषणत्रयं यत्नकर्त्तव्यते हेतुः तं विवृणोति पितुरिति पितृलालनादिभिर्नित्यं संतुष्टः सन् आश्रमान्नातिचक्राम दूरं न निरगात् ८ राम

हेत्वंतरमाह वनेनेति नगरजंमर्त्यंस्त्रग्गजादि राष्ट्रजंकुक्कुटादि ९ तद्देशंवारस्त्रीसंचारदेशंयदृच्छयादैववशात् १० चि
त्रवेषानानालंकाराः ११ कस्त्वमितिकिंजातिःकस्यपुत्रःकिन्नामाचेत्येकःप्रश्नःकिंवर्त्तसेकिंमासि अपिचस्यकःसन्विज
नेघोरेवनेकिमर्थंचरसीतिप्रश्नत्रयं १२ यस्मात्काम्यरूपाःकमनीयरूपाःअप्रदृष्टरूपाःप्रागदृष्टवंतरूपास्तास्त्रियोवनेतेनदृ

वनेनजन्मप्रभृतिदृष्टपूर्वंतपस्विना॥स्त्रीवापुमान्वायद्वान्यत्सत्वंनगरराष्ट्रजं॥९॥ततःकदाचित्तंदे
शमाजगामयदृच्छया॥विभांडकसुतस्तत्रतास्त्वपश्यद्वरांगनाः॥१०॥ताश्चित्रवेषाःप्रमदागायंत्यो
मधुरस्वरैः॥ऋषिपुत्रमुपागम्यसर्वावचनमब्रुवन्॥११॥कस्त्वंकिंवर्तसेब्रह्मन्ज्ञातुमिच्छामहेव
यं॥एकस्त्वंविजनेघोरेवनेचरसिशंसनः॥१२॥अदृष्टरूपास्तास्तेनकाम्यरूपावनेस्त्रियः॥हार्दात्तस्य
मतिर्जाताआख्यातुंपितरंस्वकं॥१३॥पिताविभांडकोस्माकंतस्याहंसुतऔरसः॥ऋष्यशृंगइति
ख्यातंनामकर्मचमेभुवि॥१४॥

याःप्रनत्तासुहार्दात्दर्शनजस्नेहात्स्वकंपितरंआख्यातुंमतिर्बुद्धिर्जाता १३
पितेतिनामेत्यंतमाद्यप्रश्नोत्तरं औरसइतिपुराकिलमहाभूततटाख्येसरस्यपःस्पृशतोविभांडकस्यउर्वशींदृष्ट्वारेतोऽस्
खलत्तज्जलेनसहपीत्वाकाचिन्मृगीगर्भिण्यभूत् तस्यांजातऋष्यशृंगःमृगतुल्यशृंगत्वादृष्यशृंगाख्योऽभूदिति
पौराणिकीगाथा अतोऋष्यशृंगइतिमेनामआख्यातं द्वितीयप्रश्नोत्तरमाह कर्मचमदीयंभुविप्रसिद्धंतपोरूप

इहवनेसमीपप्रदेशेऽस्माकमाश्रमपदःकुरुत्वमार्थे अत्रवः पूजांकरिष्येऽआगंतव्यमितिभावःसर्वेषामितिपुल्लिंगनि
र्देशःस्त्रीत्वरूपापरिज्ञानकृतः १५ मतिरासक्ताभूत तेनसहतदाश्रमपदंजगमुश्च १६ १७ समुत्सुकाःउत्कंठिताअत
दाश्रमतोनयनेऋषेःविभांडकात् १८ मुख्यानिप्रशस्तानिस्वर्द्यंति माचिरंऋषेरागमनात्पूर्वमेवभक्षणीयमित्याश

इहाश्रमपदोस्माकंसमीपेशुभदर्शनाः॥ करिष्येवोत्रपूजांचसर्वेषांविधिपूर्वकं॥१५॥ ऋषिपु
त्रवचश्रुत्वासर्वासांमतिरासवै॥ तदाश्रमपदंद्रष्टुंजग्मुःसर्वाश्चतेनहि॥१६॥ आगतानांततःपू
जांऋषिपुत्रश्चकारह॥ इदमर्घ्यमिदंपाद्यमिदंमूलंफलंचनः॥१७॥ प्रतिगृह्णंतुनोपूजांसर्वाए
वसमुत्सुकाः॥ ऋषेर्भीतास्तुताःशीघ्रंगमनायमतिंदधुः॥१८॥ अस्माकमपिमुख्यानिफलानी
मानिवैद्विज॥ गृहाणविप्रभद्रंतेभक्षयस्वचमाचिरं॥१९॥ ततस्तास्तंसमालिंग्यसर्वाहर्षसमन्वि
ताः॥ मोदकान्प्रददुस्तस्मैभक्ष्यांश्चविविधान्शुभान्॥२०॥ तानिचास्वाद्यतेजस्वीफलानीतिस्मम
न्यते॥ अनास्वादितपूर्वाणिवनेनित्यनिवासिना॥२१॥ आपृच्छ्यचततोविप्रंव्रतचर्यांनिवेद्यच॥
गच्छंतिस्मापदेशात्ताभीतास्तस्यपितुःस्त्रियः २२

पः १९ समालिंग्यस्पर्शेनापिवशीकर्तुमालिंगनम् २० २१
व्रतचार्यामिष्येवकिंचिद्व्रतमनुष्ठेयंनिवेद्यतस्मादपदेशात्व्याजात्तस्यपितुर्भीताःसंत्योगच्छंतिस्म २२ श्रीरामायनमः

काश्यपश्यकश्यपपुत्रस्यविभांडकस्यात्मजोद्विजःऋष्यशृंगस्तस्यहृदयःअप्रसन्नचित्तआसीत्तादृशाचाक्षुषादिवि
षयसुखविश्लेषजाद्दुःखाद्धपरिवर्त्ततेस्मसंचरितिस्म २२. ततःऋष्यस्यचित्तत्वाद्धेतोःमनसाचिंतयन्तासांदर्शनस्पर्श

गतासुतासुसर्वासुकाश्यपस्यात्मजोद्विजः॥ऋष्यस्यहृदयश्चासीद्दुःखाच्चपरिवर्त्तते॥२३॥ततोपरेद्यु
स्तंदेशमाजगामसवीर्यवान्॥विभांडकसुतःश्रीमान्मनसाचिंतयन्मुहुः॥मनोज्ञायत्रतादृष्टावार
मुख्याःस्वलंकृताः॥२४॥दृष्ट्वैववचनतोविप्रमायांतंहृष्टमानसाः॥उपसृत्यततःसर्वास्तास्तमूचुरि
दंवचः॥२५॥सद्याश्रमपदंसौम्यअस्माकमितिचाब्रुवन्॥२६॥चित्राणामत्रबहूनिस्युर्मूलानिचफ
लानिच॥नत्रायेषविधिःश्रीमन्विशेषेणाभविष्यति॥२७॥श्रुत्वातुवचनंतासांसर्वासांहृदयंगमं
गमनायमतिंचक्रेनेतुंचविप्रसुतराधिपः॥२८॥तत्रचानीयमानेतुविप्रेतस्मिन्महात्मनि॥ववर्षसह
सादेवोजगत्प्रह्लादयंस्तदा॥२९॥वर्षेणैवागतंविप्रंविषयेस्वनराधिपः॥प्रत्युद्गम्यमुनिंप्रह्वःशि
रसाचमहींगतः॥३०॥

नगमनादिप्रकारान्स्मरन्नित्यर्थःदेशमाहमनोज्ञाइति २४ उपसृत्यप्रत्युद्गम्य २५
अस्माकमाश्रमपदमेहीतिचाब्रुवन् २६ यथाऽत्रतथात्राप्येषविधिःचित्रितमूलफलभक्षणविधिःविशेषे
णात्राधिकेनभविष्यति २७ हृदयंगमंमनोज्ञंनिन्युःनावमारोप्यगंगाप्रवाहेणेतिशेषः २८ तत्रेतिअंगदेशेइत्यर्थः
२९ वर्षेतोयवर्षेणसाहेयविषयेस्वदेशे ३०

॥६५॥

न्यायतः शास्त्रक्रमेणाऽर्घ्यं ददौ विप्रेंद्राद्दृष्यशृंगात्प्रसादं शांतिकाभिः प्रलोभ्यानयनकृतकोपनिवृत्तिं वव्रे विप्रं त्वां मन्युः कोपः माविशेदिति यद्वा विप्रं विभांडकं मन्युः पुत्रविश्लेषकृतकोपो माविशेदिति एवं प्रसादनाद्देवविभांडकोनेतु कोपइतिलोकत्तः ३१ अंतःपुरं प्रविश्यास्मै कन्यां दत्वा शांतेन निर्दुःखेन मनसोऽपि लक्षितो हर्षमवाप ३२ एवं स

अर्घ्यं च प्रददौ तस्मै न्यायतः सुसमाहितः ॥ वव्रे प्रसादं विप्रेंद्रान्न विप्रं मन्युराविशेत् ॥ ३१ ॥ अंतःपुरं प्रविश्यास्मै कन्यां दत्वा यथाविधि ॥ शांतां शांतेन मनसा राजा हर्षमवाप सः ॥ ३२ ॥ एवं स न्यवसत्तत्र सर्वकामैः सुपूजितः ॥ ऋष्यशृंगो महातेजाः शांतया सह भार्यया ॥ ३३ ॥ इत्यार्षे रामायणे वाल्मीकीये बालकांडे [illegible] दशमः सर्गः ॥ १० ॥ भूय एव च राजेंद्र शृणु मे वचनं हितं ॥ यथा स देवप्रवरः कथायामेवमब्रवीत् ॥ १ ॥ इक्ष्वाकूणां कुले जातो भविष्यति सुधार्मिकः ॥ नाम्ना दशरथो राजा श्रीमान्सत्यप्रतिश्रवाः ॥ २ ॥ अंगराजेन सख्यं च तस्य राज्ञो भविष्यति ॥ कन्या चास्य महाभागा शांता नाम भविष्यति ॥ ३ ॥

म:

वैः कामैः पूजितोऽसावृष्यशृंगस्तत्र लोमपादांतःपुरेऽन्ववसत् ३३ इति दशमः सर्गः १० एवं दशरथप्रश्नस्योत्तरमुक्त्वा कथाशेषं प्रस्तौति भूय इति देवप्रवरः सनत्कुमारः कथायां कथाप्रसंगे एवं वक्ष्यमाणरीत्या यथा उक्तवान् तथा शृणु १ सुधार्मिको भविष्यतीत्यन्वयः सत्यप्रतिश्रवाः सत्यप्रतिज्ञः २ तस्य राज्ञो दशरथस्याऽंगराजेन रोमपादेन सख्यं भविष्यति अस्य रोमपादस्य कन्या च शांता नाम भविष्यति ३

॥६८॥

कोशलंगराज इत्यत्राह पुत्र इति अंगस्य अंगनामकस्य राज्ञः पुत्रो रोमपादः तं रोमपादं प्रति स राजा दशरथो गमिष्यति ऋष्य
शृंगानयनार्थमिति शेषः ४ गमनप्रयोजनमाह अनपत्य इति हे धर्मात्मन् अनपत्योस्मि तस्मान्मम कुलस्य संतानार्थं
वंशाविच्छेदार्थं धर्मार्थं च शांताभर्त्ता क्रतुमाहरेत् प्रवर्त्तयेत् इति वक्ष्यतीति शेषः ५ मनसा च तस्य प्रवरस्य कर्त्तव्यतां

पुत्रस्त्वंगस्य राज्ञस्तु रोमपाद इति श्रुतः ॥ तं स राजा दशरथो गमिष्यति महायशाः ॥४॥ अनपत्योस्मि ध
र्मात्मन् शांताभर्त्ता मम क्रतुं ॥ आहरेत त्वया ज्ञप्तः संतानार्थं कुलस्य च ॥५॥ श्रुत्वा राज्ञोथ तद्वाक्यं मन
सा चाविचिंत्य च ॥ प्रदास्यते पुत्रवंतं शांताभर्त्तारमात्मवान् ॥६॥ प्रतिगृह्य च तं विप्रं स राजा विगतज्वरः
आहरिष्यति तं यज्ञं प्रहृष्टेनांतरात्मना ॥७॥ तं च राजा दशरथो यशस्कामः कृतांजलिः ऋष्यशृंगं द्विजश्रे
ष्ठं वरयिष्यति धर्मवित् ॥८॥

विचिंत्य निश्चित्य पुत्रवंतं शांताभर्त्तारं दास्यते इत्यन्वयः पुत्रवंतं इत्यनेन जातः पुत्रः
कृष्णकेशोग्नीनादधीतेति विध्युक्तमग्न्याधानाधिकारित्वं सूचितं तेनाहिताग्नित्वेनार्त्विज्याधिकारस्तस्य उक्तः
आहरिष्यति करिष्यतीत्यर्थः अंतरात्मा नाम मनसा उपलक्षितः ७ तस्मिन्यज्ञे तमेव ऋत्विजं करिष्यतीत्याह तं चेति
श्लोकद्वयमेकं वाक्यं वरयिष्यति वरो वरणं तां करिष्यतीत्यर्थः ८

किमर्थंतत्राहयत्तार्थमिति पुत्रकामेष्ट्यर्थंतद्द्वाराप्रसवार्थंपुत्रार्थंतद्द्वारास्वर्गार्थंनापुत्रस्यलोकोस्तीतिश्रुतेःकामंकाम्य
मानं ९ अमितविक्रमाःअपरिच्छिन्नपराक्रमाः १० पूर्वंपूर्वकालेपुरादेवयुगे एतच्चतुर्युगीप्राक्तनचतुर्युगापेक्षसत्य

पुत्रार्थंप्रसवार्थंचस्वर्गार्थंचनरेश्वरः॥लभतेचसतंकामंद्विजमुख्याद्विशांपतिः॥९॥पुत्राश्चास्यभविष्यंतिच
त्वारोऽमितविक्रमाः॥वंशप्रतिष्ठानकराःसर्वलोकेषुविश्रुताः॥१०॥एवंसदेवप्रवरःपूर्वंकथितवान्कथां
सनत्कुमारोभगवान्पुरादेवयुगेप्रभुः॥११॥सत्वंपुरुषशार्दूलसमानयसुसत्कृतं॥स्वयमेवमहाराजगत्वास
बलवाहनः॥१२॥सुमंत्रस्यवचःश्रुत्वाहृष्टोदशरथोभवत्॥अनुमान्यवसिष्ठंचसूतवाक्यंनिशाम्य
च॥१३॥सांतःपुरःसहामात्यःप्रययौयत्रसद्विजः॥वनानिसरितश्चैवव्यतिक्रम्यशनैःशनैः॥अभि
चक्रामतंदेशंयत्रवैमुनिपुंगवः॥१४॥

युगेइत्यर्थः ११ एतत्कथाकथनस्यविवक्षितार्थमाहसइति स्वय
मेवपुरोहितादिद्वारा १२ अनुमान्यकृतानुमतिकंकृत्वाअन्यथामयिस्थितेकथमन्यमाकारयतीतिवशिष्ठःकुप्ये
दतोसुमंत्रोक्तकथोक्तिपूर्वकमनुमान्येत्यर्थः सांतःपुरइत्यागमनंजामातृपलालनरीत्याशांतयासहसमानय
नार्थंयत्रतेमपारनगारे १३ अभिचक्रामजगाम १४

तंदेशमासाद्यतंऋषिपुत्रमासैददर्शतस्मिन्सत्त्वातिशयदीप्तनार्यं १५ ततस्तदनंतरंराजारोमपादः तस्मात्तोदशरथ

श्रामाघतंद्विजश्रेष्ठंरोमपादसमीपगं॥ऋषिपुत्रंददर्शाथोदीप्यमानमिवानलं॥१५॥ततोराजायथान्या
यपूजांचक्रेविशेषतः॥सखित्वात्तस्यवैराज्ञःप्रहृष्टेनांतरात्मना॥१६॥रोमपादेनचाख्यातंऋषिपुत्रा
यधीमते॥सख्यंसंबंधकंचैवतदातंप्रत्यपूजयत्॥१७॥एवंसुसत्कृतस्तेनसहोषित्वानरर्षभः॥सप्ता
ष्टदिवसान्राजाराजानमिदमब्रवीत्॥१८॥शांतातवसुताराजन्सहभर्त्राविशांपते॥मदीयंनगरंयातुकार्यं
हिमहदुद्यतं॥१९॥तथेतिराजासंश्रुत्यगमनंतस्यधीमतः॥उवाचवचनंविप्रंगच्छत्वंसहभार्यया॥२०॥ऋषि
पुत्रःप्रतिश्रुत्यजयेत्याहनृपंतदा॥सनृपेणाभ्यनुज्ञातःप्रययौसहभार्यया॥२१॥तावन्योन्यांजलिंकृत्वास्ने
हात्संश्लिष्यचोरसा॥ननंदतुर्दशरथोरोमपादश्चवीर्यवान्॥२२॥ततःसुहृदमापृच्छ्यप्रस्थितोरघुनं
दनः॥पौरेभ्यःप्रेषयामासदूतान्वैशीघ्रगामिनः॥२३॥

स्पयथान्यायंयथाविधिविशेषतःअत्यादरेणपूजां
चक्रेआदरेहेतुःसखित्वे १६ सख्यंमैत्रींसंबंधकंयोनादिसंबंधंचऋषिपुत्रायरोमपादेनआख्यातंकथितंतदातं
वणानंतरंतंदशरथंप्रत्यपूजयदृष्यशृंगइतिशेषः १७ १८ उद्यतंउपक्रांतं १९ संश्रुत्यप्रतिज्ञाय २० प्रतिश्रुत्यस्त्री
कार्यं २१ तौरोमपाददशरथौ २२ सुहृदंरोमपादं २३

॥५०॥ स्वलंकृतस्यप्रकारमाहधूपितमित्यादि आर्द्रैःसिक्तंतोयैःपश्चात्संमृष्टं २४ प्रेषितमित्यस्यऽक्केत्यादिः २५ द्विजर्षभंऋ
ष्यशृंगंपुरस्कृत्यशंखदुंदुभिनिर्घोषैःसहप्रविवेशः २६ ततःसर्वेनागराःनगरवासिनःइंद्रकर्मणानरेंद्रेणदशरथेन

क्रियतांनगरंसर्वंक्षिप्रमेवस्वलंकृतं॥धूपितंसिक्तसंमृष्टंपताकाभिरलंकृतं॥२४॥ततःप्रहृष्टाःपौरास्ते
श्रुत्वाराजानमागतं॥तथाचक्रुश्चतत्सर्वंराज्ञायत्प्रेषितंतदा॥२५॥ततस्स्वलंकृतंराजानगरंप्रविवे
शह॥शंखदुंदुभिनिर्ह्रादैःपुरस्कृत्यद्विजर्षभं॥२६॥ततःप्रमुदिताःसर्वेदृष्ट्वावैनागराद्विजं॥प्रवे
श्यमानंसत्कृत्यनरेंद्रेणेंद्रकर्मणा॥२७॥यथादिविसुरेंद्रेणसहस्राक्षेणकाश्यपं॥२८॥अंतःपुरंप्रवे
श्यैनंपूजांकृत्वाचशास्त्रतः॥कृतकृत्यंतदात्मानंमेनेतस्योपवाहनात्॥२९॥अंतःपुराणिसर्वाणिशांतांदृ
ष्ट्वातथागतां॥सहभर्त्राविशालाक्षींप्रीत्यानंदमुपागमन्॥३०॥पूज्यमानातुताभिःसाराज्ञाचैवविशेष
तः॥उवासतत्रसुखिताकंचित्कालंसहद्विजा॥३१॥इत्यार्षेरामायणेवाल्मीकीयेबालकांडेएकादशःसर्गः॥११॥

सत्कृत्यप्रवेश्यमानंतंद्विजंदृष्ट्वाप्रमुदिताआसन्नितिसंबंधः २७ दिविसुरेंद्रेणसहस्राक्षेणयथास्वनगरंप्रवेश्यमानंका
श्यपंवामनंदृष्ट्वास्वर्गवासिनइव २८ उपवाहनात्स्वसमीपानयनात् २९ तथागमनमेवव्याचष्टेसहभर्त्रेति प्रीत्या ॥५०॥
शांतायांप्रीत्या ३० सहद्विजासपुत्रभर्त्रकेतियावत् ३१ इत्येकादशःस

एवंदशरथःसर्वकामसमृद्धोपिपुत्रलाभसंतप्तस्तन्मूलभूतानिपापानिस्वाधिकारानुरूपेणाश्वमेधेनविनानश्यंतीतिम
त्वानःसर्वंपाप्मानंतरतितरतिब्रह्महत्यांयोश्वमेधेनयजतेइतिश्रुत्याराजासार्वभौमोऽश्वमेधेनयजेतेतिस्मृत्याच

ततःकालेवहुतिथेकस्मिंश्चित्सुमनोहरे॥वसंतेसमनुप्राप्तेराज्ञोयष्टुंमनोभवत्॥१॥ततःप्रणम्यशिरसातंवि
प्रंदेववर्णिनं॥यज्ञायवरयामाससंतानार्थंकुलस्यवै॥२॥तथेतिचसराजानमुवाचवसुधाधिपं॥संभा
राःसंभ्रियंतांतेतुरगश्चविमुच्यतां॥सरय्वाश्चोत्तरेतीरेयज्ञभूमिर्विधीयतां॥३॥ततोराजाब्रवीद्वाक्यंसुमं
त्रंमंत्रिसत्तमं॥सुमंत्रावाहयक्षिप्रमृत्विजोब्रह्मवादिनः॥४॥सुयज्ञंवामदेवंचजाबालिमथकाश्यपं
पुरोहितंवसिष्ठंचयेचाप्यन्येद्विजोत्तमाः॥५॥ततःसुमंत्रस्त्वरितंगत्वात्वरितविक्रमः॥समानयत्स
तान्सर्वान्समस्तान्वेदपारगान्॥६॥

विहितमश्वमेधंकर्तुंसंकल्पयतइदानीमुद्बुद्धसंस्कारेणसुमंत्रेणोदीरितव
चनाच्छांतयासहऋष्यशृंगमानीयप्राप्तकालेपूर्वसंकल्पिताश्वमेधंकर्तुमारेभेइत्याहततःकालइति ततःऋष्य
शृंगानयनानंतरंवहुतिथेऽनल्पेकालेगतेसतिकस्मिंश्चिद्दोषरहितेसुमनोहरेवसंतेसमनुप्राप्तेप्रारब्धेराज्ञोदशर
थस्ययष्टुंयागायमनोभवत् १ अथऋत्विग्वरणेप्राप्तेप्रथममृष्यशृंगंवृतत्वेनव तवानित्याहततइति देवव
र्णिनंदेववर्चसं २ सचऋष्यशृंगस्तथेत्युवाच ३ वरणमाहततइति ४ ऋत्विजःपरिगणयतिसुयज्ञमिति ५

त्वरितविक्रमःत्वरितपदन्यासः ६

धर्मार्थसहितं धर्मार्थरूपप्रयोजनयुक्तं युक्तं यथार्थं श्लक्ष्णं मधुरं ७ अनुध्यानात् अभावपुनरूपन्यस्यतिममलालप्य
मानस्येति ८ यष्टुमिच्छामि प्रतिबंधकदुरितशांत्यर्थं ऋषिपुत्रप्रभावेन ऋष्यशृंगकृतयज्ञप्रभावेन कामान्पुत्रा

तानूजपित्वा धर्मात्मा राजा दशरथस्तदा॥ धर्मार्थसहितं युक्तं श्लक्ष्णं वचनमब्रवीत्॥७॥ ममलालप्य
मानस्य पुत्रार्थं नास्ति वै सुखं॥ पुत्रार्थं हयमेधेन यक्ष्यामीति मतिर्मम॥८॥ तदहं यष्टुमिच्छामि ह
यमेधेन कर्मणा॥ ऋषिपुत्रप्रभावेन कामान्प्राप्स्यामि चाप्यहं॥९॥ ततः साध्विति तद्वाक्यं ब्राह्मणाः
प्रत्यपूजयन्॥ वसिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखाच्च्युतं॥१०॥ ऋष्यशृंगपुरोगाश्च प्रत्यूचुर्नृ
पतिं तदा॥ संभाराः संभ्रियंतां ते तुरगश्च विमुच्यतां॥११॥ सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयतां॥
१२॥ सर्वथा प्राप्स्यसे पुत्रांश्चतुरोमितविक्रमान्॥ यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता॥१३॥
ततः प्रीतोऽभवद्राजा श्रुत्वा तु द्विजभाषितं॥ अमात्यानब्रवीद्राजा हर्षेणेदं शुभाक्षरं॥१४॥

नवाप्स्यामीति ९ ऋष्यशृंगस्याघागार्भत्वाद्वसिष्ठप्रमुखा इत्युक्तं १० ११ १२ धार्मिकी प्रजासंरक्षणारूपधर्मप्रयो
जना १३ क्रियामेतान्नराजपदपुनरुक्तिः १४

संभाराः यज्ञोपकरणानि संभ्रियंतु संपाद्यंतां १५ यथाकल्पं यथाक्रमं [illegible] यथाविधि यथाशास्त्रं १६ कष्टः क्लेशकरः १७

गुरूणां वचनाच्छीघ्रं संभाराः संभ्रियंतु मे ॥ समर्थाधिष्ठितश्चाश्वः सोपाध्यायो विमुच्यतां ॥ १५ ॥ सरय्वा
श्चोत्तरे तीरे यज्ञभूमिर्विधीयतां ॥ शांतयश्चाभिवर्द्धंतां यथाकल्पं यथाविधि ॥ १६ ॥ शक्यः कर्तुमयं य
ज्ञः सर्वेणापि महीक्षिता ॥ नापराधो भवेत्कष्टो यद्यस्मिन् क्रतुसत्तमे ॥ १७ ॥ छिद्रं हि मृगयंते च वि
द्वांसो ब्रह्मराक्षसाः ॥ विधिहीनस्य यज्ञस्य सद्यः कर्ता विनश्यति ॥ १८ ॥ तद्यथाविधिपूर्वं मे क्रतुरेष स
समाप्यते ॥ तथा विधानं क्रियतां समर्थाः करणेष्विह ॥ १९ ॥ तथेति च ततः सर्वे मंत्रिणः प्रत्यपूज
यन् ॥ पार्थिवेंद्रस्य तद्वाक्यं यथाज्ञप्तमकुर्वत ॥ २० ॥ ततो द्विजास्ते धर्मज्ञमस्तुवन्पार्थिवर्षभं ॥ अ
नुज्ञातास्ततः सर्वे पुनर्जग्मुर्यथागतं ॥ २१ ॥ गतानां तु द्विजातीनां मंत्रिणस्तान्नराधिपः ॥ विसर्ज
यित्वा स्ववेश्म प्रविवेश महामतिः ॥ २२ ॥

छिद्रमिति अपराधमित्यर्थः १८ १९ २० अनुज्ञाताः तेनेति शेषः २१
गतानामिति गतेषु द्विजातिष्वित्यर्थः सप्तम्यर्थे षष्ठी विसर्जयित्वा संवत्सरांते यागार्थमिति शेषः २२ श्रीसीताराम

इतिद्वादशःसर्गः १२ एवंप्रथमवसंतेचैत्रेपौर्णमास्यांसंग्रहेष्टिंविधायप्रतिदिनंसावित्र्यादिषुकर्मस्वनुष्ठीयमानेषुसंवत्सर
रेपूर्णोऽश्वसंवत्सरांतेदीक्षितेनेतिसूत्रात्प्रसवार्थंप्रसवरूपंफलंहयमेधेनभावयितुंगतोदेवयजनमितिशेषः १ अथाध्व
र्युलोचतस्यसर्वस्यकर्तव्यत्वाद्ध्वर्युत्वेनवृतंतंवशिष्ठंप्रतिप्रार्थयतेअभिगम्येत्यादिश्लोकत्रयेणप्रश्रितंविनययुक्तं

इत्यार्षेरामायणेवालकांडेद्वादशःसर्गः॥१२॥पुनःप्राप्तेवसंतेतुपूर्णःसंवत्सरोभवत्॥प्रसवार्थंगतो
यष्टुंहयमेधेनवीर्यवान्॥१॥अभिवाद्यवसिष्ठंचन्यायतःप्रतिपूज्यच॥अब्रवीत्प्रश्रितंवाक्यंप्रसवा
र्थंद्विजोत्तमं॥२॥यज्ञोमेक्रियतांविप्रयथोक्तंमुनिपुंगव॥यथानविघ्नाःक्रियंतेयज्ञांगेषुविधी
यतां॥३॥भवान्हिस्निग्धःसुहृन्मह्यंगुरुश्चपरमोमहान्॥वोढव्योभवताचैवभारोयज्ञस्यचोद्यतः॥४॥
तथेतिचसराजानमब्रवीद्द्विजसत्तमः॥करिष्येसर्वमेवैतद्भवतायत्समर्थितं॥५॥ततोब्रवीद्द्विजा
न्वृद्धान्यज्ञकर्मसुनिष्ठितान्॥स्थापत्येनिष्ठितांश्चैववृद्धान्परमधार्मिकान्॥६॥

२ प्रसवार्थमाहयज्ञोमेयतःयथोक्तंशास्त्रोक्तमनतिक्रम्यक्रियतांयज्ञांगेषुद्रव्यदेवताकर्मादिरूपेषुयथाविघ्नानक्रियंते
राक्षसैरितिशेषःतथाविधीयतांक्रियतामित्यर्थः ३ ४ ५ स्थापत्यंस्थपतेरपकारस्यकर्मतत्रनिष्ठितान्प्रवीणान् ६

कर्मांतिकानामस्माश्रिकर्मणांनिर्वाहकान्भृत्यान्शिल्पकारान्शिल्पंचित्रादिवर्द्धकीन्तक्ष्णः खनकान्कूपवापीनिर्मा
तॄन् गणकान्ज्योतिर्विदः शिल्पिनःचर्मकारावाः नटाःसूत्रधाराःनर्त्तकाःनृत्यकारिणः ७ यत्तकर्मनिवर्त्तयितुमितिशे

कर्मांतिकांश्छिल्पकरान्वर्द्धकान्खनकानपि ॥ गणकांश्छिल्पिनश्चैवतथैवनटनर्त्तकान् ॥ ७ ॥
तथाशुचीन्शास्त्रविदःपुरुषान्सुबहुश्रुतान् ॥ यज्ञकर्मसमीहंतोभवंतोराजशासनात् ॥ ८ ॥ इष्ट
कावहुसाहस्रीशीघ्रमानीयतामिति ॥ श्चोपकार्याःक्रियंतांचराज्ञोबहुगुणान्विताः ॥ ९ ॥ ब्राह्मणा
वसथाश्चैवकर्त्तव्याःशतशःशुभाःभक्ष्यान्नपानैर्बहुभिःसमुपेताःसुनिष्ठिताः ॥ १० ॥ पौरजानपदस्यापि
कर्त्तव्याश्चसुविस्तराः ॥ आगतानांसुदूराच्चपार्थिवानांपृथक् ॥ ११ ॥ वाजिवारणशालाश्चतथाशय्या
गृहाणिच ॥ भटानांमहदावासावैदेशिकनिवासिनां ॥ १२ ॥ पृथक्

षः समीहंतोकर्मकुर्वन्तु इत्यब्रवीदिति पूर्वेणान्वयः ८ बहुसाहस्री बहुत्वसंख्येया इत्यर्थः अत्रेतिशब्दः परेणासंबध्य
तेसचैवमर्थंवर्त्ततेयथेष्टकानयनंएवमोपकार्याश्चक्रियंतामितिसंबंधः अत्रोपकार्याःराजसद्मानिगुणाःअन्नादुपस्क
रणानिसर्वंअब्रवीदित्यनुकर्षः ९ सुनिष्ठिताःमहावर्षवातादिनिवारणक्षमाः १० कर्त्तव्याःआवासा इतिशेषः ११
वैदेशिकनिवासिनांवैदेशिकानांस्वदेशवासिनांचेत्यर्थः महदावासा इत्यत्रात्वाभावश्चार्षः १२

सर्वकामैरुपस्थिताः काम्यमानैः सर्वपदार्थैर्युक्ताः जनस्य इतरस्य क्षुद्रजनस्यापि वहुशो भक्तं यथा भवति तथाऽऽवासाः कार्याः १३ न तु लीलयाऽनादरेणानेत्यर्थः यथा सर्ववर्णाः पूजां प्राप्नुवंति पूजां प्राप्तां मन्यंते तथा सुसत्कृताः कार्या इत्यर्थः १४ १५ तेषामपीति अपि त्वर्थे यथाक्रमं ज्येष्ठानुक्रमेण तत्र उपपत्तिमाह ये वसुभिर्धनैर्भोजनादिभिश्च पूजिताः

आवासा वहुभक्ष्या वै सर्वकामैरुपस्थिताः ॥ तथा योरजनस्यापि जनस्य वहुशो भक्तं ॥१३॥ दानमन्नं विधिवत्सत्कृतं न तु लीलया ॥ सर्ववर्णा यथा पूजां प्राप्नुवंति सुसत्कृताः ॥१४॥ न चावज्ञा प्रयोक्तव्या कामक्रोधवशादपि ॥ यज्ञकर्मसु ये मग्नाः पुरुषाः क्लेशिनस्तथा ॥१५॥ तेषामपि विशेषेण पूजा कार्या यथाक्रमं ॥ ये स्युः संपूजिताः सर्वैर्वसुभिर्भोजनेन च ॥१६॥ यथा सर्वं सुविहितं न किञ्चित्परिहीयते ॥ तथा भवंतः कुर्वंतु प्रीतिस्निग्धेन चेतसा ॥१७॥ ततः सर्वे समागम्य वसिष्ठमिदमब्रुवन् ॥१८॥

सेवकाः तेषां सर्वं कार्यं सुविहितं भवति किंचिदपि कार्यं न परिहीयते न हीनं भवति तस्मान्यपि प्रीतियुक्तेन चित्तेन भवंतस्तथा कुर्वंतु यथा सर्वे संपूजिताः स्युरिति १६ १७ १८

यथेष्टमितिक्रम्यमेधोपक्रमेइष्टंत्वयाभिलषितंकार्यंयथावदस्माभिःसुविहितंस्वनुष्ठितंतत्रनकिंचित्परिहीयतेनकिं
चित्परिलुप्यतेइदानीमपियत्त्वयोक्तंतत्रापिनकिंचित्परिहास्यतेकिंचिदपियथापरित्यक्तंनभवेत्तथातत्सुविहितंकरि
ष्यामइत्यर्थः १९ एवमुपकरणानिष्पत्त्यनंतरंराजाह्वानमाज्ञापयतिततइति निमंत्रयस्वत्याहूय २० मानवान्

यथेष्टंतत्सुविहितंनकिंचित्परिहीयते॥ यथोक्तंतत्करिष्यामोनकिंचित्परिहास्यते॥१९॥ ततःसु
मंत्रमाहूयवसिष्ठोवाक्यमब्रवीत्॥ निमंत्रयस्वनृपतीन्पृथिव्यांयेचधार्मिकाः॥२०॥ ब्राह्मणा
न्क्षत्रियान्वैश्यांश्छूद्रांश्चैवसहस्रशः समानयस्वसत्कृत्यसर्वदेशेषुमानवान्॥२१॥ मिथि
लाधिपतिंशूरंजनकंसत्यवादिनं॥ निष्ठितंसर्वशास्त्रेषुतथावेदेषुनिष्ठितं॥२२॥ तमानयमहा
भागंस्वयमेवसुसत्कृतं॥ पूर्वसंबंधिनंज्ञात्वाततःपूर्वंब्रवीमिते॥२३॥ तथाकाशीपतिंस्निग्धं
सततंप्रियवादिनं॥ सद्वृत्तंदेवसंकाशंस्वयमेवानयस्वह॥२४॥

चतुर्वर्णातिरिक्तान्संकरजातीयान्नरा
तंप्रसिद्धंस्वयमेवनतुदूतमुखेनपूर्वसंबंधिनंचिरंसुनसुहृदंततःपूर्वोक्तेभ्योनृपतिभ्यः २२ २३ २४

॥५६॥ केकयराज्ञानमितिसमासांतस्यानित्यत्वात्टजभावः २५ २६ तथेतिसमानय २७ प्राचीनान्प्राग्देशवर्त्ति

तथाकेकयराजानंवृद्धंपरमधार्मिकं॥श्वशुरंराजसिंहस्यसपुत्रंत्वमिहानय॥२५॥अंगेश्वरंवरा
जानेरोमपादंसुसत्कृतं॥वयस्यंराजसिंहस्यसमानययशस्विनं॥२६॥तथाकोसलराजानंभा
नुमंतंसुसत्कृतं॥मगधाधिपतिंशूरंसर्वशास्त्रविशारदं॥२७॥राज्ञःशासनमादायचोदयस्व
नृपर्षभान्॥प्राचीनान्सिंधुसौवीरान्सौराष्ट्रेयांश्चपार्थिवान्॥२८॥दाक्षिणात्यान्नरेंद्रांश्च
समस्तान्त्वानयस्वह॥संतिस्निग्धाश्चयेचान्येराजानःपृथिवीतले॥२९॥तान्त्वानययथा
क्षिप्रंसानुगान्सहबांधवान्॥एतान्दूतैर्महाभागैरानयस्वनृपाज्ञया॥३०॥वसिष्ठवाक्यंत
च्छ्रुत्वासुमंत्रस्त्वरितंतदा॥व्यादिशत्पुरुषांस्तत्रराज्ञामानयनेशुभान्॥३१॥स्वयमेवहिधर्मा
त्माप्रययौमुनिशासनात्॥सुमंत्रस्त्वरितोभूत्वासमानेतुंमहीक्षितः॥३२॥तेचकर्मांतिकाःसर्वेव
सिष्ठायचधीमते॥सर्वंनिवेदयंतिस्मयज्ञेयदुपकल्पितं॥३३॥

नः २८ २९ ३० ३१ ३२ यत्तेयज्ञनिमित्तंयदुपकल्पितंनिर्मितं।तत्सर्वंनिवेदयंतिस्म ३३ श्रीसीताराम ॥५६॥

अवरंपशिस्तनीयान्सपुनः शिष्यपतिस्ततः प्रीत इति अवज्ञया अनादरेण लीलया विनोदेन ३४ ३५ ३६ ३७ पति
यं यज्ञोपयोगिस्रुक्स्रुवादिसंभाररूपं अंतिकात्समीपे वर्तमाने ३८ उपहृतैः सर्वकामैः सर्वोपकरणैरुपेतं मनसैवे

ततः प्रीतो द्विजश्रेष्ठस्तान्सर्वान्पुनरब्रवीत् ॥ अवज्ञया न दातव्यं कस्यचिल्लीलयापि वा अवज्ञया कृ
तं हन्याद्दातारं नात्र संशयः ॥ ३४ ॥ ततः कैश्चिदहोरात्रैरुपयाता महीक्षितः ॥ बहूनि रत्नान्यादाय राज्ञो
दशरथस्य ह ॥ ३५ ॥ ततो वसिष्ठः सुप्रीतो राजानमिदमब्रवीत् ॥ उपयाता नरव्याघ्र राजानस्तव शासना
त् ॥ ३६ ॥ मयापि सत्कृताः सर्वे यथार्हं राजसत्तमाः ॥ ३७ ॥ यज्ञीयं च कृतं राजन्पुरुषैः सुसमाहितैः ॥ निर्या
तु च भवान्यष्टुं यज्ञायतनमंतिकात् ॥ ३८ ॥ सर्वकामैरुपहृतैरुपेतं वै समंततः ॥ द्रष्टुमर्हसि राजेंद्र मन
सेव विनिर्मितं ॥ ३९ ॥ तथा वसिष्ठवचनादृष्यशृंगस्य चोभयोः ॥ दिवसे शुभनक्षत्रे निर्यातो जग
तीपतिः ॥ ४० ॥

तिस्त्रिप्रप्रसिद्धत्वे दृष्टांत ३९ वसिष्ठेत्यविभक्तिको निर्देशः वसिष्ठस्य ऋष्यशृंगस्य च प्रत्येकमुभ
योरमिलितयोर्वचनमित्यर्थः दिवसे सोमसौम्यवारादौ शुभनक्षत्रे रोहिण्यादौ निर्यातो गृहाद्यज्ञशालां प्रतीत्यर्थः ॐ
अत्र कुशंखदुंदुभिमृदंगवाद्यैर्मंगलैः पटहकाहलादिभिः स्वस्तिकवाद्यमुख्यैर्मे वसिष्ठनिब्राह्मणैश्च सह संप्रयात इति

आरभन्नितिछांदसंआरंभंतेत्यर्थः ४१ यज्ञवाटंगताः सर्वेयजमानर्त्विगादयः यथाशास्त्रंवेदोक्तमनतिक्रमन
तिक्रम्ययथाविधिकल्पसूत्रानुसारेणयज्ञकर्मारभंतेतिपूर्वेणान्वयः ४२ इतित्रयोदशसर्गः १३ पूर्वसर्गेंतेशाला

ततोवसिष्ठप्रमुखाःसर्वएवद्विजोत्तमाः॥ ऋष्यशृंगंपुरस्कृत्ययज्ञकर्मारभंस्तदा ॥४१॥ यज्ञवाटंगता
ताःसर्वेयथाशास्त्रंयथाविधि॥ श्रीमांश्चसहपत्नीभीराजादीक्षामुपाविशत्॥४२॥ इत्यार्षेरामायणे
वाल्मीकीयेबालकांडेत्रयोदशःसर्गः॥१३॥ अथसंवत्सरेपूर्णेतस्मिन्प्राप्तेतुरंगमे॥ सरय्वाश्चोत्तरेतीरे
राज्ञोयज्ञोभ्यवर्तत॥१॥ ऋष्यशृंगंपुरस्कृत्यकर्मचक्रुर्द्विजर्षभाः॥ अश्वमेधेमहायज्ञेराज्ञोस्यसु
महात्मनः॥२॥ प्रवेशानंतरमश्वमेधारंभःसंग्रहेणादर्शितःअथविस्तरेणतत्तदनुष्ठानंदर्शयतिअथेत्यादि अ
श्वोत्सर्गानंतरंवर्षेपूर्णेतस्मिन्नश्वेमखःप्राप्तेसतिकर्मप्रावर्ततेत्यर्थः १ ऋष्यशृंगमिति अनेनप्रधानार्त्विज्यंब्रह्म
त्वंतस्येतिगम्यते २

वेदपारगाःवेदपारंतद्व्याववोधंगच्छन्तीतिवेदपारगास्तेयाजकाऋत्विजःकर्मपूर्वोक्तंविधिवत्कुर्वंतिस्मयथाविधिय
थावेदोक्तं यथान्यायंयथामीमांसंशास्त्रतकल्पसूत्रानुसारेणापरिक्रमंतिशास्त्रोक्तंस्वस्वक्रियाक्रमकालमविस्मृत्यप्र
वर्तते ३ द्विजास्त्वृत्विजःप्रवर्ग्यंदेयावैसत्रमासते त्यादिप्रवर्ग्यप्रासंगोक्तकर्मविशेषंशास्त्रानुसारेणकृत्वा उपस
दमिष्टिविशेषंतथैवकृत्वा शास्त्रतः उपदेशशास्त्रादधिकंप्रतिदेशतःप्राशंसर्वंकर्मचक्रुः ४ अथसोमप्रयोगंदर्शी

कर्मकुर्वंतिविधिवद्याजकावेदपारगाः॥ यथाविधियथान्यायंपरिक्रामंतिशास्त्रतः॥३॥ प्रवर्ग्यंशास्त्रतः
कृत्वातथैवोपसदंद्विजाः॥ चक्रुश्चविधिवत्सर्वमधिकंकर्मशास्त्रतः॥४॥ अभिपूज्यततोहृष्टाःस
वैचक्रुर्यथाविधि॥ प्रातःसवनपूर्वाणिकर्माणिमुनिपुंगवाः॥५॥ ऐंद्रश्चविधिवद्दत्तोराजाचाभिषुतो
नघः॥ माध्यंदिनंचसवनंप्रावर्त्ततयथाक्रमं॥६॥

यतिःअभिपूज्येति तत्तत्कर्मदेवतामभिपूज्यततः प्र
वर्ग्योपसद्दिनावसानेप्रातःसवनपूर्वाणिप्रातःसवनमध्यंदिनसवनतृतीयसवनानिकर्माणियथाविधिचक्रुः ५
ऐंद्रःइंद्रदेवताकोहविर्भागःदत्तः राजासोमलताचअभिषुतःग्रावभिःसंक्षुघनिःसारितसारोऽभूदित्यर्थः अभिषुत
इतिपाठेत्तोग्रशास्त्रैःस्तुतइत्यर्थः अनघःपापनिवर्त्तकः ६

यथेत्यस्य यथाविधीत्यर्थः ६ शिक्षाअभ्यासकालः तत्रगृहीतानिअक्षराणिशिक्षाक्षराणितत्समन्वितैः स्वरतोव
र्णतश्चअहीनैरितियावत् ८ गीतिभिःसामभिः ९ अहुतंअन्यथाहुतं स्खलितंनअज्ञानतोनकिमपिकर्मस्कं

तृतीयसवनंचैवराज्ञोस्यसुमहात्मनः ॥ चक्रुस्तेशास्त्रतोदृष्ट्वायथाब्राह्मणपुंगवाः ॥७॥ आह्वयांचक्रिरे
तत्रशक्रादीन्विबुधोत्तमान् ॥ ऋष्यशृंगादयोमंत्रैःशिक्षाक्षरसमन्वितैः ॥८॥ गीतिभिर्मधुरैःस्नि-
ग्धैर्मंत्राह्वानैर्यथार्हतः ॥ होतारोददुरावाह्यहविर्भागान्दिवौकसां ॥९॥ नचाहुतमभूत्तत्रस्खलि-
तंवानकिंचन ॥ दृश्यतेब्रह्मवत्सर्वंक्षेमयुक्तंहिचक्रिरे ॥१०॥ नतेष्वहःसुश्रांतोवाक्षुधितोवापिदृ-
श्यते ॥ नाविद्वान्ब्राह्मणःकश्चिन्नाशतानुचरस्तथा ॥११॥

ब्रह्मवत्मंत्रवत्क्षेमयुक्तंविघ्नरहितं १०
अथतत्रान्नदानसमृद्धिंदर्शयन्सप्तभिः नतेष्विति यद्यपिक्रीतेसोमेयज्ञान्नंनभोक्तव्यंतथापिसर्वद्रव्यस्य
वशिष्ठसात्कृतत्वान्नदोषः तेष्वहःसुपर्वदिनेषु श्रांतःपिपासितः अशतानुचरःशतसेवकरहितः ११

ब्राह्मणा इति त्रैवर्णिकोपलक्षणं नाथवंतः दासाः शूद्रा इति यावत् तापसा ग्रहस्थाः श्रमणाः संन्यासिनः १२
न तृप्तिरुपलभ्यते भोज्यसौष्ठवात् उदारपूर्वापरिसातिशयलोभेन मानसी तृप्तिर्नैवोपलभ्यते इत्यर्थः १३ तथा च

ब्राह्मणा भुंजते नित्यं नाथवंतश्च भुंजते ॥ तापसा भुंजते चापि श्रमणा भुंजते तथा ॥ १२ ॥ वृद्धाश्चा-
व्याधिताश्चैव स्त्रीवालाश्च तथैव च ॥ अनिशं भुंजमानानां न तृप्तिरुपलभ्यते ॥ १३ ॥ दीयतां दीयताम-
न्नं वासांसि विविधानि च ॥ इति संचोदितास्तत्र याचकुरनेकशः ॥ १४ ॥ अन्नकूटाश्च दृश्यंते बह-
वः पर्वतोपमाः ॥ दिवसे दिवसे तत्र सिद्धस्य विधिवत्तदा ॥ १५ ॥ नानादेशादनुप्राप्ताः पुरुषाः स्त्रीगणास्त-
था ॥ अन्नपाने सुविहितास्तस्मिन्यज्ञे महात्मनः ॥ १६ ॥ अन्नं हि विधिवत्स्वादु प्रशंसंति द्विजर्षभाः
अहो तृप्ताः स्म भद्रं ते इति शुश्राव राघवः ॥ १७ ॥ स्वलंकृताश्च पुरुषा ब्राह्मणान्पर्यवेशयन् ॥ उपा-
संते च तानन्ये सुमृष्टमणिकुंडलाः ॥ १८ ॥

कुः रद्दुरित्यर्थः १४ अन्नेति लुप्तविभक्तिकं अन्नस्येत्यर्थः सिद्ध-
स्य पक्वस्य चान्नस्य कूटा दृश्यंत इत्यर्थः १५ सुविहिताः सुतरां तर्पिताः १६ विधिवत् उपचारवत् १७ ब्राह्मणा-
न्ब्राह्मणेभ्यः पर्यवेषयन् भक्षान्नपानादीनि तिशेषः १८

कर्मांतरे एकसवनं समाप्य पुनः सवनांतरारंभकालागमात्पूर्वस्मिन्नंतरालकाले धीरा धीमंतः सुवाग्मि
नः पटुवाचः विप्रास्त्वृत्विजः परस्परजिगीषया वहून्हेतुवादान्हेतूपन्यासपूर्वकन्वादानचक्रुः १९ संस्तरे
यज्ञे प्रचोदिताः शास्त्रीयैः व्रूहिप्रेष्यादिशब्दैः प्रेरिता इत्यर्थः २० सदस्याः विधिदर्शिनः द्विजाः प्रवादकुशला

कर्मांतरेतदविप्राहेतुवादान्वहूनपि ॥ प्राहुः सुवाग्मिनो धीराः परस्परजिगीषया ॥१९॥ दिवसे दिवसे
नत्र संस्तरे कुशलाद्विजाः ॥ सर्वकर्माणि चक्रुस्ते यथाशास्त्रप्रचोदिताः ॥२०॥ नाषडंगविदत्रासी
न्नाव्रतो नाबहुश्रुतः ॥ सदस्यास्तस्य वै राज्ञो नावादकुशला द्विजाः ॥२१॥ प्राप्ते यूपोच्छ्रये तस्मिन्षड्
वैल्वाः खादिरास्तथा ॥ तावंतो विल्वसहिताः पर्णिनश्च तथापरे ॥२२॥

नामन २१ अथ पश्चालंभं कर्तुं यूपोच्छ्रयमाह प्राप्त इति श्लोकद्वयेन तस्मिन्नश्वमेधे यूपानामुच्छ्रयो यूपो
च्छ्रयः उच्छ्रय ऊर्ध्वस्थापनं तत्काले यूपायोच्छ्रीयमानायानुव्रूहीति यूपोत्क्षेपणप्रैषकाले प्राप्ते षट् वैल्वाः खा
दिराः तथा तावंतः षट्संख्याकाः विल्वासहिताः एकैकविल्वयूपसमीपस्थिताः परे अन्ये पर्णिनः पालाशाः पू

पालेविषडितितथाशब्दार्थः २२

श्लेष्मांतकोरज्जुदालस्तन्मयएकोयूपःअश्वमेधेस्विदुपदिष्टइत्यर्थःश्लेष्मांतकमयोग्निष्ठइतिपाठेअग्न्य
भिमुखःतथादेवदारुमयोप्यस्तियूपःसचनैकोनापिषट्किंद्वौतौव्यस्तबाहुभ्यांतावद्व्यामेनपरिग्रहःस्वी

श्लेष्मांतकमयोदिष्टोदेवदारुमयस्तथा॥ द्वावेवतत्रविहितौबाहुव्यस्तपरिग्रहौ॥२३॥ कारिताःसर्व
एवैतेशास्त्रज्ञैर्यज्ञकोविदैः॥ शोभार्थंतस्ययज्ञस्यकांचनालंकृताभवन्॥२४॥ एकविंशतियूपा
स्तेएकविंशत्यरत्नयः॥ वासोभिरेकविंशद्भिरेकैकंसमलंकृताः॥२५॥ विन्यस्ताविधिवत्सर्वेशि
ल्पिभिःसुकृतादृढाः॥ अष्टास्रयःसर्वएवश्लक्ष्णरूपसमन्विताः॥२६॥

कारोययोस्तौएवंचैकविंशतिरश्वमेधेयूपाइत्युक्तं २३ एतेसर्वेयूपाःयज्ञप्रयोगकुशलैर्यज्ञशास्त्रज्ञैःकारि
ताःकांचनैःकांचनपट्टैरलंकृताभवन् अभवन्नित्यर्थः अडभावआर्षः अलंकारोपिकिंशास्त्रीयोनेत्या
हतस्ययज्ञस्ययज्ञभूमेःशोभार्थमित्यर्थः २४ तेयूपाःएकविंशतिःएकविंशत्यरत्न्युन्नताःअरत्निर्नामचतु
विंशत्यंगुलयः २५ अष्टाश्रयःअष्टकोणाःश्लक्ष्णाःस्निग्धाः २६

पूपान्वर्णोपतिरुप्राच्छादिताइति यथासप्तर्षयोविराजंते यथापूपाव्यराजंतत इत्यर्थः २७ ~~[illegible]~~ चय
नमाह इष्टकामिति यथान्यायंयथासूत्रं अग्निः अग्न्याधारभूतोदेशः सब्राह्मणोः इष्टकाभिश्चितोबभू इत्य
र्थः २८ सचित्यइति राजसिंहस्यदशरथस्यचित्यश्चयननिर्वर्त्यः सदेशः कुशलैर्द्विजैः संचितः सम्यक्चितः सं
पूर्णः कृतइत्यर्थः तमेवाह गरुडइति गरुडसंस्थानइत्यर्थः रुक्मपक्षः रुक्मेष्टकाभिः पक्षनिर्माणात् त्रि

आच्छादितास्तेवासोभिः पुष्पैर्गंधैश्चपूजिताः सप्तर्षयोदीप्तिमंतोविराजंतेयथादिवि ॥२७॥
इष्टकाश्चयथान्यायंकारिताश्चप्रमाणतः ॥ चितोग्निर्ब्राह्मणैस्तत्रकुशलैर्यज्ञकर्मणि ॥२८॥ स
चित्योराजसिंहस्यसंचितःकुशलैर्द्विजैः ॥ गरुडोरुक्मपक्षोवैत्रिगुणोष्टादशात्मकः ॥२९॥ नियुक्ता
स्तत्रपशवस्तत्तदुद्दिश्यदैवतं ॥ उरगाःपक्षिणश्चैवयथाशास्त्रंप्रचोदिताः ॥३०॥ शामित्रेतुहया
स्तत्रतथाजलचराश्चये ॥ ऋत्विग्भिःसर्वमेवैतन्नियुक्तंशास्त्रतस्तदा ॥३१॥ ॥ ॥ ॥ ॥

गुणः षट्चितयोभवंतीतिप्रकृतोषट्प्रस्तारात्मकस्यचित्यस्याग्निदेशस्यप्रथमेक्षेत्रेगुणपविधानात्त्रिगु
णः अतएवाष्टादशात्मकः अष्टादशप्रस्तारात्मकइत्यर्थः २९ अथपूर्वोक्तेषुयूपेषुपशुनियोजनमाह
नियुक्ताइतियथाशास्त्रंइंद्रायएतेइत्याद्यनुवाकैःप्रचोदिताःप्रतिपादिताः ३० शामित्रेमारणाविशसनो

[illegible]

तत्रयूपेषुपशूनांत्रिशतंनियतंनियतंयदुक्तंतथाराज्ञो ऽश्वरत्नोत्तमंअश्वरत्नेषूत्तमंश्रेष्ठंचचनियतं त्रिशत
मितिप्रधानापेक्षयाअधिकानामपिसत्वात् ३२ मतान्वोपचारमाहकौशल्येतीतरामामुपलक्षणं परि

पशूनांत्रिशतंतत्रयूपेषुनियतंतदा ॥ अश्वरत्नोत्तमंतत्रराज्ञोदशरथस्यह ॥ ३२ ॥ कौशल्यातंहयंत
त्रपरिचर्यसमंततः ॥ कृपाणैर्विशशासैनंत्रिभिःपरमयामुदा ॥ ३३ ॥ पतत्रिणातदासार्द्धंसुस्थितेन
चचेतसा ॥ अवसद्रजनीमेकांकौशल्याधर्मकाम्यया ॥ ३४ ॥ होताध्वर्युस्तथोद्गाताहयेनसम-
योजयन् ॥ महिष्यापरिवृत्याथवावातामपरांतथा ॥ ३५ ॥

चर्यप्रोक्षणादिनासंस्कृत्यत्रिभिःकृपा
णैःअसिभिःएवंअश्वंविशशास महिष्यश्चास्याःसिनाकल्पयंतीतिसूत्रात् ३३ महिष्याःकर्तव्यांतरमा
हपतत्रिणेति पतत्रिणागरुडवेगेनअश्वेनपुराअश्वानांपक्षाःसंतीतिप्रसिद्धायाःएवंचारुःसुस्थितेन
स्थिरेणचेतसाउपलक्षितासतीकौशल्याधर्मेच्छयाएकांरजनींअश्वेनसहअवसत् ३४ अथहोत्रादयः
महिष्यकृताभिषेकयापरिवृत्याराज्ञोभोगाद्बहिष्कृतयादास्याचसहवावातांराज्ञोमध्यमजातीयांद्वितीय
भार्यांअश्वेनसमयोजयन्नित्यन्वयःवावाताशब्दोमध्यमभार्यावाची तदुक्तंऐतरेयब्राह्मणभाष्ये राज्ञो
हित्रिविधाःस्त्रियःउत्तममध्यमाधमजातीयाःतासांमध्येउत्तमजातेःक्षत्रियायामहिषीतिनाम मध्यमजा
तेर्वैश्यायाःवावातेतिअधमजातेःशूद्रा
याःपरिवृक्तिरिति ३५

॥५२॥

वपां चोद्धृत्य मेदः परमेण श्रौतप्रयोगचातुर्येण संपन्नः युक्तः श्रपयामास पपाच ३६ नराधिपा इत्याद्य ३७
३८ प्लक्षेति अमेध्यं अश्वमेधातिरिक्तपशूनां पाशुकं हविः प्लक्षशाखासु निधाय अवदीयते अश्वमेधे प्रधा
नस्य पशोरश्वस्य हविर्भागो वैतसे कटे निधाय अवदातव्य इष्यते ३९ अह इति अश्वमेधस्य त्रीणि सवनीया

पतत्रिणास्तस्य वपामुद्धृत्य नियतेंद्रियः॥ऋत्विक्परमसंपन्नः श्रपयामास शास्त्रतः॥३६॥धूमां
धं वपायास्तु जिघ्रंति स्म नराधिपाः॥यथाकालं यथान्यायं निर्णुदन्पापमात्मनः॥३७॥हयस्य
यानि चांगानि तानि सर्वाणि भूसुराः॥अग्नौ प्रास्यंति विधिवत्समस्ताः षोडशर्त्विजः॥३८॥प्ल
क्षशाखासु यज्ञानामन्येषां क्रियते हविः॥अश्वमेधस्य यज्ञस्य वैतसो भाग इष्यते॥३९॥अहोऽश्व
मेधः संख्यातः कल्पसूत्रेण ब्राह्मणैः॥चतुष्टोममहस्तस्य प्रथमं परिकल्पितं॥४०॥उक्थ्यं द्वितीयं
संख्यातमतिरात्रं तथोत्तरं॥कारितास्तत्र बहवो विहिताः शास्त्रदर्शनात्॥४१॥

न्यहानि इति कल्पसूत्रेण तन्मूलब्राह्मणैश्च अश्वमेधः त्र्यहः संख्यात उक्तः सवनीयाहां प्राधान्यात्तानि
अहोरात्राणि गण्यंते चतुष्टोमशब्देन अग्निष्टोमः ४० उत्तरं तृतीयं शास्त्रदर्शनाद्विहिताः बह
वः प्रधानाः क्रतवः तत्र कारिताः ४१

॥५२॥

केनेक्रतवइत्यपेक्षायामाह ज्योतिरित्यादि आयुरायुष्टोमः अतिरात्रावितिद्विवचनादतिरात्रस्यद्विःप्रयोगःत
थाप्तोर्यामावितिमहाक्रतुरितिजातावेकवचनं एतेमहाक्रतवइत्यर्थः ४२ अथदक्षिणादानमाहप्रा

ज्योतिष्टोमायुषीचैवमतिरात्रौचनिर्मितौ॥ अभिजिद्विश्वजिच्चैवमप्तोर्यामोमहाक्रतुः॥४२॥ प्राचींहो
त्रेददौराजादिशंस्वकुलवर्द्धनः॥ अध्वर्यवेप्रतीचींतुब्रह्मणोदक्षिणांदिशं॥४३॥ उद्गात्रेतुतथोदी
चींदक्षिणैषाविनिर्मिता॥ अश्वमेधेमहायज्ञेस्वयंभुविहितेपुरा॥४४॥ क्रतुंसमाप्यतुतदान्यायतः
पुरुषर्षभः॥ ऋत्विग्भ्योहिददौराजाधरांतांकुलवर्द्धनः॥४५॥ ऋत्विजस्त्वब्रुवन्सर्वेराजानंगतक
ल्मषं॥ भवानेवमहींकृत्स्नामेकोरक्षितुमर्हति॥४६॥ नभूम्याकार्यमस्माकंनहिशक्ताःस्मपालने॥ र
ताःस्वाध्यायकरणेवयंनित्यंहिभूमिप॥४७॥ निष्क्रयंकिंचिदेवेहप्रयच्छतुभवानिति॥ मणिर
त्नंसुवर्णंवागावोयद्वासमुद्यतं॥४८॥

चीमितिविविनिर्मिताकल्पेषुविहितास्वयंभूविहितेब्रह्मनिर्मि
तेप्रजापतिरश्वमेधमसृजतेतिश्रुतेः ४३ ४४ न्यायतःशास्त्रतः ४५ ४६ अशक्ताहेतुःरताइति ४७ नि
ष्क्रयंमूल्यंतनुभुवोमूल्यंदातुमशक्यं अतःकिंचिदेवेतिकिंचित्पदार्थमाहमणिरत्नं अनर्घरत्नंतस्या
पिराजार्हत्वादाह सुवर्णमिति यद्वासमुद्यतंउपस्थितंयत्किंचिदेवभवच्छक्यमित्यर्थः ४८ श्रीराम

॥६०॥ शतसहस्राणिदशलक्ष्यमितियावत् सुवर्णषोडशमाषुकंचतुर्गुणंचत्वारिंशत्कोटिःअर्जतानिप्रतिनि
धित्वेनदत्तानिनतुदक्षिणात्वेनअतस्तस्मात्कुरुत्वंरजतमदक्षिणामितिश्रुत्यानविरोधः ५० ततःसर्वेऋ
त्विजःसहिताःदक्षिणाप्राप्तंवसुधनंअंगीकृत्यविभागायऋष्यशृंगवशिष्ठाभ्यांप्रददुः ५१ सततस्तेन्या

तमब्रुवन्नृपश्रेष्ठधरण्यानप्रयोजनं॥ एवमुक्तोनरपतिर्ब्राह्मणैर्वेदपारगैः॥ ४९॥ गवांशतसहस्रा
णिदशतेभ्योददौनृपः॥ दशकोटिंसुवर्णस्यरजतस्यचतुर्गुणं॥ ५०॥ ऋत्विजस्तुततःसर्वेप्रददुःसहि
तावसु॥ ऋष्यशृंगायमुनयेवसिष्ठायचधीमते॥ ५१॥ ततस्तेन्यायतःकृत्वाप्रविभागंद्विजोत्तमाः
सुप्रीतमनसःसर्वेप्रत्यूचुर्मुदिताभृशं॥ ५२॥ ततःप्रसर्पकेभ्यस्तुहिरण्यंसुसमाहितः॥ जांबूनदं
कोटिसंख्यंब्राह्मणेभ्योददौतदा॥ ५३॥ दरिद्रायद्विजायाथहस्ताभरणमुत्तमं॥ कस्मैचिद्याचमाना
यददौराघवनंदनः॥ ५४॥

यतःशास्त्रतःयावदध्वर्यवेचेद्दत्तानितदर्द्धंप्रतिस्थात्रेतत्तृतीयंनेष्टेचतुर्थमुन्ने
त्रेइत्युक्तक्रमेणऋष्यशृंगवशिष्ठादिद्वाराविभज्यगृहीत्वेत्यर्थः अतएवतेमुदितास्सन्तोतिराजानमूचुः ५२
प्रसर्पकेभ्यःअभ्यागतेभ्यःजांबूनदंजंबूप्रभवंसुवर्णकोटिशःकोटिशब्दोनंतवाची ५३ अथसर्वदक्षिणादानानंत
रंयाचमानायदरिद्रायकस्मैचिद्दातव्यवस्त्वंतराभावाद्धस्ताभरणमेवददौ ५४ श्रीसियजीवनजू ॥६०॥

५५ विविधाश्चाशिषःश्राव्यमन्नादिषुअंतइत्याद्याः ५६ स्वर्गनयनंस्वर्गप्रापकंदुस्तरंप्राकृतैराजभिःप्राप्तिसमाप्तिकं ५७ तज्जुनादृशंकर्म ५८ तवेतिपुत्रियंकर्मकरिष्येसुताश्चभविष्यंतीत्युवाचेत्यन्वयः ५९ पुनरप्युवाच

द्विजेषु

ततःप्रीतेषुविधिवत्तैर्द्विजवत्सलः ॥ प्रणाममकरोत्तेषांहर्षपर्याकुलितेक्षणः ॥५४॥ तस्याशिषोथविविधा ब्राह्मणैःसमुदाहृताः ॥ उदारस्यनवीरस्यधरणीपांप्रणतस्यच ॥५६॥ ततःप्रीतमनाराजाप्राप्ययज्ञमनुत्तमं ॥ पापापहंस्वर्नयनंदुस्तरंपार्थिवर्षभैः ॥५७॥ ततोब्रवीदृष्यशृंगंराजादशरथस्तदा ॥ कुलस्यवर्द्धनंतत्तुकर्तुमर्हसिसुव्रत ॥५८॥ तथेतिचसराजानमुवाचद्विजसत्तमः ॥ भविष्यंतिसुताराजंश्चत्वारस्तेकुलोद्वहाः ॥५९॥ सतस्यवाक्यंमधुरंनिशम्यप्रणम्यतस्मैप्रयतोनृपेंद्रः ॥ जगामहर्षंपरमंमहात्मातमृष्यशृंगंपुनरप्युवाच ॥६०॥ इतिश्रीरामायणेवाल्मीकीयेबालकांडेचतुर्दशःसर्गः ॥ १४

मेधावीतिततोध्यात्वासकिंचिदिदमुत्तरं ॥ लब्धसंज्ञस्ततस्तंतुवेदज्ञोनृपमब्रवीत् ॥१॥

पुत्रजनककर्मततोपुनरपिप्रेरयामासेत्यर्थः ६० इतिचतुर्दशःसर्गः १४ ततोदशरथप्रेरणानंतरंमेधावी अशेषवेदशास्त्रबोधारणायोग्यबुद्धिमान् वेदज्ञःस्वरूपतोर्थतश्चवेदतत्त्ववित्सऋष्यशृंगःप्रतिज्ञातार्थनिर्वाहायकिंकर्त्तव्यमितिनिश्चेतुंकंचित्कालंध्यात्वासमाधिंकृत्वाइदमुत्तरंइदमिहउत्तरानुष्ठेयकृत्यमितिनिश्चित्यपश्चाल्लब्धसंज्ञःसमाध्युत्थितःतंनृप

८

॥६१॥

पं

किमब्रवीत ह्याह इष्टिमिति पुत्रियां पुत्रप्राप्तिकारणभूतां भूतकारणात्पुत्रप्राप्तिहेतोः अथर्वणवेदप्रोक्तैर्मं
त्रैर्विधानतः कल्पसूत्रसिद्धानियतफलत्वेन प्रसिद्धां इष्टिं तेन ह्यभिलषितफलसिद्धये करिष्यामीत्युक्ते
विशेषः २ मंत्रदृष्टेन वेदावगतेन कर्मणाऽग्नौ ख प जुहाव शास्त्रदृष्ट० क्रमेण० कामाहुतिमकरोदि

इष्टिंतेहंकरिष्यामिपुत्रीयांपुत्रकारणात् अथर्वशिरसिप्रोक्तैर्मंत्रैःसिद्धांविधानतः॥१॥ततःप्रा
क्रमदिष्टिंतांपुत्रीयांपुत्रकारणात् जुहावचाग्नौतेजस्वीमंत्रदृष्टेनकर्मणा॥३॥ततोदेवाःसगंध
र्वाःसिद्धाश्चपरमर्षयः॥भागप्रतिग्रहार्थंवैपूर्वमेवसमागताः॥४॥ताःसमेत्ययथान्यायंतस्मिन्सदसि
देवताः॥अब्रुवन्लोककर्तारंब्रह्माणंवचनंमहत्॥५॥भगवंस्त्वत्प्रसादेनरावणोनामराक्षसः॥सर्वा
न्नोबाधतेवीर्याच्छासितुंतंनशक्नुमः॥६॥त्वयातस्मैवरोदत्तःप्रीतेनभगवन्पुरामानयंतश्चतंनित्यंसर्वं ७
तस्यक्षमामहे॥७॥

त्वर्थः एतच्छेषं ततोवैयजमानस्येत्यादिनावक्ष्यति ३ मध्येभगवदवतरणस्येति
मित्तांतरं देवताभ्यर्थनं दर्शयति ततइतित्रेत्यर्थः देवादयः स्वस्वभागप्रतिग्रहार्थं उपक्रमात्पूर्वमेव
समागताः चकारेण ब्रह्मापि समुच्चीयते ४ ताश्च देवतास्तस्मिन्सदसि यथान्यायं यथाक्रमं समेत्य अं
तर्द्धानशक्त्या इतरानवलोकमितिशेषः लोककर्तारं स्वस्वामिनं ब्रह्माणं महत्फलेदारगुरुतरं वचनमब्रुव
न् ५ भगवन्निति त्वत्प्रसादेन जनिताद्वीर्यादित्यन्वयः ६ वरः अस्माभिरवध्यत्वरूपः तं वरं मानयंतः तस्य

[illegible] ॥६१॥

तदुपपादयति उद्वेजयतीत्यादिना उद्वेजयति भीषयति उच्छ्रितानुन्नतान्लोकपालान्द्वेष्टि त्रिदशराजानं प्रध
र्षयितुं स्थानात्प्रच्यावयितुमित्यर्थः समासांतोऽनित्यत्वान्न कृतः इच्छतीत्युक्तेरेतदुत्तरं कालमिंद्रजित्कृ

उद्वेजयति लोकांस्त्रीनुच्छ्रितान्द्वेष्टि दुर्मतिः॥ शक्रं त्रिदशराजानं प्रधर्षयितुमिच्छति॥८॥ ऋषीन्यक्षान्स
गंधर्वान्ब्राह्मणानसुरांस्तथा॥ अतिक्रामति दुर्धर्षो वरदानेन मोहितः॥९॥ नैनं सूर्यः प्रतपति पार्श्वे वा
ति न मारुतः॥ चलोर्मिमाली तं दृष्ट्वा समुद्रोऽपि न कंपते॥१०॥ तन्महन्नो भयं तस्माद्राक्षसाद्घोरदर्शनात्॥
वधार्थं तस्य भगवन्नुपायं कर्तुमर्हसि॥११॥ एवमुक्तः सुरैः सर्वैश्चिंतयित्वा ततोऽब्रवीत्॥ हंतायं विदितस्त
स्य वधोपायो दुरात्मनः॥१२॥ तेन गंधर्वयक्षाणां देवदानवरक्षसां॥ अवध्योऽस्मीति वागुक्ता तथेत्युक्तं च
तन्मया॥१३॥ नाकीर्तयदवज्ञानात्तद्रक्षो मानुषांस्तदा॥ तस्मात्स मानुषाद्वध्यो मृत्युर्नान्योऽस्य विद्यते॥१४॥

तइंद्रत्वं धरतितापचे ८ अतिक्रामति पीडयतीति यावत् ९ सूर्य एवं तं न प्रतपति न प्रतापयतीत्यर्थः १० त
तस्मात्कारणात्तस्माद्राक्षसान्महन्नो भयमुत्पन्नमिति शेषः कर्तुं चिंतयितुं ११ एवमुक्तो ब्रह्मेति शेषः चिं
तयित्वाऽपायमिति शेषः हंतेत्युपायस्मरणेन हर्षः १२ अयं शब्दार्थमाह तेनेति तत्तोथोक्तमित्यन्वयः
१३ तदेवच्यात्ववरणात्स्वसरेग्रवहानादवमानात् मृत्युर्मृत्युजनकः १४

॥ ६२ ॥ प्रह्वायथाकथंचिद्दोषापसंभावनयेतिभावः १५ अथपरमकारुणिकोभगवान्धर्मस्थापनादिकृतेस्वोपा
सकरशरथसुतीक्ष्णादिमनोरथपरिपूर्णायावतितीर्षुराजगामेत्याह एतस्मिन्नंतरेरक्षापेक्षासमवेसर्वदेवो
विहिदेवेशःमहाकारुणिकोयत् संसारतंत्रवाहित्वाद्रक्षापेक्षांप्रतीक्षतइत्युक्तोविष्णुःसर्वांतर्यामितया
वर्त्तमानोमहाद्युतिः आश्रितरक्षणावकाशलाभसमुदितहर्षप्रकर्षकांतियुक्तःशंखचक्रगदापाणिः

एतच्छ्रुत्वाप्रियंवाक्यंब्रह्मणासमुदाहृतं ॥ देवामहर्षयःसर्वेप्रहृष्टास्तेभवंस्तदा ॥ १५ ॥ एतस्मिन्नंतरे
विष्णुरुपयातोमहाद्युतिः ॥ शंखचक्रगदापाणिःपीतवासाजगत्पतिः ॥ १६ ॥ वैनतेयंसमारुह्यभास्कर
स्तोयदंयथा ॥ तप्तहाटककेयूरोवंद्यमानःसुरोत्तमैः ॥ १७ ॥ ब्रह्मणाचसमागम्यतत्रतस्थौसमाहितः
तमब्रुवन्सुराःसर्वेनमभिष्टूयसन्नताः ॥ १८ ॥

श्रितानांरक्षणापेक्षायांरक्षणोपकरणग्रहणायविलंबोमाभूदितिसर्वदातैरुपेतोवैकुंठादुपयातइतिसंबं
धः १६ वैनतेयोगरुडःकेयूरंबाहुभूषणं १७ तत्रसदसिब्रह्मणासमागम्यसमाहितःकरिष्यमाणारक्षणा
कृतेएकाग्रःतस्थौतमाश्रितरक्षणासन्नद्धंसर्वेसुराब्रह्मादयःसमभिष्टूयसम्यक्स्तुत्वासन्नताःप्रणताःसंतः १८ ॥ ६१ ॥

त्वामित्यर्द्धमेकंवाक्यंहेविष्णोलोकानांहितकाम्ययाहितेच्छयात्वांनियोक्ष्यामहेउत्साहयिष्यमःस्मारयेत्वांनशि
क्षयेइतिवत्केवलंत्वांप्रोत्साहयिष्यामःस्वयमेवस्वकीयपरक्षणेप्रवर्तत्वादितिभावः यदिनियोजनमेवार्थःस्या
त्तर्हिपूर्वश्लोकेऽभिषूपसन्नताइत्येतद्विरुद्ध तत्किंनुनियोजनमत्रप्रार्थनमेवहरस्तत्रनियोज्यतामितिवत
१९ किंनियोज्यमित्यत्राहराज्ञइति २० आत्मानंसोपकरणमात्मानं अन्येद्युःपांचजन्यात्माकैकेय्यां

त्वांनियोक्ष्यामहेविष्णोलोकानांहितकाम्यया १९ राज्ञोदशरथस्यत्वमयोध्याधिपतेर्विभोः धर्मज्ञस
वदान्यस्यमहर्षिसमतेजसः २० तस्यभार्यासुतिसृषुह्रीश्रीकीर्त्युपमासुचैविष्णोपुत्रत्वमागच्छकृ
त्वात्मानंचतुर्विधं २१ तत्रत्वंमानुषोभूत्वाप्रवृद्धंलोककंटकं अवध्यंदैवतैर्विष्णोसमरेजहिराव
णम् २२ सहिदेवान्सगंधर्वान्सिद्धांश्चऋषिसत्तमान् राक्षसोरावणोमूर्खोवीर्योद्रेकेणबाधते
२३

भरतोऽभवत् तदन्येद्युःसुमित्रायामनंतात्मातुलक्ष्मणःसुदर्शनात्माशत्रुघ्नोऽभूज्जातौयुगपत्प्रियेइतिपद्मो
क्तेः अत्रात्मानमितिसुत्तराशंखचक्रानंतानामपिभगवद्रूपतासूचिता चातुर्विध्यविधानंरावणोद्द्विजिह्व
वरागंधर्वेचघातिनाप्रत्येकंदेवकार्यहयारांतासम्भावात् २१ तत्रदशरथभार्यासु प्रवृद्धंवरबलभुज
बलैरभिवृद्धंमानुषभावःकिमर्थंभजनीयस्तत्राहअवध्यंदैवतैरिति २२ सकिमर्थंहंतव्यस्तत्राहसहीति

ततःवीर्याद्रेका रणातेनऋषयोविनिपातिताःक्रीडंतःक्रीडंत्वःलिंगव्यत्ययःप्रार्षः २४ तस्यवधार्थंमुनि
भिःसहवयमायाताःत्वत्समीपमितिशेषः २५ परमागतिरुपायःमनःकुरुप्रवर्तयितुमितिशेषः २६ एव

ऋषयश्चततस्तेनगंधर्वाप्सरसस्तथा॥ क्रीडंतोनंदनवनेरौद्रेणविनिपातिताः॥२४॥वधार्थंवयमाया
तास्तस्यवैमुनिभिःसह॥सिद्धगंधर्वयक्षाश्चततस्त्वांशरणांगताः॥२५॥त्वंगतिःपरमादेवसर्वेषांनःप
रंतप॥वधायदेवशत्रूणांनृणांलोकेमनःकुरु॥२६॥एवमुक्तस्तुदेवेशोविष्णुस्त्रिदशपुंगवः॥पि
तामहपुरोगांस्तान्सर्वलोकनमस्कृतः॥२७॥अब्रवीत्त्रिदशान्सर्वान्समेतान्धर्मसंहितान्॥भयंत्य
जतभद्रंवोहितार्थंयुधिरावणं॥२८॥सपुत्रपौत्रंसामात्यंसमित्रज्ञातिबांधवं॥हत्वाक्रूरंदुराधर्षंदेवर्षी
णांभयावहं॥२९॥दशवर्षसहस्राणिदशवर्षशतानिच॥वत्स्यामिमानुषेलोकेपालयन्पृथिवीमिमां
३०॥एवंदत्त्वावरंदेवोदेवानांविष्णुरात्मवान्॥मानुषेचिंतयामासजन्मभूमिमथात्मनः॥३१॥ ॥

रामं

मित्यादिसार्द्ध[illegible]श्लोकमेकान्वयः २८ धर्मसंहितान्शरणागतिरूपधर्मसंयुक्तान् भयमित्यादिसार्द्ध
श्लोकद्वयमेकान्वयं भयंत्यजतवोयुष्माकंभद्रमस्तुयस्मादहंसर्वेषांहितार्थं रावणंहत्वाधर्मसंस्थापना
यदशवर्षसहस्राणिवत्स्यामितियोजना २८ २९ ३० आत्मावान्सर्वात्मस्वामीमानुषेमनुष्यलोकेजन्म

भूमिंजन्मस्थानम् ३१

ततोविचारानंतरंरोचयामासप्रच्छन्न २२ दिव्यरूपाभिःदिव्यात्मस्वरूपविषयाभिस्तुतिभिःस्तुतिरूपप्रबंधै
स्तुष्टुवुः मधुसूदनमित्यनेनमधुवस्यमपिनिरसनीयइत्युक्तं २३ स्तुत्वापदद्युक्तदाहृतमिति भगवन्रा
वणमुद्धर समूलमुन्मूलय जन्मतएवउद्धतं उग्रतेजसउग्रप्रतापं वरदानेनप्रवृद्धदर्पंलोकान्विरावतीति

ततःपद्मपलाशाक्षःकृत्वात्मानंचतुर्विधं॥पितरंरोचयामासतदादशरथंनृपं॥२२॥ततोदेवर्षिगंधर्वाःस
रुद्रास्साप्सरोगणाः॥स्तुतिभिर्दिव्यरूपाभिस्तुष्टुवुर्मधुसूदनं॥२३॥तमुद्धतंरावणमुग्रतेजसंप्रवृद्धदर्पं
त्रिदशेश्वरद्विषं॥विरावणंसाधुतपस्विकंटकंतपस्विनामुद्धरतंभयावहं॥२४॥तमेवहत्वासबलंस
बांधवंविरावणंरावणमुग्रपौरुषं॥स्वर्लोकमागच्छगतज्वरश्चिरंसुरेंद्रगुप्तंगतदोषकल्मषं॥२५॥
॥इत्यार्षेरामायणेबालकांडेपंचदशःसर्गः॥१५॥

विरावणंसर्वलोकानामाक्रंदयितारं तपस्विनांकं
टकंशत्रुं अतएवतपस्विनांभयावहमित्यन्वयः २४ भयेनपुनरनुवादपूर्वकंप्रार्थयंतेतमेवेति तंहत्वैवे
त्यन्वयः हेसुरेंद्रउपेंद्रगुप्तंरक्षितंत्वयेतिशेषः गतदोषकल्मषंदोषारागद्वेषास्तद्रूपकल्मषहीनंस्वर्गलो
कंवैकुंठाख्यमागच्छेतिप्रार्थना २५ इतिपंचदशःसर्गः १५

॥६४॥ एवंमनुष्यलोकेदशरथपुत्रत्वेनावतीर्यरावणवधःकर्तव्यइत्युक्तं तत्रकिंमयाउपेंद्रादिवत्स्वरूपेणास्थातव्यमु
तप्रकारांतरेणेतिभगवान्स्वभक्तानांबहुमानार्थंपृच्छतिततइत्यादि नराणांसमूहोनारंनारमयनंवासस्था
नमस्येतिनारायणः सर्वांतर्यामित्यर्थः पक्षांतरेनराणामयनंनारायणःसर्वाधारःएवंसर्वस्मात्परतरोपि

ततोनारायणोविष्णुर्नियुक्तःसुरसत्तमैःजानन्नपिसुरानेवंश्लक्ष्णंवचनमब्रवीत्॥१॥उपायःकोव
धेतस्यराक्षसाधिपतेःसुराः॥यमहंतंसमास्थायनिहन्यामृषिकंटकं॥२॥एवमुक्ताःसुराःसर्वेप्रत्यू
चुर्विष्णुमव्ययं॥मानुषंरूपमास्थायरावणंजहिसंयुगे॥३॥सहितेपेतपस्तीव्रंदीर्घकालमरिं
दमयेनतुष्टोभवद्ब्रह्मालोककृल्लोकपूर्वजः॥४॥संतुष्टःप्रददौतस्मैराक्षसा~~हिमानवाःएवंपिता~~
यवरंप्रभुःनानाविधेभ्योभूतेभ्योभयंनान्यत्रमानुषात्॥५॥अवज्ञाताःपुरातेनवरदानेहिमानवाः
[illegible] एवंपिता[illegible]महात्तस्माद्वरंप्राप्यसगर्वितः॥६॥

सुरसत्तमैर्नियुक्तइत्याश्रितपारतंत्र्य
मुच्यते तादृशोपिविष्णुःजानन्नपिवधोपायंतत्संमानार्थंश्लक्ष्णंमधुरंवचनमब्रवीत् १ उपायइति
यमुपायमास्थायस्वीकृत्यतंहन्यांसउपायःकइत्यन्वयः २ ३ तत्रहेतुमाहसहीति लोककृत्त्वेहेतुर्लोक
पूर्वजइति ४ संतुष्टइति मानुषभिन्नेभ्यःप्राणिमात्रेभ्योभयंनभवेदितिवरंददावित्यन्वयः ५ अभयं
मानुषेभ्यःकुतोनदत्तमित्यत्राहअवज्ञाताइति ६ ॥६४॥

प्रकृतमुपसहरतितस्मादिति ८ २ सचापीतिदशरथोपीत्यर्थः तस्मिन्कालेभगवदवतीर्षाकालेपुत्रिया
मितिकृत्य दसः ९ निश्चयंअवतारविषयंआमंत्र्यसाधयामीत्युक्त्वाअंतर्द्धानंगतः तस्माद्देवसभाजा
दितिशेषः १० अथपुत्रकामेष्टिफलंभगवतश्चतुर्द्धावतारंसूचयन्प्रजापतिप्रेरितपुरुषेणासंप्रदा

उत्सादयतिलोकांस्त्रीन्श्रियश्चाप्यपकर्षति ॥ तस्मात्तस्यवधोदृष्टोमानुषेभ्यःपरंतप ॥ ७ ॥ इत्येतद्व
चनंश्रुत्वासुराणांविष्णुरात्मवान् ॥ पितरंरोचयामासतदादशरथंनृपं ॥ ८ ॥ सचाप्यपुत्रोनृपतिस्त
स्मिन्कालेमहाद्युतिः ॥ अयजत्पुत्रियामिष्टिंपुत्रेप्सुररिसूदनः ॥ ९ ॥ सकृत्वानिश्चयंविष्णुरामंत्र्य
चपितामहं ॥ अंतर्द्धानंगतोदेवैःपूज्यमानोमहर्षिभिः ॥ १० ॥ ततोवैयजमानस्यपावकादतुलप्रभं ॥
प्रादुर्भूतंमहद्भूतंमहावीर्यंमहाबलं ॥ ११ ॥

नेदर्शयतिततोवैइति श्लोकपंचकमेकान्वयंततोवि
ष्णोरंतर्द्धानानंतरंयजमानस्यपावकादाहवनीयान्महद्भूतंदिव्यपायससंपूर्णपात्रींदोर्भ्यांप्रगृह्यप्रा
दुर्भूतमित्यन्वयः महद्भूतंपुरुषविशेषः ११

कृष्णंकृष्णवर्णंस्निग्धाःचिक्कणाःहर्यक्षस्यसिंहस्येवतनुजाःलोमानिश्मश्रुप्रवराःमूर्द्धजाःकेशाश्चयस्यतत् २२
॥६५॥ समुत्सेधउच्छ्रायःदृप्तशार्दूलवद्विक्रमःपादन्यासोयस्यतत् २३ प्रभामंडलवत्तयादिवाकरसमाकारं तै
क्ष्ण्यातिशयेनदीप्तानलशिखोपमंराजतोरजतविकारःअंतपरिच्छेदःपिधानपात्रंयस्यास्तां २४ लिंगसामान्या

कृष्णंरक्तांबरधरंरक्तास्यंदुंदुभिस्वनंस्निग्धहर्यक्षतनुजश्मश्रुप्रवरमूर्द्धजं ॥२२॥ शुभलक्षणसंपन्नंदि
व्याभरणभूषितं ॥ शैलशृंगसमुत्सेधंदृप्तशार्दूलविक्रमं ॥२३॥ दिवाकरसमाकारंदीप्तानलशिखो
पमं ॥ तप्तजांबूनदमयींराजतांतपरिच्छदां ॥२४॥ दिव्यपायससंपूर्णांपात्रींपत्नीमिवप्रियां ॥ प्रग
ह्यविपुलांदोर्भ्यांस्वयंमायामयीमिव ॥२५॥ समवेक्ष्याब्रवीद्वाक्यमिदंदशरथंनृपंप्राजा
पत्यंनरंविद्धिमामिहाभ्यागतंनृप ॥२६॥

दुत्प्रेक्षतेपत्नीमिवेति विपुलतरत्वेनहस्तमात्रेणग्रहीतुमशक्यत्वाद्दोर्भ्यामित्युक्तंमायामयीमिव
विचित्रकार्यकरीमिव २५ दशरथंसमवेक्ष्यइदमब्रवीत्तदाहइहागतंमांप्राजापत्यंप्रजापतेरागतंनरं
विद्धि २६ ॥६५॥

ततःपरंतस्यनंतरंतस्मातदेव १७ देवानर्चयताहयमेधपुत्रकामेष्टिभ्यामितिशेषः १८ इदंशाच्छार्यमाहइदंत्वि

ततःपरंतदाराजाप्रत्युवाचकृतांजलिः ॥भगवन्स्वागतंतेस्तुकिमहंकरवाणिते ॥१७॥अथोपुनरिदं
वाक्यंप्राजापत्योनरोब्रवीत् ॥राजन्नर्चयतादेवानद्यप्राप्तमिदंत्वया ॥१८॥इदंतुनृपशार्दूलपायसंदे
वनिर्मितंप्रजाकरंगृहाणत्वंधन्यमारोग्यवर्द्धनं ॥१९॥भार्याणामनुरूपाणामश्नीतेतिप्रयच्छवै
तासुत्वंलप्स्यसेपुत्रान्यदर्थंयजसेनृप ॥२०॥तथेतिनृपतिःप्रीतःशिरसाप्रतिगृह्यतां ॥पात्रींदे
वान्नसंपूर्णांदेवदत्तांहिरण्मयीं ॥२१॥अभिवाद्यचतद्भूतमद्भुतंप्रियदर्शनं ॥मुदापरमयायुक्त
श्चकाराभिप्रदक्षिणं ॥२२॥ततोदशरथःप्राप्यपायसंदेवनिर्मितं ॥बभूवपरमप्रीतःप्राप्यवित्त
मिवाधनः ॥२३॥ततस्तदद्भुतप्रख्यंभूतंपरमभास्वरं ॥संवर्त्तयित्वातत्कर्मतत्रैवांतरधीयत ॥२४॥

तिदेवनिर्मितंदेवेनप्रजापतिनानिर्मितंधन्यंधनकरं १९ भार्याणांसंबंधसामान्येषष्ठीभार्याभ्यइत्यर्थः अ
नुरूपाणांसवर्णानां २० हिरण्मयींहिरण्यविकारां २१ अभिप्रदक्षिणंपुनःपुनःप्रदक्षिणं २२ वित्तंधनं २३
अद्भुतप्रख्यंअद्भुताकारं संवर्त्तयित्वासमाप्यतत्कर्मपायसदानरूपं तत्रैवअग्नीकुंडएव २४ श्रीराम

॥६६॥ हर्षरश्मिभिः हर्षोत्सृतमुखकांतिभिः उद्योतं द्योतमानं अंतःपुरं तद्द्युतिज्ञातं शारदचंद्रस्य अंशुभिर्नभ इव
आवभावित्यन्वयः २५ पुत्रीयं पुत्रोत्पत्तिनिमित्तं २६ अथ ततः पत्नीभ्यो विभज्य पायसदानमाह त्रिभिः कौ
शल्यायै इत्यादि पायसस्यार्द्धं पायसार्द्धं शब्दोत्र समांशवचनः ददौ ज्येष्ठपत्नीत्वादिति भावः अपद्धान्त्यथकृ
त्स्यार्द्धं सुमित्रायै द्वितीयमहिष्यै ददौ चतुर्थांशमित्यर्थः अवशिष्टस्य पायसस्यार्द्धमवसिंशिष्टाद्धमाष्टमांशं

हर्षरश्मिभिरुद्योतं तस्यांतःपुरमाबभौ ॥ शारदस्याभिरामस्य चंद्रस्येव नभोंशुभिः ॥२५॥ सोंतःपुरं
प्रविश्यैव कौसल्यामिदमब्रवीत् ॥ पायसं प्रतिगृह्णीष्व पुत्रीयं त्विदमात्मनः ॥२६॥ कौसल्यायै न
रपतिः पायसार्धं ददौ तदा ॥ अर्द्धादर्द्धं ददौ चापि सुमित्रायै नराधिपः ॥२७॥ कैकेय्यै चावशि
ष्टार्धं ददौ पुत्रार्थकारणात् ॥ प्रददौ चावशिष्टार्धं पायसस्यामृतोपमं ॥२८॥ अनुचिंत्य सुमि
त्रायै पुनरेव महीपतिः ॥ एवं तासां ददौ राजा भार्याणां पायसं पृथक् ॥२९॥

कैकेय्यै तृतीयमहिष्यै ददौ पुत्रार्थकारणात् पुत्ररूपप्रयोजननिमित्तात् अनुचिंत्य कैकेय्यपेक्षया ज्येष्ठत्वं
कौशल्यापेक्षया कनिष्ठत्वं च सुमित्रायाः विचार्य अवशिष्टार्द्धमष्टमांशं पुनः प्रददावित्यर्थः वल्लभायां संभो ॥६६॥
गकर्मणि पक्षपातो न धर्मविभागकर्मणि एवं च भरतशत्रुघ्नौ पादस्यार्द्धमर्द्धमिति विवेकः २९

प्रहर्षेणोदितं विकसितं०चेतो यासां ताः स्त्रियः नरेंद्रस्य संमाने अप्रपक्षपातेन यथोचितव्यवहारं मेनिरे ३० कथा
शेषसंग्रहेणाहर्शोपतितत्त इति तदुत्तमपायसमित्यन्वयः हुताशनादित्यशब्दौ तत्तेजःपरौ ३१ प्रतिलब्धमा
नसः स्वस्थचित्तः हरिः ईड्यः ३२ इति षोडशः सर्गः १६ विस्मोरंतधानानंतरकार्यद्वयं प्रवृत्ते पायसहस्ताग्नि

तास्वैव पायसं प्राप्य नरेंद्रस्योत्तमास्त्रियः ॥ संमानं मेनिरे सर्वाः प्रहर्षोदितचेतसः ॥ ३० ॥ ततस्तु ताः
प्राश्य तदुत्तमास्त्रियो महीपतेरुत्तमपायसं पृथक् ॥ हुताशनादित्यसमानतेजसोऽचिरेण गर्भा
न्प्रतिपेदिरे तदा ॥ ३१ ॥ ततस्तु राजा प्रसमीक्ष्य ताः स्त्रियः प्ररूढगर्भाः प्रतिलब्धमानसः बभूव हृष्टस्त्रि
दिवे यथा हरिः सुरेंद्रसिद्धर्षिगणाभिपूजितः ॥ ३२ ॥ इत्यार्षे रामायणे वालकांडे षोडशः सर्गः ॥
१६ ॥ पुत्रत्वं तु गते विष्णौ राज्ञस्तस्य महात्मनः ॥ उवाच देवताः सर्वाः स्वयंभूर्भगवानिदं ॥ १ ॥ ॥ ॥

पुरुषोत्थानं देवान्प्रति ब्रह्मनियोगश्च तत्र वाचः क्रमकत्वेन प्रथमोप थमोपस्थितमग्निपुरुषोत्थानं प्रसक्तं
पूर्वमुक्त्वा ब्रह्मनियोगं तत्फले दर्शयति पुत्रत्वमित्यादिना गतेमंगं तु प्रवृत्ते भगवान्भविकार्यज्ञः १

सहायान्किंकरान् कामरूपिणः कपटराक्षसवधक्षमशरीरिणः २ उक्तसहायान्विशेषयति त्रिभिः मा
येत्यादि मायाप्राग्भ्यर्यशक्तिसिद्धिः जवे वेगे नयज्ञान्युक्तिशालिनः २ असंहार्यानन्यैः संहर्तुमशक्यान् ३

सत्यसंधस्य वीरस्य सर्वेषां नो हितैषिणः विष्णोः सहायान्बलिनः सृजध्वं कामरूपिणः ॥२॥ मायाविद
श्च शूरांश्च वायुवेगसमान्जवे ॥ नयज्ञान्बुद्धिसंपन्नान्विष्णुतुल्यपराक्रमान् ॥३॥ असंहार्यानु
पायज्ञान्दिव्यसंहननान्वितान् ॥ सर्वास्त्रगुणसंपन्नानमृतप्राशनानिव ॥४॥ अप्सरःसु च मुख्यासु
गंधर्वीणां तनूषु च ॥ यक्षपन्नगकन्यासु ऋक्षविद्याधरीषु च ॥५॥ किन्नरीणां च गात्रेषु
वानरीणां तनूषु च ॥ सृजध्वं हरिरूपेण पुत्रांस्तुल्यपराक्रमान् ॥६॥

पायज्ञान् सामाद्युपायज्ञान् सिंहतुल्यसंस्थानैयुक्तान् सर्वास्त्रनिवारणसामर्थ्यरूपगुणयुक्तान् अमृतं
प्राश्नंतीत्यमृतप्राशनाः पीतामृतानिव मृत्युरहितानित्यर्थः ४ ५ हरिरूपेण वानररूपेणोपलक्षिता
न् तुल्यपराक्रमान्स्वतुल्यपराक्रमानित्यर्थः ६

देवत्वाविशेषात्स्वतापिपुत्रोत्पादनंकार्यमितिचेत्तत्राहपूर्वमितिसर्वः भाविरामसहायवुद्ध्येतिशेषः अत्र
पार्वतीशापेनस्वक्षेत्रेपुत्रोत्पादनासंभवात्परैः प्रभृतयः क्षेत्रजयोक्ताः गुणाधनसुत्वलाभायसुख्यातिविति

पूर्वमेवमयासृष्टोजांववान्ऋक्षपुंगवः॥जृंभमाणस्यसहसाममवक्त्रादजायत॥७॥तेतथोक्ताभगवता
तत्प्रतिश्रुत्यशासनं॥जनयामासुरेवंतेपुत्रान्वानररूपिणः॥८॥ऋषयश्चमहात्मानःसिद्धविद्याधरोर
गाः॥चारणाश्चसुतान्वीरान्ससृजुर्वनचारिणः॥९॥वानरेंद्रंमहेंद्राभमिंद्रोवालिनमात्मजं॥
सुग्रीवंजनयामासतपनस्तपतांवरः॥१०॥वृहस्पतिस्त्वजनयत्तारंनाममहाकपिं॥सर्ववा
नरमुख्यानांवुद्धिमंतमनुत्तमं॥११॥

नंदिकेश्वरशापानुसारेणहरिरूपेणोत्पन्नं ७ प्रतिश्रुत्यअंगी
कृत्यएवंवक्ष्यमाणरीत्या ८ वनचारिणःवानरान् ९ महेंद्राभंपर्वताभं ननुवालिनःकथंरामसहाया
र्थत्वंतस्यरामवध्यत्वात् उच्यते अंगदोत्पादनद्वारातस्यसाहाय्यकरणात् वृहस्पतिपुत्रत्वात्अनुत्तमंवुद्धि
मंतं ११

कुबेरपुत्रत्वात् श्रीमान् महाकपिं सर्वकार्यनिर्माणदक्षं १२ अत्यरिच्यत ततोऽधिको भवदित्यर्थः १३ रूपमेव
द्रविणं धनं तेन पन्नौ अतएव रूपसंमतौ रूपेण प्रख्यातौ स्वयमित्यनेन मानससृष्टित्वोत्पत्ते अतएव तनुष्वि

धनदस्यसुतःश्रीमान्वानरोगंधमादनः॥ विश्वकर्मात्वजनयन्नलंनाममहाकपिं॥१२॥ पावक
स्यसुतःश्रीमान्नीलोग्निसदृशप्रभः॥ तेजसायशसावीर्यादत्यरिच्यतपावकं॥१३॥ रूपद्रवि
णसंपन्नावश्विनौरूपसंमतौ॥ मैंदंचद्विविदंचैवजनयामासतुःस्वयं॥१४॥ वरुणोजनयामास
सुषेणंनामवानरं॥ शरभंजनयामासपर्जन्यस्तुमहाबलः॥१५॥ मारुतस्यौरसःश्रीमान्हनुमा
न्नामवानरः॥ वज्रसंहननोपेतोवैनतेयसमोजवे सर्ववानरमुख्येषुबुद्धिमान्बलवानपि॥१६॥
तेसृष्टाबहुसाहस्रादशग्रीववधोद्यताः॥ अप्रमेयबलावीराविक्रांताःकामरूपिणः॥१७॥

त्युक्तं १४ पर्जन्योवर्षाभिमानिनीदेवता १५ वज्रसंहननंवज्रवदभेद्यंशरीरंतेनोपेतोयुक्तः १६ एवंप्रधा
नवानरसृष्टिमुक्त्वाक्षुद्रवानरसृष्टिंसंगृह्णातितेइति दशग्रीववधोद्यताइत्यस्यये भविष्यंतीतिशेषः १७

गजाचलसंकाशाः गजसदृशाः पर्वतसदृशाश्चेत्यर्थः ऋक्षा भल्लूकाः गोपुच्छा गोलांगूलाश्चाभिजज्ञिरे जाताः क्षिप्रमित्यनेन मानससृष्टिरुच्यते १८ रूपं सौंदर्यं वेषसंस्थानविशेषः तस्य तस्य देवस्य तेन रूपादि-

ते गजाचलसंकाशा वपुष्मंतो महाबलाः ॥ ऋक्षवानरगोपुच्छाः क्षिप्रमेवाभिजज्ञिरे ॥१८॥ यस्य देवस्य यद्रूपं वेषो यश्च पराक्रमः ॥ अजायत समं तेन तस्य तस्य पृथक्पृथक् ॥१९॥ गोलांगूलेषु चोत्पन्नाः किंचिदुन्नतविक्रमाः ॥ यक्षीषु च तथा जाता वानराः किन्नरीषु च ॥२०॥ देवा महर्षिगंधर्वास्तार्क्ष्या यक्षा यशस्विनः ॥२१॥ नागाः किंपुरुषाश्चैव सिद्धविद्याधरोरगाः ॥ बहवो जनयामासुर्हृष्टास्तत्र सहस्रशः ॥२२॥

ना समः सुतः पृथगन्योन्यविलक्षणोऽजायत सुत्वमोत्रेता वानराकारस्तेपि संस्थानादौ सर्वे पितृतुल्याश्चासन्नित्यर्थः १९ विजातीयास्वपि वानरोत्पत्तिमाह गोलांगूलेष्विति किंचिदुन्नतविक्रमा देवावस्थातोपि किंचिदधिकपराक्रम इत्यर्थः २० उत्पादकसंत्रैविध्यामाह देवा इत्यादिश्लोकत्रयेण २१ नागाः दिग्गजाः उरगा वासुक्यादयः २२ श्रीसीताराम

चारणाःदेववंदिनःवनचारिणाःवनवासिनःइत्येकत्रपरत्रवनस्थफलभक्षकानित्यर्थः २३ २४
भगवदवतारकालेतेषांप्रभावमाहपंचभिःकामेतिअभवनितिशेषः २५ सर्वास्त्रकोविदाःस्वयंप्रतिभा

चारणाश्चसुतान्वीरान्ससृजुर्वनचारिणः वानरान्सुमहाकायान्सर्वान्वैवनचारिणः ॥२३॥ अप्स
रःसुचमुख्यासुतथाविद्याधरीषुच ॥ नागकन्यासुचतथागंधर्वीणांतनूषुच ॥२४॥ कामरूपबलो
पेतायथाकामंविचारिणः ॥ सिंहशार्दूलसदृशादर्पेणचबलेनच ॥२५॥ शिलाप्रहरणाःसर्वे
सर्वेपर्वतयोधिनः ॥ नखदंष्ट्रायुधाःसर्वेसर्वेसर्वास्त्रकोविदाः ॥२६॥ विचालयेयुःशैलेंद्रान्भेद
येयुःस्थिरान्द्रुमान् ॥ क्षोभयेयुश्चवेगेनसमुद्रंसरितांपतिं ॥२७॥ दारयेयुःक्षितिंपद्भ्यामा
प्लवेयुर्महार्णवान् ॥ नभस्तलंविशेयुश्चगृह्णीयुरपितोयदान् ॥२८॥

नसर्वास्त्रपरिहारोपायाइत्यर्थः २६ आप्लवेयुःसंतरेयुः २७ प्रव्रजतःस्वछंदगातीन् २८ श्रीश्रीराम

नारदेनेत्यस्यपातयेयुरित्यनेनान्वयः २९ यूथपसंख्यानमाहईदृशानामितिशतसहस्राणिकोटिरित्य

गृह्णीयुरपिमातंगान्मत्तान्प्रव्रजतोवने ॥ नर्दमानाश्चनादेनपातयेयुर्विहंगमान् ॥२९॥ ईदृशानां
प्रसूतानिहरीणांकामरूपिणां ॥ शतंशतसहस्राणियूथपानांमहात्मनां ॥३०॥ तेप्रधाने
षुयूथेषुहरीणांहरियूथपाः ॥ बभूवुर्यूथपश्रेष्ठावीरांश्चाजनयन्हरीन् ॥३१॥ अन्येऋक्षव
तःप्रस्थानुपतस्थुःसहस्रशः ॥ अन्येनानाविधांश्छैलान्काननानिचभेजिरे ॥३२॥ सूर्यपुत्रंच
सुग्रीवंशक्रपुत्रंचवालिनं ॥ भ्रातरावुपतस्थुस्तेसर्वेचहरियूथपाः ॥ नलंनीलंहनुमन्तमन्यांश्चह
रियूथपान् ॥३३॥

र्थः ३० प्रधानानाहतेइति तेप्रागुक्ताःसुग्रीवादिसुषेणांतायूथपाःप्रधानेषु
हरीणांयूथेषुसमूहेषुयूथश्रेष्ठाश्चबभूवुःवीरान्हरीनयंश्च ३१ तेषांस्थानान्याहअन्यइतिऋक्षवतः
पर्वतस्यप्रस्थान्सानूनिउपतस्थुःसेवंतेस्म ३२ राजमंत्रिणोदर्शयतिसूर्येत्यादिसार्धश्लोकेन सुग्रीवं
युवराजंवालिनंराजानंभ्रातरौसुग्रीववालिनौसर्वेचसर्वेपिउपतस्थुःकेचित्साक्षात्केचिन्नलादिद्वारे

त्याहनलमित्यादि ३३

तेषांदुःशासनत्वमाहतेइतितार्क्ष्योगरुडः २४ सर्वशाशितारमाहतांश्चेमि २५ सहायपोष्यत्वंदर्शयति
तैरिति विविधसंस्थानैःनानाप्रकारसन्निवेशैः नानाव्यंजनलक्षणैःपरस्परभेदव्यंजकतत्तल्लक्षणायु
तै २६ अचलकूटःपर्वतशृंगंभीमशरीररूपैः भयजनकशरीराकृतिभिःरामसहायहेतोरिति येतुपूर्वम

तेनार्स्यवलसंपन्नाःसर्वेयुद्धविशारदाः॥ विचरंतोर्दयन्सर्वान्सिंहव्याघ्रमहोरगान्॥३४॥ तां
श्चसर्वान्महाबाहुर्वालीविपुलविक्रमः॥जुगोपभुजवीर्येणऋक्षगोपुच्छवानरान्॥३५॥ तै
रियंपृथिवीशूरैःसपर्वतवनार्णवा॥कीर्णाविविधसंस्थानैर्नानाव्यंजनलक्षणैः॥३६॥ तै
र्मेघवृंदाचलकूटसन्निभैर्महाबलैर्वानरयूथपालैः॥बभूवभूर्भीमशरीररूपैःसमावृतारामस
हायहेतोः॥३७॥इत्यार्षेरामायणेवालकांडेसप्तदशःसर्गः॥ १७ ॥

न्यार्थमुत्पन्नास्तेचनियोगा
नंतरंसहायंकृतवंतः अन्येतुदेवैरुत्पन्नानीमुत्पादिताइतिनविरोधः इतिसप्तदशसर्गः १७ श्रीराम

प्रासंगिकदेवतावतारमुक्त्वाप्रकृतप्रधानावतारमुच्यतेनिवृत्तेइतिसमाप्तेइत्यर्थः १ दीक्षायांनियमोदीक्षा
नियमः प्रविवेशप्रवेष्टुमुपचक्रमे आदिकर्मद्योतकःप्रशब्दः २ मुनिपुंगवंवशिष्ठं ३ शुभ्राशिरस्शार

निवृत्तेतुक्रतौतस्मिन्हयमेधेमहात्मनः॥प्रतिगृह्यामराभागान्प्रतिजग्मुर्यथागतं॥१॥समाप्तदीक्षा
नियमःपत्नीगणसमन्वितः॥प्रविवेशपुरींराजासभृत्यबलवाहनः॥२॥यथार्हंपूजितास्तेनरा
ज्ञावैपृथिवीश्वराः॥मुदिताःप्रययुर्देशान्प्रणम्यमुनिपुंगवं॥३॥श्रीमतांगच्छतांतेषांस्वपुरा
णिपुनस्ततः॥बलानिराज्ञांशुभ्राणिप्रहृष्टानिचकाशिरे॥४॥गतेषुपृथिवीशेषुराजादशरथः
पुनः॥प्रविवेशपुरींश्रीमान्पुरस्कृत्यद्विजोत्तमान्॥५॥शांतयाप्रययौसार्धमृष्यशृंगःसुपूजितः
अनुगम्यमानोराज्ञाचसानुयात्रेणधीमता॥६॥

पुरस्कृत्यवस्त्रादिभिः ४ द्विजोत्तमान्वशिष्ठादीन् ५
अथनगरप्रवेशानंतरंसानुयात्रेणसभृत्येनराज्ञादशरथेनअनुगम्यमानऋष्यशृंगःप्रययौस्वस्थानमिति
शेषः ६

॥७०॥

एवंस्वष्वमंगवतान्द्विजोत्तमान्वशिष्ठादीन्विसृज्यसंपूर्णमानसःसंपूर्णमनोरथोराजादशरथःपुत्रोत्पत्तिंविचिंतयन्तत्रस्वांतःपुरेसुखितउवास ७ ततइत्यर्द्धमेकेयाकंऋतूनामितिप्रथमार्थेषष्ठीषट्ऋतवःसमत्ययुःसमतीताइत्यर्थः ८ अथभगवतःप्रादुर्भावंदर्शयतिततश्चेत्यादिसार्द्धद्वयमेकान्वयंततःअश्वमेधसमाप्त्यनंतरंद्वादशेवैशाखमारभ्यद्वादशसंख्यापूरकेचैत्रीपौर्णमास्यस्मिन्निति चैत्रस्तस्मिन्मासेना



एवंविसृज्यतान्सर्वान्राजासंपूर्णमानसः ॥ उवाससुखितस्तत्रपुत्रोत्पत्तिंविचिंतयन् ॥७॥ ततोयज्ञेसमाप्तेतुऋतूनांषट्समत्ययुः ॥८॥ ततश्चद्वादशेमासेचैत्रेनावमिकेतिथौ ॥ नक्षत्रेऽदितिदैवत्येस्वोच्चसंस्थेषुपंचसु ॥९॥ ग्रहेषुकर्कटेलग्नेवाक्पताविंदुनासहप्रोद्यमानेजगन्नाथंसर्वलोकनमस्कृतं ॥ कौसल्याऽजनयद्रामंदिव्यलक्षणसंयुतम् ॥१०॥

वमिकेनवम्यांतिथिनयादित्वात्स्वार्थेठक् तिथौतिथिर्द्वयोरितिपुंल्लिंगस्यापितिथिशब्दस्यसत्वन्क्लीवभावःअदितिदैवत्येअदितिर्देवताकेनक्षत्रेपुनर्वसावित्यर्थः पंचसुग्रहेषुरविभौमशनिगुरुभार्गवेषुस्वोच्चसंस्थेषुनिजोच्चराशिसंस्थेषुमेषमक

रतुलाकर्कमीनस्थेषुसत्सुकर्कटेकर्कराशौलग्नेराश्युदयेवाक्पतौइंदुनासहप्रोद्यमानेउदयति
सतिजगन्नाथंपंचोच्चैर्लोकनायकरस्तुतंसर्वजगत्स्वामिनंसर्वलोकनमस्कृतंस्वामासृजितोदेवगु
णैस्तुत्यस्तुत्रैदैवदनुजमनुजपूजितचरणारविंदमित्यादिकमलनेत्रासंपुत्रंश्रीरामंकौश
ल्याअजनयत्प्रादुर्भावयतिस्मेतिसंबंधःअत्रोच्चस्थेनगुरुणासमंचंद्रस्थितिःकर्कटएवेतिपु
नर्वसुचतुर्थपादत्वंस्वोच्चमेषस्थरवेश्चतुर्थराशिस्थश्चंद्रइतिशुक्लपक्षत्वंचसिद्धंतेनहिरण्यं
हिरण्मयब्रह्मांडंगर्भेयस्येतदर्थकंहिरण्यनाभेतिजन्मनामप्रवर्तितं॥अतोहिरण्यनाभो
यत्रास्तेसुतोमेसुमहायशाइतिभरतंप्रतिकौशल्योक्तिःसंगच्छते॥१०॥

रामं विशिनष्टि विष्णोरर्द्धमिति शंखचक्रानंतविशिष्टस्य विष्णोरर्द्धं शंखचक्रादिकं विहाय विष्णुमात्रमित्यर्थः
इक्ष्वाकोर्दशरथस्य कुलं वर्द्धयतीति तथा तं ११ श्रीमद्रामावतारेण केवलं यत्नकृतः किंतु कौशल्यातपःकृतः इत्या
ह कौशल्येति कौशल्याऽमिततेजसा सऽस्वेयाभवति जायमा इत्याथर्वणश्रुत्युक्तरीत्यावतार्थये सायाऽपरि
मिततेजाः सौदर्यसौकुमार्यादिगुणावतातेन निरूपमेन पुत्रेणाशुशुभे यथाऽदितिर्वज्रपाणिना परत्वचिन्ह
भूतरेखामयवज्रयुक्तपाणितलेन देवानां प्रवरेणोपेंद्रेण शुशुभे तथा सा यथापूर्वजन्मन्यनुष्ठिततपोध्यानवि

विष्णोरर्द्धं महाभागं पुत्रमैक्ष्वाकुवर्द्धनं ॥ लोहिताक्षं महाबाहुं रक्तोष्ठं दुंदुभिस्वनं ॥११॥ कौस
ल्या शुशुभे तेन पुत्रेणामिततेजसा ॥ यथा वरेण देवानामदितिर्वज्रपाणिना ॥१२॥ भरतो
नाम कैकेय्यां जज्ञे सत्यपराक्रमः ॥ साक्षाद्विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः ॥१३॥

शेषैर्विष्णुं पुत्रं लब्धवतीति तथेयमपीत्यर्थः १२ अथ पायसोपभोगक्रमेण कौशल्यानंतरं कैकेयीप्रसवमाह
भरत इति विष्णोर्विशिष्टस्य विष्णोश्चतुर्भागश्चतुर्थो भागः शंखः पांजजन्यः साक्षात्स्वव्यवधानेन कैकेय्यां
भरतो जज्ञे जातः चतुर्भाग इत्यत्र प्रत्ययलोपश्चार्षः १३

त्रुटि शंखादेर्भरतादिरूपेणावतरिष्यमाणत्वात् महाभागमिति भजएवमहाभागः महान्भागो यस्य तं परिपूर्णषडैश्वर्यपूर्णमित्यर्थः ०

अथ भरतजन्मानंतरं विष्णोरर्द्धमनंतस्यैकं च ताभ्यां सम्यगन्वितौ तदात्मकाविति यावत् लक्ष्मणशत्रुघ्नौ सुतौ सुमित्राअजनयदिति संबंधः तदुक्तं पद्मपुराणे अन्येद्युः पांचजन्यात्मा केकेय्यां भरतोभवत् तदेन्येद्युः सुमित्रायामनंतात्मा च लक्ष्मणः सुदर्शनात्मा शत्रुघ्नो द्वौ जातौ पुत्रावपत्रियेइति औपनिषदास्त्वेव व्याचक्ष्यते प्रणवं हीश्वरं विद्यात्सर्वस्य हृदयस्थितं सर्वव्यापिनमोंकारं मत्वा धीरनशोचति एतद्वै

अथ लक्ष्मणशत्रुघ्नौ सुमित्राऽजनयत्सुतौ ॥ सर्वास्त्रकुशलौ वीरौ विष्णोरर्द्धसमन्वितौ ॥ १८ ॥

सत्यकाम परं चापरं ब्रह्म यदोंकारः प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं स्मृतं अपूर्वोऽनंतरो बाह्योऽनपरः प्रणवोऽव्ययः गिरामस्म्येकमक्षरं ओमित्येकाक्षरं ब्रह्मेत्यादिश्रुतिस्मृतिसहस्रेभ्यो विष्णुशब्देनात्र प्रणवो विक्षितः तस्यार्द्धमर्द्धमात्रात्मकं तुरीयं परं ब्रह्मरामाख्यं कौशल्या ब्रह्माभिव्यक्तिशक्तिरजनयदाविर्भावितवतीत्यर्थः साक्षात्सर्वैरनुभूयमानस्य विष्णोः प्रणवस्य ये चत्वारो भागाः चतुःशब्दस्य प्रकरणान्नागत्पसंख्येयपरत्वं तत्र यो भागो मकारात्मकः प्राज्ञ ईश्वरः सर्वैर्दिव्यगुणैः समुदितो भरतो नाम केकेय्यां

जनइतिसंबंधः चतुर्भागइत्यत्रसापेक्षत्वेपिसंबंधिकत्वात्समासः अथभरतजननोत्तरंविश्वोरौंकार
स्याद्यौंअंशोऽकारोंकारोविश्वस्तैजसोविराट्हिरण्यगर्भौताभ्यांसमन्वितौतत्त्वमकावितियावत्तस
र्वोत्रकुशलौलक्ष्मणशत्रुघ्नौसुतौसुमित्राऽजनयदित्यन्वयः उक्तंचाथवेदेश्रीमोत्तरतापिनीये
प्रणवव्याख्यायां तथैवैतेश्लोकाभवंति अकाराक्षरसंभूतःसौमित्रिर्विश्वभावनः उकाराक्षरसंभू
तोशत्रुघ्नस्तैजसात्मकः प्राज्ञात्मकस्तुभरतोमकाराक्षरसंभवः अर्द्धमात्रात्मकोरामोब्रह्मानंदैकवि
ग्रहइति प्रजापतिप्रेषितंपायसंतुनित्यसिद्धचिदानंदविग्रहिणोपादानभावमर्हतिअपितुभगवदा
विर्भावसूचनेनदशरथमनुगृह्णाति अपिवलोकवत्तुलीलाकैवल्यमितिन्यायानुगृहीतश्रुतिपु
राणेतिहासादौश्रीरामकथाप्रसिद्धैव श्रुतौवावत् पूर्वापरंचरतोमायायैतौशिशूक्रीलंतौपरियातो
अध्वरंविश्वान्यन्याभुवनाभिंचष्टऋतूनन्योविदधज्जायतेपुनरिति एतौश्रीरामलक्ष्मणौवस्तु
तःपुराणपुरुषावेवमायायामायाविधस्वशक्त्याशिशूदशरथराजकुमारौभूत्वाअध्वरं विश्वामि
त्रस्ययज्ञंअनेकरक्षोविक्षिप्तंपरियातःप्राप्तौरक्षणायेत्यर्थः कथंभूतौक्रीलंतौताटकासुबाहा

त्रयाणां जन्मकालमाह पुष्य इति पुष्येणायुक्ते तिथावित्यर्थः मीनलग्नस्य गुरुक्षेत्रत्वात्तज्जन्मफलमाह
प्रसन्नधीरिति सार्प्ये सर्पदेवताके नक्षत्रे ऽश्लेषायां कुलीरे कर्कटके रवौऽभ्युदिते ऽभ्युदये इत्यर्थः सुमित्रा
याः पुत्रौ सौमित्री वाहाद्दित्याद्दिज्जाताविति संबंधः १५ पृथग्गुणवंतः प्रत्येकमनन्यसाधारणगुणवं
तः अनुरूपाः ज्येष्ठकनिष्ठत्वादियोग्यव्यवहारवंतः ह्रिया कांत्या प्रोष्ठपदा इति पूर्वाभाद्रपदोत्तराभाद्रप

पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः। सार्प्ये जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ ॥१५॥ राज्ञः पुत्रा महा
त्मानश्चत्वारो जज्ञिरे पृथक्॥ गुणवंतोऽनुरूपाश्च रुच्या प्रोष्ठपदोपमाः॥१६॥ जगुः कलं च गंधर्वा ननृ
तुश्चाप्सरोगणाः॥ देवदुंदुभयो नेदुः पुष्पवृष्टिश्च खात्पतत्॥१७॥ उत्सवश्च महानासीदयोध्या
यां जनाकुलः॥ रथ्याश्च जनसंबाधा नटनर्तकसंकुलाः॥१८॥ गायनैश्च विराविण्यो वादनै
श्च तथापरैः॥ विरेजुर्विपुलास्तत्र सर्वरत्नसमन्विताः॥१९॥ ॥ ॥

दयोर्नामतयोश्च प्रत्येके द्वे द्वे तारे इति चतुर्णां सादृश्यात्तदुपमा इत्यर्थः १६ कलं मधुरं यथा भवति तथा ज
गुः खात् आकाशात्पतदित्यत्र अडभावश्छांदसः १७ अथ जातकर्मोत्सवमाह उत्सवश्चेति अयोध्याया
मित्यनेन प्रजप्रतिगृहमुत्सवोऽभूदित्युक्तं भवति १८ गायनैर्गायकैः वादकैरैपरैः सूतमागधादिभिश्च
विराविण्यः शब्दवत्यो विपुला रथ्यास्तत्र विरेजुः सर्वरत्नसमन्विताः नयाप्युद्देशेन क्षिप्तै रत्नैर्युक्ताः १९

अप्रदानसमृद्धिमाह प्रदेयानिति परितोषिकानित्यर्थः सूताः पौराणिकाः मागधवंशसूचकाः वंदिनस्तुति
पाठकाः संबंधसामान्ये षष्ठी सूतादिसंबंधि यद्देयं परितोषिकं तत्तेभ्यो ददावित्यन्वयः २० अतीतैकादशाह
तु अत्रैकादशाहशब्दः सूतकांतोपलक्षणं अन्यथा क्षत्रियस्य द्वादशाहं सूतकमिति विरोधः स्यात् तथा च राम
जन्मतस्त्रयोदशे दिने नामकरणमकरोदित्यर्थः कस्य किं नामाकरोदित्यत्राह ज्येष्ठमिति महात्मानं ज्येष्ठं रामं ते

प्रदेयांश्च ददौ राजा सूतमागधवंदिनां ॥ ब्राह्मणेभ्यो ददौ वित्तं गोधनानि सहस्रशः ॥२०॥ अतीत्यै
कादशाहं तु नामकर्म तथाकरोत् ॥ ज्येष्ठं रामं महात्मानं भरतं कैकयीसुतं ॥२१॥ सौमित्रिं ल
क्ष्मणमिति शत्रुघ्नमपरं तथा ॥ वसिष्ठः परमप्रीतो नामानि कुरुते तदा ॥२२॥ ब्राह्मणान्भोज
यामास पौरजानपदानपि ॥ अददद्ब्राह्मणानां च रत्नौघममितं बहु ॥२३॥ ॥ ॥

सर्वे जना गुरोरस्मिन्निति रामं राम नामानमकरोत् एवमग्रेपि अस्य निरुक्तिः पाद्मे दर्शिता श्रियः कमल
वासिन्या रमणीयं यतो हरिः तस्मात्श्रीराम इत्यस्य नाम सिद्धं पुरातनं सहस्रनामसदृशं स्मरणान्मुक्तिदं नराणामि
ति २१ ननु क्षत्रियस्य नामकरणेऽनधिकारात्कथं दशरथस्य कर्तृत्वमत आह वशिष्ठ इति कुरुते अकरोदित्यर्थः २२
अमितमसंख्येयं बहु बहुप्रकारं २३ उक्तानुवादपूर्वकमितरसंस्कारकरणं दर्शयति तेषामित्यर्द्धैः आदिशब्दे
नान्नप्राशनचौडोपनयनादीनि गृह्यंते अकारयत् वशिष्ठो राजेति शेषः २३

उक्तंरामस्यमाहात्म्यमुपपादयतिषामितितेषांसुतानांमध्येवयसाज्येष्ठःकेतुरिवध्वजइवनिजकुलप्रकाशकः
पितुर्भूयोतिशयेनरतिकरःसंतोषकरः २४ भूतानांस्वयंभूरिवसंमतःनित्यप्रेमास्पदेवभूयदुपनीतानामषां

तेषांजन्मक्रियादीनिसवैकर्माणिकारयत॥ तेषांकेतुरिवज्येष्ठोरामोरतिकरःपितुः॥२४॥बभूवभूयो-
भूतानांस्वयंभूरिवसंमतः॥ सर्वेवेदविदःशूराःसर्वेलोकहितेरताः॥२५॥सर्वेज्ञानोपसंपन्नाःसर्वेसमु-
दितागुणैः॥ तेषामपिमहातेजारामःसत्यपराक्रमः॥२६॥ इष्टःसर्वस्यलोकस्य शशांक
इवनिर्मलः॥ गजस्कंधेश्वपृष्ठेचरथचर्यासुसंमतः॥ धनुर्वेदेचनिरतःपितुःशुश्रूषणेरतः २७

वेदाध्ययनास्तिक्यमाहसर्वेइति २५ वेदार्थज्ञानसिद्धिमाहसर्वैर्ज्ञानेनेति ज्ञानकार्यंगुणसंपत्तिमाहगुणार्दया-
दिभिरासमन्निति शेषअप्यप्रत्येकमसाधारणान्गुणान्वक्तुमादौरामस्यगुणानाहतेषामिति सत्यपराक्र-
मःअमोघवीर्यः २६ निर्मलःशशांकइवसर्वस्यलोकस्येष्टःसर्वदादर्शनीयोऽभवदितिशेषः २७ श्रीराम

॥७५॥

अथलक्ष्मणस्यविशेषगुणानाह बाल्यादितिचतुर्भिः लक्ष्मींवर्द्धयतीतिलक्ष्मिवर्द्धनः ज्यायोरितिकृ
त्वः लक्ष्मणः रामस्यबालमारभ्यसुस्निग्धः जन्मप्रभृतिनिरवधिकभक्तिसंपन्नइत्यर्थः २८ शरीरत
स्यशरीरादपरामस्यसर्वात्मनाप्रियकरोबहिःसंचरन्नपरःप्राणइवेत्यन्वयः २९ रामस्यानुरागंलक्ष्म

बाल्यात्प्रभृतिसुस्निग्धोलक्ष्मणोलक्ष्मिवर्द्धनः॥ रामस्यलोकरामस्यभ्रातुर्ज्येष्ठस्यनित्यशः ॥२८॥
सर्वप्रियकरस्तस्यरामस्यापिशरीरतः॥ लक्ष्मणोलक्ष्मिसंपन्नोबहिःप्राणइवापरः ॥२९॥
नचतेनविनानिद्रांलभतेपुरुषोत्तमः॥ मृष्टमन्नमुपानीतमश्नातिनहितंविना ॥ ३०॥
यदाहिहयमारूढोमृगयांयातिराघवः॥ अथैनंपृष्ठतोभ्येतिसधनुःपरिपालयन् ॥ ३१॥

णोदर्शयतिनचेति पुरुषोत्तमोरामस्तेनविनानिद्रांनलभते कौशल्ययानीतंमृष्टान्नंतंविनानाश्ना
ति ३० यदाराघवःहयमारूढःमृगयांयातीतितदाएनंरामंसधनुःसम्यक्परिपालयन्नभ्येतिहिप्रसिद्धो ३१

॥७५॥

॰अथ भरतशत्रुघ्नयोः परस्परानुरागं दर्शयति भरतस्यापीति हि यस्मात्स शत्रुघ्नो लक्ष्मणावरजोनो रामावर
जस्य भरतस्यापि नित्यं प्राणैः प्रियतर आसीत् तस्य शत्रुघ्नस्य च भरतस्तथा प्रियतर आसीत् ३२ अथ दश
रथस्य मनोरथनिष्पत्तिमाह स चतुर्भिरिति देवैश्चतुर्भिर्दिक्पालैः ३३ पूर्वलाभजा प्रीतिरुक्ता अथ तेषु कृत
प्रीतिविशेषमाह त इति श्लोकद्वयमेकान्वयं यदा यस्मिन्वयसि ते ज्ञाने शास्त्रीये तत्संपन्नाः ह्रीमंतः प्रमाणज्ञा

भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः ॥ प्राणैः प्रियतरो नित्यं तस्य चासीत्तथा प्रियः ॥३२॥ स चतु
र्भिर्महाभागैः पुत्रैर्दशरथः प्रियैः ॥ बभूव परमप्रीतो देवैरिव पितामहः ॥३३॥ ते यदा ज्ञानसंपन्नाः
सर्वे समुदिता गुणैः ॥ ह्रीमंतः कीर्तिमंतश्च सर्वज्ञा दीर्घदर्शिनः ॥३४॥ तेषामेवंप्रभावानां सर्वेषां
दीप्ततेजसां ॥ पिता दशरथो हृष्टो ब्रह्मा लोकाधिपो यथा ॥३५॥

प्राकृत्यचिंतामुलज्जावतः कीर्त्तिमंतः ज्ञानकृतप्रभाववंतः आसन्निति शेषः तदा तेषां पिता दशरथः ए
वंप्रभावानां तेषां लाभेन लोकाधिपो ब्रह्मा यथा तथा हृष्टो बभूव ३४ ३५

॥७६॥ तेचापिपितृपलालिताअपिवैदिकानांवेदसंबंधिनांस्मृतीतिहासपुराणशास्त्रादीनामध्ययनेपितृशुश्रूषणो
चरताआसन्नितिशेषः ३६ अथैषांसमावर्तनोचितकालंदर्शयतिअथेति अथाध्ययनानंतरंउपाध्या
येनपुरोहितेनसहितःसबांधवोराजादशरथस्तेषांकुमाराणांदारक्रियांप्रतिदारविषयिणींक्रियांविवाह

तेचापिपुरुषव्याघ्रावैदिकाध्ययनेरताः॥ पितृशुश्रूषणोरताधनुर्वेदेचनिष्ठिताः॥३६॥ अथरा
जादशरथस्तेषांदारक्रियांप्रति॥ चिंतयामासधर्मात्मासोपाध्यायःसबांधवः॥३७॥ तस्यचिंत
यमानस्यमंत्रिमध्येमहात्मनः॥ अभ्यागच्छन्महातेजाविश्वामित्रोमहामुनिः॥३८॥ सराजोद
र्शनाकांक्षीद्वाराध्यक्षानुवाचह॥ शीघ्रमाख्यातमांप्राप्तंकौशिकंगाधिनःसुतं॥३९॥ तच्छ्रुत्वा
वचनंत्रासाद्राजवेश्मप्रदुद्रुवुः॥ संभ्रांतमनसःसर्वेतेनवाक्येनचोदिताः॥४०॥

मा

रूपांतामुद्दिश्यचिंतयामासतुल्यवयोरूपवृत्ताभिजनलक्षणाकन्यान्वेषणांकृतवानित्यर्थः ३७ अथभगवद
वतारप्रयोजनानिसाधुपरित्राणदुष्कृद्विनाशनधर्मसंस्थापनादीनितत्रप्रधानत्वात्साधुपरित्राणमुप
क्रमतेतस्येति ३८ कौशिकंकुशिकगोत्रजं ३९ विलंबेशापत्रासाद्द्वाराध्यक्षाराजवेश्मत्वरयाविविशुःत
दागमननिवेदनायेतिशेषःसंभ्रांत मनसःक्षुभितचित्ताः ४० ॥७६॥

इक्ष्वाकुवंश्यस्य ४१ समाहितःएकाग्रचित्तःब्रह्माणंबृहस्पतिं बृहस्पतिर्देवानांब्रह्मेतिश्रुतेः ४२ संशित

तेगत्वाराजभवनंविश्वामित्रमषिंतदा ॥ प्राप्तमावेदयामासुर्नृपायैक्ष्वाकवेतदा ॥ ४१ ॥ तेषांत
द्वचनंश्रुत्वासपुरोधाःसमाहितः ॥ प्रत्युज्जगामसंहृष्टोब्रह्माणमिववासवः ॥ ४२ ॥ सदृष्ट्वा
ज्वलितंदीप्त्यातापसंसंशितव्रतं ॥ प्रहृष्टवदनोराजाततोर्घ्यमुपहारयत ॥ ४३ ॥ सराज्ञःप्रतिगृह्या
र्घ्यंशास्त्रदृष्टेनकर्मणा ॥ कुशलंचाव्ययंचैवपर्यपृच्छन्नराधिपं ॥ ४४ ॥ पुरेकोशेजनपदेबां
धवेषुसुहृत्सुच ॥ कुशलंकौशिकोराज्ञःपर्यपृच्छत्सुधार्मिकः ॥ ४५ ॥ अपितेसन्नताःसर्वेसा
मंतारिपवोजिताः ॥ दैवंचमानुषंचैवकर्मतेसाध्वनुष्ठितं ॥ ४६ ॥ ॥ २६ ॥ ॥ ५६ ॥

व्रतंतीक्ष्णनियमंउपहारयमुवसिद्धेनेतिशेषः ४३ यत्तोऽर्घ्यंराजप्रेरणयानीतंशास्त्रदृष्टेनकर्मणासमर्पि
तमितिशेषः प्रतिगृह्यकुशलमपूर्वार्थप्राप्तिः अव्ययंतस्यासंयं ४४ कुशलमनुपद्रवं ४५ अपिप्र
श्नेसामंताःसन्नताःनम्राःरिपवोजिताः दैवयज्ञादिकंमानुषमतिथिसत्कारादिकं ४६

॥७७॥

महाभागोमुनिपुंगवोविश्वामित्रः समागम्यवशिष्ठेनालिंगनादिकृत्वावशिष्ठेनतान् ऋषीन्वामदेवादींश्च यथाक्रमंकुशलमुवाचहपप्रच्छेत्यर्थः ४७ निवेशनेसभां पूजिताःइत्यस्यराज्ञेतिशेषः यथार्हतःयथान्यायं ४८ हृष्टःपुलकितःअभिपूजयन्नस्तुवन् ४९ अमृतस्यसुधायाः अप्रजस्यपुत्रस्यसदृशदारेषुजातिवयो

वसिष्ठंचसमागम्यकुशलंमुनिपुंगवः ॥ ऋषींश्चतान्यथान्यायंमहाभागउवाचह ॥४७॥ तेसर्वैर्हृष्टमनसस्तस्यराज्ञोनिवेशनं ॥ विविशुःपूजितास्तेननिषेदुश्चयथार्हतः ॥४८॥ अथहृष्टमनाराजाविश्वामित्रंमहामुनिं ॥ उवाचपरमप्रीतोहृष्टस्तमभिपूजयन् ॥४९॥ यथामृतस्यसंप्राप्तिर्यथावर्षमनूदके ॥ यथासदृशदारेषुपुत्रजन्माप्रजस्यवै ॥५०॥ प्रनष्टस्ययथालाभोयथाहर्षोमहोदये ॥ तथैवागमनंमन्येस्वागतंतेमहामुने ॥५१॥ कंचतेपरमंकामंकरोमिकिमुहर्षितः ॥ पात्रभूतोसिमेब्रह्मन्दिष्ट्याप्राप्तोसिमानद ॥५२॥

रूपगुणतुल्येषुपुत्रजन्म ५० प्रनष्टस्यनिध्यादेरितिशेषः महःपुत्रविवाहाद्युत्सवःतस्यउदयेयथाहर्षःतथातेऽत्रागमनंमन्ये ५१ कंचपरंकामंकिमुकेनप्रकारेणाकरोमिकुर्यामित्यर्थःवर्त्तमानसामीप्येलट् ५२

॥७७॥

५२ राजर्षिशब्दसाधकेनतपसापूर्वमतिशयितकांतिमान् अनुपश्चाद्ब्रह्मर्षित्वसाधकेनतपसाब्रह्मर्षित्वंप्राप्तोमया
बहुप्रकारेणराजर्षिब्रह्मर्षिप्रकारेणपूज्योसीत्यन्वयः ५४ हेब्रह्मन्तद्दिनेऽद्यमागमनंममपरमपवित्रंपरममद्भुतं

अद्यमेसफलंजन्मजीवितंचसुजीवितं ॥ यस्माद्विप्रेंद्रमद्राक्षंसुप्रभातानिशाममम ॥५३॥ पूर्वंराजर्षिशब्दे
नतपसाद्योतितप्रभः ॥ ब्रह्मर्षित्वमनुप्राप्तःपूज्योसिबहुधामया ॥५४॥ तदद्भुततमिदंविप्रपवि
त्रंपरमंमम ॥ शुभक्षेत्रगतश्चाहंतवसंदर्शनात्प्रभो ॥५५॥ ब्रूहियत्प्रार्थितंतुभ्यंकार्यमागम
नंप्रति ॥ इच्छाम्यनुगृहीतोहंत्वदर्थपरिवृद्धये ॥५६॥ कार्यस्यनविमर्शंचगंतुमर्हसिसुव्रत
कर्ताचाहमशेषेणदैवतंहिभवान्मम ॥५७॥

च हेप्रभोतवसंदर्शनादहंशुभक्षेत्रगतःप्रशापव
देहंप्राप्तः त्वद्दर्शनाद्दिदंमत्क्षेत्रंतीर्थरूपंजातमित्यर्थः ५५ तुभ्यमितितृतीयार्थेचतुर्थी तेयत्कार्यंप्रति
यत्कार्यार्थमागमनंतद्ब्रूहि अहंत्वयानुगृहीतःसन्त्वदर्थपरिवृद्धयेइच्छामित्वदर्थपरिवृद्धिंकर्तुमिच्छा
मित्यर्थः ५६ विमर्शसंशयंतत्रहेतुमाहदैवतंहीति ५७

॥७८॥ इतश्चनसंदेहइत्याहममचेति अयंतवागमनजःकृत्स्नोधर्मःमममहानभ्युदयःप्राप्तःहर्षातिशयाद्द्विजेतिपुनःरु
क्तिः ५८ हृदयसुखंश्रव्यसौख्याद्वाहृदयसुखकरं शब्दमार्दवाच्छ्रुतिसुखं आत्मवताबुद्धिमताविनीतंविनयव
सुधाभवतितथाउक्तंवाक्यंनिशम्यप्रथितगुणयशाः पृथुतरगुणविषयकीर्त्तिर्नकेवलंकीर्त्तिमात्रंगुणैर्विशि

ममचायमनुप्राप्तोमहानभ्युदयोद्विज ॥ तवागमनजःकृत्स्नोधर्मश्चानुत्तमोद्विज ॥५८॥ इतिहृद
यसुखंनिशम्यवाक्यंश्रुतिसुखमात्मवताविनीतमुक्तं ॥ प्रथितगुणयशागुणैर्विशिष्टःपर
मऋषिःपरमंजगामहर्षं ॥५९॥ इत्यार्षेरामायणेबालकांडेऽष्टादशःसर्गः ॥१८ तच्छ्रुत्वाराज
सिंहस्यवाक्यमद्भुतविस्तरं ॥ हृष्टरोमामहातेजाविश्वामित्रोऽभ्यभाषत ॥१॥ सदृशंराजशार्दू
लतवैतद्भुविनान्यतः ॥ महावंशप्रसूतस्यवसिष्ठव्यपदेशिनः ॥२॥ ष्टःपरमऋषिःपरमंहर्षंज

३ गाम ५९ इत्यष्टादशःसर्गः १८ अथविश्वामित्राभ्यर्थनमाहतच्छ्रुत्वेत्यादिना अद्भुतस्यविस्तरोयस्मिन्त
द्वाक्यंश्रुत्वाहृष्टरोमापुलकितरोमा १ एतत्तवैवसदृशंनान्यस्यतस्यहेतुगर्भंविशेषणंमहावंशेत्यादि वशिष्ठे
नव्यपदेशोऽपदेशोस्यास्तीतिवशिष्ठव्यपदेशीतस्यवशिष्ठनियोगवर्त्तिनइत्यर्थः २ ॥७८॥

पत्विति मे हृतं यत्कार्यप्रतिपादकं वाक्यं तस्य तत्प्रतिपाद्यस्य कार्यस्य निश्चयं कर्त्तव्यत्वनिश्चयं सर्व्वथा करिष्यामी
त्यंगीकारं कुरुष्व कृत्वा च सत्यप्रतिश्रवः सत्यप्रतिज्ञो भव ३ तद्वाक्यमाह अहमिति विद्ध्यर्थं यागार्थं निमं दीक्षां
आतिष्ठे आस्थितोस्मि तस्य व्रतस्य द्वौ स्त इति शेषः ४ बहुतै शस्त्रीरौ समाप्तिकल्पे समाप्तौ समाप्तिसमये ५

यन्मे हृद्गतं वाक्यं तस्य कार्यस्य निश्चयं ॥ कुरुष्व राजशार्दूल भव सत्यप्रतिश्रवः ॥३॥ अहं निय
ममातिष्ठे विद्ध्यर्थं पुरुषर्षभ ॥ तस्य विघ्नकरौ द्वौ तु राक्षसौ कामरूपिणौ ॥४॥ व्रते तु बहुशश्चीर्णो
समाप्त्यां राक्षसाविमौ ॥ मारीचश्च सुबाहुश्च वीर्यवन्तौ सुशिक्षितौ ॥ तौ मांसरुधिरौघेण वेदीं ता
मभ्यवर्षतां ॥५॥ अवधूते तथाभूते तस्मिन्नियमनिश्चये ॥ कृतश्रमो निरुत्साहस्तस्माद्देशा
दपाक्रमे ॥६॥ न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव ॥ तथाभूता हि सा चर्या न शापस्तत्र मुच्य
ते ॥७॥

नियमनिश्चये व्रतसंकल्पे अवधूते तस्मिन्तत्संकल्पविषये पत्ते च तथाभूते नाशिते सति कृतश्रमः कृ
तव्याप्रयासः अत एव निरुत्साहस्तस्माद्देशादपाक्रमे निर्गतोस्मि ६ तर्हि कुतो न तौ शप्तौ तत्राह न चेति तत्र हेतु
माह तथाभूतेति सा चर्या यज्ञाचारः तथाभूता हि शापादिप्रचारानर्हेत्यर्थः अतस्तत्र मारीचसुबाह्वोः शापो न मुच्यते ७

॥रा०बा०॥
॥७१॥

तत्रमयाकिंकर्त्तव्यंतत्राहस्वपुत्रमितिबालानांकपोलसमीपशिखाकाकपक्षः ८ बालोयंकथंतौनाशयिष्यति तत्राह
शक्तइतिएषोभवत्कुमारोमयापितृस्थानीयेनगुप्तोरक्षितोदिव्येनस्वेनवैस्नवेनतेजसायुक्तइतिशेषः अत्रयेराक्षसा
विकर्त्तारःविघ्नकर्त्तारः तेषांविनाशनेपिशक्तःकिंपुनर्यत्तरक्षसौ ९ रातोदानव्रतेचनायाहश्रेयश्चेतिबहुरूपंबहु

॥ स्वपुत्रंराजशार्दूलरामंसत्यपराक्रमम॥ काकपक्षधरंवीरंज्येष्ठंमेदातुमर्हसि॥ ८ ॥ शक्तोह्येष॥
॥ मयागुप्तोदिव्येनस्वेनतेजसा॥ राक्षसायेविकर्त्तारस्तेषामपिविनाशने॥ ९ ॥ श्रेयश्चास्मैप्र॥
॥ दास्यामिबहुरूपंनसंशयः त्रयाणामपिलोकानांयेनख्यातिंगमिष्यति॥ १० ॥ नचतौ॥
॥ राममासाद्यशक्तौस्थातुंकथंचन॥ नचतौराघवादन्योहंतुमुत्सहतेपुमान॥ ११ ॥ वीर्यो॥
॥ त्सिक्तौहितौपापौकालपाशवशंगतौ॥ रामस्यराजशार्दूलनपर्याप्तौमहात्मनः॥ १२ ॥

[illegible]

प्रकारंत्रयाणांत्रिख्यातिरित्यर्थः १० आसाद्ययुद्धेइतिशेषः ११ वीर्योत्सिक्तौदृप्तौयतःपापौअतःकालोयमः सएवपा
शस्तद्वशंगतौअतोरामस्यनपर्याप्तावित्यर्थः १२

॥राम॥
॥७१॥

पुत्रकृतंपुत्रत्वेनकृतंस्नेहंकर्त्तुंनार्हसि किंतुपरवस्तुत्वेनकर्त्तुमर्हसि १३ दशानांरात्रीणांसमाहारोदशरात्रःरात्रान्ता
हाःपुंसीतिपुंस्त्वं १४ हंतोविद्धीतिभूतप्रत्ययेनवधस्यसुकरत्वंसूचितं १५ अहंवेद्मीत्यादिनारामस्यपरत्वमेववि
शदयति महात्मानं अप्राकृतदिव्यमंगलविग्रहं रामंनित्यावाप्तसमस्तकामतया त्मन्येवपरमानंदरू
पेरममाणं यद्वारमतेचरेषुसर्वेषुभूतेष्वंतर्यामितयेतिरामं सत्यपराक्रमंसदैकरूपपराक्रमंवाल्पेपिनिरव

नचपुत्रकृतंस्नेहंकर्तुमर्हसिपार्थिव ॥ दशरात्रस्तुयज्ञस्यतस्मिन्रामेणराक्षसौ ॥ हंतव्यौविघ्न
कर्त्तारौममयज्ञस्यवैरिणौ ॥ १४ ॥ अहंतेप्रतिजानामिहतौतौविद्धिराक्षसौ ॥ १५ ॥ अहंवेद्मिमहा
त्मानंरामंसत्यपराक्रमं ॥ वसिष्ठोपिमहातेजाये चेमेतपसिस्थिताः ॥ १६ ॥ ५६ ॥ ॥

धिकपराक्रममितियावत् अहंप्रबलतरोपासनेनलब्धज्ञानोवेद्मिवेदाहमेतंपुरुषंपुराणमितिश्रुतिसंवाद
न्निश्चिनोमि महातेजाः सरस्वतीवल्लभंस्तज्ञोत्पत्तिकयोगज्ञाननिधिर्वशिष्ठोपिवेद येचेमेरामरहस्यावेदि
नोगस्त्यपुलस्त्यादयोयेचेमेतपसिस्थितावामदेवभरद्वाजादयःपरमैकांतिनस्तेपिजानंतीत्यर्थः १६ श्रीराम

॥८०॥ नेश्यतित्वमित्यर्थः धर्मलाभंपरमंयशश्चयदिस्थिरमिच्छसीत्यन्वयः १६ किंचमंत्रिणांसंमतोदातुमर्हसित्याहयदि
हीति अनुज्ञांतामद्दानविषयकानुमंतिं विसर्जयप्रेषय १८ अभिप्रेतंममेष्टंतवचअसंसक्तंअतीतबाल्यत्वाना
नापितरशक्तिरहितंईश्वरत्वात्कृप्यनासक्तमितिव्यंगंय आत्मजंराजीवलोचनंरामंयस्यपत्तायदशरात्रंदातु

यदितेधर्मलाभंचयशश्चपरमंभुवि॥स्थिरमिच्छसिराजेंद्ररामंमेदातुमर्हसि॥१७॥यद्यभ्यनुज्ञां
काकुत्स्थददतेतवमंत्रिणः॥वसिष्ठप्रमुखाःसर्वेततोरामंविसर्जय॥१८॥अभिप्रेतमसंसक्त
मात्मजंदातुमर्हसि॥दशरात्रंहियज्ञस्यरामंराजीवलोचनं॥१९॥नात्येतिकालोयज्ञस्ययथायंमम
राघव॥तथाकुरुष्वभद्रंतेमाचशोकेमनःकृथाः॥२०॥इत्येवमुक्त्वाधर्मात्माधर्मार्थसहितंव
चः॥विररामहातेजाविश्वामित्रोमहामतिः॥२१॥सतन्निशम्यराजेंद्रोविश्वामित्रवचःशुभं॥शोकेन
महताविष्टश्चचालचमुमोहच॥२२॥लब्धसंज्ञस्ततोत्थायव्यषीदतभयान्वितः॥२३॥ ॥ ॥

मर्हसि १९ हेराघवममायंयज्ञस्यकालोयथानात्येतिनातिक्रमेत्तथाकुरुष्वतेभद्रम् २० अर्थोरामस्यात्वाद्हिता
भयः २१ चचालचकंपे २२ ततोत्थायेतिछांदसं भयान्वितः रक्षोनिमित्तपुत्रवियोगभयान्वितः २२ श्रीराम ॥ ८०॥

हरयस्य हृदयपुंडरीकवर्त्यात्मनः मनसोंतःकरणस्यच अतीवविदारणं पीडाजनकं शुश्रुवान् शुश्राव महान्नरप
तिः सार्वभौमइत्यावत् महात्मामहाबुद्धिः व्यथितमनाः मूर्छितचित्तः अभवत् अवस्यातुमशक्तः आसनात्स्वच

इतिसहृदयमनोविदारणंमुनिवचनंतदतीवशुश्रुवान् ॥ नरपतिरभवन्महान्महात्माव्यथितमनाः
प्रचचालचासनात् ॥२४॥ इत्यार्षेरामायणेवाल्मीकीयेबालकांडेसकोनविंशतितमः सर्गः ॥१९॥
तच्छ्रुत्वाराजशार्दूलोविश्वामित्रस्यभाषितं ॥ मुहूर्तमिवनिःसंज्ञः संज्ञावानिदमब्रवीत् ॥१॥ ॥ ॥

चालेत्यर्थः २४ इत्येकोनविंशः सर्गः १९ निःसत्त्वइवनिष्प्राणइव ततःसंज्ञावान्जातमूर्छाइदंवक्ष्यमाणमब्रवीत् १

ऊनानिषोडशार्थमागतस्यरामस्यवयोवर्षाणियस्यसः द्वादशवर्षइत्यर्थः कौशिकयागरक्षणार्थमागतस्यरामस्यवयो
॥८१॥ विशेषमुद्दिश्यबालोद्वादशवर्षोयत्कृतार्थश्चराघवइत्यारण्यकांडेरावणंप्रतिमारीचोक्तेः अत्रदशरथेनपित्राऊन
षोडशवर्षइत्युक्ते ऊनत्वंचमासेनमासद्वयेनषण्मासेनवास्यात् नत्वेकवर्षादिभिः तस्मिन्नेववर्षेजानकीविवाहः त
दनुद्वादशवर्षाणिअयोध्यावासः तथाचवनप्रवेशकालेरामस्याष्टादशविंशतिवर्षाणीतिप्रतिभाति तदनुप
पन्नं ममभर्त्तामहातेजावयसापंचविंशकः अष्टादशहिवर्षाणिममजन्मनिगण्यते इतिसंन्यासिवेषरावणंप्र
तिसीतावचनात् कौशल्यायाचवनप्रवेशसमयेप्रोच्यते दशसप्तचवर्षाणिजातस्यतवपुत्रक अतितानिप्रका

ऊनषोडशवर्षोमेरामोराजीवलोचनः॥ नयुद्धयोग्यतामस्यपश्यामिसहराक्षसैः ॥२॥ ॥ ॥

क्षंत्यामयादुःखपरिक्षयमिति तस्मादष्टाविंशतेः सप्तदशानांचकथमविरोधइति अत्रोच्यते कौशल्यावा
क्येजातस्येतिउपनयनाख्यंद्वितीयंजन्मोच्यते तच्चदशरथेनकाम्यपक्षमाश्रित्यगर्भाष्टमएवकृतं तथाचद्वि
तीयजन्मापेक्षयासप्तदशत्वंउपनयनात्पूर्वैसप्तवर्षाणितिवयसापंचविंसक इतिसीतावचनमप्युपपन्नं ऊन
षोडशवर्षइत्यत्रापिपाठेनत्वे द्वादशवर्षेइत्युक्तत्वादितिसर्वंजसमिति द्वादशवर्षोराजीवलोचनोमेरामःसदाम ॥८१॥
दुत्संवर्तितयामद्विरहासहिष्णुरितिभावः अस्यराक्षसैःसहयुद्धयोग्यतांनपश्यामिकिंतुक्रीडनकस्वीकारयोग्य
तमेवपश्यामित्यर्थः २

तर्हितवप्रतिज्ञाव्यर्थोस्यात्तत्राहइयमितियस्याहमितिसंधिरार्षःपातिः पालकःईश्वरःस्वामीयोद्धास्मीति
शेषः ३ विक्रांताअक्षतविक्रमाः ४ गोप्तापतस्येतिशेषः ५ अहंगमीष्यामीत्यनेनपुरस्थिताभविष्यतीति

इयमक्षौहिणीसेनायस्याहंपतिरीश्वरः ॥ अनयासहितोगत्वायोद्धाहंतैर्निशाचरैः ॥३॥ इमेशू
राश्चविक्रांताभृत्यामेस्त्रविशारदः ॥ योग्यारक्षोगणैर्योद्धुंनरामंनेतुमर्हसि ॥४॥ अहमेवधनुष्पा
णिर्गोप्तासमरमूर्द्धनि ॥ यावत्प्राणान्धरिष्यामितावद्योत्स्येनिशाचरैः ॥५॥ निर्विघ्नाव्रतचर्यासा
भविष्यतिसुरक्षिता ॥ अहंतत्रगमिष्यामिनरामंनेतुमर्हसि ॥६॥ बालोह्यकृतविद्यश्चनच
वेत्तिबलाबलं ॥ नचास्त्रबलसंयुक्तोनचयुद्धविशारदः नचासौरक्षसांयोग्यःकूटयुद्धाहिराक्ष
साः ॥७॥ विप्रयुक्तोहिरामेणमुहूर्तमपिनोत्सहेजीवितुंमुनिशार्दूलनरामंनेतुमर्हसि ॥८॥ ॥

योजना ६ रामगमनेऽनुपपत्तिमाहबालइतिअकृतएवाकृतविद्यबलाबलंशत्रूणामितिशेषः रक्षसांयुद्धेइ
तिशेषःकूटयुद्धाःकपटयुद्धाः ७ मत्स्वभावश्चेयमित्याहविप्रयुक्तइतिविनाकृतइत्यर्थः ८ श्रीराम

चत्वार्यंगानि चतुरंगानि ९ षष्टिर्वर्षसहस्राणि अतीतानि इति शेषः तदनंतरं दुःखेन उपवासदीक्षादिक्लेशेनोत्पादितः १० चतुर्णां मध्ये रामे परमिका प्रीतिः स्वार्थे कः तस्माज्ज्येष्ठत्वाद्धेतोः न नेतुमर्हसीति योजना ११ अथ सर्वथा रामनयनमयुक्तमिति विकुंयोद्धृस्वरूपं पृच्छति किमिति किंनामधेयाः कथंप्रमाणाः कीदृशाका

यदि वा राघवं ब्रह्मन्नेतुमिच्छसि सुव्रतः॥ चतुरंगसमायुक्तं मया सह च तं नय ॥९॥ षष्टिर्वर्षसहस्राणि जातस्य मम कौशिक दुःखेनोत्पादितश्चायं न रामं नेतुमर्हसि ॥१०॥ चतुर्णामात्मजानां हि प्रीतिः परमिका मम ज्येष्ठे धर्मप्रधाने च न रामं नेतुमर्हसि ॥११॥ किंवीर्या राक्षसास्ते च कस्य पुत्राश्च के च ते॥ कथंप्रमाणाः के चैतान्रक्षन्ति मुनिपुंगव ॥१२॥ कथं च प्रतिकर्तव्यं तेषां रामेण रक्षसां॥ मामकैर्वा बलैर्ब्रह्मन्मया वा कूटयोधिनां॥१३॥ सर्वं मे शंस भगवन्कथं तेषां मया रणे॥ स्थातव्यं दुष्टभावानां वीर्योत्सिक्ता हि राक्षसाः॥१४॥

रा इत्यर्थः एतान्के रक्षंति के प्रधाना इत्यर्थः १२ प्रतिकर्तव्यं प्रतिविधेयं संहारः कथं कर्तव्य इत्यर्थः १३ तेषां रणे कथं मया स्थातव्यमिति व्यूहप्रकारप्रश्नः १४

१५ राक्षसः अस्तीति शेषः किंवीर्य इत्यस्योत्तरमाह स इति १६ प्रसिद्धमन्वायमित्याह श्रूयत इति १७ यतो महा
बलस्ततो यज्ञमनादरात्स्वयं यज्ञस्य विघ्नकर्त्ता न खलु अनादरात्स्वयं विघ्नाय नागच्छति तदा १८ तेन राव

नस्य तद्वचनं श्रुत्वा विश्वामित्रोऽभ्यभाषत ॥१५॥ पुलस्त्यवंशप्रभवो रावणो नाम राक्षसः स ब्रह्मणा दत्त
वरस्त्रैलोक्यं बाधते भृशं ॥१६॥ महाबलो महावीर्यो राक्षसैर्बहुभिर्वृतः श्रूयते च महावीर्यो रावणो
राक्षसाधिपः ॥१७॥ साक्षाद्वैश्रवणभ्राता पुत्रो विश्रवसो मुनेः ॥ यदा न खलु यज्ञस्य विघ्नकर्त्ता म
हाबलः ॥१८॥ तेन संचोदितौ तौ तु राक्षसौ च महाबलौ ॥ मारीचश्च सुबाहुश्च यज्ञविघ्नं करिष्यतः
॥१९॥ इत्युक्तो मुनिना तेन राजोवाच मुनिं तदा ॥ न हि शक्तोऽस्मि संग्रामे स्थातुं तस्य दुरात्मनः ॥ ।
२०॥ स त्वं प्रसादं धर्मज्ञ कुरुष्व मम पुत्रके ॥ मम चैवाल्पभाग्यस्य दैवतं हि भवान्गुरुः ॥२१॥

णेन प्रेरितौ मारीचसुबाहू यज्ञविघ्नं करिष्यत इति संबंधः १९ तस्य रावणस्य २० अल्पभाग्यस्येति त्वन्नि
योगाकरणेनेति शेषः प्रसादकरणे हेतुः दैवतमिति २१

देवेतिरावणसंग्रामवैमवैमुख्यंनदोषायसर्वाशक्यत्वादित्याशयः २२ सत्वित्यर्द्धत्रयमेकंवाक्यं वीर्यमादत्ते
नाशयतीत्यर्थः तस्यबलैर्मारीचादिभिः हेमुनिश्रेष्ठसबलस्सःससैन्यःममपुत्रैःसहितोवाभवानपितेनयोद्धुंनश
क्तइत्यनुषंगः २३ अस्तुवाभवतस्तथासामर्थ्यंपुत्रंतुसुवंध्यानदास्यामीत्याहकथमपीति अमरप्रख्यंअमर

देवदानवगंधर्वायक्षाःपतगपन्नगाः॥ नशक्तारावणंसोढुंकिंपुनर्मानवायुधि॥२२॥सतुवी
र्यवतांवीर्यमादत्तेयुधिरावणः॥तेनचाहंनशक्तोस्मिसंयोद्धुंतस्यवाबलैः॥सबलोवामुनिश्रेष्ठ
सहितोवाममात्मजैः॥२३॥कथमप्यमरप्रख्यंसंग्रामाणामकोविदं॥बालंमेतनयंब्रह्मन्नै
वदास्यामिपुत्रकं॥२४॥अथकालोपमौयुद्धेसुतौसुंदोपसुंदयोः॥यज्ञविघ्नकरौतौतेनैव
दास्याम्यहंसुतं॥२५॥तौतुयक्षस्यकन्यायांजातौदैत्यकुलोद्भवौ॥मारीचश्चसुबाहुश्चवी
र्यवंतौसुशिक्षितौ॥२६॥

तुल्यरूपमेवनत्वमरमितात्पर्यं पुत्रकमित्यनुकंपायांकन् २४ प्रसंगेनेहेत्वंत
रमप्याह अथेत्यादि यतःसुंदोपसुंदपुत्रौकालोपमौयमतुल्यौमारीचसुबाहूदैत्यकुलजौसुंदोपसुंदाभ्यांयक्षकन्या
यांजातत्वेनअगस्त्यशापेनअतिक्रूरतमोराक्षसत्वंप्राप्तौयज्ञविघ्नकरौअतःसुतंनैवदास्यामीत्यन्वयः २५ २६

अन्यथा भवतामममानयनेऽनुनेष्यामि तमागमनाय चेति शेषः २७ उत्तरसर्गार्थमंते संगृह्णाति इनीति जल्पनात् अप्रसं
गतोक्तेः कोपाविष्टत्वे दृष्टांतमाह सुहुत इति आज्यैः समिद्भिः सुहुतः तत आज्यसिक्तो वह्निरिव महर्षिव महर्षिवह्निः ज्व
लितो बभूव रोषज्वालारूपचित्तवृत्तियुक्तो जात इत्यर्थः २८ इति विंशसर्गः २० स्नेहेन पुत्रस्नेहेन पर्याकुलानि

तयोरन्यतरं योद्धुं यास्यामि ससुहृद्गणः ॥ अन्यथा त्वनुनेष्यामि भवंतं सहबांधवः ॥२७॥ इति नरपतिज
ल्पनाद्द्विजेंद्रं कुशिकसुतं सुमहान्विवेश मन्युः ॥ सुहुत इव मखेऽग्निराज्यसिक्तः समभवदुज्ज्वलितो महर्षि
वह्निः ॥२८॥ इत्यार्षे रामायणे बालकांडे विंशः सर्गः ॥२०॥ तच्छ्रुत्वा वचनं तस्य स्नेहपर्याकुलाक्षरं ॥ स
मन्युः कौशिको वाक्यं प्रत्युवाच महीपतिं ॥१॥ पूर्वमर्थे प्रतिश्रुत्य प्रतिज्ञां हातुमिच्छसि ॥ राघवाणाम
युक्तोऽयं कुलस्यास्य विपर्ययः ॥२॥ ॥ ॥

गद्गदानि अक्षराणि यस्मिन् तत्तस्य वचनं श्रुत्वेत्यन्वयः १ अर्थे
प्रार्थिर्थे अर्थं विधेर्येयः प्रतिज्ञाहानिरूपः राघवाणामयुक्तः यत्तोयमस्य कुलस्य विपर्ययो नाश इति विपर्ययेयरा
वृत्त्या संबंधः २

२

॥८४॥

इदंप्रतिज्ञावान्यथाकरणंतेक्षमंयुक्तंयदिसुखीभवेतिव्यंग्योक्तिः ३ तस्येत्यादिषौसत्रम्यर्षेतस्मिन्विश्वामित्रेरोष
व्याप्तेसतीत्यर्थः जगदन्यथाकरणंतेक्षमंयुक्तंयदिसुखीभवेति समर्थोयमपकुरुद्धःकिंकरिष्यतीतिस्वानांभयं ४
त्रस्तरूपंप्रतिशयेनत्रस्तंजगत्त्रैलोक्यंधीरोधीमान् ५ साक्षाद्धर्मइवइवशब्दएवार्थेत्वमितिशेषः दृणातेपरूप

यदीदंतेक्षमंराजन्गमिष्यामियथागतं॥मिथ्याप्रतिज्ञःकाकुत्स्थसुखीभवसुहृद्वृतः॥३॥तस्यरोषपरी
तस्यविश्वामित्रस्यधीमतःचचालवसुधाकृत्स्नाविवेशचभयंसुरान्॥४॥त्रस्तरूपंतुविज्ञायज
गत्सर्वंमहानृषिःनृपतिंसुव्रतोधीरोवसिष्ठोवाक्यमब्रवीत्॥५॥इक्ष्वाकूणांकुलेजातःसाक्षाद्ध
र्मइवापरः धृतिमान्सुव्रतःश्रीमान्नधर्मंहातुमर्हसि॥६॥त्रिषुलोकेषुविख्यातोधर्मात्माइतिरा
घव स्वधर्मंप्रतिपद्यस्वनाधर्मंवोढुमर्हसि॥७॥संश्रुत्यैवंकरिष्यामीत्यकुर्वाणस्यराघव॥इ
ष्टापूर्तवधोभूयात्तस्माद्रामंविसर्जय॥८॥

कमिदं ६ स्वधर्मंसत्यप्रतिज्ञत्वं ७ इष्टंअश्वमेधान्तयागः पूर्तंवापिकूपादिनिर्माणं तद्वधःतत्फलनाशः
भवेत् ८

॥८४॥

कृतास्त्रं शिक्षितास्त्रं शक्ष्यंतिसहिष्यंते ९ मकेवलंविश्वामित्रकृतसंरक्षणोनैवास्यरघुनाथस्यदुर्धर्षत्वंकिंतुस्वतो
पीत्याहरामविश्वामित्रयोः श्लिष्टवर्णनेनएषरामोविश्वामित्रश्चरामपक्षेसहजोधर्मःसहजंवीर्यंविश्वामित्रपक्षेधै
र्यंसाधनसाध्यंरामपक्षेविद्याधिकःसहजज्ञानशक्तिःतपसःमननादेःपरायणंप्राप्यःविश्वामित्रपक्षेतपोनि

कृतास्त्रंवाकृतास्त्रंवानैनंशक्ष्यंतिराक्षसाः॥ गुप्तंकुशिकपुत्रेणज्वलनेनामृतंयथा॥९॥ एषविग्र
हवान्धर्मएषवीर्यवतांवरः॥ एषविद्याधिकोलोकेतपसश्चपरायणो॥१०॥ एषोस्त्रान्विविधान्वे
त्तित्रैलोक्येसचराचरे॥ नैनमन्यःपुमान्वेत्तिनचवेत्स्यंतिकेचन॥११॥ नदेवानर्षयःकेचिन्नामरान
चराक्षसाः॥ गंधर्वयक्षप्रवराःसकिंनरमहोरगाः॥१२॥ सर्वास्त्राणिकृशाश्वस्यपुत्राःपरमदुर्जयाः
कौशिकायपुरादत्तायदाराज्यंप्रशासति॥१३॥
तद्विद्याधिकःतपसःपरायणंआश्रयः १० रामपक्षे ७४
एनंरामंअन्यःपुमाननविद्यावत्तःपुमान्नित्यर्थःविश्वामित्रपक्षेएतांअस्त्रब्रह्मगतां ११ १२ ननुदेवाद्यनवगतसर्वा बा
स्त्रप्राप्तिःअस्यकथमित्यतआहसर्वास्त्राणीतिकृशाश्वःप्रजापतिःकःदत्ताःशिवेनेतिशेषःप्रशासतिप्रशास्तिस्म टी

॥८५॥ प्रजापतिसुतेदक्षकन्येतयोः सुताः नैकरूपाः अनेकरूपाः १४ केप्रजापतिसुते तत्राह जया चेति सूतेवातेइत्य
र्थः परमभास्वरमिति शताभिप्रायेणैकवचनं १५ काकति अस्रूत यत तत्राह पंचाशतमिति परान्श्रेष्ठा

ते पि पुत्रा भृशाश्वस्य प्रजापतिसुतासुताः॥ नैकरूपा महावीर्या दीप्तिमंतो जयावहा ॥१४॥ जया च सु
शस्त्राणि प्रभा चैव दक्षकन्ये सुमध्यमे॥ ते सूते स्त्राणि शतं परमभास्वरं॥१५॥ पंचाशतं सुतान्लेभे जया लब्ध
वरापरान्॥ वधायासुरसैन्यानामप्रमेयानरूपिणाः॥१६॥ सुप्रभाजनयच्चापि पुत्रान्पंचा
शतं पुनः संहारान्नाम दुर्धर्षान्दुराक्रामान्बलीयसः॥१७॥ तानि चास्त्राणि वेत्त्येष यथाव
त्कुशिकात्मजः॥ अपूर्वाणां च जनने शक्तो भूयश्च धर्मवित् ॥१८॥ न् अप्रमेयान् अपरिच्छे
द्यवैभवान् अरूपिणः अदृश्यमानरूपान् १६ संहारान् अन्वर्थः संहारसंतान् दुर्धर्षान् वैरैरभि
भवितुमशक्यान् दुराक्रामान् अमोघान् इत्यर्थः १७ यथावत्कात्स्न्येन अपूर्वाणां अस्त्रविद्याविशेषाणामिति
शेषः १८ ॥८५॥

१९ २० वस्तुतोरक्षोनिग्रहेशक्तोपिकौशिकस्त्वत्पुत्रानुग्रहार्थमेवत्वांयाचतइत्याहतेषामितिहितमनेकवि
द्याप्रदानादिरूपं २१ २२ मुमुदमुमुदेकुशिकात्मजापरामंत्रानुबुद्ध्याग्रचिंतयदितिशेषः २२ इत्येकविंशःस

तेनास्यमुनिमुख्यस्यधर्मज्ञस्यमहात्मनः नकिंचिदस्त्यविदितंभूतंभव्यंचराघव ॥१९॥ एवंवीर्यो
महातेजाविश्वामित्रोमहायशाः नरामगमनेराजन्संशयंगंतुमर्हसि ॥२०॥ तेषांनिग्रहणेशक्तः स्व
यंचकुशिकात्मजः धनुर्भृतोस्यशक्रस्तुविभियात्समरेविभो ॥२१॥ तवपुत्रहितार्थायत्वामुपे
त्याभियाचते ॥२२॥ इतिमुनिवचनात्प्रसन्नचित्तोरघुवृषभश्चमुमोदपार्थिवः । गमनमभिरुरोचरा
घवस्यप्रथितयशाःकुशिकात्मजायबुद्ध्या ॥२३॥ इत्यार्षेरामायणेबालकांडेएकविंशःसर्गः ॥ २१
तथावसिष्ठेब्रुवतिराजादशरथःस्वयं ॥ प्रहृष्टवदनोराममाजुहावसलक्ष्मणं ॥१॥ कृतस्वस्त्ययनंमा
त्रापित्रादशरथेनच ॥ पुरोधसावसिष्ठेनमंगलैरभिमंत्रितं ॥२॥

टी॰ २ सलक्ष्मणंराममितितयोरविनाभावत्वान्नादितिशेषः १ कृतेत्यादिश्लोकद्वयमेकान्वयं कृतस्वस्त्य
यनंकृतमंगलानुष्ठानं मंगलैर्मंगलसूचकैर्मंत्रैरभिमंत्रितंकृतांगन्यासं २ राम

सराजातद्वाक्यश्रवणेनसुप्रीतमनाःसन्रामंददर्श ३ अथयात्रायांशुभनिमित्तसंपत्तिंदर्शयन्नितत इत्यादि व
वीरस्यास्यपक्षेतदितिशेषः विश्वामित्रगतंतत्संवद्धं राजीवंपद्मं ४ प्रयातेप्रयाणोन्मुखेस्वप्रयोजनोपक्रमा
देवानांदुंदुभीस्वनैःसहितापुष्पवृष्टिः शंखादिघोषस्तुस्वनगरजः ५ धन्वीधनुर्विद्याकृतश्रमः कलापि

सपुत्रंमूर्ध्न्युपाघ्रायराजादशरथस्तदा॥ ददौकुशिकपुत्रायसुप्रीतेनांतरात्मना॥३॥ ततोवायुःसुखस्पर्शो
नीरजस्कोववौतदा विश्वामित्रगतंरामंदृष्ट्वाराजीवलोचनं॥४॥ पुष्पवृष्टिर्महत्यासीद्देवदुंदुभि
निस्वनैः शंखदुंदुभिनिर्घोषः प्रयातेतुमहात्मनि॥५॥ विश्वामित्रोऽययावग्रेततोरामोमहायशाः काकपक्ष
धरोधन्वीतंचसौमित्रिरन्वगात्॥६॥ कलापिनौधनुष्पाणीशोभयानौदिशोदश॥ विश्वामित्रंमहा
त्मानंपंचशीर्षाविवोरगौ॥७॥

नावित्यादिसार्द्धश्लोकमेकान्वयंकलापिनौतूणीरधारिणौकलापोभूष
णेवर्हेतूणीरेसंहतावपीतकोशः शोभयानौप्रकाशयंतौ विश्वस्यमित्रंविश्वामित्रः मित्रेचर्षाविति विश्वे
शब्दस्यदीर्घःस्तुतिश्रुतस्येदंविश्वंमित्रमसौचाहृदं किंतस्माद्विश्वामित्रमाचक्षतेइति पंचशीर्षाविवोरगौस्कं
धद्वयशिरस्कौति त्रिशीर्षाविवपन्नगावितिपाठेस्कंधस्थितधनुषापृष्ठवद्धतूणीरेणमस्तकेनचत्रिशीर्षत्वं
यद्वाप्रत्येकंतूणीरद्वयधारणात्त्रिशीर्षत्वंधनुषःपारागुक्तेयात्र ७

अक्षुद्रौ अनल्परूपवीर्यौ हिमंतौ ८ तदेत्यादिसार्द्धश्लोकद्वयमेकान्वयं बद्धगोधांगुलित्राणौ बद्धं गोधाचर्मकृतं
अंगुलित्राणं याभ्यां तौ ९ शोभयेतामित्यत्र अभावश्छांदसः विश्वामित्रमनुयातौ रामलक्ष्मणौ स्थाणुमनुयातौ कुमा
रौ श्रिया शोभेनाभितामित्यर्थः स्थाणुं रुद्रं पावकी पावकात्साद्भूतौ स्कंदविशाखाविव ततोऽभवच्चतुर्मूर्त्तिः क्ष
णेन भगवान्प्रभुः स्कंदो विशाखः श्लाघ्यश्च नैगमेयश्च पृष्ठत इ भारतोक्ते १० अध्यर्धयोजनं अर्धाधिकयो

अनुजग्मतुरक्षुद्रौ पितामहमिवाश्विनौ ॥ तदाकुशिकपुत्रं तु धनुष्पाणी स्वलंकृतौ ॥ ८ ॥ बद्धगोधांगुलि
त्राणौ खड्गवंतौ महाद्युती ॥ कुमारौ चारुवपुषौ भ्रातरौ रामलक्ष्मणौ ॥ ९ ॥ अनुयातौ श्रियादीप्तौ शोभयेतामनि
न्दितौ ॥ स्थाणुं देवमिवाचिंत्यं कुमाराविव पावकी ॥ १० ॥ अध्यर्धयोजनं गत्वा सरय्वाद्दक्षिणे तटे ॥ रामेति
मधुरां वाणीं विश्वामित्रोऽभ्यभाषत ॥ ११ ॥ गृहाण वत्स सलिलं मा भूत्कालस्य पर्ययः ॥ १२ ॥

जनं षट्क्रोशं ११ तत्र दुर्गमने बालयोः क्षुत्पिपासाप्रादुर्भावस्यावश्यकत्वान्महर्षिर्विनाप्यमंत्रं परमतत्त्वप्रयेविधेऽ
पदेष्टुमाह गृहाणेति वत्सराम सलिलं गृहाण आचमनं कुरु कालस्य भोजनकालस्य पर्ययः अतिक्रम १२

मंत्रग्रामंमंत्रसमूहरूपंबलातिबलाख्यंतद्ग्रहणात्फलमाहनश्रमइत्यादि १३ अस्तिभविष्यति वर्त्तमानसामीप्ये
भविष्यतिलट् सर्वत्रतद्विद्यालाभोहेतुः १४ नकेवलंपृथिव्यामेवेत्याहत्रिष्वित्यादि १५ सौभाग्येसौंदर्येदाक्षि

मंत्रग्रामंगृहाणत्वंबलामतिबलांतथा ॥ नश्रमोनज्वरोवातेनरूपस्यविपर्ययः ॥१३॥ नचसुप्तंप्रमत्तंवा
धर्षयिष्यंतिनैर्ऋताः ॥ नबाह्वोःसदृशोवीर्येपृथिव्यामस्तिकश्चन ॥१४॥ त्रिषुलोकेषुवैरामनभ
वेत्सदृशस्तव ॥ बलामतिबलांचैवपठतस्तवराघव ॥१५॥ नसौभाग्येनदाक्षिण्येनज्ञानेबुद्धिनि
श्चये ॥ नोत्तरेप्रतिवक्तव्येसमोलोकेतवानघ ॥१६॥ एतद्विद्याद्वयेलब्धेनभवेत्सदृशस्तव ॥ ब
लाचातिबलाचैवसर्वज्ञानस्यमातरौ ॥१७॥ क्षुत्पिपासेनतेरामभविष्येतेनरोत्तम ॥ बलामतिबलांचै
वपठतःपथिराघव ॥१८॥ गृहाणसर्वलोकस्यगुप्तयेरघुनंदनविद्याद्वयमधीयानेयशश्चाप्यभवेद्भु
वि ॥१९॥

ण्येसामर्थ्ये ज्ञानेतत्त्वज्ञानेबुद्धिनिश्चयेबुद्ध्याकार्यनिश्चयेवाह्निंप्रतिवक्तव्येउत्तरेतवसमोनभविष्यतीतिशे
षः १६ सामान्येनोपसंहरतिएतेइति तवसदृशोनकेनापिगुणेनेतिशेषः मातरौकारणभूते १७ भविष्येतेभवि
ष्यतः १८ अधीयानेत्वयियशश्चभवेदित्यर्थः १९

तयोर्थिवयोस्तादृशसामर्थ्यकारणमाहपितामहेत्यादि तन्निर्मितत्वात्तत्सुतेतेजसमन्वितेप्रभावयुक्ते सदृशस्तद्
नयोग्यइत्यर्थः २० यद्यपेतेपूर्वोक्ताःसौभाग्यादयोवहुप्रकारागुणाःसर्वेपित्वयिकामंयथेष्टंसंत्येवतथाप्येतेवि

पितामहसुतेह्येतेविद्येतेजःसमन्विते ॥ प्रसूतस्त्वंकाकुत्स्थसदृशस्त्वंहिपार्थिव ॥२०॥ कामंवहुगुणाः
सर्वेत्वय्येतेनात्रसंशयः ॥ तपसासंभृतेचैतेवहुरूपेभविष्यतः ॥२१॥ ततोरामोजलंस्पृष्ट्वाप्रहृष्टवदनः
शुचिः ॥ प्रतिजग्राहतेविद्येमहर्षेर्भावितात्मनः ॥२२॥ विद्यासमुदितोरामःशुशुभेभूरिविक्रमः ॥ स
हस्ररश्मिर्भगवान्शरदीवदिवाकरः ॥२३॥ गुरुकार्याणिसर्वाणिनियुज्यकुशिकात्मजे ॥ ऊषुस्तां
रजनींतत्रस[illegible]सुसुखंत्रयः ॥२४॥

द्येतपसानियमेनत्वयासंभृतेधृतेवहुरूपेदेशाल्लोकेवहुविस्तृतेभ
विष्यतः २१ जलंस्पृष्ट्वाआचम्यभावितात्मनःध्यानात्मस्वरूपात् २२ विद्यासमुदितःविद्यासंवद्धःस्वतोवि
क्रमवानपिविद्यासंवंधादधिकविक्रमइत्यर्थः २३ गुरुकार्य्याणिपादोपसंग्रहणादीनिकुशिकात्मजेनि
युज्यकृत्वेत्यर्थःसरय्वांतत्तीरे २४

॥८८॥ दशरथेत्यादि षष्ठ्यर्थे चतुर्थी दशरथतनयसत्तमयोरित्यादि तृणाद्यनुचितशयनोषितयोरपि रात्रेः सुखसुप्तत्वे
कुशिकसुतवचोनुलालनं हेतुः विबभौ बभौ इति यावत् इवशब्दो वाक्यालंकारे २५ इति द्वाविंशः सर्गः २२ पर्णसं
स्तरे तृणपर्णोपरिकल्पिते शयनीये १ सुखसुप्तं रामं प्रबोधनार्थमागतो विश्वामित्रो रामस्यानिद्राकालीनां स्थि

दशरथतनयसत्तमाभ्यां तृणशयनेनुचिते सहोषिताभ्यां ॥ कुशिकसुतवचोनुलालिताभ्यां सुखमिव
सा विबभौ विभावरी ॥२५॥ इत्यार्षे रामायणे बालकांडे द्वाविंशः सर्गः ॥२२॥ प्रभातायां तु शर्वर्यां वि
श्वामित्रो महामुनिः ॥ अभ्यभाषत काकुत्स्थं शयानं पर्णसंस्तरे ॥१॥ कौशल्यासुप्रजा राम पूर्वा सं
ध्या प्रवर्तते ॥ उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकं ॥२॥ तस्यर्षेः परमोदारं वचः श्रुत्वा नरोत्तमौ
स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपं ॥३॥

यमवलोक्येमं प्रसूतवती कौशल्या किंवा न यत्नप्रवती
ति विस्मयते कौशल्यासुप्रजा इति प्रबोधयति हे राम पूर्वा संध्या प्रवर्तते अतो हे नरशार्दूल मयत्ननिर्वाह
क दैवमाह्निकं दैवविहितं नित्यं कर्म लोकसंग्रहाय भवतापि कर्तव्यमित्यर्थः २ परमोदारं परमगंभीरमित्य
र्थः स्नात्वा कृतोदकौ कृतार्घ्यदानौ परमं जपं गायत्रीं जेपतुः तस्या एव परमत्वात् न सावित्र्याः परं जाप्यमिति वचनात् ३ ॥८८॥

अन्हिभवमान्हिकंकृतप्रातःकृत्वाविस्वर्पःउपतस्थतुःसंमुखंस्थितौ ४ ततस्तस्माद्देशात्प्रयातौनौतत्रप्रसिद्धंसरय्वाः
संगमेत्रिपथगांगंगांनदींददृशाते ५ तत्रगंगासरयूसंगमेतप्यतांतपतांऋषीणामाश्रमपदंददृशातेइत्यनुकर्षः ६
तंपरमरमणीयं ७ वसतेवसतितङ्छांदसः ८ प्रस्मेमाधुर्योन्मानुषभावेननसादाप्रहासः यस्यपूर्वःपूर्वकाला

कृतान्हिकौमहावीर्यौविश्वामित्रंतपोधनं॥अभिवाद्याभिसंहृष्टौगमनायोपतस्थतुः॥४॥तौप्रया
तौमहावीर्यौदिव्यांत्रिपथगांनदीं॥ददृशातेततस्तत्रसरय्वाःसंगमेशुभे॥५॥तत्राश्रमपदंपुण्य
मृषीणांभावितात्मनां॥बहुवर्षसहस्राणितप्यतांपरमंतपः॥६॥तंदृष्ट्वापरमप्रीतौराघवौपु
ण्यमाश्रमं॥ऊचतुस्तंमहात्मानंविश्वामित्रमिदंवचः॥७॥कस्यायमाश्रमःपुण्यःकोन्वस्मिन्वसते
पुमान्॥भगवंश्रोतुमिच्छावःपरंकौतूहलंहिनौ॥८॥तयोस्तद्वचनंश्रुत्वाप्रहस्यमुनिपुंगवः॥अ
ब्रवीच्छ्रूयतांरामयस्यायंपूर्वआश्रमः॥९॥कंदर्पोमूर्तिमानासीत्कामइत्युच्यतेबुधैः॥तपस्यंतमि
हस्थाणुंनियमेनसमाहितं॥१०॥

भिधेयः अयमाश्रमोऽश्रूयतामित्यन्वयः ९ यःकामइत्युच्यतेसःकंदर्पःपुरामूर्त्तिमानासीत्तपस्यंतमितिसार्द्धश्लो
कमेकान्वयः इहाश्रमेतपस्यंतंतपश्चरंतंनियमेनअविच्छेदेनसमाहितंसमाधिमंतं १० श्रीरामायनमः

॥८२॥

कृतोद्वाहंसमाधेःकृतव्युत्थानंकालोचितविलासदेशंगच्छंतंदेवेशंदुर्मेधाकामःधर्षयाम सचित्तविकारोत्पा
दनेनाभिभूतवान् ततोमहात्मनारुद्रेणहुंकृतःचक्षुषाऽवध्यातोदग्धश्चासीदितिशेषः ११ व्यशीर्यं

कृतोद्वाहंतुदेवेशंगच्छंतंसमरुद्गणं॥धर्षयामासदुर्मेधाहुंकृतश्चमहात्मना॥११॥अवध्या[illegible]रौ तश्च
द्रेणचक्षुषारघुनंदन॥व्यशीर्यंतशरीरात्स्वात्सर्वगात्राणिदुर्मतेः॥१२॥तस्यांगान्यपतन्रामनिर्द
ग्धस्यमहात्मना॥अशरीरःकृतःकामःक्रोधाद्देवेश्वरेणह॥१३॥अनंगइतिविख्यातस्तदाप्रभृतिरा
घव॥सचांगविषयःश्रीमान्यत्रांगंसमुमोचह॥१४॥तस्यायमाश्रमःपुण्यस्तस्येमेमुनयःपुराशि
ष्याधर्मपरावीरतेषांपापंनविद्यते॥१५॥इहाद्यरजनींरामवसेमशुभदर्शन॥पुण्ययोःसरितोर्म
ध्येश्वस्तरिष्यामहेवयं॥१६॥

न्तविशीर्णानिसर्वगात्राणिसर्वावयवाः १२ हेतिप्रसिद्धौ १३ ततोभया
त्पलायमानोयत्रदेशेसकामःअंगंमुमोचसःश्रीमान्शोभमानोंगविषयःअंगदेशइतिविख्यातइतिशेषः
१४ तस्यस्थाणोरयमाश्रमः इमेमुनयस्तस्यरुद्रस्यपुरापूर्वकालसंतानपरंपरयाशिष्याअतएवधर्मपराः
अतएवतेषांपापंनविद्यते १५ इहअंगविषयेसरितोःगंगासरय्वोःतरिष्यामहेगंगामितिशेषः १६ ॥८२॥

अभीत्यादि सार्द्धमेकं वाक्यं हे नरोत्तम वयं सर्वे स्नानादिना शुचयो भूत्वा पुण्यमाश्रममभिगच्छामहे यत्र
पात्तइ इहास्माकं वासः परः प्रकृष्टतरो भविष्यति निशां सुखं वत्स्यामहे हे इति पदयरूपंस्वा १७ तेषां संवदतां
तेषु विश्वामित्रादिषु एवं संवदत्सु तत्राश्रमे विद्यमाना मुनयस्तपसा दीर्घेणा विप्रकृष्टार्थग्रहणासमर्थेरा

अभिगच्छामहे सर्वे शुचयः पुण्यमाश्रमे ॥ इह वासः परोस्माकं सुखं वत्स्यामहे निशां ॥ स्नाताश्च कृ-
तजप्याश्च हुतहव्या नरोत्तम ॥१७॥ तेषां संवदतां तत्र तपोदीर्घेण चक्षुषा ॥ विज्ञाय परमप्रीता मुन-
यो हर्षमागमन् ॥१८॥ अर्घ्यं पाद्यं तथातिथ्यं निवेद्य कुशिकात्मजे ॥ रामलक्ष्मणयोः पश्चादकुर्वन्न-
तिथिक्रियां ॥१९॥

चक्षुषा ज्ञानेन रामाद्यागमनतात्कालिकनिरासनिमित्तं विज्ञाय परमप्रीता हर्षं ह-
र्षपुलकं आगामन् हर्षपुलकिताङ्गा अभवन्नित्यर्थः १८ ते च मुनयः अर्घ्यं पाद्यं तथातिथ्यं भोजनादि कुशि-
कात्मजे निवेद्य पश्चाद्रामलक्ष्मणयोरतिथिक्रियामतिथिपूजां अकुर्वन् १९

सत्कारंकुशलप्रश्नादिकंविश्वामित्रात्समनुप्राप्यकथाभिः अभिरंजयन् अभ्यरंजयन् अतिथिभूतानि
तिशेषः क्रमेणासायंसंध्यागमेसतितेनवासितोविश्वामित्रादयश्चऋषविन्यायेनऋषयइत्युक्तेसमाहिता
अनल्पतःसंध्यामहोरात्रयोःसंधिंअस्तंतत्संयोगेद्वितीया यथार्हंयथायोग्यंयथाशक्तीतियावत्

सत्कारंसमनुप्राप्यकथाभिरभिरंजयन्॥यथार्हमजपन्संध्यामृषयस्तेसमाहिताः॥२०॥तत्रवासिभि
रानीतामुनिभिःसुव्रतैःसह॥न्यवसन्सुखंतत्रकामाश्रमपदेतदा॥२१॥कथाभिरभिरामाभिर
भिरामौनृपात्मजौ॥रमयामासधर्मात्माकौशिकोमुनिपुंगवः॥२२॥इत्यार्षेरामायणेबालकां
डेत्रयोविंशःसर्गः॥२३॥

सहस्रंपरमंदेवीशतंमध्यांदशावरामितिवचनात् अजपन्गायत्रीमिति
शेषः २० तत्रवासिभिर्मुनिभिःसहस्यसाहित्येनआनीताःसंवेशनायस्वाश्रमंप्रापिताविश्वामि
त्राद्यास्तत्रकामाश्रमस्यकामदाहात्कामाश्रमनामकस्यपदेस्थानेभर्गाश्रमेतदासुसुखंन्यवसन्निति
संबंधः २१ कौशिकःअभिरामाभिःतदाश्रमवैभवपराभिःकथाभिरभिरामौअत्यंतप्रियदर्शनौनृपात्म
जौदशरथराजकिशोरौरमयामासबहुलालितौचकारेत्यर्थः २२ इतित्रयोविंशःसर्गः २३

विमलेसूर्योदयेइत्यर्थःनाद्याःगंगायाः १ उपस्थाप्यआनीय २ राजपुत्राभ्यांपुरस्कृतःपूजितोभवान्नावमारोह
तु तारकावधाभिप्रायेणाह अरिष्टंशुभंयथाभवतितथापंथानंगच्छकालस्यपर्ययोविलंबोमाभूत् ३ ततो
रतितुमुपक्रांतःसरितंगंगांसागरंगच्छतीतिसागरंगमातां ४ ततोमध्यमागम्यतोयसंरंभेणपरस्परंतरंग

ततःप्रभातेविमलेकृताह्निकमरिंदमौ॥विश्वामित्रंपुरस्कृत्यनद्यास्तीरमुपागतौ॥१॥तेचसर्वेमाहात्मानो
मुनयःसंशितव्रताःउपस्थाप्यशिवांनावंविश्वामित्रमथाब्रुवन्॥२॥आरोहतुभवान्नावंराजपुत्रपु
रस्कृतःअरिष्टंगच्छपंथानंमाभूत्कालस्यपर्ययः॥३॥विश्वामित्रस्तथेत्युक्त्वातानृषीन्प्रतिपूज्यच
ततारसहितस्ताभ्यांसरितंसागरंगमां॥४॥ततःशुश्रुवतुःशब्दंतोयसंरंभवर्द्धितं॥मध्यमागम्यतो
यस्यतस्यशब्दस्यनिश्चयं॥ज्ञातुकामोमहातेजाःसहरामःकनीयसा॥५॥अथरामःसरिन्मध्येपप्रच्छ
मुनिपुंगवं॥वारिणोभिद्यमानस्यकिमयंतुमुलोध्वनिः॥६॥

संघट्टजक्षोभणवर्द्धितंअतिप्रवृद्धंतो
यस्यशब्दंशुश्रुवतुःतस्यशब्दस्यनिश्चयंसहजस्सोपाधिकोवाइत्येतदन्यतरनिश्चयंज्ञातुकामोजातइतिशेषः
५ भिद्यमानस्यपरस्परंमिलितस्यवारिणःतुमुलःनिविडोयंध्वनिःकिंवारिसंभेदकृतःउतान्यकृतइतिप्रश्नः ६

निश्चयं निश्चयजनकहेतुं ६ सरय्वा वारिसंभेदं वक्तुं सरय्वा वैभवमाह कैलासेति कैलासपर्वते कुवेरभवने ब्रह्मणा मनसा निर्मितं सरोस्ति तेन मनसा निर्मितत्वेनेदं सरः मानसमित्युच्यते ८ तस्मात्सरसः या सुस्राव सा ऽयोध्यांउपगूहते ऽश्रावयत्य वहते अयोध्यायाः पश्चिमभागमारभ्य उत्तरदिग्भागे पूर्वभागमागत्यांवाहेरो

राघवस्य वचः श्रुत्वा कौतूहलसमन्वितं ॥ कथयामास धर्मात्मा तस्य शब्दस्य निश्चयं ॥ ७ ॥ कैलासपर्वते राम मनसा निर्मितं सरः ॥ ब्रह्मणा नरशार्दूल तेनेदं मानसं सरः ॥ ८ ॥ तस्मात्सुस्राव सरसः साऽयोध्यामुपगूहते ॥ सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता ॥ ९ ॥ तस्यायमतुलः शब्दो जाह्नवीमभिवर्तते ॥ वारिसंक्षोभजो राम प्रणामं नियतः कुरु ॥ १० ॥ ताभ्यां तु तावुभौ कृत्वा प्रणाममतिधार्मिकौ ॥ तीरं दक्षिणमासाद्य जग्मतुर्लघुविक्रमौ ॥ ११ ॥

गंगया संयुज्यते सरसो येति प्रवर्तत इति सरयूरिति योगनिर्वचनं पुण्यत्वे हेतुर्ब्रह्मसरश्च्युतत्वं ९ या जान्हवीं गंगामभिवर्तते गंगया सह संयुज्यते तस्याऽयं संधिरार्थः वारिसंक्षोभजोऽतुलः शब्दः इत्यर्थः हे राम ताभ्यां सरयूगंगाभ्यां नियतः नियतमनस्कः सन् प्रणामं कुरु १० अतिधार्मिकौ तावुभौ राजकुमारौ ताभ्यां प्रणामं कृत्वा दक्षिणतीरमासाद्य लघुपादविक्षेपौ जग्मतुः ११

घोरसंकाशंघोररूपं अविप्रहतमसुगांजनसंचारहीनमित्यर्थः १२ झिल्लिकाकीटविशेषः भैरवैः भयंकरैः
श्वापदैः दुःप्रसहैः दारुणारवैः दारुणशब्दैः शकुनैः भासैः १३ शकुनैः सर्वपक्षिभिः भैरवस्वनैर्वाश्यद्भिः अप्रति

सवनंघोरसंकाशंदृष्ट्वानृपवरात्मजः ॥ अविप्रहतमैक्ष्वाकःपप्रच्छमुनिपुंगवं ॥१२॥ अहोवनमिदंदुर्गं
झिल्लिकागणसंयुतं ॥ भैरवैःश्वापदैःकीर्णंशकुनैर्दारुणारवैः ॥१३॥ नानाप्रकारैःशकुनैर्वाश्यद्भि
र्भैरवस्वनैःसिंहव्याघ्रवराहैश्चवारणैश्चापिशोभितं ॥१४॥ धवाश्वकर्णककुभैर्बिल्वतिंदुकपाटलैः
संकीर्णंबदरीभिश्चकिंन्विदंदारुणंवनं ॥१५॥ तमुवाचमहातेजाविश्वामित्रोमहामुनिः ॥ श्रूयतांवत्स
काकुत्स्थयस्यैतद्दारुणंवनं ॥१६॥ एतौजनपदौस्फीतौपूर्वमास्तांनरोत्तम ॥ मलदाश्चकरूषाश्चदे
वनिर्माणनिर्मितौ ॥१७॥

भैरवस्वनंकुर्वद्भिःशोभितंयुक्तं १४ धवादयोवृक्षविशेषः किंनुकुतोनु १५
स्यप्राणिनःसश्रूयतामित्यन्वयः १६ स्फीतौप्रवृद्धधनधान्यौमलदाश्चकरूषाश्चमलदकरूषनामधेयौ अत्र
पदबहुत्वाद्बहुवचनंदेवनिर्माणेनदेवनिर्माणतुल्यनिर्माणेननिर्मितौ देवलोकसमसंस्थानावित्यर्थः १७

॥२२॥

मलदकरूषसंज्ञानिमित्तमाह पुरेत्यादि वृत्रवधे कृते सति मलेनऽशुचित्वेन क्षुधा बुभुक्षया च समभिप्लुतं व्याप्तं
सहस्राक्षं ब्रह्महत्या समाविशत् १८ स्नापयन् गंगातीर्थेषु स्नापयन् पुनर्मंत्रपूतैः कलशैः गंगाजलपूर्णैर्घटैः
स्नापयामासुः पुनः स्नात्यनिनास्येंद्रस्य मलं चात्कारूषं प्रामोचयन् ऽडभावश्छांदसः १९ कारूषं क्षुत्

पुरा वृत्रवधे राम मलेन समभिप्लुतं ॥ क्षुधा चैव सहस्राक्षं ब्रह्महत्या समाविशत् ॥ १८ ॥ तमिंद्रं स्नापयं
न्देवा ऋषयश्च तपोधनाः ॥ कलशैः स्नापयामासुर्मलं चास्य प्रमोचयन् ॥ १९ ॥ सोस्मिन्देशे मलं त्य
क्त्वा देवः कारूषमेव च ॥ उत्तारिद्देहिसंभूतं ततो हर्षमवाप्तवान् ॥ २० ॥ शरीरजं महेंद्रस्य ततो हर्षं प्र
पेदिरे ॥ निर्मलो निष्करूषश्च शुचिरिंद्रो यथाभवत् ॥ २१ ॥ ततो देशस्य सुप्रीतो वरं प्रादादनुत्तमं ॥२२
इमौ जनपदौ स्फीतौ ख्यातिं लोके गमिष्यतः मलदाश्च करूषाश्च ममांगमलधारिणौ ॥ २३ ॥ ॥

२० शरीरजमिति पूर्वान्वयि प्रपेदिरे देवा इति शेषः २१ ततःतदेत्यर्थः २२ यस्मान्ममांगमलधारिणौ तस्मा
त्ख्यातिं गमिष्यतः २३

॥२२॥

शक्रेणाकृतंदेशस्यपूजांदृष्ट्वापाकशासनंसाध्वित्यब्रुवन् २४ अत्रतातौजनपदौदीर्घकालंस्फीतौसमृद्धौ
आस्तामितिशेषः तदेवाहमलदाइति २५ कस्यचित्कियतःकालस्यअपगमेइतिशेषः तस्यजन्मकाल

साधुसाध्वितितंदेवाःपाकशासनमब्रुवन्॥ देशस्यपूजांतांदृष्ट्वाकृतांशक्रेणधीमता ॥२४॥ एतौज
नपदौस्फीतौदीर्घकालमरिंदम॥मलदाश्चकरूषाश्चमुदिताधनधान्यतः॥२५॥कस्यचित्त्व
थकालस्ययक्षिणीकामरूपिणी॥बलंनागसहस्रस्यधारयंतीतदाह्यभूत्॥२६॥ताटकानामभ
द्रंतेभार्यासुंदस्यधीमतः मारीचोराक्षसःपुत्रोयस्याःशक्रपराक्रमः॥२७॥वृत्तबाहुर्महाशीर्षोविपु
लास्यतनुर्महान्॥राक्षसोभैरवाकारोनित्यंत्रासयतेप्रजाः॥२८॥इमौजनपदौनित्यंविनाशयति
राघव॥मलदांश्चकरूषांश्चताटकादुष्टचारिणी॥२९॥

एवनागसहस्रस्यगजसहस्रस्यबलंधारयं
तीताटकानामयक्षिण्यभूत् २६ तेतुभ्यंभद्रमस्तुताटकातोभयंमाभूदित्यर्थः २७ यःप्रजाःनित्यंत्रासय
तेसमारीचोयस्याःपुत्रःसायक्षिण्यभूदितिपूर्वेणान्वयः २८ अस्तुताटकाततःकिंतत्राहइमाविति २९

सेयंयाविनाशयतिसेत्यर्थः पंथानमावृत्यमार्गंनिरुध्यअर्द्धमतिक्रांतमत्यर्द्धंता दशेयोजनेवशति यतश्चेदंता
टकावनमस्माभिर्गंतव्यंअतएववलेनोर्हेरामत्ववाहुवलमाश्रित्यइमांजहिननुस्त्रीकथंहंतव्यातत्राहमन्नियो
गादिति मदाज्ञयास्त्रीवधशंकांत्यजपुनरिमंदेशंनिष्कंटकंकुरु २० २१ ईदृशंताटकाक्रांतं अगस्त्यशापे

सेयंपंथानमावृत्यवसत्यर्ध्दयोजने ॥ अतएवचगंतव्यंताटकायावनंततः ॥ २० ॥ स्ववाहुवलमाश्रि
त्यजहीमांदुष्टचारिणीं ॥ मन्नियोगादिमंदेशंकुरुनिष्कंटकंपुनः ॥ २१ ॥ नहिकश्चिदिमंदेशंशक्तोह्यागं
तुमीदृशं ॥ यक्षिण्याघोरयारामउत्सादितमसह्यया ॥ २२ ॥ एतत्तेसर्वमाख्यातंयथैतद्दारुणंवनं ॥
यक्ष्याचोत्सादितंसर्वमद्यापिननिवर्तते ॥ २३ ॥ इत्यार्षेरामायणेवाल्मीकियेवालकांडेचतुर्विंशःसर्गः
२४ ॥ अथतस्याप्रमेयस्यमुनेर्वचनमुत्तमं ॥ श्रुत्वापुरुषशार्दूलःप्रत्युवाचशुभांगिरं ॥ १ ॥ ॥ ॥

रजेयया २२ यथायेनप्रकारेणदारुणंयथाचोत्सादितंनिर्जनीकृतंयथाचोत्सादनान्ननिवर्त्ततेतथैतत्सर्वं
माख्यातमित्यन्वयः २३ इतिचतुर्विंशसर्गः २४ स्त्रियोपिसर्वलोकविनाशिन्यावध्येनदोषइत्याहअप्र
मेयेत्यादि अप्रमेयस्याप्रमेयप्रभावस्यशार्दूलःश्रेष्ठः १

यक्षपतेःयक्षीयक्षजातिः अल्पबलाश्रूयतेपुरात्वादिच्छितिशेषःततोऽबलास्त्रीकथंनागसहस्रस्यबलंधारय
ति २ ३ वीर्यंशौर्यंद्विबलमात्रप्रश्नेवीर्याभिधानंशौर्योऽन्येविगुणास्तस्यांसंतीतिज्ञापनार्थं ४ वरदानप्रका

अल्पवीर्यायदायक्षीश्रूयतेमुनिपुंगव॥कथंनागसहस्रस्यधारयत्यबलाबलं॥२॥इत्युक्त्वावचनंश्रु
त्वाराघवस्यामितौजसः॥हर्षयन्श्लक्ष्णयावाचासलक्ष्मणमरिंदमं॥३॥विश्वामित्रोऽब्रवीद्वाक्यंशृ
णुयेनबलोत्कटा॥वरदानकृतंवीर्यंधारयत्यबलाबले॥४॥पूर्वमासीन्महायक्षःसुकेतुर्नामवीर्य
वान्॥अनपत्यःशुभाचारःसचतेपेमहत्तपः॥५॥पितामहस्तुसुप्रीतस्तस्ययक्षपतेस्तदा॥कन्यार
त्नंददौरामताटकानामनामतः॥६॥ददौनागसहस्रस्यबलंचास्याःपितामहः॥नत्वेवपुत्रंयक्षा
यददौचासौमहायशाः॥७॥तांतुबालांविवर्द्धंतींरूपयौवनशालिनीं॥जंभपुत्रायसुंदायददौभार्यां
यशस्विनीं॥८॥कस्यचित्त्वथकालस्ययक्षीपुत्रंव्यजायत॥मारीचंनामदुर्धर्षंयःशापाद्राक्षसोऽभ
वत्॥९॥

रमाहपूर्वमित्यादितेपेपुत्रार्थंपितामहमुद्दिश्येतिशेषः ५ कन्यारत्नंदिव्यरूपवतींकन्यांनाम
प्रसिद्धो ६ तदभिसंहितगुणवतापुत्रेणात्यंतजनपीडाभवेदितिचायंपुत्रंनददौ ७ विवर्द्धंतींविवर्द्धमा
नांभार्यांभार्यत्वेनददौ ८ कस्यचिदितिकस्मिंश्चित्कालेगतेसतिव्यजायतअजनयत् ९ श्रीरामायनमः

शापप्रकारमाह सुंदे इत्यादि निहते अगस्त्येन शापं दत्त्वेति शेषः इच्छति इच्छतिस्म १० जातसंरंभा स्वभर्तृवधजनित
कोपवती अतएव भक्षार्थमभ्यधावत् ११ १२ तदेव विस्तरेणाह पुरुषादीति पुरुषादी मनुष्यभक्षिणी त्वमिदं रूपं

सुंदेतु निहते राम सागस्त्यमृषिसत्तमं ॥ ताटका सह पुत्रेण प्रधर्षयितुमिच्छति ॥१०॥ भक्षार्थं जातसंरं
भा गर्जंती साभ्यधावत ॥ आपतंतीं च तां दृष्ट्वा अगस्त्यो भगवानृषिः ॥११॥ राक्षसत्वं भजस्वेति मारीचं व्या
जहार सः ॥ अगस्त्यः परमामर्षस्ताटकामपि शप्तवान् ॥१२॥ पुरुषादी महायक्षी विकृता विकृतान
ना ॥ इदं रूपं विहायाथ दारुणं रूपमस्तु ते ॥१३॥ सैषा शापकृतामर्षा ताटका क्रोधमूर्छिता ॥ देशमुत्सा
दयत्येनमगस्त्याचरितं शुभं ॥१४॥ एनां राघव दुर्वृत्तां यक्षीं परमदारुणां ॥ गोब्राह्मणहितार्थाय जहि
दुष्टपराक्रमां ॥१५॥

विहाय पुरुषादीत्यादिविशेषणयुक्ता भव अथ पते दारुणां क्रूरं रूपं शरीरमस्तु १३ अमर्षो
त्वसहनात् अगस्त्याचरितं अगस्त्यतपःस्थानं १४ गोब्राह्मणहितार्थायेति स्त्रीवधशंकानिरासाय तेन द्विना
पक्रियमाणां पापवदाभासमानमपि धर्मायेति भावः १५

शापसंसृष्टां अगस्त्यशापव्याप्तां १६ हे नरोत्तम ते त्वया स्त्रीवधनिमित्ताद्घृणा जुगुप्सा न कार्या हि यतो राजसूनुना चातु
र्वर्ण्यहितार्थं चातुर्वर्णानां हिताय कर्त्तव्यं कर्मेति शेषः अत्र नरोत्तमपदेन त्वत्तु पुरुषोत्तमत्वात्पापसंबंधोनास्त्ये
वेति सूचितं १७ नृशंसं क्रूरं अनृशंसं सौम्यं वा पातकं पातकबहुलं वा सदोषं सापवादं वा कर्मेति शेषः सतां रक्षता
राजपुत्रेण प्रजारक्षणकारणात्कर्त्तव्य १८ सनातनः नित्यः अधर्म्यां धर्मादनपेतं तद्दोषपारायधर्मोहीति १९

नह्येनां शापसंसृष्टां कश्चिदुत्सहते पुमान् ॥ निहंतुं त्रिषु लोकेषु त्वामृते रघुनंदन ॥१६॥ नहि ते स्त्रीव
धकृते घृणा कार्या नरोत्तम ॥ चातुर्वर्ण्यहितार्थं हि कर्त्तव्यं राजसूनुना ॥१७॥ नृशंसमनृशंसं वा प्रजार
क्षणकारणात् ॥ पातकं वा सदोषं वा कर्त्तव्यं रक्षता सतां ॥१८॥ राज्यभारनियुक्तानामेष धर्मः सनातनः
अधर्म्यां जहि काकुत्स्थ धर्मो ह्यस्या न विद्यते ॥१९॥ श्रूयते हि पुरा शक्रो विरोचनसुतां नृप ॥ पृथिवीं हं
तुमिच्छंतीं मंथरामभ्यसूदयत् ॥२०॥

अधर्मस्त्रीवधस्य कर्त्तव्यत्वे इतिहासद्वयमाह श्रूयते हीत्यादिभिः मंथरां मंथराभिधानाम् २० श्रीरामायनमः

॥२५॥ काव्यमाताशुक्रस्यमाता इयंकथामत्स्यपुराणेदर्शिता स्वपुत्रेशुक्रेदेवशिक्षार्थंमहेन्द्रस्यसमीपेतपस्यतिसतिदेवपी
डिताअसुराःशुक्रमातरंभृगुपत्नींशरणमगच्छन् साचासुररक्षणार्थंदेवान्हंतुमुद्युक्ता तांचेंद्रप्रार्थितोविष्णुः

विष्णुनाचपुरारामभृगुपत्नीपतीव्रता॥अनिंद्रंलोकमिच्छंतीकाव्यमाता॥२१॥एतैश्चान्यैश्चबहुभी निषूदिता
राजपुत्रैर्महात्मभिः॥अधर्मसहितानार्योहताःपुरुषसत्तमैः॥२२॥तस्मादेनांघृणांत्यक्त्वाजहिमच्छा
सनान्नृप॥२३॥इत्यार्षेरामायणेबालकांडेपंचविंशःसर्गः॥२५॥मुनेर्वचनमक्लीवंश्रुत्वानरवरात्म
जः राघवःप्रांजलिर्भूत्वाप्रत्युवाचदृढव्रतः॥१॥पितुर्वचननिर्देशात्पितुर्वचनगौरवात्॥वचनंकौ
शिकस्येतिकर्तव्यमविशंकया॥२॥

सचतस्याःशिरश्चिच्छेदेति २१ एतैरेतादृशैरित्यर्थः २२ २३ इतिपंच
विंशःसर्गः २५ अक्लीवंध्रुवं १ कौशिकस्यवचनंअविशंकयाकर्तव्यंत्वयपत्येवंरूपान्निर्देशात् नियोगात्पि
तुर्वचनगौरवात्परमाप्तवाक्यत्वेनअप्रतिप्रमाणत्वात् त्वद्वचनमवश्यकर्तव्यत्वेननिश्चितमितिशेषः २ ॥२५॥

कस्त्वैवं नियोगः कृत इत्यत्राह अनुशिष्टोस्मीति गुरुमध्ये वशिष्ठवामदेवादिसन्निधौ महात्मना पित्रानुशिष्टास्मि
कौशिकस्य वचनं कर्त्तव्यमिति तद्वचो नावहेयमिति संबंधः २ सोहं पितुर्वचः श्रुत्वा ब्रह्मवादिनो भवतः शास

अनुशिष्टोस्म्ययोध्यायां गुरुमध्ये महात्मना ॥ पित्रा दशरथेनाहं नावज्ञेयं हि तद्वचः ॥३॥ सोहं पितुर्वचः
श्रुत्वा शासनाद्ब्रह्मवादिनः करिष्यामि न संदेहस्ताटकावधमुत्तमं ॥४॥ गोब्राह्मणहितार्थाय देशस्य
च हिताय च तव चैवाप्रमेयस्य वचनं कर्त्तुमुद्यतः ॥५॥ एवमुक्त्वा धनुर्मध्ये बध्वा मुष्टिमरिंदमः ॥
ज्याघोषमकरोत्तीव्रं दिशः शब्देन नादयन् ॥६॥ तेन शब्देन वित्रस्तास्ताटकावनवासिनः ॥ ताट
का च सुसंक्रुद्धा तेन क्रोधेन मोहिता ॥७॥

नात्ताटकावधं करिष्यामि उत्तमं उत्कृष्टधर्मं ४ उत्कृष्टधर्म
त्वमेवोपपादयति गोब्राह्मणेति अप्रमेयस्य तव च हिताय तव यज्ञपरिपालनेन तव संतोषरूपहिताय तव वचनं कर्त्तु
मुद्यतः संशयरहितोहं ताटकावधं करिष्यामीति पूर्वेणान्वयः तीव्रं दुःसहश्रवणं ६ वित्रस्ता भीताः मोहिता व्याकुलचित्ता जाता

तंशब्दंश्रुत्वाचक्रुद्धासशब्दोयत्रयतोनिःसृतः तमभिनिध्यायशब्दनिःशरणावधिदेशंलक्ष्मीकृत्यअभ्यद्रवदिति

योजना ८ प्रमाणेनशरीरप्रमाणेन ९ भैशरीरप्रमाणेन ९ भैरवंभयंकरंदारुणांविकृतं अस्यवपुषःचोप

तंशब्दमभिनिध्यायराक्षसीक्रोधमूर्छिता॥श्रुत्वाचाभ्यद्रवत्क्रुद्धायत्रशब्दोविनिसृतः॥८॥तांदृष्ट्वारा
घवःक्रुद्धांविकृतांविकृताननां॥प्रमाणेनातिवृद्धांचलक्ष्मणंसोभ्यभाषत॥९॥पश्यलक्ष्मणयक्षिण्याभै
रवंदारुणंवपुः॥भिद्येरन्दर्शनादस्याभीरूणांहृदयानिच॥१०॥एनांपश्यदुराधर्षांमायाबलसमन्वितां
विनिवृत्तांकरोम्यद्यहृतकर्णाग्रनासिकां॥११॥नह्येनामुत्सहेहंतुंस्त्रीस्वभावेनरक्षितां॥वीर्यंचास्या
गतिंचैवहन्यामितिहिमेमतिः॥१२॥एवंब्रुवाणेरामेतुताटकाक्रोधमूर्छिता॥उद्यम्यबाहूगर्जंतीरा
ममेवाभ्यधावत॥१३॥

र्थः अभीरूणामपीत्यर्थः १० एतामितिविनिवृत्ताविशेषणंनिवृत्तांपलायितां
मितियावत् एतावतैवगुरुवचनानुष्ठानसिद्धिरितिभावः ११ कर्णादिहरणमात्रेहेतुमाहनहीति वीर्यंश
क्तिं गतिंआकाशादिगमनं १२ राममेवेतिविश्वामित्रस्यदुर्धर्षत्वेनतंविसृज्यबालोयमितिबुद्ध्याराममे

तेरमसन्मुखमभिधावंतीं जयंचजयविषयकाशिषंच अतिमानुषशक्तिंजानन्नपिताटकायाः क्रौर्यतिश
यंदृष्ट्वाविशंकयाशिषमभ्यभाषतेत्यर्थः १४ घोरंरजउद्धूनानाउत्किरंती रजोमेघेनरजोंधकारेण १५

विश्वामित्रस्तुब्रह्मर्षिर्हुंकारेणाभिभर्त्स्यतां ॥स्वस्तिराघवयोरस्तुजयंचैवाभ्यभाषत ॥१४॥ उद्धून्वा
नारजोघोरंताटकाराघवावुभौ ॥रजोमेघेनमहतामुहूर्तंसाव्यमोहयत् ॥१५॥ततोमायांसमास्था
यशिलावर्षेणराघवौ ॥अवाकिरत्सुमहतानतश्चुक्रोधराघवः ॥१६॥प्रतिवार्योपधावंत्याःक
रौचिच्छेदपत्रिभिः शिलावर्षंमहत्तस्याःशरवर्षेणराघवः ॥१७॥ततश्छिन्नभुजांश्रांतामभ्यासे
परिगर्जतीं ॥सौमित्रिरकरोत्क्रोधाद्धृतकर्णाग्रनासिकां ॥१८॥

मायामंतर्धानशक्तिं चुक्रोधश्चीत्यप्रयुक्तःशासिरांपविसृज्येतिशेषः १६ प्रतिवर्पकरौचिच्छेदशिलावर्षेहेतुत्वात्
पत्रिभिःशरैः १७ अभ्यासेसमीपेपरिगर्जंतींनुमभावश्चार्षः हतेकर्णाग्रेनासिकाचयस्यास्तां १८ सीताराम

॥२८७॥ सकामरूपधराअनेकशःरूपाणिकृत्वाअंतर्धानंगतासतीस्वमाययाराघवौमोहयंतीअश्मवर्षैर्विमुंचंतीयक्षीभैरवं
विचचारहेतिप्रसिद्धो १९ श्रीमान्परंतत्वप्रा कांतिमान् २० खराणांकरुणायाअलंयत्तविघ्नकरीइयंपुराकृत

कामरूपधरामानुकृत्वारूपाण्यनेकशःअंतर्धानंगतायक्षीमोहयंतीस्वमायया।अश्मवर्षैर्विमुंचंतीभैरवं
विचचारह॥१८॥ततस्तावश्मवर्षैराकीर्यमाणौसमंततः॥दृष्ट्वागाधिसुतःश्रीमानिदंवचनमब्रवीत्॥१९॥
अलंतेघृणयारामपापैषादुष्टचारिणी॥यज्ञविघ्नकरीयक्षीपुरावर्द्धेतमायया॥२१॥वध्यतांतावदेवैषा
पुरासंध्याप्रवर्त्तते॥रक्षांसिसंध्याकालेतुदुर्धर्षाणिभवंतिहि॥२२॥इत्युक्तस्तुतदायक्षीमश्मवर्षाभिव-
र्षिणी॥दर्शयंच्छब्दवेधित्वंतांरुरोधससायकैः॥२३॥

वर्द्धिष्यते २१ पुरासंध्याप्रवर्त्ततेप्रवर्त्तयिष्यतेतावत्पूर्वमेववध्यतांनाम संध्याप्रवृत्तौकाहानिस्तत्राहरक्षांसी
ति २२ शब्दवेधित्वंशब्दमात्रेणलक्ष्यंनिश्चित्यवेधकर्तृत्वसामर्थ्यंदर्शयन्नित्यर्थः २३ श्रीसीतारामायनमः ॥२८७॥

अभिदुद्रावकं प्रतर्धानं हित्वेति शेषः विनेदुषी नादं कुर्वाणा २४ २५ भीमसंकाशा भीमरूपा अभिपूजयत्स्वय

सारुद्ध्वाशरजालेनमायावलसमन्विता॥ अभिदुद्रावकाकुत्स्थंलक्ष्मणंचविनेदुषी॥२४॥ तामापतंतींवेगेन।
विक्रांतामशनीमिव॥ शरेणोरसिविव्याधसापपातममारच॥२५॥ तांहतांभीमसंकाशांदृष्ट्वासुरपतिस्तदा
साधुसाध्वितिकाकुत्स्थंसुराश्चाप्यभिपूजयन्॥२६॥ उवाचपरमप्रीतःसहस्राक्षःपुरंदरःसुराश्चसर्वे
संहृष्टाविश्वामित्रमथाब्रुवन्॥२७॥ मुनेकौशिकभद्रंतेसेंद्राःसर्वेमरुद्गणाः॥ तोषिताःकर्मणानेनस्ने
हंदर्शयराघवे॥२८॥ प्रजापतेःकृशाश्वस्यपुत्रान्सत्यपराक्रमान्॥ तपोवलभृतान्व्रह्मन्राघवायनिवेद
य॥२९॥

पूजयन् उवाच चेत्यन्वयः २६ २७ किमब्रुवंस्तत्राह मुने इति सर्वे वयमिति शेषः स्नेहं दर्शय स्नेहकार्यं प्र
वर्तय २८ तदेवाह प्रजापतेरिति तपसा वलेन च भृतान् पूर्णान् २९

॥ ९५ ॥

नेतवदानस्यपात्रभूतः अनुगमने शुश्रूषणे च ततः दृढनिश्चयः ३० पूजयंतस्तुवंतोजग्मुरित्यन्वयः प्रवर्त्तनइ

पात्रभूतस्त्वनेव्रह्मंस्तवानुगमनेधृतः ॥ कर्त्तव्यंसुमहत्कर्मसुराणांराजसूनुना ॥ ३० ॥ एवमुक्त्वासुराःसर्वेजग्मु
र्हृष्टायथागतं ॥ विश्वामित्रंपूजयंतस्ततःसंध्याप्रवर्त्तते ॥ ३१ ॥ ततोमुनिवरःप्रीतस्ताटकावधतोषितः ॥ मू
र्द्ध्निराममुपाघ्रायइदंवचनमब्रवीत् ॥ ३२ ॥ इहाद्यरजनींरामवसामशुभदर्शन ॥ श्वःप्रभातेगमिष्यामस्तदा
श्रमपदंमम ॥ ३३ ॥ विश्वामित्रवचःश्रुत्वाहृष्टोदशरथात्मजः ॥ उवासरजनींतत्रताटकायावनेसुखं ॥ ३४
मुक्तशापंवनंतच्चतस्मिन्नेवतदाहनि ॥ चंपकाशोकपुन्नागमल्लिकाभिःसुशोभितं ॥ ३५ ॥ चूतैश्चपनसैः
पूगैर्नारिकेलैश्चशोभितं ॥ वापीकूपतडागैश्चदीर्घिकाभिरलंकृतं ॥ ३६ ॥

त्यस्यस्येतिशेषः ३१ ३२ तत्पूर्वोक्तं ३३ ३४ मुक्तशापंअपगतोपद्रवंतस्मिन्नहनितद्दिवसेतस्मादेवचंपका
दिभिरुपशोभितंचैत्ररथंकुवेरोद्यानंयथातथावभ्राज ३५ ३६

॥ ९८ ॥

३७ विश्वामित्रेण प्रभातवेलां प्रतिबोध्यमानो जजागरेति शेषः ३८ इति षड्विंशः सर्गः २६ अथ तां रजनीं उष्य
उषित्वा विश्वामित्र प्रहस्य प्रकर्षेण मंदहास्यं कृत्वा मधुरस्वरं वाक्यं राघवमुवाच विजयशालिनामदर्शनसंतो

मल्लिका हेमकूटैश्च मंडपैरुपशोभितं ॥ रमणीयं हि वभ्राज यथा चैत्ररथं वनं ॥३७॥ निहत्य तां यक्षसुतां स रामः
प्रशस्यमानः सुरसिद्धसंघैः ॥ उवास तस्मिन्मुनिना सहैव प्रभातवेलां प्रतिबोध्यमानः ॥३८॥ इत्यार्षे रामा
यणे वालकांडे षड्विंशः सर्गः ॥२६॥ अथ तां रजनीमुष्य विश्वामित्रो महायशाः ॥ प्रहस्य राघवं वाक्यमु
वाच मधुरस्वरं ॥१॥ परितुष्टोस्मि भद्रं ते राजपुत्र महायशः ॥ प्रीत्या परमया युक्तो ददाम्यस्त्राणि सर्वशः ॥२॥ दे
वासुरगणान्वापि सगंधर्वोरगान्भुवि ॥ यैरमित्रान्प्रसह्याजौ वशीकृत्य जयिष्यसि ॥३॥

षजोत्रहासः १ प्रीत्या परमया युक्त इति परितुष्टोस्मीत्यस्यानुवादः सर्वशः सर्वाणि २ देवासुरगणान्वापि वा
शक्रस्यार्थे गंधर्वोरगसहितदेवासुरगणान् अपि शत्रूनपि प्रसह्य बलेन जयिष्यसि जेष्यसि ३ श्रीसियजीवनोजय

दंडचक्राद्ययोरस्त्रभेदाः ४ धर्मेतिसार्धश्लोकद्वयमेकान्वयं ५ शूलवरं शूलश्रेष्ठं ब्रह्मशिरो ब्रह्मास्त्रादन्यत् ६ ग

तानिदिव्यानिभद्रंतेददाम्यस्त्राणिसर्वशः॥दंडचक्रंमहद्दिव्यंतवदास्यामिराघव॥४॥धर्मचक्रंततोवीर-
कालचक्रंतथैवच॥विष्णुचक्रमथात्युग्रमैंद्रचक्रंतथैवच॥५॥वज्रमस्त्रंनरश्रेष्ठशैवंशूलवरंतथा
अस्त्रंब्रह्मशिरश्चैवऐषीकमपिराघव॥६॥ददामितेमहाबाहोब्राह्ममस्त्रमनुत्तमं॥गदेद्वेचैवकाकुत्स्थ
मोदकीशिखरीउभे॥७॥प्रदीप्तेनरशार्दूलप्रयच्छामिनृपात्मज॥धर्मपाशमहंरामकालपाशंतथैव-
च॥८॥वारुणंपाशमस्त्रंचददाम्यहमनुत्तमं॥अशनीद्वेप्रयच्छामिशुष्कार्द्रेरघुनंदन॥९॥ददाम्य-
स्त्रंपैनाकमस्त्रंनारायणंतथा॥आग्नेयमस्त्रंदयितंशिखरंनामनामतः॥१०॥वायव्यंमथनंनामद-
दामितवचानघ॥अस्त्रंहयशिरोनामक्रौंचमस्त्रंतथैवच॥११॥

दद्वेकौमोदकीशिखरीसंज्ञके द्वे गदे गदासंज्ञके द्वे ७ ८ अस्त्रं च वारुणास्त्रं चेत्यर्थः शुष्कार्द्रसंज्ञिके द्वे अश-
नी अशनीसंज्ञिके अस्त्रे ९ पिनाकिन इदं पैनाकं दयितं अग्नेरितिशेषः नामतः शिखरं नामप्रसिद्धं १० ११

शक्तिद्वयंविष्णुशक्तिरुद्रशक्ति कंकालादीन्यसुरधार्याणि १२ यानिरक्षसांवधार्थंसमर्थानिएतानिददामीत्य

शक्तिद्वयंचकाकुत्स्थददामितवराघव ॥ कंकालंमुसलंघोरंकापालमथकंकणं ॥ १२ ॥ वधार्थंरक्षसांया
निददाम्येतानिसर्वशः ॥ १३ ॥ वैद्याधरंमहास्त्रंचनंदनंनामनामतः ॥ असिरत्नंमहाबाहोददामिनृवरात्म
ज ॥ १४ ॥ गांधर्वमस्त्रंदयितंमानवास्त्रंचनामतः ॥ प्रस्वापनप्रशमनेदद्मिसौर्यंचराघव ॥ १५ ॥ वर्षणंशो
षणंचैवसंतापनविलापने ॥ मादनंचैवदुर्धर्षमस्त्रंकंदर्पदैवतं ॥ १६ ॥ पैशाचमस्त्रंदयितंमोहनंनामनाम
तः ॥ प्रतीच्छनरशार्दूलराजपुत्रमहायशः ॥ १७ ॥ तामसंनरशार्दूलसौमनंचमहाबल ॥ संवर्तंचैवदुर्धर्षंमौ
सलंचनृपात्मज ॥ १८ ॥ सत्यमस्त्रंमहाबाहोतथामायाधरंपरं ॥ सौरंतेजःप्रभंनामपरतेजोपकर्षणं ॥ १९ ॥

न्वयः १३ वैद्याधरंविद्याधरसंबंधिनंचंदनंनामकमसिरत्नमित्यन्वयः यतोस्मादसीनांप्रादुर्भावइतिभावः १४
दद्मिददामीत्यर्थःआर्षं प्रशमनंरिपूणांक्रोधशामकमस्त्रम् विलापनंपरिदेवनकारकम् १५ मादनंशत्रूणां
मदजनकंदुर्धर्षं १६ प्रतीच्छगृहाण १७ मौशलंचासुरमुसलादन्यत् १८ १९

२० कामरूपानैच्छिकशरीरान् २१ मंत्रग्रामंअस्त्राणांमंत्रमूर्तित्वात् ननुबलातिबलादानप्रसंगेऽस्मिंमंत्रग्रामं गृहाणेत्युक्तमितिपुनरत्रदानंविफलमितिचेन्न बलातिबलेमंत्रसमूहात्मकेइतितद्रूपंमंत्रग्रामंगृहाणेतिपूर्वमुक्तंइहत्ववयवशोऽनूद्यमंत्रग्रामंददावित्यनोघात् २२ येषांउक्तदिव्यास्त्राणांतांसर्वसंग्रहणांसर्वधारणां कर्तुं

सोमास्त्रंशिशिरंनामत्वाष्ट्रमस्त्रंसुदामनं॥दारुणांचभगस्यापिशीतेषुमपिमानवं॥२०॥एतान्राममहाबाहोकामरूपान्महाबलान्॥गृहाणपरमोदारान्क्षिप्रमेवनृपात्मज॥२१॥स्थितस्तुप्राङ्मुखोभूत्वाशुचिर्मुनिवरस्तदाददौरामायसुप्रीतोमंत्रग्राममनुत्तमं॥२२॥सर्वसंग्रहणांयेषांदैवतैरपिदुर्लभंतान्यस्त्राणितदाविप्रोराघवायन्यवेदयत्॥२३॥जपतस्तुमुनेस्तस्यविश्वामित्रस्यधीमतउपतस्थुर्महार्हाणिसर्वाणास्त्राणिराघवं॥२४॥

दैवतैरपिदुर्लभंदुष्करं देवाअपियत्किंचिदल्पमेवजानंति तानिसर्वाण्यस्त्राणिराघवायविश्वामित्रोऽन्यवेदयत्दत्तवान् २३ जपतःरामायदातुंतेषांवीर्यवतांसंघाह्नायतान्यस्त्राणिजपतइत्यर्थः उपतस्थुःगृहीतप्रभामंडलवपूंषिविश्वामित्रनियोगेनराममुपस्थितानि २४

सर्वेत्वद्देवतामुदिताः स्वाधिदेवतारामसंबंधेनतुष्टाः हेपरमोदारराघवइमेवयंतवकिंकराअंगीकृतदास्याइत्यू

ऊचुश्चमुदितारामंसर्वेप्रांजलयस्तदा ॥ इमेस्मपरमोदारकिंकरास्तवराघव ॥२५॥ यद्यदिच्छसि
भद्रंतेतत्सर्वंकरवामवै ॥ ततोरामःप्रसन्नात्मातैरित्युक्तोमहाबलैः ॥२६॥ प्रतिगृह्यचकाकुत्स्थःसमाल
भ्यचपाणिनामानसामेभविष्यध्वमितितानभ्यचोदयत् ॥२७॥ ततःप्रीतमनारामोविश्वामित्रंमहामु
निं ॥ अभिवाद्यमहातेजागमनायोपचक्रमे ॥२८॥ इत्यार्षेरामायणेबालकांडेसप्तविंशःसर्गः ॥ २७ ॥

चुः २५ २६ प्रतिगृह्यत्वद्देवतानांगीकृत्यसमालभ्यसंस्पृश्यमानसाः चिंतामात्रेणोपस्थिताभविष्यध्वमि
त्यभ्यचोदयत् २७ गमनायगंतुंमर्यादाभाववचनादितिचतुर्थी २८ इतिसप्तविंशःसर्गः २७ सीताराम

गच्छन् गमिष्यन् १ संहारान् ज्ञातुमिति शेषः संहारो नाम प्रयुक्तस्यास्त्रस्य मंत्रविशेषेण पुनः स्वात्मनि स्थाप
नं २ उक्तास्त्राणां संहारमार्गमुपदिश्य अथ अनंतरं तत्प्रश्नसंतुष्टः परमऋषिरन्यान्यप्यस्त्राण्युपदिशति

प्रतिगृह्य ततोस्त्राणि प्रहृष्टवदनः शुचिः ॥ गच्छन्नेव च काकुत्स्थो विश्वामित्रमथाब्रवीत् ॥१॥ गृहीतास्त्रोस्मि
भगवन्दुराधर्षः सुरैरपि ॥ अस्त्राणां त्वहमिच्छामि संहारान्मुनिपुंगव ॥२॥ एवं ब्रुवति काकुत्स्थे विश्वामित्रो
महातपाः ॥ संहारान्व्याजहाराथ धृतिमान्सुव्रतः शुचिः ॥३॥ सत्यवंतं सत्यकीर्तिं धृष्टं रभसमेव च ॥ प्रतिहार
तरं नाम पराङ्मुखमवाङ्मुखं ॥४॥ लक्ष्यालक्ष्याविमौ चैव दृढनाभसुनाभकौ ॥ दशाक्षशतवक्त्रौ च दशशी
र्षशतोदरौ ॥५॥ पद्मनाभमहानाभौ दुंदुनाभसुनाभकौ ॥ ज्योतिषं शकुनं चैव नैराश्यविमलावुभौ ॥६॥

स्म ३ तदाह सत्यवंतमित्यादि ददामीति सर्वत्र शेषः क्वचित्प्रथमा द्वितीयार्थे ४ ५ ६

६ सार्चिमाल्यादयोमेतांश्च रक्षामीत्यर्थः ८ ९ भास्वरान्तेजोमयान् प्रतीच्छ गृहाण पात्रभूतः श्रेष्ठस्थानस्येतिशे

यौगंधरविनिद्रौ च दैत्यप्रमथनौ तथा॥ शुचिबाहुर्महाबाहुर्निष्कलिर्विरुचस्तथा॥ ७॥ सार्चिमाली धृति-
मालीवृत्तिमान् रुचिरस्तथा॥ चंद्रसौमनसं चैव विधूतमकरावुभौ॥ करवीरं रतिं चैव धनधान्यौ च राघ-
व॥ ८॥ जंभकं सर्वनाभं च संधानवरुणावुभौ॥ ९॥ भशाश्वतनयान् राम भास्वरान् कामरूपिणः॥ प्रतीच्छ
मम भद्रं ते पात्रभूतोसि राघव॥ १०॥ बाढमित्येव काकुत्स्थः प्रहृष्टेनांतरात्मना॥ दिव्यभास्वरदेहाश्च मूर्ति-
मंतः सुखप्रदाः॥ ११॥ केचिदंगारसदृशाः केचिद्धूमोपमास्तथा॥ चंद्रार्कसदृशाः केचित्प्रह्वांजलिपुटा-
स्तथा॥ १२॥

षः मम मत्तः १० बाढमित्यंगीकारे प्रहृष्टेनांतरात्मना प्रतिजग्राहेति शेषः मंत्रस्वीकारानंतरं मंत्रदेवतासाक्षात्कारं
दर्शयति दिव्येत्यादिश्लोकद्वयेन दिव्याः श्लाघ्याः भास्वराश्च देहा येषां ते मूर्तिमंतः स्वस्वदेवतारूपेण ११ प्रह्वा नम्राः अं-
जलिपुटास्तथा युक्ताः अंशं प्राप्य च १२

॥१०२॥

इमेस्मसन्निहितावयमितिशेषः शाधिआज्ञापय १३ गम्यताइदानीतिशेषः कार्यकालेषुमानसाः मनसिसन्निहिताभू
त्वासहायंकरिष्यथ १४ अमंत्र्यपरमोदारेतामंत्र्योऽसकलस्यदेवताऽधिदैवतरूपत्वात्प्रदक्षिणांकृत्वाएवमस्तुश्री
मदात्याश्रमाणामितिकाकुत्स्थमुक्त्वायथागतंजग्मुरितिसंबंधः १५ सराघवस्तानुपदिष्टान्नत्वान्तान्त्वामंत्रतोमू

रामंप्रांजलयोभूत्वाब्रुवन्मधुरभाषिणः॥इमेस्मनरशार्दूलशाधिकिंकरवामते॥१३॥गम्यतामितितानाना
हृष्टोरघुनंदनःमानसाःकार्यकालेषुसहायंमेकरिष्यथ॥१४॥अथतेराममामंत्र्यकृत्वाचापिप्र
दक्षिणां॥एवमस्त्वितिकाकुत्स्थमुक्त्वाजग्मुर्यथागतं॥१५॥सचतान्राघवोज्ञात्वाविश्वामित्रंमहा
मुनिं॥गच्छन्नेवाथमधुरंश्लक्ष्णंवचनमब्रवीत॥१६॥किमेतन्मेघसंकाशंपर्वतस्याविदूरतः॥वृ
क्षखंडमितोभातिपरंकौतूहलंहिमे॥१७॥

र्तितःप्रयोगतश्चेतिशेषः १६ मेघसंकाशंकार्ष्ण्यान्निविडत्वाच्चवृक्षखंडंवृक्षसंमूहः किंवनसंबंधिउताश्रमसंबंधी
तिप्रश्नः १७

॥१०२॥

वल्गुभाषैः मधुरभाषैः १८ रोमहर्षणात्ताटकयानिर्जनीकरणात्तस्य भयानकत्वेन रोमहर्षणत्वं अनयादेशस्य
सुखवत्तया इदमाश्रमपदं त्ववगच्छामि १९ आश्रमपदं त्वं निर्णीय तत्कस्येति पृच्छति सर्वमिति सर्वं शंस सर्वश

दर्शनीयं मृगाकीर्णं मनोहरमतीव च॥ नानाप्रकारैः शकुनैर्वल्गुभाषैरलंकृतं॥१८॥ निःसृताः स्म मुनिश्रेष्ठ
कांताराद्रोमहर्षणात्॥ अनया त्ववगच्छामि देशस्य सुखवत्तया॥१९॥ सर्वं मे शंस भगवन्कस्याश्रमपदं त्वि
दं॥ संप्राप्ता यत्र ते पापा ब्रह्मघ्ना दुष्टचारिणः॥२०॥ तव यज्ञस्य विघ्नाय दुरात्मानो महामुने॥ भगवंस्तस्य
को देशः स यत्र तव याज्ञिकी॥२१॥ रक्षितव्या क्रिया ब्रह्मन्मया वध्याश्च राक्षसाः॥ एतत्सर्वं मुनिश्रेष्ठ
श्रोतुमिच्छाम्यहं प्रभो॥२२॥ इत्यार्षे रामायणे बालकांडे अष्टाविंशः सर्गः॥२८॥

ब्दविवक्षितं जिज्ञासांतरं स्वयमेवाह संप्राप्ता इति ते ब्रह्मघ्नाः तव यज्ञस्य विघ्नाय यत्र प्राप्ताः स देशः कः २० यत्र च
तव याज्ञिकी क्रिया मया रक्षितव्या यत्र च राक्षसा वध्याः भगवंस्तस्य त्वदाश्रमस्य को देशः कः प्रदेशः इत्यन्वयः २१
२२ इत्यष्टाविंशः सर्गः २८ राम

अप्रमेयस्याऽप्रचिंत्यवैभवस्यरामस्यपरिपृच्छतोवचनंश्रुत्वेतिशेषः व्याख्यातुंप्रश्नोत्तरमितिशेषः १ इहेतिसार्द्धश्लोक
एकान्वयः हेरामदेवनमस्कृतोविष्णुःसुबहूनिवर्षाणियुगशतानिचइहवनेतपश्चरणायोगार्थेइहप्रदेशेउवासे
तिइहशब्दद्वयनिर्वाहः २ वामनस्यकरिष्यमाणावामनावतारस्यविष्णोरेषःपूर्वाश्रमःसिद्धाश्रमइतिख्यातःहि

अथतस्याप्रमेयस्यवचनंपरिपृच्छतःविश्वामित्रोमहातेजाव्याख्यातुमुपचक्रमे॥१॥इहराममहाबाहोविष्णु
र्देवनमस्कृतःवर्षाणिसुबहूनीहतथायुगशतानिच॥२॥तपश्चरणायोगार्थमुवाससुमहातपाःएष
न पूर्वाश्रमोरामवावस्यमहात्मनः॥सिद्धाश्रमइतिख्यातःसिद्धोह्यत्रमहातपाः॥३॥एतस्मिन्नेवकाले
तुराजावैरोचनिर्बलिःनिर्जित्यदैवतगणान्सेंद्रान्सहमरुद्गणान्॥४॥

यस्मादत्रमहातपाविष्णुःतपःसि
द्धोजातइति ३ एतस्मिन्कालेविष्णोस्तपःकालेवैरोचनिर्बलिःसेंद्रान्देवतगणान्निर्जित्यतद्राज्यंकारयामास
स्वार्थेणिच चकारेत्यर्थः यद्वाइंद्रादिराज्यंस्वीयैःकैश्चिद्देवकारयामासेत्यन्वयः सचासुरेन्द्रोयज्ञंचकार ४ ४

५ वलेरितिभावलश्वरोषष्ठीवलौयजमानोयागंकुर्वानेसाग्निपुरोगमाः पुरोगमेनाग्निमहिताः अग्निमुखत्वाद्देवा
नांस्वयमेवसमागम्यइहाश्रमेतपश्चरंतंविस्नुमूचुः ६ यज्ञंयजतेयज्ञंकरोतीत्यर्थः अप्रसमाप्तइति समाप्तश्चेन्न
जेतुंशक्यइत्यर्थः स्वकार्यंदेवकार्यंआश्रितकार्यस्यस्वकार्यत्वात् अभिपद्यतांअभितःकार्त्स्न्येनसंपाद्यतां ७

कारयामासतद्राज्यंत्रिषुलोकेषुविश्रुतः॥यज्ञंचकारसुमहानसुरेंद्रोमहाबलः॥५॥वलेस्तुयजमान
स्यदेवाःसाग्निपुरोगमाः॥समागम्यस्वयंचैवविस्नुमूचुरिहाश्रमे॥६॥वलिर्वैरोचनिर्विस्नोयजतेयज्ञ
मुत्तमं॥असमाप्तेक्रतौतस्मिन्स्वकार्यमभिपद्यतां॥७॥येचैनमभिवर्तंतेयाचितारइतस्ततःयच्चयत्र
यावच्चसर्वंतेभ्यःप्रयच्छति॥८॥

तत्संपादनेऽपायमपिस्वयमेववदंतीतियेचेति अभिवर्त्तंतेप्राप्नुवंति इतस्ततः नानादेशेभ्यः यत्रगोभूहिरण्या
दिविषयेच्चयाचंतेतेभ्यस्तत्सर्वंयावत् यत्नसाकुण्यायसत्कारपूर्वंप्रयच्छति चौराद्यार्थे ८ श्रीसीताराम

मायाविस्तुत्वाच्छादिकाशक्तिःतस्यायोगंसंबंधंउपाश्रितस्तेनवामनरूपत्वंगतःकल्याणमस्मत्कार्यंकुर्वित्यर्थः ९
॥१०४॥ एतस्मिन्नंतरेदेवप्रार्थनावसरेकश्यपःअदित्यासहितोव्रतंसमाप्यदेवीसहायोवरंईप्सितदानायोन्मुखंमधुसूदनं
तुष्टावउभयत्रभार्यान्वयार्थोद्विःप्रयोगः १० ११ स्तोत्रप्रकारमाहतपोमयंतपःप्रचुरं प्राचुर्यंचाराध्यत्वेन

सत्त्वंसुरहितार्थायमायायोगमुपाश्रितः॥ वामनत्वंगतोविष्णोकुरुकल्याणमुत्तमं॥९॥ एतस्मिन्नंतरेरामक-
श्यपोग्निसमप्रभः॥ अदित्यासहितोरामदीप्यमानइवौजसा॥१०॥ देवीसहायोभगवान्दिव्यवर्षसहस्रकं
व्रतंसमाप्यवरदंतुष्टावमधुसूदनं॥११॥ तपोमयंतपोराशिंतपोमूर्त्तिंतपोधनं। तपसात्वांसुतप्तेनपश्या-
मिपुरुषोत्तमं॥१२॥ शरीरेतवपश्यामिजगत्सर्वमिदंप्रभो॥ त्वमनादिरनिर्देश्यस्त्वामहंशरणंगतः॥१३॥

तपसाराध्यमित्यर्थः तपोराशिंइकट्ठतांसकलतपोजन्यफलप्राप्त्याभगवतस्तपोराशित्वंतपोमूर्त्तितानत्वद्रूपं
तपःआलोचनइतिधातोरसुन्प्रत्ययः तपोधनंतपःप्रधानंपुरुषोत्तमंक्षराक्षरोभयविलक्षणंत्वांसुतप्तेनतप
श्यामिसाक्षात्करोमि १२ इदंचेतनाचेतनात्मकंसर्वंजगत्तवशरीरेपश्यामि त्वमनादिःउत्पत्तिरहितःअनिर्दे-
श्यःएतावानितिपरिच्छेत्तुमशक्यःअतस्त्वामहंशरणंगतोस्मि १३ ॥१०४॥

वरंश्रेष्ठं वरार्हःदिव्यवर्षसहस्रतपसावरदानयोग्यः १४ मारीचः मरीचिपुत्रः अदित्याइत्यादेःयाच्यमानाया
इत्यादिशेषः १५ याच्यमानवरमाहपुत्रत्वमित्यादि १६ यवीयाःकनिष्ठःसाहाय्यंवलिच्छलरूपं १७ यज्ञाश्रमे

तमुवाचहरिःप्रीतःकश्यपंध्वजकल्मषं॥ वरंवरयभद्रंतेवरार्होसिमतोमम॥१४॥तच्छ्रुत्वावचनंतस्यमा
रीचःकश्यपोब्रवीत्॥अदित्यादेवतानांचममचैवानुयाचितः॥१५॥वरंवरदसुप्रीतोदातुमर्हसिसुव्रतपुत्र
त्वंगच्छभगवन्नदित्याममचानघ॥१६॥भ्राताभवयवीयांस्त्वंशक्रस्यासुरसूदन॥शोकार्तानांतुदेवानां
साहाय्यंकर्तुमर्हसि॥१७॥अयंसिद्धाश्रमोनामप्रसादात्तेभविष्यति॥सिद्धेकर्मणिदेवेशउत्तिष्ठभगव
न्नितः॥१८॥

तपोमयप्त्वंमयादैवैश्वर्यअनुभूयसे अयंतेप्रसादात्सिद्धाश्रमइतिप्रसिद्धोभविष्यतीत्यर्थः सिद्धेएतदाश्रममधि
तिसाध्येतपःकर्मणिसिद्धेसतिनिष्पन्नेसतिप्रयोजनाभावादितउत्तिष्ठदेवकार्यायेतिशेषः १८ श्रीराम

अपरेस्मिन्कालेच कार्यनियोगानंतरं १९ आक्रम्यत्रिभिःपादैरितिशेषः आक्रमणेहेतुर्लोकार्थीति २० नियम्य
बध्वा २१ प्रकृतिमुपसंहरतितेनैवेतिवामनेनैवेत्यर्थः पूर्वमाक्रांतोपमाश्रमः अतएवाश्रमनाशनः संसारस्य

अथविष्णुर्महातेजा अदित्यांसमजायत ॥ वामनंरूपमास्थायवैरोचनिमुपागमत् ॥ १९ ॥ त्रीन्पदानथभिक्षित्वा
प्रतिगृह्यचवामनः ॥ आक्रम्यलोकाँल्लोकार्थीसर्वलोकहितेरतः ॥ २० ॥ महेंद्रायपुनःप्रादान्नियम्यबलि
मोजसा ॥ त्रैलोक्यंसमहातेजाश्चक्रेशक्रवशंपुनः ॥ २१ ॥ तेनैवपूर्वमाक्रांतआश्रमःश्रमनाशनःमयातु
भक्त्यातस्यैववामनस्योपभुज्यते ॥ २२ ॥ एतमाश्रममायांतिराक्षसाविघ्नकारिणःअत्रतेपुरुषव्याघ्रहंत
व्यादुष्टचारिणः ॥ २३ ॥ मनिवर्त्तकःसंनिहितंस्थानमेवाश्रमंविहायभवान्किमर्थमत्रस्थितइत्यत्राह
मयात्वितिमयातुतस्यैववामनस्यभक्त्यैवाश्रमउपभुज्यते आश्रीयते वामनचरणस्पर्शेणभूमिरिति
केवलंतामेवावलोकयन्वर्त्तेइत्यर्थः पूर्वसर्गांतेकृतद्वितीयप्रश्नोत्तरमाह एतमिति २२ २३ श्रीराम

हेरामअथानुत्तमंसर्वोत्तमंसिद्धाश्रमंगच्छामः तातेत्युपलालने तदेतदाश्रमपदंयथाममतथातवापिस्वामी
तिशेषः २४ गतनीहारःगतहिमःपुनर्वसुभ्यांसमन्वितइतिरामलक्ष्मणसाम्यापेक्षया पुनर्वसूद्वेतारे २५ उ

अथगच्छामहेरामसिद्धाश्रममनुत्तमंतदाश्रमपदंताततवाप्येतद्यथामम॥२४॥प्रविशन्नाश्रमपदंव्यरोचत
महामुनिःशशीवगतनीहारःपुनर्वसुसमन्वितः॥२५॥तंदृष्ट्वामुनयःसर्वेसिद्धाश्रमनिवासिनः॥उत्पत्यो
त्पत्यसहसाविश्वामित्रमपूजयन॥२६॥मुहूर्तमथविश्रांतौराजपुत्रावरिंदमौ॥प्रांजलीमुनिशार्दूलमू
चतूरघुनंदनौ॥२८॥

उट यथार्हंचक्रिरेपूजांविश्वामित्रायधीमते तथैवराजपुत्राभ्यामकुर्वन्नतिथि
क्रियाम २७

उत्पत्योत्पत्येतिप्रीत्यतिशयोक्तिःआगत्यागत्येत्यर्थः २६ यथार्हंमुनियोग्यतामनतिक्रम्य २७ मुहूर्तमल्पकालं
विश्रांताविवेतिमनुष्यभावेनोच्यते २८

अद्यैवआश्रमप्रवेसदिनएवदीक्षांप्रविशत्वंनियममातिष्ठतेभद्रंतवयागसिद्धरस्तु हेमुनिपुंगवअयंसिद्धःस्यात्त्वायत्तसिद्धाश्रमवर्णसंतोभवतुअत्रैवपुरुषव्याघ्रंहंतव्याकुष्यचारिणा इतितववचःसत्यमस्तु २९ नियतःनिगृहीतांतःकरणः ३० कुमाराविति श्लोकद्वयमेकान्वयंकुमाराविवस्कंदविशाखाविव ३१ स्पृ

अद्यैवदीक्षांप्रविशभद्रंतेमुनिपुंगव॥ सिद्धाश्रमोऽयंसिद्धःस्यात्सत्यमस्तुवचस्तव॥२९॥ एवमुक्तोमहातेजा विश्वामित्रोमहानृषिः॥ प्रविवेशतदादीक्षांनियतोनियतेंद्रियः॥३०॥ कुमाराविवतांरात्रिमुषित्वासुसमाहितौ॥ प्रभातकालेचोत्थायपूर्वांसंध्यामुपास्यच॥३१॥ स्पृष्टोदकौशुचीजप्यंसमाप्यनियमेनचहुताग्निहोत्रमासीनंविश्वामित्रमवंदतां॥३२॥ इत्यार्षेरामायणेवालकांडेएकोनत्रिंशःसर्गः॥२९॥

ष्टोदकौस्नातौनियमेनजप्यंसमाप्यहुताग्निहोत्रंहुतमानसाग्निहोत्रंदीक्षामध्येऽग्निहोत्रस्यनिषिद्धत्वात् अवंदतामित्यर्थः ३२ इतिएकोनत्रिंशःसर्गः २९

अथ तावित्ति देशकालज्ञाविति हेतुगर्भं देशकालज्ञत्वादुचिते देशे उचिते काले तावब्रूतां १ तौ निशाचरौ संरक्ष
णीयौ पतत्सरक्षणाय निवारणीयौ गृहादित्यध्यः तत्क्षणं सक्षणः यथा नातिवर्तेत नातिक्रमेत तथा ब्रूहीत्य
न्वयः २ युयुत्सया योद्धुमिच्छया एवं ब्रुवाणौ प्रशशंसुः प्रोचु ३ तदाह अद्यप्रभृतीति एतद्दिनमारभ्य षड्रात्रं

अथ तौ देशकालज्ञौ राजपुत्रावरिंदमौ ॥ देशे काले च वाक्यज्ञावब्रूतां कौशिकं वचः ॥ १ ॥ भगवन् श्रोतुमिच्छावो य
स्मिन्काले निशाचरौ ॥ संरक्षणीयौ तौ ब्रूहि नातिवर्तेत तत्क्षणं ॥ २ ॥ एवं ब्रुवाणौ काकुत्स्थौ त्वरमाणौ युयुत्स
या ॥ सर्वे ते मुनयः प्रीताः प्रशशंसुर्नृपात्मजौ ॥ ३ ॥ अद्यप्रभृति षड्रात्रं रक्षतं राघवौ युवां ॥ दीक्षां गतो ह्येष मु
निर्मौनित्वं च गमिष्यति ॥ ४ ॥ तौ तु तद्वचनं श्रुत्वा राजपुत्रौ यशस्विनौ ॥ अनिद्रौ षडहोरात्रं तपोवनमरक्षतां ॥ ५ ॥
उपासांचक्रतुर्वीरौ यत्तौ परमधन्विनौ ॥ ररक्षतुर्मुनिवरं विश्वामित्रमरिंदमौ ॥ ६ ॥

युवां रक्षतां एष मुनिर्दीक्षितो मुनित्वं च गमिष्यति अद्यपि दीक्षितत्वान्मौन्येव अतः परमपि षड्रात्रपर्यंतं मुनित्वं प्राप्स्य
तीत्यर्थः ४ षणामहोरात्राणां समाहारः षडहोरात्रं ५ उपासांचक्रतुः यत्तौ सन्नद्धौ विश्वामित्रं तत्पार्श्वे ६ स्थितजीवनाय

कालेयेचाहोरात्रलक्षणेषष्ठेहनिसुत्यादिनेआगतेप्राप्तेइत्यर्थः यत्तःसज्जःसमाहितःएकाग्रचित्तः ६ रामस्येति
रामेएवंब्रुवतिसतीत्यर्थः उपाध्यायोब्रह्मा पुरोहितउपद्रष्टा इदंऋत्विगंतराणामप्युपलक्षणं अत्रवेदिज्वल
नंराक्षसागमनसूचकउत्पातः ८ दर्भसहितचमसस्रुग्वती समित्कुसुमोच्चयैश्चसहिताचमसंपानपात्रं उच्च

अथकालेगतेतस्मिन्षष्ठेहनिसमागते सौमित्रिमब्रवीद्रामोयत्तोभवसमाहितः॥७॥ रामस्यैवंब्रुवाणा
स्यत्वरितस्ययुयुत्सया। प्रजज्वालततोवेदिःसोपाध्यायपुरोहिता॥८॥ सदर्भचमसस्रुक्कासममित्कुसु
मोच्चया विश्वामित्रेणसहितावेदिर्जज्वालसर्त्विजा॥९॥ मंत्रवच्चयथान्यायंयज्ञोसौसंप्रवर्तते॥ आ
काशेचमहांशब्दःप्रादुरासीद्भयानकः॥१०॥ आवार्यगगनेमेघोयथाप्रावृषिदृश्यते। तथामायांविकु
र्वाणौराक्षसावभ्यधावतां॥११॥

यःसमूहः इदंवेदीज्वलनंयज्ञोद्देश्यकं ९ संप्रवर्त्ततेस्मआकाशेमहान्शब्दःप्रादुरासीच्च १० यथाप्रावृषि
गगनमावार्यगगनमावृत्यमहाशनिमहागर्जमहावर्षादिविचित्रकार्यकारीमेघोदृश्यतेतथामायांविकु
र्वाणौप्रकटीकुर्वाणौराक्षसावभ्यधावतां ११

कौ तौ का च सा मायेत्यत्राह मारीच इत्यादि अवासृजन्न्यवर्षुः १२ समुक्षितां अभ्यासे इति शेषः अभिद्रुतः शालोद्र
धावत्तत्राह स्थाततो दिवि तानपश्यत् १३ आपतंतौ त्वसंभ्रमागच्छंतौ १४ मानवास्त्रसमाधूतान्करिष्यामि

मारीचश्च सुबाहुश्च तयोरनुचरास्तथा ॥ आगम्य भीमसंकाशा रुधिरौघानवासृजन् ॥१२॥ तां तेन रुधि
रौघेण वेदीं वीक्ष्य समुक्षितां ॥ सहसाभिद्रुतो रामस्तानपश्यत्ततो दिवि ॥१३॥ तावापतंतौ सहसा दृष्ट्वा रा
जीवलोचनः लक्ष्मणं त्वभिसंप्रेक्ष्य रामो वचनमब्रवीत् ॥१४॥ पश्य लक्ष्मण दुर्वृत्तान्राक्षसान्पिशिता
शनान् ॥ मानवास्त्रसमाधूताननिलेन यथा घनान् ॥१५॥ करिष्यामि न संदेहो नोत्सहे हंतुमीदृशान्
इत्युक्त्वा वचनं रामश्चापे संधाय वेगवान् ॥१६॥ मानवं परमोदारमस्त्रं परमभास्वरं ॥ चिक्षेप परमक्रु
द्धो मारीचोरसि राघवः ॥१७॥

पश्य १५ ईदृशान्दुर्वृत्तान् १६ परमोदारं परमश्रेष्ठं ननु सर्वराक्षसेष्वस्त्रप्रतिज्ञाय मारीचोरसि तत्प्रयो
जः कथमिति चेन्न पूर्वश्लोके राक्षसशब्दस्य मारीचादिपरत्वात् १७

स मारीचः सागरसंप्लवे समुद्रपूरे १८ विचेतन चैतन्यरहितं अत एव विघूर्णमानं शीतेषुर्मानवास्त्रं तद्बलेन पी
डितं निरस्तं मारीचं दृष्ट्वा मारीचस्य प्राणारक्षणस्वाभाविकार्यं तत्र साधनाय १९ शीतेषुं शीतेष्वित्यपर
नामकं मानवास्त्रं मनुसंहितं मनुप्रयुक्तं वियुज्यते वियोजयतीति यावत् २० वधप्रयोजकानि निर्दे

अत्र गायत्रीं स तेन परमास्त्रेण मानवेन समाहतः ॥ संपूर्णं योजनशतं क्षिप्तः सागरसंप्लवे ॥१८॥
विचेतनं विघूर्णांतं शीतेषुबलपीडितं ॥ निरस्तं दृश्य मारीचं रामो लक्ष्मणमब्रवीत् ॥१९॥ पश्य लक्ष्म
ण शीतेषुं मानवं मनुसंहितं ॥ मोहयित्वा नयत्येनं न च प्राणैर्वियुज्यते ॥२०॥ इमानपि वधिष्यामि
निर्घृणान्दुष्टचारिणः ॥ राक्षसान्पापकर्मस्थान्यज्ञघ्नान्रुधिराशनान् ॥२१॥ इत्युक्त्वा लक्ष्मणं चा
शु लाघवं दर्शयन्निव ॥ संगृह्य सुमहच्चास्त्रमाग्नेयं रघुनंदनः ॥२२॥ सुबाहूरसि चिक्षेप स विद्धः
प्रापतद्भुवि ॥ शेषान्वायव्यमादाय निजघान महायशाः ॥२३॥ अथ यज्ञे समाप्ते तु विश्वामित्रो महामु
निः निरीतिका दिशो दृष्ट्वा काकुत्स्थमिदमब्रवीत् ॥२४॥

तात्वदीनि २१ निजघान ह्रोत्सारणपूर्वकं नाशनं वायव्यास्त्रफलं बोध्यम् २३ निरीतिकाः निरुपद्रवाः २४

सत्यंकृतंप्रत्यर्पणनामकंकृतमित्यर्थः २५ २६ इतित्रिंशःसर्गः ३० एवंकृतार्थोविश्वामित्रोजनकसुतात्वेना
वतीर्णायाश्चिदानंदरूपयाभगवत्याभगवंतंश्रीरामंयोजयितुंधनुर्दानव्याजेनमिथिलाप्रस्थानंप्रस्तौतिअ

कृतार्थोस्मिमहावाहोकृतंगुरुवचस्त्वया॥सिद्धाश्रममिदंसत्यंकृतंवीरमहायशः॥२५॥सहिरामंप्रश
स्यैवंताभ्यांसंध्यामुपागमत्॥२६॥इत्यार्षेरामायणेवालकांडेत्रिंशःसर्गः॥३०॥अथतांरजनींतत्रकृ
तार्थौरामलक्ष्मणौ॥ऊषतुर्मुदितौवीरौप्रहृष्टेनांतरात्मना॥१॥प्रभातायांतुशर्वर्यांशौचंकृत्वामहावलौ
विश्वामित्रमृषींश्चान्यान्सहितावभिजग्मतुः॥२॥अभिवाद्यमुनिश्रेष्ठंज्वलंतमिवपावकं॥ऊचतुर्म
धुरोदारंवाक्यंमधुरभाषिणौ॥३॥इमौस्ममुनिशार्दूलकिंकरौसमुपागतौ॥आज्ञापयमुनिश्रेष्ठशास
नंकरवावकिं॥४॥

थेति तत्रयज्ञशालायांकृतार्थौकृतविश्वामित्रकार्यौप्रहृष्टेनसंतुष्टेनांतरात्म
नाअंतःकरणेनोपलक्षितौ १ सहितौअविनाभूतौअभिजग्मतुः अभिवाद्यार्थाविति शेषः २ मधुरोदारो
क्तौहेतुर्मधुरभाषिणाविति ३ स्मेतिभूतार्थसूचकाव्ययंहेमुनिशार्दूलकिंकराविमौस्म आज्ञापितंसर्वमनु
ष्ठितवंतौपुनःकिंशासनंकरवावेत्याज्ञापय ४

तयोरितिताभ्यामित्यर्थः विश्वामित्रंपुरस्कृत्यविश्वामित्रप्रमुखामुनयइत्यर्थः ५ मैथिलस्यमिथिलाधिप
तेःपरमधर्मिष्ठः भगवत्ताराधनधर्मवान् यद्वापरमेतिपृथक्पदंपरमाशोभायस्मिन्नित्यर्थकंरामसं
बोधनं ६ ७ पूर्वंपूर्वस्मिन्कालेदेवराताख्यप्राचीनजनकस्ययज्ञेसदसिदैवतैःशिवसहितैर्दैवतैर्देवरात

रावमुक्तेतयोर्वाक्येसर्वएवमहर्षयः॥ विश्वामित्रंपुरस्कृत्यरामंवचनमब्रुवन्॥४॥ मैथिलस्यनरश्रेष्ठज
नकस्यभविष्यति॥ यज्ञःपरमधर्मिष्ठस्तत्रयास्यामहेवयं॥६॥ त्वंचैवनरशार्दूलसहास्माभिर्गमिष्यसि
अद्भुतंचधनूरत्नंतत्रत्वंद्रष्टुमर्हसि॥७॥ तद्धिपूर्वंनरश्रेष्ठदत्तंसदसिदैवतैः॥ अप्रमेयबलंघोरंम
खेपरमभास्वरं॥८॥ नास्यदेवानगंधर्वानासुरानचराक्षसाः॥ कर्तुमारोपणंशक्तानकथंचनमानुषाः॥९॥
धनुषस्तस्यवीर्यंहिजिज्ञासंतोमहीक्षितः॥ नशेकुरारोपयितुंराजपुत्रामहाबलाः॥१०॥ ॥ ॥

ह्येतदप्रमेयबलंधनुर्दत्तमतस्तत्रतिष्ठतीतिशेषः ८ तस्याद्भुतत्वमाहनास्येति आरोपणंशरप्रक्षेपयोग्यता
संबंधः नकथंचननकथमपीत्यर्थः ९ जिज्ञासंतःजिज्ञासमानाः १० श्रीयुगलकिशोरोज॰

यत्तं द्रक्ष्यसि तत्र धनुर्द्रक्ष्यसीत्यन्वयः ११ कुतस्तादृशस्य धनुषस्तत्र स्थितिस्तत्राह तद्धीति उत्तमं तद्धनुः मैथिलेन
निजयज्ञप्रीतदेवेभ्यः यज्ञफलत्वेन याचितं युद्धे रिपूणां जयाय सर्वैर्देवतैर्दत्तमतस्तत्र तिष्ठतीत्यर्थः तदुक्तं कौर्मे
प्रीतश्च भगवानीशस्त्रिशूली नीललोहितः प्रददौ शत्रुनाशार्थं जनकायाद्भुतं धनुरिति सुनाभं शोभनमुष्टि
बंधनस्थानं १२ आयागभूतं मखदेवताभूतमित्यर्थः वेश्मनीत्यस्य तिष्ठतीति शेषः अत एवाह अर्चितमित्या

तद्धनुर्नरशार्दूल मैथिलस्य महात्मनः ॥ तत्र द्रक्ष्यसि काकुत्स्थ यज्ञं च परमाद्भुतं ॥११॥ तद्धि यज्ञफलं तेन
मैथिलेनोत्तमं धनुः ॥ याचितं नरशार्दूल सुनाभं सर्वदैवतैः ॥१२॥ आयागभूतं नृपतेस्तस्य वेश्मनि राघव
अर्चितं विविधैर्गंधैर्धूपैश्चागरुगंधिभिः ॥१३॥ एवमुक्त्वा मुनिवरः प्रस्थानमकरोत्तदा ॥ सर्षिसंघः
सकाकुत्स्थ आमंत्र्य वनदेवताः ॥१४॥

टि॰ अयमत्र धनुरागमनक्रमः पूर्वं देवास्त्रिपुरवधाय विश्वक
र्मणा निर्मितं धनुर्महादेवाय ददुः तद्भगवतोर्बलाबलपरीक्षानिमित्तकविरोधे विष्णुपराक्रमे जृंभीकृते देवैः
प्रार्थितो महादेवो धनुरिच्छतो देवरातस्य हस्ते न्यस्तवान् ततः प्रभृति न्यासभावेन वर्तमानं जनकेन स्य परे
स्वत्वेन याचमानं देवैस्तस्य यज्ञफलत्वेन दत्तमिति १२ मुनिवरो विश्वामित्रः वनः देवताः वनस्थाः १४

॥११०॥ सिद्धः निर्विघ्नयत्नसिद्धेतिभावः क्कगमिष्यसीत्यत्राह उत्तरे इति शिलाच्चयं पर्वतं सिद्धाश्रमाद्धिमवद्गमनं
मिथिलामार्गेणोतिज्ञेयं १५ ततःवनदेवनदेवतामंत्रणानंतरं १६ अनुसारिणां पश्चाद्गामिनां शकटीशत

स्वस्ति वोस्तु गमिष्यामि सिद्धः सिद्धाश्रमादहं ॥ उत्तरे जाह्नवीतीरे हिमवंतं शिलोच्चयं ॥१५॥ प्रदक्षिणं त
तः कृत्वा सिद्धाश्रममनुत्तमं ॥ उत्तरां दिशमुद्दिश्य प्रस्थातुमुपचक्रमे ॥१६॥ तं व्रजंतं मुनिवरमन्वगाद
नुसारिणां ॥ शकटीशतमात्रं तु प्रयाणे ब्रह्मवादिनां ॥१७॥ मृगपक्षिगणाश्चैव सिद्धाश्रमनिवासि
नः ॥ अनुजग्मुर्महात्मानं विश्वामित्रं तपोधनं ॥१८॥ निवर्तयामास ततः सर्षिसंघः सपक्षिणः ॥ ते ग
त्वा दूरमध्वानं लंबमाने दिवाकरे ॥१९॥ वासं चक्रुर्मुनिगणाः शोणाकूले समाहिताः ॥२०॥ तेस्तंगते
दिनकरे स्नात्वा हुतहुताशनाः ॥ विश्वामित्रं पुरस्कृत्य निषेदुरमितौजसः ॥२१॥

परिच्छिन्नकशठ्यारोपिताग्निहोत्रसंभारादिमत्ब्रह्मवादिनां पूर्वं अन्वगादिति संबंधः १८ पक्षिगणोनि
वर्त्तयामासेत्यनेनऋषीणामनिववर्त्तनमुक्तं १९ तदेवाहतेगत्वेति शोणाइति गिरिव्रजसमीपस्थोनदवि ॥११५॥
शेषः इत्येतदुत्तरसर्गेस्पष्टं २० अस्तंगते अस्तंजिगमिषतीत्यर्थः २१

२२ २३ अयंदेशःशोणाकूलस्थः २४ निखिलंभवमिशेषः २५ इतिएकत्रिंशःसर्गः ३१ शोणाकूलदेशवे

रामोपिसहसौमित्रिर्मुनींस्तानभिपूज्यच ॥ अग्रतोनिषसादाथविश्वामित्रस्यधीमतः ॥२२॥ अथरामोम
हातेजाविश्वामित्रंतपोनिधिं ॥ पप्रच्छमुनिशार्दूलंकौतूहलसमन्वितं ॥२३॥ भगवन्कोन्वयंदेशःसम
द्धवनशोभितः ॥ श्रोतुमिच्छामिभद्रंतेवक्तुमर्हसितत्वतः ॥२४॥ चोदितोरामवाक्येनकथयामाससु
व्रतः ॥ तस्यदेशस्यनिखिलमृषिमध्येमहातपाः ॥२५॥ इत्यार्षेरामायणेबालकांडेएकत्रिंशःसर्गः
३१ ॥ ब्रह्मयोनिर्महानासीत्कुशोनाममहातपाः ॥ अक्लिष्टव्रतधर्मज्ञःसज्जनप्रतिपूजकः ॥१॥ समहात्मा
कुलीनायांजायायांसुमहाबलान् ॥ वैदर्भ्यांजनयामासचतुरःसदृशान्सुतान् ॥२॥ ॥ ॥ ॥ ॥

भवप्रश्नेमद्दृश्यानामयंदेशइत्युत्तरमाहब्रह्मयोनिरितिब्रह्मयोनिःकारणंयस्यसःब्रह्मपुत्रइत्यर्थः अक्लि
ष्टव्रतस्यासौधर्मज्ञश्चेतिविग्रहः १ युक्तायांअनुरूपायां २

असूर्तरजसंनविद्यन्तेसूर्तंप्रसृतंरजोयस्यतं अजितियोगविभागश्च क्षत्रधर्मचिकीर्षयातद्धर्मवृद्धिकरणेछया

कुशांवंकुशनाभंचअसूर्तरजसंवसुं॥ दीप्तियुक्तान्महोत्साहान्क्षत्रधर्मचिकीर्षया॥३॥ तानुवाचकुशःपु
त्रान्धर्मिष्टान्सत्यवादिनः क्रियतांपालनंपुत्राधर्मंप्राप्स्यथपुष्कलं॥४॥ कुशस्यवचनंश्रुत्वाचौरोमि
तविक्रमाः॥ निवेशंचक्रिरेसर्वेपुराणांनृवरास्तदा॥५॥ कुशांवस्तुमहातेजाःकौशांवीमकरोत्पुरीं॥ कु
शनाभस्तुधर्मात्मापुरंचक्रेमहोदयं॥६॥ असूर्तरजसोनामधर्मारण्यंमहीपतिः॥ चक्रेपुरवरंरा
जावसुर्नामगिरिव्रजं॥७॥ एषावसुमतीनामवसोस्तस्यमहात्मनः॥ एतेशैलवराःपंचप्रकाशंतेसमंततः॥
८॥ सुमागधीनदीरम्यामगधान्विश्रुतायया॥ पंचानांशैलमुख्यानांमध्येमालेवशोभते॥९॥

चत्वा

३ पालनंप्रजापालनं ४ निवेशंसन्निवेशं ५ महोदयंमहोदयनामनामकं ६ ७ एषागिरिव्रजापरप
र्याया ८ आययौइतिच्छेदः ९

सामागधीमगधान्भातितयामागधीत्वेनप्रसिद्धायाएषाशोणात्तस्यमद्वंश्यस्यवसोर्भवति पूर्वाभिचरिता पूर्वे

सैषाहिमागधीनामवसोस्तस्यमहात्मनः॥पूर्वाभिचरितानामसुक्षेत्रासस्यमालिनी॥१०॥कुशनाभस्तुराज
र्षिःकन्याशतमनुत्तमं॥जनयामासधर्मात्माघृताच्यांरघुनंदन॥११॥तास्तुयौवनशालिन्योरूपवत्यःस्वलं
कृताः॥उद्यानभूमिमागम्यप्रावृषीवशतह्रदा॥१२॥गायंत्योनृत्यमानावादयंत्यस्तुराघव॥आमोदं
परमंजग्मुर्वराभरणभूषिताः॥१३॥अथताश्चारुसर्वांग्योरूपेणाप्रतिमाभुवि॥उद्यानभूमिमागम्यतारा
इवघनांतरे॥१४॥ताःसर्वगुणसंपन्नारूपयौवनसंयुताः॥दृष्ट्वासर्वात्मकोवायुरिदंवचनमब्रवीत्॥१५॥
अहंवःकामयेसर्वाभार्यामभविष्यथ॥मानुषस्त्यज्यतांभावोदीर्घमायुरवाप्स्यथ॥१६॥

[illegible]मालिनी सुक्षेत्रायाशस्यद्वयेयीतिशेषः १० घृताच्यांअप्सरसि ११ ताःशतंकन्याः १२ आमोदंसंतोषं १३
घनांतरेमेघमध्येताराइवरेजुरितिशेषः १४ सर्वस्मिन्आत्मास्वरूपंयस्यसःसर्वात्मकःसर्वत्रसंचारीत्यर्थः १५
भवतीभिर्मानुषोभावःमनुष्यसंबंधिअनुरागस्त्यज्यतांतथासतिदीर्घमायुरवाप्स्यथ १६

मानुषेषु हि यतः विशेषेणानित्यमनुक्षणं यौवनं चलं च चलं क्षीयमाणमतो मत्संयोगेनाक्षयं यौवनं प्राप्ताः देव्यो
भविष्यथ १७ अक्लिष्टकर्मणः अप्रतिहतकर्मणः अपहास्य हासपूर्वकमयमान्य १८ अन्तश्चरसीति पूर्वा
र्द्धेन स्वप्रभाववत्ता वायोः सूचिता वयमपि सर्वास्ते प्रभाववत्ताः तस्मादेवमनुचितप्रार्थनयाऽस्मदवमाननम

चलं हि यौवनं नित्यं मानुषेषु विशेषतः ॥ अक्षयं यौवनं प्राप्ता अमर्त्याश्च भविष्यथ ॥१७॥ तस्य तद्वचनं
श्रुत्वा वायोरक्लिष्टकर्मणः ॥ अपहास्य ततो वाक्यं कन्याशतमथाब्रुवीत् ॥१८॥ अन्तश्चरसि भूतानां
सर्वेषां सुरसत्तम ॥ प्रभावज्ञाश्च ते सर्वाः किमर्थमवमन्यसे ॥१९॥ कुशनाभसुताः सर्वाः समर्थाश्च
सुरोत्तम स्थानात् च्यावयितुं देवं रक्षामस्तु तपो वयं ॥२०॥ मा भूत्स कालो दुर्मेधः पितरं सत्यवादिनं
अवमन्य स्वधर्मेण स्वयं वरमुपास्महे ॥२१॥

नुचितमित्याह किमर्थमित्यादि १९ स्वप्रभावं दर्शयति
कुशनाभेत्यादि स्थानात् वायुपदात् देवमपि त्वां च्यावयितुं समर्था इति शेषः शापेन तथाक हितं यतः क्षय
स्यादिति भावः २० हे दुर्मेधः दुर्बुद्धे यत्र काल पितरमवमन्य अवमानविषयं कृत्वा स्वधर्मेण कामेन स्वयंव
रमुपास्महे आत्मना स्वातंत्र्येण वयं वरमंगीकुर्मः स कालः कदाचिदपि मा भूदित्यन्वयः २१

उक्तेविवरणोतिपितेति २२ हरिःवायुःबभंजकुब्जीचकार २३ सलज्जाःस्वरूपवैरूप्यादितिभावः २४ भग्नांगाः २५

पितावैप्रभुरस्माकंदैवतंपरमंहिसः यस्यनोदास्यतिपितासनोभर्त्ताभविष्यति ॥२२॥ तासांतुवचनंश्रुत्वाह
रिःपरमकोपनःप्रविश्यसर्वगात्राणिबभंजभगवान्प्रभुः ॥२३॥ ताःकन्यावायुनाभग्नाविविशुर्नृपतेर्गृहं
प्रविश्यचसुसंभ्रांताःसलज्जाःसाश्रुलोचनाः ॥२४॥ सचतादयितादीनाःकन्याःपरमशोभनाः ॥ दृष्ट्वाभग्नास्त
दाराजासंभ्रांतइदमब्रवीत् ॥२५॥ किमिदंकथ्यतांपुत्र्यः कोधर्ममवमन्यते ॥ कुब्जाःकेनकृताःसर्वाश्चेष्टं
त्योनाभिभाषथ ॥ एवंराजाविनिश्वस्यसमाधिंसंदधेततः ॥२६॥ इत्यार्षेरामायणेवालकांडेद्वात्रिंशःस
र्गः ॥३२॥ तस्यतद्वचनंश्रुत्वाकुशनाभस्यधीमतः ॥ शिरोभिश्चरणौस्पृष्ट्वाकन्याशतमभाषत ॥१॥ ॥ ॥

धर्ममवमन्यतेबलात्कारंकरोतीतियावत् रोदनादिनाचेष्टंत्यःकिंनाभिभाषथेत्यन्वयः २५ एवंदृष्ट्वेतिशेषः
समाधिंकिंवक्ष्यंतीतितद्वचनश्रवणेसावधानंसंदधेकृतवान् २६ इतिद्वात्रिंशःसर्गः ३२ शिरोभिश्चरणौ
स्पृष्ट्वापादयोःप्रणम्येत्यर्थः १

प्रधर्षयितुंअभिभवितुंइच्छतिस्म अशुभंबलात्काररूपं प्रत्यवेक्षतेस्वस्येतिशेषः २ पितृमत्यःपित्रधीनाःस्व-
च्छंदेपतिस्वीकारविषयेस्वातंत्र्येसास्थिताः नवर्त्तामहेअतोनपितरंवरणीष्वत्वंयदिनः अस्मान्तुभ्यंदास्यति
तदातववत्वदीयाभार्याभविष्यामः तेतवभद्रमस्तु ३ एवंब्रुवंत्योवयंअस्माकंवचनेनप्रतीच्छताअंगीकुर्व

वायुःसर्वात्मकोराजन्प्रधर्षयितुमिच्छति॥अशुभंमार्गमास्थायनधर्मंप्रत्यवेक्षते॥२॥पितृमत्यःस्मभ
द्रंतेस्वच्छंदेनवयंस्थिताःपितरंनोवृणीष्वत्वंयदिनोदास्यतेतव॥३॥तेनपापानुबंधेनवचनंनप्रतीच्छता
एवंब्रुवंत्यःसर्वाःस्मवायुनाभिहताभृशं॥४॥तासांतुवचनंश्रुत्वाराजापरमधार्मिकः॥प्रत्युवाचमहातेजाः
कन्याशतमनुत्तमं॥५॥क्षांतंक्षमावतांपुत्र्यःकर्त्तव्यंसुमहत्कृतं॥ऐकमत्यमुपागम्यकुलंचावेक्षितंम
म॥६॥अलंकारोहिनारीणांक्षमातुपुरुषस्यवा॥दुष्करंतच्चवःक्षांतंत्रिदशेषुविशेषतः॥७॥ ॥ ॥

तापापानुसारिणातेनवायुनाभृशंअभिहताःनिहताः ४ ५ हेपुत्र्यःक्षमावतांक्षमावद्भिःकर्त्तुमर्हंयत्सां
तंक्षमातत्सुमहत्कृतंमहतीक्षमाकृता यच्चकुलंअवेक्षितंतदपिसुमहत् ६ ७ रामसीता

भोपुत्र्यःयादृशोयुष्माकंक्षमातादृशीअस्मत्कुलेसर्वासामस्त्विति शेषः प्रार्थनीयत्वेनिमित्तमाहक्षमेति दान
सत्यवचनयज्ञसमाधिजसकलधर्मफलाक्षमासकलजगदाधारभूताचक्षमा अतःसाऽपादेयेत्यर्थः ८

यादृशीवःक्षमापुत्र्यःसर्वासामविशेषतः॥ क्षमादानंक्षमासत्यंक्षमायज्ञाश्चपुत्रिकाः॥८॥क्षमायशःक्षमा
धर्मःक्षमायांविष्ठितंजगत्॥विसृज्यकन्याःकाकुत्स्थराजात्रिदशविक्रमः॥९॥मंत्रज्ञोमंत्रयामासप्रदानं
सहमंत्रिभिः देशेकालेचकर्तव्यंसदृशेप्रतिपादनं॥१०॥एतस्मिन्नेवकालेतुचूलीनाममहाद्युतिः॥ऊर्द्ध
रेताःशुभाचारोब्राह्मंतपउपागमत्॥११॥तपस्यंतमृषिंतत्रगंधर्वीपर्युपासते॥सोमदानामभद्रंतेऊर्मि
लातनयातदा॥१२॥

विष्ठितंस्थितंभवति ९ सदृशेस्वकुलस्यसदृशेपात्रेप्रतिपादनंचमंत्रयामास १०
ऊर्द्धरेताःब्रह्मचारीब्राह्मंतपः ब्रह्मविषयेचित्तैकाग्र्यंउपागमत्कृतवान् ११ यदाचूलीतपश्चरतितदाऊर्मि
लातनयासोमदानामगंधर्वीतंपर्युपास्तेस्ममप्यनुग्रहंकुर्विति प्रार्थनयासेवते १२ सियवस्त्रभोजन

॥११९॥ तंप्रतीतिशेषः उवासतत्समीपेआसेत्यर्थः कियतिकालेतुषोभवत् व्रह्मर्षित्वाद्गुरुरित्युक्तिः कालयोगेनशु
श्रूषापरिपाककालसंवंधेनकरोमिकुर्यां १४ वाक्येवचनेकोविदंसमर्थं १५ व्राह्म्यालक्ष्म्याव्रह्मवर्चसेन
समृद्धिः व्रह्मात्मभावनयाव्रह्मतोमहात्मायतस्त्वमतोव्राह्मेणातपसायुक्तंपुत्रमिच्छामिव्राह्म्यंतपः

साजेचप्रणताभूत्वाशुश्रूषणपरायणा ॥ उवासकालेधर्मिष्ठातस्यास्तुषोभवत्सुतः ॥१३॥ सचतांकाल
योगेनप्रोवाचरघुनंदन ॥ परितुष्टोस्मिभद्रंतेकिंकरोमितवप्रियं ॥१४॥ पारितुष्टंमुनिंज्ञात्वागांधर्वीमधुर
स्वरं ॥ उवाचपरमप्रीतावाक्यज्ञावाक्यकोविदं ॥१५॥ लक्ष्म्यासमुदितोव्राह्म्याव्रह्मभूतोमहातपाः ॥ व्राह्मे
णातपसायुक्तंपुत्रमिच्छामिधार्मिकं ॥१६॥ अपतिश्चास्मिभद्रंतेभार्याचास्मिनकस्यचित् ॥ व्राह्मे।
णोपगतायास्त्वंदातुमर्हसिमेसुतं ॥१७॥ स्वाध्यायः १६ तातत्वह अपतिश्चास्मीति इतःपरमपिअस्मि
अहंनकस्यचिद्भार्याभविष्यामीतिशेषः अपापिनैष्ठिकव्रह्मचारिणाउपगतायाःकिंकरत्वंप्राप्ताया
मेव्राह्मेणव्रह्मसंवंधिनाउपायेनसुतंदातुमर्हसि सनकादयइवमानसः पुत्रोदेयइतिभावः १७श्रीसीतारा ॥११९॥

तस्याः सोमदायाः प्रसन्नः चूलितनामा ब्रह्मऋषिः ब्राह्मं ब्रह्मतपसा युक्तं ब्राह्मणाद्दत्तत्वाद्ब्रह्मदत्त इति ख्यातं मान
सं सुतं ददाविति अन्वयः फली फलिन इतिवत् चूली चूलिन इति ऋषेर्नामद्वयं साधु १८ स राजेति राजगंधर्व्याः सोम
दायाः क्षत्रियात्वात् कांपिल्यां कंपिलेन निर्विता १९ तदा ब्रह्मदत्तस्य कांपिल्यायामावासकाले २० देवपति

तस्याः प्रसन्नो ब्रह्मर्षिर्ददौ पुत्रमनुत्तमं ॥ ब्रह्मदत्त इति ख्यातं मानसं चूलिनः सुतं ॥१८॥ स राजा ब्रह्मद
त्तस्तु पुरीमध्यावसत्तदा ॥ कांपिल्यां परया लक्ष्म्या देवराजो यथा दिवि ॥१९॥ स बुद्धिं कृतवान् राजा कुश
नाभस्तु धार्मिकः ब्रह्मदत्ताय काकुत्स्थ दातुं कन्याशतं तदा ॥२०॥ तमाहूय महातेजा ब्रह्मदत्तं महीपतिः
ददौ कन्याशतं राजा सुप्रीतेनांतरात्मना ॥२१॥ यथाक्रमं तदा पाणिं जग्राह रघुनंदन ॥ ब्रह्मदत्तो महीपा
लस्तासां देवपतिर्यथा ॥२२॥ स्पृष्टमात्रे तदा पाणौ विकुब्जा विगतज्वराः ॥ युक्तं परमया लक्ष्म्या बभौ क
न्याशतं तदा ॥२३॥

यथा देवपतिसदृशः तत्तुल्यविभव इत्यर्थः २२ तदा तेन राज्ञा पाणौ स्पृष्टमात्रे ताः कन्या विकुब्जत्वरहिताः प्राप
न्निति शेषः ब्राह्मतपोयुक्तत्वाद्देवसामर्थ्यात् ततः एवं च सति तदा तत्कन्याशतं परया लक्ष्म्या बभाविति अन्वयः २२

सराजावायुनामुक्तादृष्ट्वेत्यन्वयः २४ प्रेषयामासकांपिल्यामितिशेषः २५ सदृशींक्रियांदारक्रियामित्यर्थः प्रतिवंदनप्रकारमाहस्पृष्ट्वेत्यादिप्रशस्यचगतेत्यर्थः अप्राक्स्वर्यमासोऽवैधेर्यदेवस्येष्टस्याप्यनादरः धन्योऽयंराजा

सदृष्ट्वावायुनामुक्ताःकुशनाभोमहीपतिः वभूवपरमप्रीतोहर्षंलेभेपुनःपुनः॥२४॥कृतोद्वाहंतुरा
जानंब्रह्मदत्तंमहीपतिःसदारंप्रेषयामाससोपाध्यायगणंतदा॥२५॥सोमदापिसुसंहृष्टापुत्रस्यसदृशीं
क्रियां॥यथान्यायंचगंधर्वीस्नुषास्ताःप्रत्यनंदत॥स्पृष्ट्वाचताःकन्याःकुशनाभंप्रशस्यच॥२६॥इत्या प०क्षा
र्षेरामायणेबालकांडेत्रयस्त्रिंशःसर्गः॥३३॥कृतोद्वाहेगतेतस्मिन्ब्रह्मदत्तेचराघव॥अपुत्रःपुत्र
लाभायपौत्रीमिष्टिमकल्पयत्॥१॥इष्ट्यांनुवर्तमानायांकुशनाभंमहीपतिं॥उवाचपरमोदारःकु
शोब्रह्मसुतस्तदा॥२॥

यस्यईदृश्यःसुताःअहोभाग्यंयस्यामेईदृश्यःस्नुषाःइत्येवंप्रतिनंदनं अनेनह्री
माहात्म्यंतपोमाहात्म्यंचदर्शितं २६ इतित्रयस्त्रिंशःसर्गः ३३ एवंप्रासंगिकंपरिसमाप्यप्रकृतकथाशे
षमाहकृतोद्वाहइत्यादिअपुत्रःकुशनाभःपुत्रलाभायपुत्रप्राप्तयेपौत्रींपुत्रार्थंपौत्रींतां १ कुशःकुशनाभपिता २

सदृशःगुणैरितिशेषःसपुत्रःकिन्नामतत्राहगाधिमिति गाधिनामानंपुत्रंप्राप्स्यसितेनगाधिनाचशाश्व
त्स्वांशाश्वतींकीर्त्तिंचप्राप्स्यसि २ आकाशमाविश्यआकाशस्वरूपोभूत्वा अनेनतस्यमुक्तत्वंसूचितं ४

पुत्रस्तेसदृशःपुत्रभविष्यतिसुधार्मिकः॥गाधिंप्राप्स्यसियेनत्वंकीर्त्तिंलोकेचशाश्वतीं॥३॥एवमुक्त्वाकुशो
नामकुशनाभंमहीपतिं॥जगामाकाशमाविश्यब्रह्मलोकंसनातनं॥४॥कस्यचित्त्वथकालस्यकुशनाभ
स्यधीमतः॥जज्ञेपरमधर्मिष्ठोगाधिरित्येवनामतः॥५॥सपितामम काकुत्स्थगाधिःपरमधार्मिकः॥कु
शवंशप्रसूतोस्मिकौशिकोरघुनंदन॥६॥पूर्वजाभगिनीचापिममराघवसुव्रता॥नाम्नासत्यवतीनामऋ
चीकेप्रतिपादिता॥७॥सशरीरागतास्वर्गंभर्त्तारमनुवर्त्तिनीकौशिकीपरमोदाराप्रवृत्ताचमहानदी॥८॥

के

कस्यचित्कालस्यानंतरमितिशेषः ५ ममविश्वामित्रस्यकुशवंशप्रसूतत्वादहंकौशिकः ६ नकेव
लमहमेवगाधेःपुत्रःममपूर्वजाज्येष्ठानाम्नासत्यवतीप्रसिद्धाऋचीकायदत्ता ७ अनुवर्त्तिनीशुश्रूष
माणा नकेवलस्वशरीरतःस्वर्गमनंअपितुअत्वामहानदीत्वमपिजातमित्याहकौशिकीत्यादिना ८

दिव्याश्चनन्यसाधारणा हितकामार्थंहितंआमुष्मिकंकामःऐहिकंतदुभयप्रदानार्थं ९ ततोहमितियतोहि
मवंतमाश्रिताततइत्यर्थः १० सत्यवतीनामनिमित्तमाहसात्वितिसत्येधर्मेप्रतिष्ठिता तत्सेवनात्सत्यात्म
नोननिवर्त्ततेइतिभावः ११ नन्वेवंकथंसिद्धाश्रमेस्थितिरतःआहअहंहीति नियमात्अध्वरहेतोः आ

दिव्यापुण्योदकारम्याहिमवंतमुपाश्रिता॥लोकस्यहितकामार्थंप्रवृत्ताभगिनीमम॥९॥ततोहंहिमवत्पा
र्श्वेवसामिनियतःसुखं॥भगिन्यांस्नेहसंयुक्तःकौशिक्यांरघुनंदन॥१०॥सातुसत्यवतीपुण्यासत्ये
धर्मेप्रतिष्ठिता॥पतिव्रतामहाभागाकौशिकीसरितांवरा॥११॥अहंहिनियमाद्रामहित्वातांसमुपाग
तःसिद्धाश्रममनुप्राप्यसिद्धोस्मितवतेजसा॥१२॥एषाराममोत्पत्तिःस्वस्यवंशस्यकीर्तिता॥देशस्य
हिमहाबाहोयन्मांत्वंपरिपृच्छसि॥१३॥गतोर्द्धरात्रःकाकुत्स्थकथाःकथयतोमम॥निद्रामभ्येहिभ
द्रंतेमाभूद्विघ्नोऽध्वनीहनः॥१४॥

गमनकार्यंचत्वदनुग्रहात्सिद्धमित्याहसिद्धाश्रममिति १२ उपसं
हरति एषेति कुशवंशप्रसूतोस्मीत्यादिनास्वस्योत्पत्तिःब्रह्मयोनिरित्यादिमहाप्रबंधेनस्ववंशोत्पत्तिःएषा
वसुमतीत्यादिनादेशस्योत्पत्तिश्चकीर्त्तितेत्यर्थः १३ विघ्नःगंतव्याध्वनिनिद्राभावप्रयुक्तरुजा मूर्छाः १४

ग्रकुरात्रचिन्त्याव्याहतनिष्पन्दाइति पक्षिचलनाभावादितिभावः १५ शनैर्वियुज्यते वर्त्तमानसमीपेभूतेल
र् अविपुक्तइत्यर्थः संध्याशब्देनतदुपासनयोग्यगौणकालसहितसार्धयामद्वयः नक्षत्रताराग्रहनंन

निष्पंदास्तरवःसर्वेनिलीनामृगपक्षिणः नैशेनतमसाव्याप्तादिशश्चरघुनंदन॥१५॥ शनैर्वियुज्यतेसंध्या
नभोनेत्रैरिवावृतं॥ नक्षत्रताराग्रहनंज्योतिर्भिरवभासते॥१६॥ उत्तिष्ठतेचशीतांशुःशशीलोकतमोनुदः॥ ह्ला
दयन्प्राणिनांलोकेमनांसिप्रभयास्वया॥१७॥ नैशानिसर्वभूतानिप्रचरंतिततस्ततःयक्षराक्षससंघाश्च
रौद्राश्चपिशिताशनाः॥१८॥ एवमुक्त्वामहातेजाविररामममहामुनिःसाधुसाध्वितितेसर्वेमुनयोह्यभ्य
पूजयन्॥१९॥ कुशिकानामयंवंशोमहान्धर्मपरःसदा॥ ब्रह्मोपमामहात्मानःकुशवंश्यानरोत्तमाः॥२०

भः सहस्रास्रवत्नेत्रैरावृतमिवत ज्योतिर्भिस्तद्रश्मिभिरवभासते १६ तिं उत्तिष्ठतेउदेतिउदोनूर्द्ध्वकर्मे
णीतितङ् १७ नैशानिनिशाप्रभवानि तान्येवाहयक्षेत्यादि १८ अभ्यपूजयन् अस्तुवन् १९ स्तुतिप्र
कारमाहकुशिकानामित्यादिकुशिकानांतद्गोत्रजानां ब्रह्मोपमाः ब्रह्मर्षितुल्याः २०

हे महयशो विश्वामित्र भवानेव विशेषण महात्मेति शेषः यत्तपसा ब्राह्मणत्वं प्राप्त इति भावः किंच यस्य त
व भगिनी तव कुलोद्योतकरी कुलप्रकाशकत्री सरितां श्रेष्ठा सरिदुत्तमा २१ प्रशस्तः स्तुतः स नरश्रीमान्

विशेषेण भवानेव विश्वामित्र महायशाः॥ कौशिकी सरितां श्रेष्ठा कुलोद्योतकरी तव॥२१॥ इति तैर्मुनि
शार्दूलैः प्रशस्तः कुशिकात्मजः॥ निद्रामुपागमच्छ्रीमानस्तंगत इवांशुमान्॥२२॥ रामोपि सहसौमि
त्रिः किंचिदागतविस्मयः प्रशस्य मुनिशार्दूलं निद्रां समुपसेवते॥२३॥ इत्यार्षे रामायणे वालकांडे च
तुस्त्रिंशः सर्गः॥३४॥ उपास्य रात्रिशेषं तु शोणाकूले महर्षिभिः॥ निशायां सुप्रभातायां विश्वामित्रोऽभ्यभा
षत॥१॥ सुप्रभाता निशा राम पूर्वा संध्या प्रवर्तते॥ उत्तिष्ठोत्तिष्ठ भद्रं ते गमनायाभिरोचय॥२॥ तच्छ्रु
त्वा वचनं तस्य कृत्वा पूर्वाह्निकीं क्रियां॥ गमनं रोचयामास वाक्यं चेदमुवाच ह॥३॥

प्रशंसाकृतहर्षजनितश्रीमान् २२ किंचिदागतविस्मयः निंद्रायाः स्वस्थाहितिभावः निद्रां समुपसेवते स्म
२३ इति चतुस्त्रिंशः सर्गः ३४ रात्रिशेषं उपास्य निद्रया अतिवाह्य १ गमनाय गमनकर्तुं २ पूर्वाह्ने भवा पू
र्वाह्निकी तां ३

गाधः स्वल्पजलः स्रुतस्थपुलिनमंडितः सैकतालंकृतैः तथा च नावं विना गंतुं शक्यत्वेन कतरेण पथा संतरि-
ष्यामहे ४ उद्दिष्टः गंतव्यत्वेन निश्चितः ५ जान्हवी गंगा ६ सारसो हंसजातिविशेषः ७ वासपरिग्रहं
संमार्जनादिना आवासस्थानं चक्रुरित्यर्थः ८ तत इत्यादि श्लोकद्वयमेकान्वयं यथान्यायं यथाशास्त्रं अग्र

अयं शोणः शुभजलो गाधः पुलिनमंडितः कतरेण पथा ब्रह्मन्संतरिष्यामहे वयं ॥ ४ ॥ एवमुक्तस्तु रामेण
विश्वामित्रोऽब्रवीदिदं ॥ एष पंथा मयोद्दिष्टो येन यांति महर्षयः ॥ ५ ॥ ते गत्वा दूरमध्वानं गतेऽर्द्धदिवसे तदा
जान्हवीं सरितां श्रेष्ठां ददृशुर्मुनिसेवितां ॥ ६ ॥ तां दृष्ट्वा पुण्यसलिलां हंससारससेवितां ॥ बभूवुर्मुनयः
सर्वे मुदिताः सहराघवाः ॥ ७ ॥ तस्यास्तीरे तदा सर्वे चक्रुर्वासपरिग्रहं ॥ ततः स्नात्वा यथान्यायं संतर्प्य पितृ-
देवताः ॥ ८ ॥ हुत्वा चैवाग्निहोत्राणि प्राश्य चामृतवद्धविः ॥ विविशुर्जान्हवीतीरे शुभा मुदितमानसाः ॥ ९ ॥

घमर्षणस्नानादिजपपूर्वकमित्यर्थः पितृदेवता इति स्त्रीणामुपलक्षणं अग्निहोत्राणि अग्नौ होत-
व्यानि पंचमहायज्ञान् पाठो होमोऽतिथीनां च सपर्या तर्पणं बलिः एते पंचमहायज्ञा ब्रह्मयज्ञादिनाम-
का इत्युक्तरीत्या कृत्वा अमृतवद्धविर्यज्ञशिष्टमन्नं प्राश्येत्यर्थः ९

॥११८॥ विष्ठिताःपिरोषरणस्थिताः यथार्हतः यथास्थानमर्हतस्तथास्थिता इत्यर्थः १० अथ यावत्स्थित्यनंतरं रामो विश्वा
मित्रमब्रवीत् ११ गंगाश्रोतुं गंगाविषयं किंचिच्छ्रोतुमित्यर्थः श्रोतव्यं विषयमाह त्रैलोक्यमिति १२ यद्धिंत्रैलो

विश्वामित्रेमहात्मानेपरिवार्यसमंततः॥विष्ठिताश्चयथान्यायंराघवौचयथार्हतः॥१०॥संप्रहृष्टमना
रामोविश्वामित्रमथाब्रवीत्॥११॥भगवन्श्रोतुमिच्छामिगंगांत्रिपथगांनदीं॥त्रैलोक्यंकथमाक्र
म्यगतानदनदीपतिं॥१२॥चोदितोरामवाक्येनविश्वामित्रोमहामुनिः॥वृद्धिंजन्मचगंगायावक्तुमेवो
पचक्रमे॥१३॥शैलेंद्रोहिमवान्नामधातूनामाकरोमहान्॥तस्यकन्याद्वयंजातंरूपेणाप्रतिमंभुवि
॥१४॥यामेरुदुहितारामतयोर्मातासुमध्यमा॥नाम्नामेनामनोज्ञावैपत्नीहिमवतःप्रिया॥१५॥
तस्यांगंगासमभवज्ज्येष्ठाहिमवतःसुता॥उमानामद्वितीयाभूत्कन्यातस्यैवराघव॥१६॥

कन्याद्विरूपं १३ धातूनांस्वर्णादीनां १४ यामेरुदुहितामेनानामसातयोः कन्ययोर्मातेत्यन्वयः १५ कन्याद
यस्यनाम दर्शयति तस्यामिति तस्यांमेनायांतस्यैवहिमवतराव १६ श्रीसीताराम ॥११८॥

देवकार्यंभववीर्यधारणं त्रिपथगांस्वर्गभूपातालमार्गगां इदंस्वर्त्तमानापदेशेन वरणांचतस्याःशिवभार्यात्वाय १६ ध
र्मेणकन्यादानधर्मेणास्वच्छंदःस्वच्छातत्पथप्रवर्त्याःस्वच्छंदस्यपयःतंगच्छतीतितथा १८ त्रिलोकहितकारिणोदेवाः

अथज्येष्ठांसुराःसर्वेदेवकार्यचिकीर्षया ॥ शैलेंद्रंवरयामासुर्गंगांत्रिपथगांनदीं ॥ १७ ॥ ददौधर्मेणहिमवांस्त
नयांलोकपावनीं ॥ स्वच्छंदपथगांगंगांत्रैलोक्यहितकाम्यया ॥ १८ ॥ प्रतिगृह्यत्रिलोकार्थेत्रिलोकहि
तकारिणः ॥ गंगामादायतेगच्छन्कृतार्थेनांतरात्मना ॥ १९ ॥ याचान्याशैलदुहिताकन्यासीद्रघुनंदन
उग्रंसाव्रतमास्थायतपस्तेपेतपोधना ॥ २० ॥ उग्रेणतपसायुक्तांददौशैलवरःसुतां ॥ रुद्रायाप्रतिरूपायउ
मांलोकनमस्कृतां ॥ २१ ॥

त्रिलोकार्थेगारकतोभीतत्रिलोकरक्षकपुत्रोत्पत्त्यर्थंगंगामादायकृतार्थेनमनसाभि
लषितदेशमगच्छन् १९ गंगावृत्तांतप्रसंगेनतदनुजायावृत्तांतमप्याहयाचेतिकन्याअलब्धभर्तृकाउग्रंव्रतंप
रीभोजनस्यापित्यागसंकल्परूपंतपःशिवध्यानरूपं २० अप्रतिरूपायअननुकूलायरुद्रायेतिपश्यंतीमुमांप्रसन्नायदत्तवा
नित्यर्थः २१

॥११८॥

उपसंहरतिरातेइति २२ यथात्रिपथगात्रिपथगामिनीगंगातयाश्रूयतामितिशेषः हेतातशैलेंद्रस्यसुताप्रथमंखंगतिं
प्राकाशमार्गंगतायस्मात्सुरलोकब्रह्मलोकंसमारूढाअभवत्तदाब्रह्मनियोगेनजलवाहिनीतत्स्वभावाविपापासकल
पापहंत्रीरम्यासुरनदीजातेतिशेषः २४ इतिपंचत्रिंशःसर्गः ३५ भगवान्श्रोतुमिच्छामीगंगांत्रिपथगांनदीमिति

एतेनेशैलराजस्यसुतेलोकनमस्कृते॥गंगाचसरितांश्रेष्ठाउमादेवीचराघव॥२२॥एतेतेसर्वमाख्यातं
यथात्रिपथगामिनी॥खंगताप्रथमंतातगतिंगतिमतांवर॥२३॥सैषासुरनदीरम्याशैलेंद्रस्यसु
तातदा॥सुरलोकंसमारूढाविपापाजलवाहिनी॥२४॥इत्यार्षेरामायणेवालकांडेपंचत्रिंशःसर्गः
३५॥उक्तवाक्येमुनौतस्मिन्नुभौराघवलक्ष्मणौ॥प्रतिनंद्यकथांवीरावूचतुर्मुनिपुंगवं॥१॥

गंगायात्रिपथगात्वप्रकारेपृष्टे अंतरिक्षस्वर्गगमनयोरुक्तत्वात्तत्रीयपथगमनंकथमित्याशयेनपुनःपृच्छ
तउक्तवाक्यइत्यादि मुनौउक्तवाक्येउक्तोत्तरेसतिउभौवीरौकथांपूर्वोक्तांप्रतिनंद्यमुनिपुंगवमूचतुः अत्रोभा
वित्युक्तेः पूर्वसर्गेरामपदंलक्ष्मणस्याप्युपलक्षणतांवेदितव्यं १

॥११८॥

धर्मयुक्तमित्येतत्त्रयमेकंवाक्यं हेब्रह्मन्धर्मयुक्तं धर्मफलश्रवणादि इदं शैलराजस्यज्येष्ठायादुहितुः एतंत्वयाकथितंत
स्यदिव्यमानुषसंभवंदिव्यलोकेमानुषलोकेचसंभवंविस्तरंवक्तुमर्हसि २ त्रीन्पथः भूर्भुवःस्वर्मार्गान्केनहेतुनाप्लाव
येत्गप्लावयदित्येकोविस्तरः २ द्वितीयमाहकथमितित्रिपथगेतिप्रसिद्धिः किंनिबंधनेतिद्वितीयः कैः कर्मभिश्च

धर्मयुक्तमिदंब्रह्मन्कथितंपरमंत्वया ॥ दुहितुःशैलराजस्यज्येष्ठायावक्तुमर्हसि ॥१॥ विस्तरंविस्तरज्ञो
सिदिव्यमानुषसंभवं ॥ त्रीन्पथोहेतुनाकेनप्लावयेल्लोकपावनी ॥३॥ कथंगंगात्रिपथगाविश्रुतास
रिदुत्तमा ॥ त्रिषुलोकेषुधर्मज्ञकर्मभिःकैःसमन्विता ॥४॥ तथाब्रुवतिकाकुत्स्थेविश्वामित्रस्तपोध
नः ॥ निखिलेनकथांसर्वामृषिमध्येन्यवेदयत् ॥५॥ पुरारामकृतोद्वाहःशितिकंठोमहातपाः ॥ दृष्ट्वाच
स्पृहयादेवींमैथुनायोपचक्रमे ॥६॥

रितैः समन्वितेतित्तृतीयः ४ निखिलेनकार्त्स्न्येनविस्तरेणेतियावत् ५ सर्वांदिव्यसंभवांमानुषसंभवांचक
थांनिखिलेनवक्तुंगांगेयसंभवमाहपुरेतिकृतोद्वाहः कृतविवाहः ६

गतंक्रीडपेशषः ८ पितामहपुरोगमादेवाः यद्भूतमिहोत्पद्यतउत्पत्स्यतेतत्कः प्रतिसहिष्यतेइतिविचार्यतन्नि
वर्त्तनायसमुद्विग्ना इत्यर्थः ९ मध्यभिगम्येति महादेवमितिशेषः परिणिपातेनपादमूलपतनेन १० प्रसादविषय

तस्यसंक्रीडमानस्यमहादेवस्यधीमतः॥शितिकंठस्यदेवस्यदिव्यंवर्षशतंगतं॥७॥एवंमन्मथयुद्धे
नुतनयोनासीत्यराजपः॥नचापितनयोरामतस्यामासीत्परंतप॥८॥ततोदेवाःसमुद्विग्नाःपितामहपु
रोगमाः॥यदिहोत्पद्यतेभूतंकस्तत्प्रतिसहिष्यते॥९॥अभिगम्यसुराःसर्वेप्रणिपत्येदमब्रुवन्॥देवदे
वमहादेवलोकस्यास्यहितेरत॥सुराणांप्रणिपातेनप्रसादंकर्तुमर्हसि॥१०॥नलोकाधारयिष्यं
तितवतेजःसुरोत्तम॥ब्राह्मेणतपसायुक्तोदेव्यासहतपश्चर॥११॥

माहनलोकाइति सुरादीलोकास्तत्स्यप्राणाश्चेत्यर्थः तेजस्तेजः समुद्भूतंपुत्रंनधारयिष्यंतिनसहिष्यंति ब्र
तोब्राह्मेणवेदावतेगतेनतपसायोगयुक्तः सन्तरंगतपादेव्यासहतपश्चर नतत्तेजःपार्वत्यांमोक्तुमर्हसीतिभावः ११

त्रैलोक्यहितमेवकामः काम्यमानः पुरुषार्थस्तदर्थंतेजोरेतः तेजजसितेजोमयंनिजशरीरेधारयनमुं९चेत्यर्थः ननुरु
द्रराख्यतेजोधारलोकयंलोकरक्षेतिचेत् अत्र पदेतत्पुरुषेरेतोभवतिआदित्यस्यतद्रूपमितिश्रुतेस्तद्रेतोरूपंतेज
तावऽआदित्यमंडलंतद्धृतोसकलंजगद्रक्षितंभवतितद्विनाशेहिसर्वलोकविनाशप्रसंगस्तदहनात्लोकमिति

त्रैलोक्यहितकामार्थंतेजस्तेजसिधारय॥रक्षसर्वानिमान्लोकान्नालोकंकर्तुमर्हसि॥१२॥देवना
नांवचःश्रुत्वासर्वलोकमहेश्वरः॥बाढमित्यब्रवीत्सर्वान्पुनश्चेदमुवाचह॥१३॥धारयिष्याम्यहंते
जस्तेजस्येवसहोमया॥त्रिदशाःपृथिवीचैवनिर्वाणमधिगच्छतु॥१४॥

१२ १३ बाढमित्यंगीकृत्यतांशमाह धारयिष्यामिति सहोमयाऽमापिस्वरजोरूपंतेजोग्निंस्वत्स्वरूपेणतेजसाधा
रयिष्यामीतिमो त्रिदशा अनेनतेजोधारणेनपृथिवीचकारात्सर्वलोकोनिर्वाणंसुखंप्राप्नोतु अन्यथातेऽस्मत्ते
जोजन्यस्पर्द्धोपर्यत्वेनपृथिव्यादेःपीडास्यादितिभावः १४

॥१२१॥ यदिदमिति स्थानान्रुद्रहृत्पुंडरीकलक्षणात्क्षुभितं दिव्यवर्षशतभोगवशात्स्खलितं प्रवृत्तमं देवकार्याहमुत्तम
मर्थत्वेनसर्वोत्तमं ममतत्स्थार्यंन पावकमामकभोनहं को धारयिष्यति १५ उत्तरमाहुः एवमिति धरा धारयिष्यति
तस्याग्रशेषः धारणाशक्तिमत्त्वादितिभावः १६ सुरपतिः रुद्रः प्रमुमोचतेजइतिशेषः १७ पुनःशब्दोवाक्यालं

यदिदं क्षुभितं स्थानान्ममतेजोह्यनुत्तमं॥ धारयिष्यति कस्तन्मे ब्रुवंतु सुरसत्तमाः॥१५॥ एवमुक्तास्ततो
देवाः प्रत्यूचुर्वृषभध्वजं॥ यत्तेजः क्षुभितं ह्यद्य तद्धरा धारयिष्यति॥१६॥ एवमुक्तः सुरपतिः प्रमुमोच
महीतले तेजसा पृथिवी येन व्याप्ता सगिरिकानना॥१७॥ ततो देवाः पुनरिदमूचुश्चापि हुताशनं॥
आविश त्वं महातेजो रौद्रं वायुसमन्वितः॥१८॥ तदग्निना पुनर्व्याप्तं संजातं श्वेतपर्वतं दिव्यं शरवणं
चैव पावकादित्यसंनिभं॥ यत्र जातो महातेजाः कार्त्तिकेयोऽग्निसंभवः॥१९॥

कारे वायुसमन्वितइत्यनेनचालनलक्षणउपायउक्तः १८ तदग्निनेति उक्ताग्निना चालन वेकप्रवेशात्त
तेजोवह्न्यसन्नकेवलश्वेतपर्वतरूपंजातं तद्रूपं तेजःप्रवेशप्रदेशे तन्महिम्ना दिव्यं पावकादित्यसन्निभं शरव ॥१२१॥
णंचअभूत् यत्रेति किंचित्कालंधृतत्वात्कार्त्तिकेपत्यवदेवऽग्निसंभवत्वंबोध्यं १९

सुप्रीतमनसः लोकानुग्रहाय मूलतेजसा धृतत्वात् देवकार्याय स्कन्नतेजस अश्वरक्तत्वात् संतोषः क्रियमाणामपि पूजांऽमा देवीनां नांगीकरोतीति स्मि प्रस्तुतक्रुद्धेवाभूदित्याह अथेति किमब्रवीदित्याह अप्रशस्यदिति शापरूपं वचोऽब्र

अथोमां च शिवं चैव देवाः सर्षिगणास्तथा ॥ पूजयामासुरत्यर्थं सुप्रीतमनसस्तदा ॥२०॥ अथ शैलसुता राम त्रिदशानिदमब्रवीत् ॥ समन्युरशपत्सर्वान् क्रोधसंरक्तलोचना ॥२१॥ यस्मान्निवारिता चाहं संगता पुत्रकाम्यया ॥ अपत्यं स्वेषु दारेषु ~~दारेषु~~ नोत्पादयितुमर्हथ ॥२२॥ अद्यप्रभृति युष्माकमप्रजाः संतु पत्नय ॥ पत्न्यो न जनयिष्यन्ति ह्यद्यप्रभृति चात्मजान् ॥२३॥ एवमुक्त्वा सुरान्सर्वान् शशाप पृथिवीमपि ॥ अवने नैकरूपा त्वं बहुभार्या भविष्यसि ॥२४॥

वीदित्यर्थः २१ मन्युकारणमाह यस्मादिति यस्मादहं निवारिता तस्मात् यूयमपि स्वेषु दारेषु अपत्यं पुत्रं नोत्पादयिष्यथ २२ उक्तमेव तेषां पुनरुच्यते अद्येति यत्नपहत्याह बहु अवने पृथिवि त्वं नैकरूपा उर्वरान्यादिरूपेण नाना रूपा बहुभार्या अनेकभूपतिभोग्या भविष्यसि २४

हेसुदुर्मेधेममपुत्रमनिच्छतीमक्रोधकलुषीकृतात्वंपुत्रकृतांप्रीतिंनैवप्राप्स्यसिमत्पुत्रोममैवस्यादित्याशयः २५
सुरपतिःश्रीरुद्रःदेवान्लज्जितान्दृष्ट्वाप्रियाशापस्यदुष्परिहरत्वाद्वरुणपालितांदिशंहिमवतःप्रतीचींप्रति
गमनायोपचक्रामपारस्यासंकृतवान २६ तस्यगिरेःहिमालयस्योत्तरेपार्श्वेहिमवत्प्रभावाख्येशृंगे २६

नचपुत्रकृतांप्रीतिंमक्रोधकलुषीकृता।प्राप्स्यसित्वंसुदुर्मेधेममपुत्रमनिच्छती॥२५॥तानसर्वान्व्रीडि
तानदृष्ट्वासुरान्सुरपतिस्तदा॥गमनायोपचक्रामदिशंवरुणपालितां॥२६॥सगत्वातपआतिष्ठत्पार्श्वेत
स्योत्तरेगिरेः॥हिमवत्प्रभवेशृंगेसहदेव्यामहेश्वरः॥२७॥एषतेविस्तरोरामशैलपुत्र्यानिवेदितः।गंगायाः
प्रभवंचैवशृणुमेसहलक्ष्मणः॥२८॥इत्यार्षेरामायणेबालकांडेषड्विंशःसर्गः॥३६॥

उपसंहरतिएषइति प्रभवंखांहसोद्भवः एषतेजोधारणात्पूर्वंप्रभावमित्यर्थः २८ इतिषट्त्रिंशःसर्गः ३६

अथप्रतिज्ञातंस्कंदोत्पादकत्वरूपंदिव्यसंभवमाह तप्यमानइत्यादिना देवेशिवेतप्यमानेसतितदाअग्निनापुरो
गमेनसहिताःसेंद्रादेवाइत्यर्थः १ सुराःसर्वेप्रणिपत्यसुराःसर्वेऽब्रुवन्नितिक्रियाभेदान्नपुनरुक्तिदोषः २

तप्यमानेतदादेवेसेंद्राःसाग्निपुरोगमाः॥सेनापतिमभीप्संतःपितामहमुपागमन्॥१॥ततोब्रुवन्सुराःस
र्वेभगवंतंपितामहं॥प्रणिपत्यसुराःसर्वेसेंद्राःसर्षिगणास्ततः॥२॥योनःसेनापतिर्देवदत्तोभगवता
पुरा॥सनज्ञातोद्यभगवन्नस्मद्वैरिनिवर्हणः॥३॥तत्पिताभगवान्शर्वोहिमवच्छिखरालयः॥सत
पःपरमास्थायतप्यतेस्मसहोमया॥४॥प्रदत्तानंतरंकार्यंलोकानांहितकाम्यया॥संविधत्स्वविधा
नज्ञत्वंहिनःपरमागतिः॥५॥

भगवताभवतायःसेनापतिरस्मभ्यमादिकालेदत्तःसोद्यनजातः ३ सइदानीमुमयासहतप्यतेस्मेतिवृद्धो ४ अनं
तरंबीजदानुरूपरमानंतरंअत्रसेनापतिविषयेयत्कार्यंविधेयंतत्संविधत्स्वआलोचय ५ श्रीसियजीवन

॥१२३॥ सांत्वयन्इष्टकार्यालाभखिन्नानितिशेषः ६ शैलपुत्र्यापार्वत्यायदुक्तंपत्निषुनप्रजास्यथेतितस्यावचनम
क्लिष्टंअमोघं ७ तर्हिकागतिस्तत्राहइयमिति यस्यांहुताशनःपुत्रंजनयिष्यतिसेयंआकाशगंगाऽस्तीति

देवतानांवचःश्रुत्वासर्वलोकपितामहः॥सांत्वयन्मधुरैर्वाक्यैस्त्रिदशानिदमब्रवीत्॥६॥शैलपुत्र्यायदु
क्तंतन्नप्रजास्यथपत्निषु॥तस्यावचनमक्लिष्टंसत्यमेवनसंशयः॥७॥इयमाकाशगागंगायस्यांपु
त्रंहुताशनः॥जनयिष्यतिदेवानांसेनापतिमरिंदमं॥८॥ज्येष्ठाशैलेंद्रदुहितामानयिष्यतितंसुतं
उमायास्तद्बहुमतंभविष्यतिनसंशयः॥९॥तच्छ्रुत्वावचनंतस्यकृतार्थारघुनंदन॥प्रणिपत्य
सुराःसर्वेपितामहमपूजयन्॥१०॥

शेषः ८ ज्येष्ठागंगातत्कनिष्ठोमापत्यत्वान्मानयिष्यति उमाशिवसंयोगेनच्युतरेतोरजाभ्यामुत्पत्तेस्तत्त्वा
पत्यसंमाननंउमायाबहुमतंभविष्यतीत्यर्थः ९ कृतार्थाःकृतार्थप्रायाः १० श्रीसियवल्लभोजयति ० ॥१२३॥

अथप्रतिज्ञातंस्कंदोत्पादकत्वरूपंदिव्यसंभवमाह तप्यमानइत्यादिना देवेशिवेतप्यमानेसतितदाऽग्निनापुरो
गमेनसहिताःसेंद्रादेवाइत्यर्थः १ सुराःसर्वेप्रणिपत्यसुराःसर्वेऽब्रुवन्नितिक्रियाभेदान्नपुनरुक्तिदोषः २

तप्यमानेतदादेवेसेंद्राःसाग्निपुरोगमाः॥सेनापतिमभीप्संतःपितामहमुपागमन्॥१॥ततोऽब्रुवन्सुराःस
र्वेभगवंतंपितामहं॥प्रणिपत्यसुराःसर्वेसेंद्राःसर्षिगणास्तदा॥२॥योनःसेनापतिर्देवदत्तोभगवता
पुरा॥सनजातोह्यभगवन्नस्मद्वैरिनिर्वहणः॥३॥तत्पिताभगवान्शर्वोहिमवच्छिखरालयः॥सत
पःपरमास्थायतप्यतेस्मसहोमया॥४॥यदत्रानंतरंकार्यंलोकानांहितकाम्यया॥संविधत्स्वविधा
नज्ञत्वंहिनःपरमागतिः॥५॥

भगवताभवतायःसेनापतिरस्मभ्यमादिकालेदत्तःसोद्यनजातः ३ सइदानीमुमयासहतप्यतेस्मेतिप्रश्नो ४ अनं
तरंबीजदानुरूपरमानंतरंअत्रसेनापतिविषयेयत्कार्यंविधेयंतत्संविधत्स्वआलोचय ५ श्रीसियजीवन

कैलाशपर्वतंगत्वेत्यन्वयः ११ समाधत्स्वसंपादयअस्यविवरणमुत्तरार्द्धं महातेजइतिसंबोधनं १२ देवतानांदे
वताभ्यस्तथाकरोमीतिप्रस्तावइदंगर्भधारणंदेवतानांप्रियमित्यन्वयः १३ दिव्यंरूपंदिव्यस्त्रीवेषंसोग्निस्तस्या

तेगत्वापर्वतंरामकैलासंधातुमंडितं॥ अग्निंनियोजयामासुःपुत्रार्थंसर्वदेवताः॥११॥ देवकार्यमिदंदेव
समाधत्स्वहुताशनः॥ शैलपुत्र्यांमहातेजोगंगायांतेजउत्सृज॥१२॥ देवतानांप्रतिज्ञायगंगामभ्येत्यपाव
कः॥ गर्भंधारयवैदेविदेवतानामिदंप्रियं॥१३॥ इत्येतद्वचनंश्रुत्वादिव्यंरूपमधारयत॥ सतस्यामहिमांद
ृष्ट्वासमंतादवकीर्यत॥१४॥ समंततस्तुतांदेवीमभ्यषिंचतपावकः॥ सर्वस्रोतांसिपूर्णानिगंगायारघु
नंदन॥१५॥

महिमांसौंदर्यातिशयंदृष्ट्वासमंतात्सर्वावयवेभ्योऽवकीर्यतअवाकिरत्‌रूपंव्यत्ययश्चार्षः १४ समंततःसर्वा
वयवेषुयथाव्याप्तंभवतितथाअभ्यषिंचतरसेस्वरेतोतिशेषः स्रोतांसिनाड्यः १५

पुरोगमंपुरोयायिनंतवआग्नेयेनतेजसासंवंधात्समुद्भूतंअत्युग्रंतेजःशैवंपततोनतस्तस्यधारणेऽहमशक्तेत्यन्वयः
संप्रव्यथितचेतनाअस्मीतिशेषः १६ सर्वदेवानांहुतंअश्नातीतिसर्वदेवहुताशनः सन्निवेशयतांस्थाप्यतां
स्रोतोभ्यउत्सृज्यततेजःहिमवत्पार्श्वेउत्ससर्जेत्यन्वयः १८ यत्तस्मात्अस्याःगंगायाःसकाशान्निर्गतंत

तमुवाचततोगंगासर्वदेवपुरोगमं॥अशक्ताधारणेदेवतेजस्तवसमुद्धतं॥दह्यमानाग्निनातेनसंप्रव्य
थितचेतना॥१६॥अथाब्रवीदिदंगंगांसर्वदेवहुताशनःइहहैमवतेपार्श्वेगर्भोयंसन्निवेश्यतां॥१७॥
श्रुत्वात्वग्निवचोगंगातंगर्भमतिभास्वरं॥उत्ससर्जमहातेजःस्रोतोभ्योहितदानघ॥१८॥यदस्या
निर्गतंतस्मात्तप्तजांबूनदप्रभं॥कांचनंधरणींप्राप्तंहिरण्यममलप्रभं॥१९॥

तस्मात्गंगागर्भतोनिर्गमात्तत्तेजःजाबूनदाकारसुमेरुकन्यापत्यत्वाद्गंगायाः तप्तजांबूनदंसुवर्णंतेन
समप्रभंआसीदितिशेषः अतएवधरणींप्राप्तंसाक्षात्संबंध्यधरणीस्वंवकांचनमकरोत् तत्समीपवर्ति
भूसंस्थंअतुलप्रभंहिरण्यंरजतंअकरोत् १९

तत्तेजः संवर्धितं तैक्ष्ण्यात्स्वतएवहितभूस्थंवस्तुजातंताम्रंकार्ष्णायसंलोहंअभिजायत अत्रअडभावआर्षः ततस्य
गर्भस्यमलंत्रपुसीसंचअभवत् अयंभावः तैक्ष्ण्यमलंगंधयुक्तेनशुद्धेनस्वर्णेनोविद्धंस्वर्णंगंधयुक्तेनवि
द्धंरजतंतैक्ष्ण्ययुक्तेनविद्धंताम्रंलोहंचमलयुक्तेनविद्धंत्रपुसीसंचेति नानाधातुः तद्रूपम् २० २१ ततस्य

ताम्रंकार्ष्णायसंचैवतैक्ष्ण्यादेवाभिजायत ॥ मलंतस्याभवत्तत्रपुसीसकमेवच ॥ २० ॥ तदेवधरणीं
प्राप्यनानाधातुरवर्धत ॥ २० ॥ निक्षिप्तमात्रेगर्भेतुतेजोभिरभिरंजितं ॥ सर्वंपर्वतसन्नद्धंसौवर्णमभव
द्वनं ॥ २२ ॥ जातरूपमितिख्यातंतदाप्रभृतिराघव ॥ सुवर्णंपुरुषव्याघ्रहुताशनसमप्रभं ॥ २३ ॥ तंकुमा
रंततोजातंसेंद्राःसहमरुद्गणाः ॥ क्षीरसंभावनार्थायकृत्तिकाःसमयोजयन् ॥ २४ ॥

त्र

तेदेशंतुततो
वेलासंप्राप्ये
नमभाषत
जातस्यरूप
यत्तस्माज्जा
तरूपंभविष्य
ति २३

॥ शेवेधित्वमेवतस्यअपितुरूपवेधित्वमपीत्याह निक्षिप्तेत्यादि गर्भेगंगयानिक्षिप्तमात्रेतस्यतेजोभिरभिरं
जितंव्याप्तंपर्वतसन्नद्धंपूर्वोक्तश्वेतपर्वतसहितंसर्वंतद्वनंशरवणंसौवर्णंस्वर्णमयमभवत् २२ जातरूपेरूपेण
जातमित्यर्थः २३ एवंगंगयोत्सृष्टस्यगर्भस्यपोषणप्रकारमाहतमिति ततोगंगोत्सर्जनानंतरंजातंतंकु
मारंसेंद्रामरुद्गणाःसहयुगपत्क्षीरेणसंवर्द्धनप्रयोजनायकृत्तिकासमयोजयन्प्रेरयन्नित्यर्थः २४

ताश्चकृत्तिकाः अयमस्माकंसर्वासांपुत्रोभवत्वितिउ=त्तमंसंकेनेकृत्वाकृतनिश्चयाःसद्योजातमात्रस्यक्षीरं
ददुःदातुमुत्सुकाः २५ ततःसमयकरणात्तंकार्त्तिकेयइतिवुष्माकमयंपुत्रस्त्रैलोक्यविख्यातोभविष्यतीतिचाब्रु
वन्नित्यन्वयः २६ तेषांदेवानांतत्स्वेच्छानुकूलंवचनंश्रुत्वास्कन्नंगौरीश्वरयोःसकाशात्पतितंपश्चाद्गंगाया
गर्भात्परिस्रवेसतिपरयालक्ष्म्यादीप्यमानंअनलमिवस्थितंशैत्यसिद्ध्यैताःस्नापयन्अस्नापयन्नित्यर्थः २७

ताःक्षीरंजातमात्रस्यकृत्वासमयमुत्तमं॥ददुःपुत्रोयमस्माकंसर्वासामितिनिश्चिताः॥२५॥ततस्तुदे
वताःसर्वाःकार्त्तिकेयइतिब्रुवन्॥पुत्रस्त्रैलोक्यविख्यातोभविष्यतिनसंशयः॥२६॥तेषांतद्वचनं
श्रुत्वास्कन्नंगर्भपरिस्रवे॥स्नापयन्परयालक्ष्म्यादीप्यमानंयथानलं॥२७॥स्कंदइत्यब्रुवन्देवाः
स्कन्नंगर्भपरिस्रवे॥कार्त्तिकेयंमहाबाहुंकाकुत्स्थज्वलनोपमं॥२८॥प्रादुर्भूतंततःक्षीरंकृत्तिकाना
मनुत्तमं॥२९॥

पूर्वंकार्त्तिकेयत्वेनोक्तंस्कन्नपरिस्रुतत्वहेतोःस्कंदइत्यन्वर्थनाम्नाअब्रुवन्पृषोदरादित्वा
त्साधुः २८ प्रादुर्भूतमित्यर्द्धमेकंवाक्यंअन्यथाउत्तरार्द्धस्यपयःशब्देनपुनरुक्तिःस्यात् २९ श्रीशिववल्लभ

तच्चुस्तनजं पयः षडाननो भूत्वा जग्राह स्वंयावदपेक्षितं क्षीरं गृहीत्वा एकान्ता एकदिनेनैव सुकुमारवपुरपि स्वतेजसैव दैत्यसैन्यगणान्जयत् ३० ततः सकलासुरजयाद्भुतो सर्वैर्देवाः समेत्य सुरसेनागणपतित्वेन तमभ्यषिंचन् ३१

षण्मां षडाननो भूत्वा जग्राह स्तनजं पयः ॥ गृहीत्वा क्षीरमेकाह्ना सुकुमारवपुस्तदा ॥ अजयत्स्वेन वीर्येण दैत्यसैन्यगणान्विभुः ॥ ३० ॥ सुरसेनागणपतिं ततस्तममलद्युतिं ॥ अभ्यषिंचन्सुरगणाः समेत्याग्निपुरोगमाः ॥ ३१ ॥ एष ते राम गंगायाः विस्तरोभिहितो मया ॥ कुमारसंभवश्चैव धन्यः पुण्यस्तथैव च ॥ ३२ ॥ भक्तश्च यः कार्तिकेये काकुत्स्थ भुवि मानवः ॥ आयुष्मान्पुत्रपौत्रैश्च स्कंदसालोक्यतां व्रजेत् ॥ ३३ ॥

इत्यार्षे रामायणे बालकांडे सप्तत्रिंशः सर्गः ॥ ३७ ॥

उपसंहरति एष इति ३२ धन्यत्वपुण्यत्वे विवृणोति भक्तश्चेति ऐहलौकिकफलेन धन्यत्वमामुष्मिकेन पुण्यत्वं पुत्रपौत्रैश्चेत्यस्य युक्तः सन्देहत्यागे इति शेषः सलोक एव सालोक्यं तस्य भावः सालोक्यता तां स्कंदसमानलोकतामित्यर्थः ३३ इति सप्तत्रिंशः सर्गः ३७

॥१२६॥

एवंदिव्यसंभवंसविस्तरंप्रतिपाद्यत्रीन्ययोहेतुनाकेनेत्यादिमानुषलोकसंभवविस्तरप्रश्नस्योत्तरंवक्तुमाहतांकथा
मितिग्रप्रपरंवाक्यंवक्ष्यमाणंप्रश्नोत्तरं १ यस्मादप्रजः तस्मात्प्रजाकामोऽभूदित्यन्वयः २ याविदर्भदुहितासा

तांकथांकौशिकोरामेनिवेद्यमधुराक्षरं॥पुनरेवापरंवाक्यंकाकुत्स्थमिदमब्रवीत्॥१॥अयोध्याधि
पतिर्वीरपूर्वमासीन्नराधिपः सगरोनामधर्मात्माप्रजाकामःसचाप्रजः॥२॥विदर्भदुहितारामकेशि
नीनामनामतः ज्येष्ठासगरपत्नीसाधर्मिष्ठासत्यवादिनी॥३॥अरिष्टनेमिदुहितारूपेणाप्रतिमा
भुवि॥द्वितीयासगरस्यासीत्पत्नीसुमतिसंज्ञिता॥४॥ताभ्यांसहमहाराजःपत्नीभ्यांतप्तवांस्तपःहिम
वंतंसमासाद्यभृगुप्रस्रवणेगिरौ॥५॥अथवर्षशतेपूर्णेतपसाराधितोमुनिः॥सगरायवरंप्रादाद्भृ
गुःसत्यवतांवरः॥६॥

ज्येष्ठापत्नीआसीत् ३ अरिष्टनेमिःकश्यपः ४ भृगुप्रस्रवणेभृग्वधिष्ठितंप्रस्रवणंप्रवाहोयस्मिन्नत्रगिरौं हिमवतःपादे ५ ६

॥१२६॥

७ ततोत्सुयत्नाले जनयिताजनयिष्यति षष्टिमितिनित्यैकवचनांतत्वात्सहस्राणीत्यनेनसामानाधिकरण्यं च
तस्माविति क्षत्रिन्यायात्सुमतेःकश्यपपुत्रीत्वात् ९ इछ्यवहेइछ्यावः १० अत्रपुत्र विषयेत्वच्छंदःस्वेच्छा

अपत्यलाभःसुमहान्भविष्यतितवानघ ॥ कीर्तिंचाप्रतिमांलोकेप्राप्स्यसेपुरुषर्षभ ॥ ७ ॥ एकाजनयिता
तातपुत्रंवंशकरंतव ॥ षष्टिंपुत्रसहस्राणिअपराजनयिष्यति ॥ ८ ॥ भाषमाणंनरव्याघ्रंराजपुत्र्यौ
प्रसाद्यतं ॥ ऊचतुःपरमप्रीतेकृतांजलिपुटेतदा ॥ ९ ॥ एकःकस्याःसुतोब्रह्मन्काबहून्जनयिष्यति
श्रोतुमिच्छावहेब्रह्मन्सत्यमस्तुवचस्तव ॥ १० ॥ तयोस्तद्वचनंश्रुत्वाभृगुःपरमधार्मिकः ॥ उवाचप
रमांवाणींस्वच्छंदोत्रविधीयतां ॥ ११ ॥ एकोवंशकरोवास्तुबहवोवामहाबलाः ॥ कीर्तिमंतोमहोत्सा
हाःकावाकंवरमिच्छति ॥ १२ ॥

विधीयतांप्राप्यतांस्वेच्छयैवएकपुत्रतावाव्रियतामितितात्पर्यं ११ तदेवाहएकइतिवंशकरःवंशवृद्धिहेतुः १२

जग्राहवरयामास १३ सुपर्णाभगिनीगरुडभगिनी १४ ऋषिंभृगुं १५ व्यजायतप्रसूतवती १६ गर्भतुंबंतुंबफ

मुनेस्तुवचनंश्रुत्वाकेशिनीरघुनंदन॥पुत्रंवंशकरंरामजग्राहनृपसन्निधौ॥१३॥षष्टिंपुत्रसहस्राणिसुप
र्णाभगिनीतदा॥महोत्साहान्कीर्तिमतोजग्राहसुमतिःसुतान्॥१४॥प्रदक्षिणामृषिंकृत्वाशिरसाभिप्रणा
म्यतं॥जगामस्वपुरंराजासभार्योरघुनंदन॥१५॥अथकालेगतेतस्यज्येष्ठापुत्रंव्यजायत॥असमंज
इतिख्यातंकेशिनीसगरात्मजं॥१६॥सुमतिस्तुनरव्याघ्रगर्भतुंबंव्यजायत॥षष्टिःपुत्रसहस्राणितुं
बभेदाद्विनिःसृताः॥१७॥घृतपूर्णेषुकुंभेषुधात्र्यस्तान्समवर्द्धयन्॥कालेनमहतासर्वेयौवनंप्रति
पेदिरे॥१८॥अथदीर्घेणकालेनरूपयौवनशालिनः॥षष्टिःपुत्रसहस्राणिसगरस्याभवंस्तदा॥१९॥

लाकारगर्भपिंडप्रसूतवती कथंततःपुत्रोदय इत्यतआह षष्टिरित्यादि १७ धात्र्यउपमातरः १८ दीर्घेणकालेनेति
यौवनशालित्वेहेतुत्वात्रितीया १९

ज्येष्ठः असमंजः बालान्गृहीत्वाजलेप्रक्षिप्यमज्जतस्तान्समीक्ष्यप्रहसन्स्थितोभवतीतिशेषः २० सज्जनप्र
तिबाधकः सज्जनपीडकः निर्वासितोनिष्कासितः २१ अंशुमान्नामप्यासीदितिशेषः २२ यजेयमितिनिश्चि

सचज्येष्ठोनरश्रेष्ठसगरस्यात्मसंभवः॥ बालान्गृहीत्वातुजलेसरय्वां रघुनंदन॥ प्रक्षिप्यप्रहसन्नित्यंमज्ज
तस्तान्समीक्ष्यवै॥२०॥ एवंपापसमाचारःसज्जनप्रतिबाधकः॥ पौराणामहितेयुक्तःपित्रानिर्वासितःपुरा
त॥२१॥ तस्यपुत्रोंऽशुमान्नामअसमंजस्यवीर्यवान्॥ संमतःसर्वलोकस्यसर्वस्यापिप्रियंवदः॥२२॥ ततः
कालेनमहतामतिःसमभिजायत॥ सगरस्यनरश्रेष्ठयजेयमितिनिश्चिता॥२३॥ सकृत्वानिश्चयंरा
जासोपाध्यायगणस्तदा॥ यज्ञकर्मणिवेदज्ञोयष्टुंसमुपचक्रमे॥२४॥ इत्यार्षेरामायणेबालकांडेअ
ष्टत्रिंशःसर्गः॥३८॥ विश्वामित्रवचःश्रुत्वाकथांतेरघुनंदनः॥ उवाचपरमप्रीतोमुनिंदीप्तमिवानलं॥१॥

द्वा

तामतिः समभिजायत २३ यज्ञकर्मणिनिश्चयंकृत्वेतिप्राक्तनेनान्वयः २४ इत्यष्टत्रिंशःसर्गः ३८ कथांतेय
ज्ञोपक्रमकथनानंतरं १

इमांपत्तसंबंधिनीकथां पूर्वजोमद्वंसकृत्स्थः समुपाहरत्कृतवान् २ प्रहसन्निवस्वविवक्षितस्यैववक्तव्यत्वा
॥११८॥ त्प्रसन्नवदनइत्यर्थः सगरस्यसगरयज्ञस्येत्यर्थः ३ मध्येमहापर्वतनिरोधाभावाद्विंध्यपर्वतंहिमवानन्त
यार्विंध्योहिमवंतंइत्येवंपरस्परमासाद्यऊच्चत्वेनसाम्यंप्राप्यश्रेष्ठोन्नत्यातिशयेनवीक्षानिरोधकाभावात्परस्प

श्रोतुमिच्छामिभद्रंतेविस्तरेणाकथामिमां॥ पूर्वजोमेकथंब्रह्मन्यज्ञंवैसमुपाहरत्॥१॥ तस्यतद्व
चनंश्रुत्वाकौतूहलसमन्वितः विश्वामित्रस्तुकाकुत्स्थमुवाचप्रहसन्निवंश्रूयतांविस्तरोराम
सगरस्यमहात्मनः॥३॥ शंकरश्वशुरोनाम्नाहिमवानितिविश्रुतः विंध्यपर्वतमासाद्यनिरीक्षे
तेपरस्परं॥४॥ तयोर्मध्येप्रवृत्तोभूद्यज्ञःसपुरुषोत्तम॥ सहिदेशोनरव्याघ्रप्रशस्तोयज्ञकर्मणि
५॥ तस्याश्वचर्यांकाकुत्स्थदृढधन्वामहारथः॥ अंशुमानकरोत्तातसगरस्यमतेस्थितः॥६॥
तस्यपर्वणितंयज्ञंयजमानस्यवासवः॥ राक्षसींतनुमास्थाययज्ञीयाश्वमपाहरत्॥७॥

रंनिरीक्षेतेपश्यतइत्यर्थः ४ अश्वचर्यांरक्षार्थमश्वानुगमनं सगरस्यमतेआज्ञायां ६ पर्वणीडकण्वाहे
अश्वमेधेडकपसंस्थात्रये तत्राद्वितीयअश्वालंभनदिवसेअश्वविशसनात्प्राक्तंयज्ञंविहंतुंराक्षसींतनुं ॥११८॥
यज्ञविघ्नकरणसमर्थांतनुंगृहीत्वायज्ञियाश्वंयत्ताहृमस्व ७

॥ अयं यज्ञियोऽश्वः पर्वणि वेगेन अपनीयते अपह्रियते अतो हन्तारं जहि अपराधश्च शीघ्रमुपनीयतां १० यज्ञच्छिद्रं यज्ञस्य
विघ्नः यथा यज्ञः अच्छिद्रो भवेत् तथा क्रियतां सोपाध्यायवचः उपाध्यायसहितर्त्विग्गणवचः ११ भोपुरुषर्षभाः
पुत्राः मंत्रपूतैर्महाभागैर्यद्यपि महाक्रतुरास्थितः अधिष्ठितः तथापि रक्षसां मायया यच्छिद्रं स्यात्तदाऽऽत्म

ह्रियमाणेऽनुकाकुत्स्थ तस्मिन्यज्ञे महात्मनः ॥ उपाध्यायगणाः सर्वे यजमानमथाब्रुवन् ॥ ९ ॥ अयं पर्व
णि वेगेन यज्ञियाश्वोऽपनीयते ॥ हर्तारं जहि काकुत्स्थ हयश्चैवोपनीयतां ॥ यज्ञच्छिद्रं भवत्येतत्स
र्वेषामशिवाय नः ॥ तत्तथा क्रियतां राजन्यज्ञोऽच्छिद्रः कृतो भवेत् ॥ १० ॥ सोपाध्यायवचः श्रुत्वा तस्मि
न्सदसि पार्थिवः ॥ षष्टिं पुत्रसहस्राणि वाक्यमेतदुवाच ह ॥ ११ ॥ गतिं पुत्रा न पश्यामि रक्षसां पुरुषर्षभाः
मंत्रपूतैर्महाभागैरास्थितोऽपि महाक्रतुः ॥ १२ ॥

नो गतिं स्वयत्नपारगमनं न पश्यामि तस्माद्रुच्छ्य विचिन्वध्वं अन्वेषयतेत्यपेक्षितपूरणेनान्वयः आस्थितो
हीति पाठे हि यस्मात् ईदृशैर्महाभागैरास्थितोऽयं क्रतुरतोऽत्र क्रतौ रक्षसां गतिं न पश्यामि तत्तस्मात्केनापि देवेन

हृत इति तमन्वेषयतेत्यर्थः १२

भोपुत्रकावोभद्रमस्तुयूयंसमुद्रमालिनींसर्वांपृथिवीमनुगच्छथअन्वेषयतयस्यतादेशाभावप्राप्तवात् १३
प्रथमेमयोजनंविचितंपश्चाद्योजनान्तरमिति क्रमेणतांविचिन्वध्वमित्यर्थः १४ यदिभूमौनलभ्यतेततदाहया

तद्गच्छथविचिन्वध्वंपुत्रकाभद्रमस्तुवः॥समुद्रमालिनींसर्वांपृथिवीमनुगच्छथ॥१३॥एकैकं
योजनंपुत्राविस्तारमधिगच्छथ॥१४॥यावत्तुरगसंदर्शस्तावत्खनतमेदिनीं॥तमेवहयहर्तारंमा
र्गमाणाममाज्ञया॥१५॥दीक्षितःपौत्रसहितःसोपाध्यायगणस्त्वहं॥इहस्थास्यामिभद्रंवोयाव
त्तुरगदर्शनं॥१६॥तेसर्वेहृष्टमनसोराजपुत्रामहाबलाः॥जग्मुर्महीतलंरामपितुर्वचनयंत्रिताः
१७॥गत्वातुपृथिवींसर्वामदृष्ट्वातंमहाबलाः॥योजनायामविस्तारमेकैकोधरणीतलं॥बिभिदुः
पुरुषव्याघ्रावज्रस्पर्शसमैर्भुजैः॥१८॥

वद्विति १५ स्वस्यतुरगानुगमनमयुक्तमित्याहदीक्षितइति त
स्यप्रवासनिषेधात्पौत्रस्यबालत्वाच्चेतिभावः १६ यंत्रितानियुक्ताः १७ आयामोदैर्घ्यंविस्तरोविशालतात
द्युक्तंधरणीतलमेकैकोन्वेषयामास बिभिदुरितिपृथिव्यामदृष्ट्वेतिशेषः १८

भिद्यमाना सर्वत इति शेषः १८ २० अनुत्तमं रसातलं पाताले यथा भवति तथा धरणीं योजनानां षष्टिसहस्राणि विभि

शूलैरशनिकल्पैश्च हलैश्चापि सुदारुणैः भिद्यमाना वसुमती ननाद रघुनंदन ॥१९॥ नागानां वध्यमानाना
मसुराणां च राघव । राक्षसानां च दुर्धर्षः सत्वानां निनदोऽभवत् ॥२०॥ योजनानां सहस्राणि षष्टिं तु रघुनंदन
विभिंदुर्धरणीं राम रसातलमनुत्तमं ॥२१॥ एवं पर्वतसंबाधं जंबूद्वीपं नृपात्मजाः । खनंतो नृपशार्दूल
सर्वतः परिचक्रमुः ॥२२॥ ततो देवाः सगंधर्वाः सासुराः सहपन्नगाः । संभ्रांतमनसः सर्वे पितामहमुपागमन्
२३ ते प्रसाद्य महात्मानं विषण्णवदनास्तदा । ऊचुः परमसंत्रस्ताः पितामहमिदं वचः ॥२४॥ भगवन्पृथिवी
सर्वा खन्यते सगरात्मजैः । बहवश्च महात्मानो वध्यंते जलचारिणः ॥२५॥ अयं यज्ञहनोस्माकमनेनाश्वो
पनीयते । इति ते सर्वभूतानि हिंसंति सगरात्मजाः ॥२६॥ इत्यार्षे रामायणे वालकांडे एकोनचत्वारिंशः सर्गः ३९

दुरित्यन्वयः २१ पर्वतसंबाधं पर्वतनिविडं २२ २३ २४ महात्मानः सिद्धगंधर्वादयः २५ यज्ञहन इति हंतीति हनः पचा
द्यच् अपनीयते स्मेति शेषः सर्वभूतानि तत्सुसंगरहितान्यपि २६ इत्येकोनचत्वारिंशः सर्गः ३९ श्रीसियलालनू

॥१२०॥

कृतांतवलमोहितान्कृतः सर्वलोकस्यअंततोनाशोयैस्तादृशानिवलानिसगरसुतवलानितैर्मोहितान्मूर्छितान् १
एषावसुधा २ धारयतियोगवलेनेतिशेषः तस्यकोपाग्निनेति यस्यस्वामित्वंस्वाभाविकंइतरेषांत्वभिमानमा
त्रंअतःसएवास्मत्प्रार्थनामंतरेणापिसागरान्दंडयिष्यतीत्यभिप्रायः ३ पृथिव्यानिर्भेदश्चसनातनःप्रतिकल्प

देवतानांवचःश्रुत्वाभगवान्वैपितामहः॥ प्रत्युवाचसुसंत्रस्तान्कृतांतवलमोहितान्॥१॥ यस्येयंवसुधाकृ
त्स्नावासुदेवस्यधीमतः॥ महिषीमाधवस्यैषासएषभगवान्प्रभुः॥२॥ कापिलंरूपमास्थायधारयत्यनि
शंधरां॥ तस्यकोपाग्निनादग्धाभविष्यंतिनृपात्मजाः॥३॥ पृथिव्याश्चापिनिर्भेदोदृष्टएवसनातनः सगर
स्यचपुत्राणांविनाशोदीर्घजीविनां॥४॥ पितामहवचःश्रुत्वात्रयस्त्रिंशदरिंदमाः देवापरमसंहृष्टाःपुन
र्जग्मुर्यथागतं॥५॥ सगरस्यचपुत्राणांप्रादुरासीन्महास्वनः पृथिव्यांभिद्यमानायांनिर्घातसमनिस्वनः
६॥ ततोभित्वामहींसर्वांकृत्वाचापिप्रदक्षिणां॥ सहिताःसागराःसर्वेपितरंवाक्यमब्रुवन्॥७॥

मवश्यंभावीदृष्टःनिश्चितःअतस्तत्रनशोकःकार्यइतिभावः अदीर्घजीविनांसगरपुत्राणांचविनाशोदृष्टएव४
त्रयस्त्रिंशद्देवाः अष्टौवसवः एकादशरुद्राः द्वादशादित्याः अश्विनौच ५ निर्घातउत्पातविशेषः ६ महींप्रदक्षिणंचकृत्वा ७ ॥१२०॥

रा

सत्ववंतोवलवंतः ८ तेअस्मात्सुभद्रमनुग्रवुद्धिरस्तुवयंकिंकरिष्यामःसलोपश्छांदसः वुद्धिरुपायः ९ सम

परिक्रांतामहीसर्वासत्ववंतश्चसूदिताः॥देवदानवरक्षांसिपिशाचोरगपन्नगाः॥८॥नचपश्यामहेचाश्वमश्वहर्तारमेवच॥किंकरिष्यामभद्रंतेवुद्धिरत्रविचार्यतां॥९॥तेषांतद्वचनंश्रुत्वापुत्राणांराजसत्तमः समन्युरब्रवीद्वाक्यंसगरोरघुनंदन॥१०॥भूयःखनतभद्रंवोनिर्भिद्यवसुधातलं॥अश्वहर्तारमासाद्यकृतार्थाश्चनिवर्तत॥११॥पितुर्वचनमासाद्यसगरस्यमहात्मनः॥षष्टिःपुत्रसहस्राणिरसातलमभिद्रवन्॥१२॥खन्यमानेततस्तस्मिन्ददृशुःपर्वतोपमंदिशागजंविरूपाक्षंधारयंतंमहीतलं॥१३॥सपर्वतवनांकृत्स्नांपृथिवींरघुनंदन॥धारयामासशिरसाविरूपाक्षोमहागजः॥१४॥

न्युः अश्वालाभकृतक्रोधवान् १० भूयोनिर्भिद्यत्वेननेत्यन्वयः निवर्त्ततनिवर्तध्वं ११ अभिद्रवन्अभ्यद्रवन् १२ खन्यमाइतिषष्टियोजनसहस्रात्परमप्रीतिशेषः दिशाहस्त्यावतं १३ कृत्स्नांतद्दिक्प्रदेशावच्छिन्नोभित्तिशेषः १४

यदापर्वणियस्मिन्कालेयस्मिन्क्षणेतिथिभेदेक्षणेपर्वइत्यमरः विश्रामाद्धेतोर्विश्रमार्थंचालयते १५ मानयंतः

यदापर्वणिकाकुत्स्थविश्रामार्थंमहागजः॥खेदाच्चालयतेशीर्षंभूमिकंपस्तदाभवेत्॥१५॥तंतेप्रदक्षि
णांकृत्वादिशापालंमहागजं॥मानयंतोहितेरामजग्मुर्भित्वारसातलं॥१६॥ततःपूर्वांदिशंभित्वाद
क्षिणांबिभिदुःपुनःदक्षिणस्यामपिदिशिददृशुस्तेमहागजं॥१७॥महापद्ममहात्मानंसुमहापर्वतो
पमं॥शिरसाधारयंतंगांविस्मयंजग्मुरुत्तमं॥१८॥ततःप्रदक्षिणांकृत्वासगरस्यमहात्मनः॥षष्टिःपु
त्रसहस्राणिपश्चिमांबिभिदुर्दिशं॥१९॥पश्चिमायामपिदिशिमहांतमचलोपमं॥दिशागजं
सौमनसंददृशुस्तेमहाबलाः॥२०॥तंतेप्रदक्षिणांकृत्वापृष्ट्वाचापिनिरामयं॥खनंतःसमुपाक्रां
तादिशंसोमवतींतदा॥२१॥उत्तरस्यांरघुश्रेष्ठददृशुर्हिमपांडुरं॥भद्रंभद्रेणवपुषाधारयंतंमहीमिमां॥२२

पूजयंतःहिस्त्वर्थे १६ ततइत्यस्यविवरणंपूर्वांदिशंभित्वेति १७ महापद्मंतन्नामानं १८ प्रदक्षिणांकृत्वादिग्ग
जमितिशेषः १९ २० निरामयंकुशलं सोमवतींउदीचीं २१ भद्रंभद्राख्यं २२

समालभ्यस्पृशा २३ प्रागुत्तरांरोशानी प्रथितांसर्वकर्मार्हत्वेनप्रसिद्धा २४ कपिलंकपिलरूपधारिणं २५ २६

समालभ्यततःसर्वेकृत्वाचैनंप्रदक्षिणां ॥ षष्टिःपुत्रसहस्राणिबिभिदुर्वसुधातलं ॥२३॥ ततःप्रागुत्तरां
गत्वासागराःप्रथितांदिशं ॥ रोषादभ्यखनन्सर्वेपृथिवींसगरात्मजाः ॥२४॥ तेतुसर्वेमहात्मानोभीम
वेगाःमहाबलाः ॥ ददृशुःकपिलंतत्रवासुदेवंसनातनं ॥२५॥ हयंचतस्यदेवस्यचरंतमविदूरतःप्रह
र्षमतुलंप्राप्ताःसर्वेतेरघुनंदन ॥२६॥ तेतंयज्ञहनंज्ञात्वाक्रोधपर्याकुलेक्षणाःखनित्रलांगलध
रानानावृक्षशिलाधराः ॥२७॥ अभ्यधावंतसंक्रुद्धास्तिष्ठतिष्ठेतिचाब्रुवन ॥ अस्माकंत्वंहितुरगंय
ज्ञियंहृतवानसि ॥२८॥ दुर्मेधस्त्वंहिसंप्राप्तान्विद्धिनःसगरात्मजान ॥ श्रुत्वातद्वचनंतेषांकपिलोरघु
नंदन ॥२९॥ रोषेणमहताविष्टोहुंकारमकरोत्तदा ॥ ततस्तेनाप्रमेयेनकपिलेनमहात्मना ॥३०॥

नंकपिलंहंतीतिहनःपचाद्यच् अविचारतस्तमेवअश्वापहारद्वारायज्ञहंतारंज्ञात्वेत्यर्थः २७ २८ दुर्मेधं इति
संबोधनं २९ अप्रमेयेनअप्रमेयवैभवेन ३०

३१ इतिचत्वारिशःसर्गः ४० नप्तारंपौत्र १ पूर्वैःपितृभिःगतिंवृतांतंअन्विच्छअन्वेषययेनचअश्वोपवाहिनः

द्वितीपदेवप्राकथासमा
नाः

भस्मराशीकृताःसर्वेकाकुत्स्थसगरात्मजाः॥३१॥इत्यार्षेरामायणेबालकांडेचत्वारिंशःसर्गः॥४०॥पुत्रां
श्चिरगतान्ज्ञात्वासगरोरघुनंदन॥नप्तारमब्रवीद्राजादीप्यमानंस्वतेजसा॥१॥शूरश्चकृतविद्य
श्चपूर्वैस्तुल्योसितेजसा॥पितॄणांगतिमन्विच्छयेनचाश्वोपहारितः॥२॥अंतर्भौमानिसत्वानिवीर्य
वंतिमहांतिच॥तेषांत्वंप्रतिघातार्थंसासिंगृह्णीष्वकार्मुकं॥३॥अभिवाद्याभिवाद्यांस्त्वंहत्वाविघ्न
करानपि॥सिद्धार्थःसन्निवर्तस्वममयज्ञस्यपारगः॥४॥एवमुक्तोंशुमान्सम्यक्सगरेणमहात्म
ना॥धनुरादायखड्गंचजगामलघुविक्रमः॥५॥सखातंपितृभिर्मार्गमंतर्भौमंमहात्मभिः॥प्रापद्य
तनरश्रेष्ठतेनराज्ञाभिचोदितः॥६॥

देशांतरंप्रापितःतद्गतिंचअन्विच्छअन्वेषय २ अंतर्भौमानिभूमेरंतर्जातानिभूमितलाश्रितानीत्यर्थःसत्वानि
प्राणिनः ३ अभिवाद्यान्नमस्कारार्हान् ममयज्ञस्यपारगःपारप्रापकश्चभवेत्यर्थः ४ लघुविक्रमःशीघ्रविक्रमः
पितृभिःखातंभूमेरंतर्विद्यमानंमार्गंपितृवृत्तांतपरिज्ञानायप्रापद्यतप्राप्तः ६

अपश्यत ७ निरामयंकुशलं ८ आसमंजअसमंजपुत्रभावआर्षः ९ समुपचक्रमइतिसधिनयत्वप्रकटनं १०

देवदानवरक्षोभिःपिशाचपतगोरगैः॥पूज्यमानोमहातेजादिशागजमपश्यत॥७॥सतंप्रदक्षिणंकृत्वा
पृष्ट्वाचैवनिरामयं॥पितॄन्सपरिपप्रच्छवाजिहर्त्तारमेवच॥८॥दिशागजस्तुतच्छ्रुत्वाप्रत्युवाचम
हामतिः॥आसमंजकृतार्थस्त्वंसहाश्वःशीघ्रमेष्यसि॥९॥तस्यतद्वचनंश्रुत्वासर्वानेवदिशाग
जान्॥यथाक्रमंयथान्यायंप्रष्टुंसमुपचक्रमे॥१०॥तैश्चसर्वैर्दिशापालैर्वाक्यज्ञैर्वाक्यकोविदैः
पूजितःसहयश्चैवगंतासीत्यभिचोदितः॥११॥तेषांतद्वचनंश्रुत्वाजगामलघुविक्रमः॥भस्मराशीकृता
यत्रपितरस्तस्यसागराः॥१२॥सदुःखवशमापन्नस्त्वसमंजसुतस्तदा॥चुक्रोशपरमार्त्तस्तुवधात्ते
षांसुदुःखितः॥१३॥यज्ञीयंचहयंतत्रचरंतमविदूरतः॥ददर्शपुरुषव्याघ्रोदुःखशोकसमन्वितः १४

वाक्यंवक्तुमर्हंपरवाक्याशयवेत्तैः स्वयंवाक्यप्रयोगकुशलैश्चेत्यर्थः द्वितीयवाक्येभावेकृत्यः सहयःपितामहस
मीपंगंतासीत्यभिचोदितोबोधितोऽभूत् ११ तस्यांशुमतः पितरोयत्रभस्मराशीकृतास्तंदेशंजगाम १२ पूर्व
मदर्शनाद्दुःखंसमापन्नस्तेषांवधाद्धयदर्शनात्सुदुःखितःपरमार्त्तःभृशंतप्तःचुक्रोशक्रोशहरोद १३ शोकोविलापः १४

जलक्रियार्थजलं १५ विस्तार्यसमंतात्प्रसार्यनिपुणांविवेचनसमर्थं पितॄणांमातुलंसुपर्णो भगिनीसुमतिरि
तिप्राग्युक्तेः १६ लोकसंमतःहितःएतन्मूलतयागंगावतारणात् १७ हियस्मात्कपिलेनदग्धाःमहाबलत्वात्

सतेषांराजपुत्राणांकर्तुकामोजलक्रियां॥ सजलार्थीमहातेजानचापश्यज्जलाशयं॥१५॥विस्ता
र्यनिपुणांदृष्टिंततोऽपश्यत्खगाधिपं॥ पितॄणांमातुलंरामसुपर्णमचलोपमं॥१६॥सचैनमब्र
वीद्वाक्यंवैनतेयोमहाबलः॥ माशुचःपुरुषव्याघ्रवधोयंलोकसंमतः॥१७॥कपिलेनाप्रमेयेन
दग्धाहीमेमहाबलाः॥ सलिलंनार्हसेप्राज्ञदातुमेषांहिलौकिकं॥१८॥गंगाहिमवतोज्येष्ठादुहि
तापुरुषर्षभ॥ तस्यांकुरुमहाबाहोपितॄणांसलिलक्रियां॥ १९॥

प्रायश्चित्तमर्यादातिक्रांतपापवंतोऽतोलौकिकंसलिलंदातुंनार्हसि चंडालादुदकात्सर्पाद्विद्युताद्ब्राह्मणादपि
दंष्ट्रिभ्यश्चमरणंपापकर्मणांउदकंपिंडदानंचनतेषांतुविधीयतेइतिस्मृतेःप्रकृतेब्राह्मणाद्वधःमहापापि
त्वंच १८ गंगेतिभ्रत्तीतिशेषः १९

नकेवलंतत्रजलक्रियात्तपासीचनीयंचेत्याहसार्द्धश्लोकेन भस्मेति परिप्लावयेत्सेचयेत तत्तया क्लिन्नं सिक्तं इदंभ

भस्मराशीकृतानेमान्प्लावयेल्लोकपावनी ॥ तयाक्लिन्नमिदंभस्मगंगयालोककांतया ॥ षष्टिःपुत्रसह
स्राणिस्वर्गलोकंनयिष्यति ॥२०॥ गंगामानयभद्रंतेदेवलोकान्महीतलं ॥ क्रियतांयदिशक्तोसिगंगाया
स्त्ववतारणं ॥२१॥ गच्छचाश्वंमहाभागसंगृह्यपुरुषर्षभ ॥ यज्ञंपैतामहंवीरसंवर्त्तयितुमर्हसि ॥२२॥
सुपर्णवचनंश्रुत्वासोंशुमानतिवीर्यवान् ॥ न्यवेदयद्यथावृत्तंसुपर्णवचनंतथा ॥२४॥ तच्छ्रुत्वा
घोरसंकाशंवाक्यमंशुमतोनृपः ॥ यज्ञंनिवर्त्तयामासयथाकल्पंयथाविधि ॥२५॥ स्वपुरंत्वगम
च्छ्रीमानिष्टयज्ञोमहीपतिः गंगायाश्चागमेराजानिश्चयंनाध्यगच्छत ॥२६॥

त्वरितंहयमा
दायपुनरा
यान्महातपाः
ततोराजानमा
साद्यदीक्षि
तंरघुनंदन

स्मेहेपुत्रषष्टिंसहस्राणिसागरान्स्वर्गलोकंनयिष्यतिनेष्यतीत्यर्थः २० २१ संवर्त्तयितुंसमापयितुं २२
आयात्आगच्छत् २३ वृत्तंपितृव्यवृत्तांतंयथासुपर्णवचनंतथान्यवेदयत् २४ यथाकल्पंयथाक्रमम्
२५ इष्टयज्ञइतिबहुव्रीहिः आगमेभूमावागमेनिश्चयंउपायविषयंनाध्यगच्छतेतितदर्थः २६

महताकालेनदिवंगत इत्यन्वयः २८ इतिएकचत्वारिंशसर्गः ४१ अथगंगायाभुविपथगमनहेतुप्रयत्नस्यपू
र्वकृतस्यसाक्षादुत्तरमाहकालधर्मेत्यादि जातमात्रस्यकालेनवश्यंप्राप्तव्योधर्मःकालधर्मःमरणमितिया

अगत्वानिश्चयंराजाकालेनमहतामहान् ॥ त्रिंशद्वर्षसहस्राणिराज्यंकृत्वादिवंगतः ॥२७॥ इत्यार्षे
रामायणेवालकांडेएकचत्वारिंशःसर्गः ॥४१॥ कालधर्मंगतेरामसगरेप्रकृतीजनाः ॥ राजानंरोचयामा
सुरंशुमंतंसुधार्मिकं ॥१॥ सराजासुमहानासीदंशुमानरघुनंदन ॥ तस्यपुत्रोमहानासीद्दिलीपइति
विश्रुतः ॥२॥ तस्मैराज्यंसमादिश्यदिलीपेरघुनंदन ॥ हिमवच्छिखरेरम्येतपस्तेपेसुदारुणं ॥३॥
द्वात्रिंशच्छतसाहस्रंवर्षाणिसुमहायशाः ॥ तपोवनगतोराजास्वर्गंलेभेतपोधनः ॥४॥ दिलीप
स्तुमहातेजाःश्रुत्वापैतामहंवधंदुःखोपहतयाबुद्ध्यानिश्चयंनाध्यगच्छत ॥५॥

वत् प्रकृतीजनाः अमात्यवर्गाःदीर्घश्छांदसः रोचयामासुःन्यायप्राप्तत्वादैच्छन १ २ तेपेगंगावतारणा
येतिशेषः २ स्वर्गंलेभेनतुगंगां ४ पैतामहंवधंपितामहानांसागराणांभस्मत्वम् ५

निश्चयानधिगममभिनयतिकथमिति ६ धर्मेणाविदितः प्रसिद्धआत्मायस्यतस्येत्यर्थः ७ अकारयत्कृत

कथंगंगावतरणंकथंतेषांजलक्रिया ॥ तारयेयंकथंचैतानितिचिंतापरोभवत् ॥ ६ ॥ तस्यचिंत
यतोनित्यंधर्मेणाविदितात्मनः ॥ पुत्रोभगीरथोनामजज्ञेपरमधार्मिकः ॥ ७ ॥ दिलीपस्तुमहाते
जायज्ञैर्बहुभिरिष्टवान् ॥ त्रिंशद्वर्षसहस्राणिराजाराज्यमकारयत् ॥ ८ ॥ अगत्वानिश्चयंराजाते
षामुद्धरणंप्रति ॥ व्याधिनानरशार्दूलकालधर्ममुपेयिवान् ॥ ९ ॥ इंद्रलोकंगतोराजास्वार्जितेनै
वकर्मणा ॥ राज्येभगीरथंपुत्रमभिषिच्यनरर्षभः ॥ १० ॥ भगीरथस्तुराजर्षिर्धार्मिकोरघुनंदन
अनपत्योमहातेजाःप्रजाकामःसचाप्रजः ॥ ११ ॥ मंत्रिष्वाधायतद्राज्यंगंगावतरणेरतः ॥ तपोदीर्घं
समातिष्ठद्गोकर्णेरघुनंदन ॥ १२ ॥

८

वर ८ व्याधिनापितॄणामुद्धरणालाभजन्यदुःखजेनरुपेयिवान्प्राप्तः ९ १० सचाप्रजइत्यस्यमंत्रि
ष्वाधायेत्युत्तरेणान्वयः ११ प्रजातद्राज्यंचमंत्रिष्वाधायगंगावतरेरतोभुत्तपश्चातिष्ठत्गोकर्णेहिमवति

॥१३५॥

पंचतपाः पंचाग्निमध्येतपोयस्य मासेगतेआहारोयस्य वर्षसहस्राणि अतीतानीत्यन्वयः १४ १५ १६

ऊर्ध्वबाहुः पंचतपा मासाहारो जितेंद्रियः॥ तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः॥ १३॥ अतीतानि महा
बाहो तस्य राज्ञो महात्मनः॥ सुप्रीतो भगवान्ब्रह्मा प्रजानां प्रभुरीश्वरः॥ १४॥ ततः सुरगणैः सार्द्धमु
पागम्य पितामहः॥ भगीरथं महात्मानं तप्यमानमथाब्रवीत्॥ १५॥ भगीरथ महाराज प्रीतस्तेहं जना
धिप॥ तपसा च सुतप्तेन वरं वरय सुव्रत॥ १६॥ तमुवाच महातेजाः सर्वलोकपितामहं॥ भगीरथो महा
बाहुः कृतांजलिपुटः स्थितः॥ १७॥ यदि मे भगवन्प्रीतो यद्यस्ति तपसः फलं॥ सगरस्यात्मजाः सर्वे गं
गासलिलमाप्नुयुः॥ १८॥ गंगायाः सलिलक्लिन्ने भस्मन्येषां महात्मनां॥ स्वर्गं गच्छेयुरत्यंतं सर्वे
मे प्रपितामहाः॥ १९॥

१६ १७ यद्यस्तीत्यादि असंदिग्धे संदिग्धवचनम् वेदाश्चेत्प्रमाणं स्युरितिवत् सलिलस्पर्शमात्रे
णास्वर्गप्राप्तिसाधनं सलिलम् १८ एषां भस्मनि गंगायाः सलिलेन क्लिन्ने सति एते अत्यंतं अक्षय्यं यथा भवति

तथा स्वर्गं गच्छेयुर्नान्यथा

॥१३५॥

इक्ष्वाकूणांकुलेजातस्यमेसंततिर्देयायथानःकुलेनसीदेत्तएषवरःद्वितीयेस्तु २० शुभांशुभंहेतुंमधुरांत्र

मधुरां २

देयाचसंततिर्दैवनावसीदेत्कुलेचनः ॥ इक्ष्वाकूणांकुलेदेवएषमेस्तुवरःपरः ॥२०॥ उक्तवाक्यंतुराजा
नंसर्वलोकपितामहः ॥ प्रत्युवाचशुभांवाणींमधुरांमधुराक्षरां ॥२१॥ मनोरथोमहानेषभगीरथमहारथ
एवंभवतुभद्रंतेइक्ष्वाकुकुलमव्ययं ॥२२॥ इयंहैमवतीज्येष्ठागंगाहिमवतःसुता तांवैधारयितुंराज
न्हरस्तत्रनियुज्यतां ॥२३॥ गंगायाःपतनंराजन्पृथ्वीनसहिष्यते ॥ तांवैधारयितुंराजन्नान्यंपश्यामि
शूलिनः ॥२४॥ तमेवमुक्त्वाराजानंगंगामाभाष्यलोककृत ॥ जगामत्रिदिवंदेवैःसर्वैःसहमरुद्गणैः
२५ ॥इत्यार्षेरामायणेवालकांडेद्विचत्वारिंशःसर्गः॥ ४२ ॥

र्षितोमनोज्ञां २१ मनोरथःतावकइतिशेषः २२ तत्समीपेस्थितत्वाद्द्वितीयमितिनिर्देशः इतितांगंगा २४ गंगा
माभाष्यराजानंयथाकालमनुग्रहलोत्सुक्तादेरराजानजैः मरुद्गणैःकर्मदेवैः २५ इतिद्विचत्वारिंशःसर्गः ४२

देवदेवेऽप्राजानजानामपिदेवानांदेवेपूज्ये उपासतेत्यार्षंवहुवचनंउपास्तेत्यर्थः शिवमितितिशेषः १ २ उमा
पतिरित्यनेनउमायसहागतइतिगम्यते ३ प्रियंकरिष्यामीत्येतद्विरुक्तोतिशिरसेति ४ हैमवती हिमव
त्कन्या ५ तदासेति ईश्वरेणाधारणांगीकारेकृतेगर्वादित्यर्थः शिवेशोभनेऽन्यप्रसिद्धे ५ महद्रूपकरणो

देवदेवेगतेनस्मिन्सोंगुष्टाग्रनिपीडितो ॥ कृत्वावसुमनीरामसंवत्सरमुपासत ॥१॥ ऊर्ध्ववाहुर्निरा
लंवोवायुभक्षोनिराश्रयः ॥ अचलःस्थाणुवन्नित्यंरात्रिंदिवमतंद्रितः ॥२॥ अथसंवत्सरेपूर्णेसर्वे
लोकनमस्कृतः ॥ उमापतिःपशुपतीराजानमिदमव्रवीत ॥३॥ प्रीतस्तेहंनरश्रेष्ठकरिष्या
मितवप्रियंशिरसाधारयिष्यामिशैलराजसुतामहं ॥४॥ ततोहैमवतीज्येष्टासर्वलोकनमस्कृ
ता ॥५॥ तदासासुमहद्रूपंकृत्वावेगंचदुःसहं आकाशादपतद्गंगाशिवेशिवसिरस्युत ॥ अचिं
न्तयत्त्वसादेवीगंगापरमदुर्धराविशाम्यहंहिपातालेस्रोतसागृह्यशंकरं ॥६॥ तस्यावलेपनं
ज्ञात्वाक्रुद्धस्तुभगवान्हरःतिरोभावयितुंवुद्धिंचक्रेविनशनस्तदा ॥७॥

दुःसहवेगःकरणोनिमित्तमाहअचिंतयदित्यादि दुर्धराधर्तुमशक्यागृह्यगृहीत्वा ६ वलेपनंगर्वंवष्टिभागु
रीत्यल्लोपः यद्वासंधिरार्षः तिरोभावयितुंतिरोहितांकर्तुं ७

जटामंडलमेवगह्वरंगुहायस्मिन् ८ निर्गमेयत्नमास्थितापिमहींगंतुंनाशक्नोत् किंचजटामंडलमोहितासा
निर्गमंजटामंडलान्निःसरणमात्रमपिनैवलेभेइत्यन्वयः ९ तर्हिकृतवतीत्यतआहत्रैवेति अबभ्रमत्पुनःपु

सातस्मिन्पतितापुण्यापुण्येरुद्रस्यमूर्द्धनि ॥ हिमवत्प्रतिमेरामजटामंडलगह्वरे ॥ ८ ॥ साकथंचिन्म
हींगंतुंनाशक्नोद्यत्नमास्थिता ॥ नैवसानिर्गमंलेभेजटामंडलमोहिता ॥ ९ ॥ तत्रैवाबभ्रमद्देवीसंवत्स
रगणान्बहून् ॥ तामपश्यत्पुनस्तत्रतपःपरममास्थितः ॥ १० ॥ सतेनतोषितश्चासीदत्यंतंरघुनंदन
विससर्जततोगंगांहरोबिंदुसरःप्रति ॥ ११ ॥ तस्यांविसृज्यमानायांसप्तस्रोतांसिजज्ञिरे ॥ ह्लादिनीपा
वनीचैवनलिनीचतथैवच ॥ १२ ॥ तिस्रःप्राचींदिशंजग्मुर्गंगाःशिवजलाःशुभाः ॥ सुचक्षुश्चैवसीता
चसिंधुश्चैवमहानदी ॥ १३ ॥ तिस्रश्चैतादिशंजग्मुःप्रतीचींतुशुभोदकाः ॥ सप्तमीचान्वगात्तासां
भगीरथमथोनृपं ॥ १४ ॥

नरभ्रमत् आर्षत्वात्सन्त्वच्छिंदत्वंन आस्थितःतज्जेतिशेषः १० सहस्रेणतप
सातोषितश्चासीद्विसर्जेच बिंदुसरोनामहिमवतिब्रह्मनिर्मितसरोविशेषः ११ स्रोतांसिप्रवाहाःस्रोतसां
नामनिर्देशपूर्वकंभेदमाहह्लादिनीति १२ शुभाःशोभनाःमहानदीतिसर्वविशेषणम् १३. १४ तम

अनुव्रजत् अन्वव्रजत् अडभावश्चार्षः १५ अत्र तु स्वर्गाकाशभूमिगमनात्त्रिपथगामिनीत्येके दिक्त्रयग
मनादित्यपरे एवंपथकेनहेतुनेत्यस्योत्तरमभिधाय कर्मभिः कैः समन्वितेत्यस्य चरितभेदप्रश्नस्योत्तरमाह
गगनादितितीव्रशब्दहेतुरयं १६ शिंशुमारः कथ्याकारो जलचरविशेषः शिशुमारस्त्वबुचरइतिवैजयंती

भगीरथोपिराजर्षिर्दिव्यंस्यंदनमास्थितः ॥ प्रायादग्रेमहातेजागंगातंचाप्यनुव्रजत् ॥१५॥ गगना
नाच्छंकरशिरस्ततोधरणिमागता ॥ असर्पतजलंतत्रतीव्रशब्दपुरस्कृतं ॥१६॥ मत्स्यकच्छ
पसंघैश्चशिंशुमारगणैस्तथा ॥ पतद्भिःपतितैश्चैवव्यरोचतवसुंधरा ॥१७॥ ततोदेवर्षिगंध
र्वायक्षाःसिद्धगणास्तथा ॥ व्यलोकयंततेतत्रगगनाद्गांगतांतदा ॥१८॥ विमानैर्नगराकारैर्हयैर्गज
वरैस्तथा ॥ पारिप्लवगताश्चापिदेवतास्तत्रविष्ठिताः ॥१९॥ तदद्भुततमंलोकेगंगावतरमुत्तमं ॥
दिदृक्षवोदेवगणाःसमीयुरमितौजसः ॥२०॥

६ गगनाद्गांगतां रुद्रजटाकाशाद्भुवमित्यर्थः १८ विमानैरित्यादेरत्रवंतइतिशेषः परिप्लवगताः शिबि
कादियानस्थाः तत्र गंगापतनप्रदेशे विष्ठिताः विशेषेणास्थिताः १९ देवगणाः वरुणादयः २०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

संपतद्भिरागच्छद्भिः तुरगौघैस्तेषां भरौजसा च गततोयदं गगनं शरदादित्यमिव भातीत्यन्वयः २१ आका
शं चंचलैः शिशुमारादिभिर्विद्युद्भिरिव विक्षिप्तं व्याप्तमभवत् २२ वेगवशेन सहस्रधा कीर्यमाणैः पांडुरैः स
लिलोत्पीडैः फेनैः हंससंप्लवैः हंससकुलैः सा शरदभ्रैरिव आकीर्णं गगनमभवदिति पूर्वेणान्वयः २३

संपतद्भिः तुरगौघैस्तेषां चाभरगौजसा ॥ शरदादित्यमिवाभाति गगनं गततोयदं ॥२१॥ शिशुमारोरग
ग्राहैरोर्मीनैरपि च चंचलैः ॥ विद्युद्भिरिव विक्षिप्तमाकाशमभवत्तदा ॥२२॥ पांडुरैः सलिलोत्पीडैः कीर्य
माणैः सहस्रधा ॥ शारदाभ्रैरिवाकीर्णं गगनं हंससंप्लवैः ॥२३॥ क्वचित् द्रुततरं याति कुटिलं
क्वचिदायतं ॥ विनतं क्वचिदुद्धूतं क्वचिद्याति शनैः शनैः ॥२४॥ सलिलेनैव सलिलं क्वचिदभ्याह
तं पुनः ॥ मुहूरूर्ध्वं पयो गत्वापपातैव वसुधां पुनः ॥२५॥

क्वचिदिति अत्र तरंगं गेत्यनुषज्यते द्रुततरमित्यादि
क्रियाविशेषणं आयतं विस्तृतप्रवाहं विनतं अग्रभागप्रदेशे संकुचितं उद्धूतं पाषाणादिप्रयोगादूर्ध्वमुखं २४ अभ्या
हतं वातव्यावर्तिततरंगसलिलेनाभिमुख्यमाहतमित्यर्थः मुहुरूर्ध्वपयोगमने सलिलयोरभ्याघातो निमित्तं २५

शांकरशिरसि भ्रष्टं पतितं ततो भूमितले पतितमपि निर्मलं व्यरोचत नैर्मल्ये प्रागुक्तभ्रंशद्वयं हेतुः गतकल्म
षं त्वजलस्पर्शवतां प्राणिनां नाशितपापं २६ भवांगं शिवमूर्द्धोपस्पृशः सन्तु २७ न केवलं पापसंहारमात्रं

तच्छंकरशिरोभ्रष्टं भ. ष्टं भूमितले पुनः व्यरोचत तदा तोयं निर्मलं गतकल्मषं ॥२६॥ तत्रर्षिगणा गंध
र्वा वसुधातलवासिनः ॥ भवांगपतितं तोयं पवित्रमिति पस्पृशुः ॥२७॥ शापात्प्रपतिता ये च गगना
द्वसुधातलं ॥ कृत्वा तत्राभिषेकं ते बभूवुर्गतकल्मषाः ॥२८॥ धूतशापाः पुनस्तेन तोये
नानेन भास्वता ॥ पुनराकाशमाविश्य स्वर्गलोकं प्रपेदिरे ॥२९॥ मुमुदे मुदितो लोकस्तेन तो
येन भास्वता ॥ कृताभिषेको गंगायां बभूव गतकल्मषः ॥३०॥ भगीरथोहि राजर्षिर्दिव्यं स्यंदन
मास्थितः प्रायादग्रे महातेजास्तं गंगापृष्ठतोचगात् ॥३१॥

गंगायाः कृत्यं अपि तु परलोकप्रापणमपीत्याह शापादित्यादि गगनाद्भुवस्यास्नानात् गतकल्मषाः मुक्तशा
पाः २८ आकाशमाविश्य काकाशमार्गेणोत्पर्पः २९ मुदितः दर्शनमात्रेण स्नानपानादिनामुमु

[illegible]

रेया इतिश्लोकद्वयमेकान्वयं ३२ सर्वेभगीरथस्यानुगाःसंतोगंगामन्वगमन्नित्यन्वयः ३३ यतोयेनमार्गेण

देवाःसर्षिगणाःसर्वेदैत्यदानवराक्षसाः॥ गंधर्वयक्षप्रवराःसकिन्नरमहोरगाः ॥३२॥ सर्वाश्चा-
प्सरसोरामभगीरथरथानुगाः॥ गंगामन्वगमन्प्रीताःसर्वेजलचराश्चये॥३३॥ यतोभगीर-
थोराजाततोगंगायशस्विनी॥ जगामसरितांश्रेष्ठासर्वपापप्रणाशिनी ॥३४॥ ततोहियजमान-
स्यजन्होरद्भुतकर्मणः॥ गंगासंप्लावयामासयज्ञवाटंमहात्मनः॥३५॥ तस्यावलेपनंज्ञात्वाक्रु-
द्धोजन्हुश्चराघव॥ अपिबत्तुजलंसर्वंगंगायाःपरमाद्भुतं॥३६॥ ततोदेवाःसगंधर्वाऋषयश्च-
सुविस्मिताःपूजयंतिमहात्मानंजन्हुंपुरुषसत्तमं॥३७॥

ततस्तेन ३४ अद्भुतकर्मण इतिवक्ष्यमाणगंगायानाभिप्रायं यज्ञवाटंयज्ञक्षेत्रं अवलेपनंगर्वं अपिबद-
गस्त्यःसमुद्रजलमिवयोगजशक्त्येतिभावः परमाद्भुतंतदभवच्छ्लोकस्येतिशेषः ३६ ३७

दुहितृत्वेन यंति स्म दुहितरमकुर्वन्नित्यर्थः तुष्टः गंगायाः देवैः स्वदुहितृत्वप्रापणात् श्रोत्राभ्यां नरावयवेषु श्रो
त्रस्यापि पावनत्वादिति भावः ३८ सागरं सागरसुतखातं संप्राप्ता तत्सुरगणायेति शेषः ३९ तस्मादिति यतो दु
हितृत्वमनयत् तस्माद्धेतोः जन्हुसुता जान्हवीति नामद्वयं ४० तस्य कर्मणः सिद्ध्यर्थं भगीरथस्य स्ववंशोद्धा

गंगां चापि नयंति स्म दुहितृत्वे महामनः ।। ततस्तु सो महातेजाः श्रोत्राभ्यामसृजत्पुनः ।। ५८ ।। विस
ज्य गंगां राजेंद्रो ज्ञात्वा प्राप्तं भगीरथं ।। पूजयित्वा यथान्यायं यज्ञवाटमुपागमत् ।। ५९ ।। तस्माज्ज
न्हुसुता गंगा प्रोच्यते जान्हवीति च ।। जगाम च पुनर्गंगा भगीरथरथानुगा ।। ६० ।। सागरं चापि सं
प्राप्ता सा सरित्प्रवरा नदी ।। रसातलमुपागच्छत्सिध्यर्थं तस्य कर्मणः ।। ६१ ।। भगीरथोपि राजर्षि
र्गंगामादाय यत्नतः ।। पितामहान्भस्मकृतानपश्यद्गतचेतनः ।। ६२ ।। अथ तं भस्मनां राशिं गं
गासलिलमुत्तमं ।। प्लावयद्धूतपापा नः स्वर्गं प्राप्ता रघूत्तम ।। ६३ ।।

र कर्मणः ४१ यत्नतः प्रागुक्तयत्नैः भस्मकृतान्कपिलकोपाग्निना भस्मभावं प्राप्तान् ४२ प्लावयत्सेचयत्ते
स्म अतएव धूतपाप्मानः स्वर्गं प्राप्ताः सगरपुत्रा इति शेषः ४३ श्रीसियजीवनोजय

इति त्रिचत्वारिंशः सर्गः ४३ पूर्वसर्गोक्तं संग्रहेणोक्तं विस्तरेणाह सगत्वेति भूमेस्तलं पाताले भस्मसात्कृताः का
स्नैव भस्मीकृताः १ २ तारिताः प्रेतभावान्मोचिताः देववत्स्वर्गं प्राप्ताश्च ३ स्वर्गं प्राप्यते विशेषं चाह सागा

इत्यार्षे रामायणे बालकांडे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥ स गत्वा सागरं राजा गंगयानुगतस्तदा प्रविवेश
तलं भूमेर्यत्र ते भस्मसात्कृताः ॥ १ ॥ भस्मन्यथाप्लुते राम गंगायाः सलिलेन वै ॥ सर्वलोकप्रभुर्ब्रह्मा
राजानमिदमब्रवीत् ॥ २ ॥ तारितान्नरशार्दूल दिवं याताश्च देववत् षष्टिः पुत्रसहस्राणि सगरस्य
महात्मनः ॥ ३ ॥ सागरस्य जलं लोके यावत्स्थास्यति पार्थिव ॥ सगरस्यात्मजाः सर्वे दिवि स्थास्यं
ति देववत् ॥ ४ ॥ इयं च दुहिता ज्येष्ठा तव गंगा भविष्यति ॥ त्वत्कृतेन च नाम्नाथ लोके स्थास्यति
विश्रुता ॥ ५ ॥ गंगा त्रिपथगा नाम दिव्या भागीरथीति च त्रीन्पथो भावयंतीति ततस्त्रिपथगा स्मृता ६

इत्येति ४ त्वत्कृतेन नाम्ना लोके विश्रुता स्थास्यति ५ तदेव नामद्वयं दर्शयन् त्रिपथगाशब्दं व्युत्पादय
ति गंगेति त्रीन्पथो भावयंतीति त्रिपथगा अनेन कथं गंगा त्रिपथगेत्यस्योत्तरं संपद्यते ६

॥१४०॥ प्रतिज्ञां गंगासलिलप्लावनेन सागरांस्तारयिष्यामीति प्रतिज्ञां अपमार्ज्य समाप्य ७ पूर्वकेण सगरेण एष गंगा
लाभरूपः ८ गंगां नेतुं भूलोकं प्रापयितुं प्रार्थयता प्रतिज्ञा नापवर्जिता न समापिता ९ १० गंगां नेतुं प्रार्थयतामा

पितामहानां सर्वेषां त्वमत्र मनुजाधिप ॥ कुरुष्व सलिलं राजन्प्रतिज्ञामपमार्ज्य ॥ ७ ॥ पूर्वकेनापि
ने राजंस्तेनातियशसा तदा ॥ धर्मिणां प्रवरेणाप नैष प्राप्तो मनोरथः ॥ ८ ॥ तथैवांशुमता वत्स
लोकेऽप्रतिमतेजसा ॥ गंगां प्रार्थयता नेतुं प्रतिज्ञा नापवर्जिता ॥ ९ ॥ राजर्षिणा गुणवता महर्षिस
मतेजसा ॥ मत्तुल्यतपसा चैव क्षत्रधर्मस्थितेन च ॥ १० ॥ दिलीपेन महाभाग तव पित्रातितेजसा ॥ पु
नर्न शकिता नेतुं गंगां प्रार्थयतानघ ॥ ११ ॥ सा त्वया समतिक्रान्ता प्रतिज्ञा पुरुषर्षभ प्राप्तोऽसि पर
मं लोके यशः परमसंमतं ॥ १२ ॥ यच्च गंगावतरणं त्वया कृतमरिंदम ॥ अनेन च भवान्प्राप्तो धर्मस्याय
तनं महत् ॥ १३ ॥

गंगां नेतुं न शकितेत्यर्थः ११ समतिक्रान्ता निस्तीर्णा परमसंमतं परममुत्कृष्टं च ततसंम ॥१४०॥
तं च सर्वलोकसंमतमित्यर्थः १२ धर्मस्यायतनं धर्मप्राप्यस्थानं महत् ब्रह्मलोकरूपं १३ श्रीसियजीवन

यथास्या ब्रह्मलोकप्रापकत्वं तदाह स्नावयस्वेति आत्मानं स्वदेहं सदोचिते सिंहकर्कटमध्येपि स्नानादिव्यवहारोचिते भूप्रवहनदीनामेव तत्काले भौमत्वमूलरजःसंबंधात्स्नानाद्यनर्हत्वं पुण्यफलं इति बहुव्रीहि

स्नावयस्व त्वमात्मानं नरोत्तम सदोचिते ॥ सलिले पुरुषव्याघ्र शुचिः पुण्यफलो भव ॥१४॥ पितामहानां सर्वेषां कुरुष्व सलिलक्रियां ॥ स्वस्ति तेस्तु गमिष्यामि स्वलोकं गम्यतां नृप ॥१५॥ इत्येवमुक्त्वा देवेशः सर्वलोकपितामहः ॥ यथागतं तथागच्छद्देवलोकं महायशाः ॥१६॥ भगीरथस्तु राजर्षिः कृत्वा सलिलमुत्तमं ॥ यथाक्रमं यथान्यायं सागराणां महायशाः ॥१७॥ कृतोदकः शुची राजा स्वपुरं प्रविवेश ह समृद्धार्थो नरश्रेष्ठ स्वराज्यं प्रशशास ह ॥१८॥

अनेन स्नानमात्रेण गंगा ब्रह्मलोकं प्रापयतीत्युक्तं भवति १४ सागराणां जातप्रायश्चित्तत्वसंदेहापनुत्तये गंगाजलसंबंधस्य सर्वप्रायश्चित्तत्वबोधनाय च पुनस्तेषां सलिलं कार्यमित्याह पितामहानामित्यादि गम्यतां कृतोदकक्रियेण स्वपुरमिति शेषः १५ यथागतं तथैवागच्छत् देवलोकं ब्रह्मलोकं १६ यथाक्रमं ज्येष्ठक्रमेण यथान्यायं स्वसूत्रक्रमेण उत्तमं उत्तमलोकप्रापकम् १७ कृतोदक इति अन्येषामपीति शेषः १८

नष्टशोकः नष्टतद्वियोगजशोकः विगज्वरः कथमस्यमत्यालनं भविष्यतीति विगतचिंतः १९ उपसंहरति एवमु
ति स्वस्तिभद्रयोस्तस्त्रीत्यादरसूचनार्थग्रहणं २० अस्याख्यानस्य श्रवणफलमाह धन्यमित्यादि २१ २२ २३ इति

प्रमुमोद च लोकस्तं नृपमासाद्य राघव ॥ नष्टशोकः समृद्धार्थो बभूव विगतज्वरः ॥१९॥ एष ते रा
म गंगाया विस्तरेभिहितो मया ॥ स्वस्ति प्राप्नुहि भद्रं ते संध्याकालोतिवर्तते ॥२०॥ धन्यं यशस्यमा
युष्यं पुत्र्यं स्वर्ग्यमथापि च ॥ यः श्रावयति विप्रेषु क्षत्रियेष्वितरेषु च ॥२१॥ प्रीयंते पितरस्तस्य प्रीयं
ते दैवतानि च ॥ इदमाख्यानमायुष्यं गंगावतरणं शुभं ॥२२॥ यः शृणोति च काकुत्स्थ सर्वान्कामान
वाप्नुयात् ॥ सर्वे पापाः प्रणश्यंति आयुः कीर्तिश्च वर्द्धते ॥२३॥ इत्यार्षे रामायणे वालकांडे चतुश्चत्वा
रिंशः सर्गः ॥४४॥ विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः विस्मयं परमं गत्वा विश्वामित्रमथ
ाब्रवीत् ॥१॥ अत्यद्भुतमिदं ब्रह्मन्कथितं परमं त्वया ॥ गंगावतरणं पुण्यं सागरस्यापि पूर
णं ॥२॥ क्षणभूतेव नौ रात्रिः संवृत्तेयं महातपः ॥ इमां चिंतयतः सर्वां निखिलेन कथां तव ॥३॥

चतुश्चत्वारिंशः सर्गः ४४ अब्रवीत् राम इति शेषः १ पूरणं जनयतीति शेषः २ इमां तव कथां त्वदुक्तां कथां
चिंतयतो मम रात्रिः क्षणभूतेव संवृत्ता अतीता एवमाश्चर्यभूता त्वदुक्ता गंगाकथेति भावः ३

विश्वामित्रेतिसंबोधनं उक्तस्यैवार्थस्यादरातिशयबोधनायपुनरुपादानं ४ विमलेप्रभातेसम्यक्प्रभातेइत्यर्थः
५ भगवतीगंगाकथाश्रवणात्पूज्या ६ सुखास्तीर्णासुखंशुभंप्रास्तीर्णायस्यांसा त्वरितमागत्तासर्वैस्तपसेवा

तस्यसाशर्वरीसर्वाममसौमित्रिणासह॥जगामचिंतयानस्यविश्वामित्रकथांशुभां॥४॥ततःप्रभातेविम
लेविश्वामित्रंतपोधनंउवाचराघवोवाक्यंकृत्वान्हिकमरिंदमः॥५॥गताभगवतीरात्रिःश्रोतव्यंपर
मंश्रुतं॥तरामसरितांश्रेष्ठांपुण्यांत्रिपथगांनदीं॥६॥नौरेषाहिसुखास्तीर्णाऋषीणांपुण्यकर्मणां
भगवंतमिहप्राप्तंज्ञात्वात्वरितमागता॥७॥तस्यतद्वचनंश्रुत्वाराघवस्यमहात्मनः॥संतारंकारयामास
सर्षिसंघस्यराघवः॥८॥उत्तरंतीरमासाद्यसंपूज्यर्षिगणांततः॥गंगाकूलेनिविष्टास्तेविशालांददृशुःपु
रीं॥९॥ततोमुनिवरस्तूर्णंजगामसहराघवः॥विशालांनगरींरम्यांदिव्यांस्वर्गोपमांतदा॥१०॥अथरामोम
हाप्राज्ञोविश्वामित्रंमहामुनिं॥पप्रच्छप्रांजलिर्भूत्वाविशालामुत्तमांपुरीं॥११॥

र्थमित्याशयः ७ कारयामासनाविकैरितिशेषः ८ संपूज्यर्षिगणांतत्तीरस्थामितिशेषः ९ विशालांजगाम
पूर्वंदृष्टामितिशेषः १० विशालांपप्रच्छविशालाविषयेप्रश्नंकृतवानित्यर्थः ११

विशालायांवर्त्तमानोराजवंशःकतरःकःइतिद्वितीयप्रश्नः १२ विशालास्यविशालाख्यस्यनगरस्यपुरातनंत
त्त्वमपर्वंवैभवमाख्यातुमारेभे १३ अस्मिन्देशेयद्वृत्तंतच्छृणुतच्छ्रेष्ठतयाशक्रस्यकथांकथयतोमत्तःश्रू
यतां १४ पूर्वंकृतयुगेदितेःपुत्राःमहाबलाःआसन् अदितिपुत्राःवीर्यवंतोधार्मिकाश्चासन् १५ अमरा

कतरोराजवंशोयंविशालायांमहामुने ॥ श्रोतुमिच्छामिभद्रंतेपरंकौतूहलंहिमे ॥१२॥ तस्यतद्वचनंश्रु
त्वारामस्यमुनिपुंगवः ॥ आख्यातुंतत्समारेभेविशालस्यपुरातनं ॥१३॥ श्रूयतांरामशक्रस्यकथांक
थयतःशुभां ॥ अस्मिन्देशेहियद्वृत्तंशृणुतत्त्वेनराघव ॥१४॥ पूर्वंकृतयुगेरामदितेःपुत्रामहा
बलाः ॥ अदितेश्चमहाभागावीर्यवंतःसुधार्मिकाः ॥१५॥ ततस्तेषांनरव्याघ्रबुद्धिरासीन्महात्म
नां ॥ अमराविजराश्चैवकथंस्यामनिरामयाः ॥१६॥ तेषांचिंतयतांरामबुद्धिरासीद्विपश्चितां ॥
क्षीरोदमथनंकृत्वारसंप्राप्स्यामतत्रवै ॥१७॥ ततोनिश्चित्यमथनंयोक्त्रंकृत्वाचवासुकिं ॥ मं
थानंमंदरंकृत्वाममंथुरमितौजसः ॥१८॥

मरणरहिताःविज्वराजरारहिताःनिरामयाःनीरोगाः १६
तेषांदेवासुराणां रसंअमृतरूपंरसायनं १७ योक्त्रंमंथनरज्जुं १८

योक्तसर्पः मंथनरज्जुभूतसर्पः वमंतइतिपुंस्त्वमार्षं अप्रतिः अप्रतिशयितं विषं १९ उत्पपातेतितततइत्यादिः शि

अथवर्षसहस्रेणयोक्तसर्पशिरांसिच॥वमंतोतिविषंतत्रददंशुर्दशनैःशिलाः॥१९॥उत्पपाता
ग्निसंकाशंहालाहलमहाविषं॥तेनदग्धंजगत्सर्वंसदेवासुरमानुषं॥२०॥अथदेवामहादेवंशं
करंशरणार्थिनः॥जग्मुःपशुपतिंरुद्रंत्राहित्राहीतितुष्टुवुः॥२१॥एवमुक्तस्ततोदेवैर्देवदेवेश्वरः॥ प्रभुः
प्रादुरासीत्ततोत्रैवशंखचक्रधरोहरिः॥२२॥उवाचैनंस्मितंकृत्वारुद्रंशूलधरंहरिः॥दैवतैर्मथ्यमा
नेतुपयसिसर्वंसमुपस्थितं॥२३॥त्वंचदीपंसुरश्रेष्ठसुराणामग्रजोहियत्॥अग्रपूजामिहस्थित्वागृहाणे
दंविषंप्रभो॥२४॥इत्युक्त्वाचसुरश्रेष्ठस्तत्रैवांतरधीयत॥देवतानांभयंदृष्ट्वाश्रुत्वावाक्यंतुशार्ङ्गिणः
२५॥

लादशनादिइत्यर्थः दष्टाशिलाखंडायस्य महाविषरूपंभूत्वाउत्पपात २० २१ प्रभुर्महादेवः ततः महादेवप्राद
र्भावानंतरं २२ स्मितंकृत्वाछलेनविषदानात्स्मित २३ यत्यतोभवान्सुराणामग्रजस्तेषांमध्येश्रेष्ठ इत्यर्थः २४
सुरश्रेष्ठोविष्णुः २५

अमृतोपमं यथाभवत्तितथा संजग्राहेत्यन्वयः पूर्वं देवेषु मथनसहायतया स्थितोपि विषपानानंतरं ततो
ड्यातोस्य कोजगामामृतकुंडमितिशेषः मंथानः पर्वतोत्तमः मंदरः २७ २८ कामठं कच्छपं २९ शिख

हालाहलविषं घोरं संजग्राहामृतोपमं । देवान्विसृज्य देवेशो जगाम भगवान्हरः ॥२६॥ ततो देवासुराः स
र्वे ममंथू रघुनंदन ॥ प्रविवेशाथ पातालं मंथानः पर्वतोत्तमः ॥२७॥ ततो देवाः सगंधर्वास्तुष्टुवुर्मधु
सूदनं ॥२८॥ त्वं गतिः सर्वभूतानां विशेषेणादिवौकसां ॥ पालयास्मान्महाबाहो गिरिमुद्धर्तुमर्हसि
२९॥ इति श्रुत्वा हृषीकेशः कामठं रूपमास्थितः पर्वतं पृष्ठतः कृत्वा शिश्ये तत्रोदधौ हरिः ॥३०॥
पर्वताग्रं तु लोकात्मा हस्तेनाक्रम्य केशवः देवानां मध्यतः स्थित्वा ममंथ पुरुषोत्तमः ॥३१॥ अ
थ वर्षसहस्रेण आयुर्वेदमयः पुमान ॥ उदतिष्ठत्सुधर्मात्मा सदंडः सकमंडलुः ॥३२॥

स्थितवान् जलाशये इत्यादौ स्थितिस्त्यर्थे स्पर्शने दर्शनात् ३० ममंथ पुरुषोत्तमः अनेन शक्तिवैचित्र्यं प्रक
टीकृतं ३१ धन्वंतरिरुदतिष्ठदित्यन्वयः ३२

अप्सराइत्यकारांतत्वमार्षं उत्पत्तिषन्नित्यनुकर्षः अप्सराशब्दं निर्वक्ति अप्स्विति अप्सु क्षीरकूपासु निर्मथना
द्योरसस्तस्मादप्सरोभवन् पृषोदरादित्वात्साधुः ३३ षष्टिकोट्यः षष्टिकोटिसंख्याः प्रधाना अप्सरसोभवन्

अथ धन्वंतरिर्नाम अप्सराश्च सुवर्चसः॥ अप्सु निर्मथनादेव रसात्तस्माद्वरस्त्रियः॥ उत्पेतुर्मनुज
श्रेष्ठ तस्मादप्सरसोभवन्॥३३॥ षष्टिः कोट्योभवंस्तासामप्सरसां सुवर्चसां॥ असंख्येयास्तु का
कुत्स्थ यास्तासां परिचारिकाः॥३४॥ न ताः स्म प्रतिगृह्णंति सर्वे ते देवदानवाः॥ अप्रतिग्रहणादेव तेन
साधारणाः स्मृताः॥३५॥ वरुणस्य ततः कन्या वारुणी रघुनंदन॥ उत्पपात महाभागा मार्गमाणा प
रिग्रहं॥३६॥ दितेः पुत्रा न तां राम जगृहुर्वरुणात्मजां॥ अदितेस्तु सुता वीर जगृहुस्तामनिंदितां॥
३७॥

अपरिमितपरिचारिकोपेताः षष्टिकोट्यप्सरसोजाता इत्यर्थः ३४ ताः उक्ता अप्सरसः न प्रतिगृह्णंति ममैवेमा
नान्यस्येति नांगीकुर्वंति स्म ते सर्वे देवदानवा कुतः अप्रतिग्रहणात् को वा मम पतिरिति मार्गणात् कस्मात्ते
न ताः साधारणा एवेत्यर्थः ३५ वरुणस्य समुद्राधिदेवस्य कन्या या वारुणी सुराधिदेवता परिग्रहं ममेयं मिति परि
ग्रहकर्त्तारं मार्गमाणा उत्पपात ३६ अदितिसुतांगीकारहेतुरनिंदितामिति निषेधशास्त्रं तु मानुषविषयं ३७

॥१५४॥ प्रसंगात्सुरासुरशब्दौ निर्वक्तिऽअसुराइति तेनसुरायाःऽअपरिग्रहेणासुराःतेनसुरापरिग्रहेणसुराः ऽअर्थश्चा
यच ३८ ३९ तस्यकृतेऽअमृतस्यग्रहणार्थमित्यर्थःकुलक्षयःउभयपक्षयोरपिसंघातविनाशःतदेवोपपा

असुरास्तेनदैतेयाःसुरास्तेनादितेःसुताः॥हृष्टाःप्रमुदिताश्चासन्वारुणीग्रहणात्सुराः॥३८॥
उच्चैःश्रवाहयश्रेष्ठोमणिरत्नंचकौस्तुभं॥उदतिष्ठन्नरश्रेष्ठतथैवामृतमुत्तमं॥३९॥अथ
तस्यकृतेराममहानासीत्कुलक्षयः॥अदितेस्तुततःपुत्रादितिपुत्रानयोधयन्॥४०॥एक
तामगमन्सर्वेअसुराराक्षसैःसह॥युद्धमासीन्महाघोरंवीरत्रैलोक्यमोहनं॥४१॥यदाक्षयं
गतंसर्वंतदाविष्णुर्महाबलः॥अमृतंसोहरत्तूर्णंमायामास्थायमोहिनी॥४२॥

दयतिअदितेरिति ४० कलहप्रवृत्त्यनंतरमसुराराक्षसैःसहएकतामगमन्बलवद्ध्यर्थमितिशेषःवीरेतिसं र्धं
बोधनं ४१ यदासर्वंपरस्परप्रहारेणक्षयप्रायंगतंतदादैत्याराक्षसैरेकत्वेनबलवत्त्वान्माहरंत्वितिबुध्या हि
मोहिनीकाममोहजननीमायामाश्रयेशक्तिमास्थायअवलंब्यदिव्यमोहिनीरूपंकृत्वातूर्णंशीघ्रममृतमह ॥१५४॥

येऽसुरा विसुं प्रातिकूल्येनाभिमुख्यं गताः प्राप्तास्ते सर्वे मूर्त्यंतरेण प्रभविष्णुना युद्धे संपिष्टाः ४२ दितेः पुत्रानव

येगताभिमुख्यं विष्णुमव्ययं पुरुषोत्तमं संपिष्टास्ते तदा युद्धे विष्णुना प्रभविष्णुना ॥ ४३ ॥ अदितेरा
त्मजा वीरा दितेः पुत्रान्निजघ्निरे ॥ अस्मिन्घोरे महायुद्धे दैतेयादित्ययोर्भृशं ॥ ४४ ॥ निहत्य दितिपु
त्रांश्च राज्यं प्राप्य पुरंदरः शशास मुदितो लोकान्सर्षिसंघान्सचारणान् ॥ ४५ ॥ इत्यार्षे रामाय
णे बालकांडे पंचचत्वारिंशः सर्गः ॥ ४५ ॥ हतेषु तेषु पुत्रेषु दितिः परमदुःखिता ॥ मारीचं कश्यपं राम
भर्तारमिदमब्रवीत् ॥ १ ॥ हतपुत्रास्मि भगवंस्तव पुत्रैर् [illegible] महात्मभिः ॥ शक्रहंतारमिच्छामि
पुत्रं दीर्घतपोर्जितं ॥ २ ॥ साहं तपश्चरिष्यामि गर्भं मे दातुमर्हसि ॥ ईदृशं शक्रहंतारं त्वमनुज्ञातुमर्हसि
३ ॥ तस्यास्तद्वचनं श्रुत्वा मारीचः कश्यपस्तदा ॥ प्रत्युवाच महातेजा दितिं परमदुःखितां ॥ ४ ॥

शिष्टानिति शेषः अदितेरात्मजा भगवदाप्यायितबलाः संतः दैतेयादित्ययोस्तस्मिन्युद्धे भृशमसुरान्निज
घ्निरे ४४ चकारादमृतप्रीत्यर्थः ४५ इति पंचचत्वारिंशः सर्गः ४५ मारीचं मरीचिपुत्रं कश्यपं १ दीर्घेण त
पसा अर्जितं २ ईदृशमित्यस्यैव विवरणं शक्रहंतारमिति ३ ४

॥१५५॥

शुचिर्भव पुत्रोत्पत्तिपर्यंतमिति शेषः ५ पूर्णे वर्षसहस्रे चेति जनयिष्यसीत्यनेनान्वयः शुचिर्यदि भविष्यसीति संवत्सरसहस्रमपीति शेषः त्रैलोक्यहंतारं तस्याधिपशक्रहंतारं ६ पाणिनास्य ममार्जेतां दशपुत्रप्रतिबंधहेतुपापक्षयार्थमिति शेषः ७ प्रयतामालभ्य स्पृष्ट्वा स्वस्ति गर्भ भद्रं तवास्तु इत्युक्त्वा कश्यपः तपसे

एवं भवतु भद्रं ते शुचिर्भव तपोधने ॥ जनयिष्यसि पुत्रं त्वं शक्रहंतारमाहवे ॥५॥ पूर्णे वर्षसहस्रे तु शुचिर्यदि भविष्यसि पुत्रं त्रैलोक्यहंतारं मत्तस्त्वं जनयिष्यसि ॥६॥ एवमुक्त्वा महातेजाः पाणिना संममार्जतां ॥ तामालभ्य ततः स्वस्ति इत्युक्त्वा तपसे ययौ ॥७॥ गते तस्मिन्नरश्रेष्ठ दितिः परमहर्षिता ॥ कुशप्लवं समासाद्य तपस्तेपे सुदारुणं ॥८॥ तपस्तस्यां हि कुर्वंत्यां परिचर्यां चकार ह ॥ सहस्राक्षो नरश्रेष्ठ परया गुणसंपदा ॥९॥ अग्निं कुशान्काष्ठमपः फलमूलं तथैव च ॥ न्यवेदयत्सहस्राक्षो यच्चान्यदपि कांक्षितं ॥१०॥

ययावित्यन्वयः ७ कुशप्लवं विशालायाः पूर्वस्यां नेतपोवनं ८ गुणसंपदा शुश्रूषोपयोगिगुणसमृद्ध्या ९ तामेव गुणसंपदामाह अग्निमित्यादि १०

॥१५५॥

पुत्रत्वाज्ञात्रसंवाहनानि श्रमापनयनैर्व्यजनादिभिरितिशेषः सर्वेषुकालेषुतस्याऽशुचित्वप्रतीक्षयेतिभावः
११ दशोने दशवर्षोने १२ १३ हेपुत्रयंपुत्रंगर्भहृत्य त्वत्कृतेत्वन्नाशार्थं याचितवतीतंतवजयोत्सुकंआधास्येवि

गात्रसंवाहनैश्चैव श्रमापनयनैस्तथा॥ शक्रः सर्वेषु कालेषु दितिं परिचचार ह॥११॥ पूर्णे वर्षसहस्रे
तु दशोने रघुनंदन॥ दितिः परमसंहृष्टा सहस्राक्षमथाब्रवीत्॥१२॥ तपश्चरंत्या वर्षाणि दश वीर्यव
तां वर॥ अवशिष्टानि भद्रं ते भ्रातरं द्रक्ष्यसे ततः॥१३॥ तमहं त्वत्कृते पुत्रं समाधास्ये जयोत्सुकं॥ त्रैलोक्य
विजयं पुत्र सह भोक्ष्यसि विज्वरः॥१४॥ याचितेन सुरश्रेष्ठ पित्रा तव महात्मना॥ वरो वर्षसहस्रान्ते म
म दत्तः सुतं प्रति॥१५॥ एवमुक्त्वा दितिस्तत्र प्राप्ते मध्यं दिनेश्वरे॥ निद्रयापहृता देवी पादौ कृत्वाथ
शीर्षतः॥१६॥

गतवैरंभ्रातरंस्नेहवंतमेवकरिष्येइत्यन्वयः त्रैलोक्यविजयंत्वमेतत्कृतंतेनसहभोक्ष्य
सि १४ याचितेनेतिशुश्रूषाकृतप्रीत्यतिशयाद्वरंविसृष्टवतीतिभावः १५ दिनेश्वरसूर्येमध्यंप्राप्तेसतिश
य्यायांशीर्षस्थानेपादौकृत्वादितिःनिद्रयापहृतागृहीतेत्यर्थः अनेनदि[illegible]यास्वापहृतपापेनशय्याय
रस्थानेमस्तककरणेनचाशुचित्वंसूचितं १६

पादयोःतत्स्थापनदेशेकृतमूर्द्धजांमूर्द्धजेसंबंधोजातस्वेत्यशुचित्वंतयाशिरःस्थानेनतयापादेकृतावतस्थ्य
नामशुचिंदृष्ट्वामुमोदप्राप्तच्छिद्रत्वादितिभावः १६ परमाप्रयानतिसावधानः १८ शतपर्वणाशतकोटि

दृष्ट्वातामशुचिंशक्रः पादयोः कृतमूर्धजां ॥ शिरःस्थानेकृतौपादौजहासचमुमोदच १७॥ तस्याः
शरीरविवरंप्रविवेशपुरंदरः ॥ गर्भंचसप्तधारामचिच्छेदपरमात्मवान् ॥१८॥ भिद्यमानस्ततोगर्भो
वज्रेणशतपर्वणा ॥ रुरोदसुस्वरंरामततोदितिरबुध्यत ॥१९॥ मारुदोमारुदश्चेतिगर्भंशक्रो
ऽभ्यभाषत ॥ बिभेदचमहातेजारुदंतमपिवासवः ॥२०॥ नहंतव्योनहंतव्यइत्येवंदितिरब्रवीत ॥ नि
पपातततःशक्रोमातुर्वचनगौरवात ॥२१॥ प्रांजलिर्वज्रसहितोदितिंशक्रोऽभ्यभाषत ॥ अशु
चिर्देविसुप्तासिपादयोःकृतमूर्द्धजा ॥२२॥ तदंतरमहंलब्ध्वाशक्रंहंतारमाहवे ॥ अभिंदंसप्तधा
देवितन्मेत्वंक्षंतुमर्हसि ॥२३॥ इत्यार्षेश्रीरामायणेवालकांडेषट्चत्वारिंशःसर्गः ॥४६॥

ना १८ अबुध्यतभिद्यमानगर्भस्यरोदनशब्देन १९ २० नहंतव्यःभेदनेकृतेपिप्राणवियोजनंमाकुर्वित्यर्थः २१
२२ अंतरमवकाशं क्षंतुमर्हसित्वहिंसापरंत्वामपिहिंस्यादितिन्यायेनयुक्तत्वादितिभावः २३ इतिषट्चत्वारिंशः सर्गः ४६

दुराधर्षंन्याय्योपायेनजेतव्यादित्याशयः १ ममापराधात्अशुचिरूपाकृत २ गर्भविपर्ययेगर्भविपत्तौयत्त्व
याकृतंकर्मतत्तथैवतुममचयथाभवतितथाइच्छामि तत्प्रकारमाहमरुतमितिसप्तानांमरुतांवातस्थानविशेषा
णांसप्तइमेत्वदधीनाःस्थानपालालोकरक्षिणोभवंत्वित्यन्वयः ३ तवैवमेवहेपुत्रकामाहन्ताइतिनाम्नाप्र
सिद्धाः दिव्यरूपाममपुत्राः येइमेवातस्कंधाइतिसप्तऊर्ध्वलोकेषुचरंत्वित्यन्वयः ४ एकस्मिन्एकोगताइत्यर्थः

सप्तधातुकृतेगर्भेदितिःपरमदुःखिता॥सहस्राक्षंदुराधर्षंवाक्यंसानुनयाब्रवीत्॥१॥ममापराधाद्
गर्भोयंसप्तधाशकलीकृतः॥नापराधोहिदेवेशतवात्रबलसूदन॥२॥प्रियंत्वत्कृतमिच्छामिममगर्भ
विपर्यये॥मरुतांसप्तसप्तानांस्थानपालाभवंतुते॥३॥वातस्कंधाइमेसप्तचरंतुदिविपुत्रकाः॥मारु
ताइतिविख्यातादिव्यरूपाममात्मजाः॥४॥ब्रह्मलोकेचरत्वेकइंद्रलोकेतथापरः॥दिव्यवायुरिति
ख्यातस्तृतीयोपिमहायशाः॥५॥

प्रथमंसप्तधाविभक्तस्यपुनरेकसः सप्तधाकरणामित्यस्यार्थस्यपुराणांतरेस्पष्टमुक्तत्वात्इहापिभेदश्चेत्या
दिनाख्यनितत्वाच्चेतिबोध्यं एवमपरइत्यादावपिव्याख्येयं दिव्यवायुःदिविक्षितेंतरिक्षभवइत्यर्थः ५ एम

॥१४७॥ दिशःपूर्वादिमहादिशःत्वत्कृतेमाहृतेमाहृद्इतिवचनमूल ६ ८ यथोक्तंब्रह्मादिस्थानपालकत्वं ८ मा
नावुत्रौहितीद्रौ ९ वरिष्ठेन्द्रचरितस्यप्रकृतशेषत्वमाह९षइति ८९षइत्यन्वयः १० एवंभूतेदेशोविशा

चत्वारस्तुसुरश्रेष्ठदिशोवैतवशासनात्॥संचरिष्यंतिभद्रंतेदेवभूनाममात्मजाः॥त्वत्कृतेनैवा
नाम्नावैमारुताइतिविश्रुताः॥६॥तस्यास्तद्वचनंश्रुत्वासहस्राक्षःपुरंदरः॥उवाचप्रांजलिर्वाक्यं
दितिंचबलसूदन॥७॥सर्वमेतद्यथोक्तंतेभविष्यतिनसंशयः॥विचरिष्यंतिभद्रंतेदेवरूपास्तवा
त्मजाः॥८॥एवंतौनिश्चयंकृत्वामातापुत्रौतपोवने॥जग्मतुस्त्रिदिवंरामकृतार्थाविति नः
श्रुतं॥९॥एषदेशःसकाकुत्स्थमहेंद्राध्युषितःपुरा॥दितिंयत्रतपःसिद्धामेवंपरिचचारसः
१०॥इक्ष्वाकोस्तुनरव्याघ्रपुत्रःपरमधार्मिकः॥अलंबुसायामुत्पन्नोविशालइतिविश्रुतः॥
११॥तेनचासीदिहस्थानेविशालेतिपुरीकृता॥१२॥विशालस्यसुतोरामहेमचंद्रोमहाबलः॥
सुचंद्रइतिविख्यातोहेमचंद्रादनंतरः॥१३॥सुचंद्रतनयोरामधूम्राश्वइतिविश्रुतः॥धूम्राश्वत
नयश्चापिसृंजयःसमपद्यत॥१४॥

लोत्पत्तिप्रकारमाहइक्ष्वाकोस्त्विति ११ विशालेतिकृताच्चासीदित्यन्वयः १२ कतरोवंशइतिप्रश्नस्योत्तरमाह ॥१४७॥

विशालोत्पत्त्यादि १३ १४

१५ १६ इमांपुरींसंप्रत्यावसतीत्यन्वयः १८ वैशालिकाःविशालानिवासोयेषांतेइत्यर्थः अनेनत्यत्समा

संजयस्यसुतःश्रीमान्सहदेवःप्रतापवान ॥ कुशाश्वःसहदेवस्यपुत्रःपरमधार्मिकः ॥१५॥ कुशा-
श्वस्यमहातेजाःसोमदत्तःप्रतापवान ॥ सोमदत्तस्यपुत्रोभूत्काकुत्स्थइतिविश्रुतः ॥१६॥ तस्य
पुत्रोमहातेजाःसंप्रत्येषपुरीमिमां ॥ आवसत्यमरप्रख्यःसुमतिर्नामदुर्जयः ॥१७॥ इक्ष्वाको
स्तुप्रसादेनसर्वेवैशालिकानृपाः ॥ दीर्घायुषोमहात्मानोवीर्यवंतःसुधार्मिकाः ॥१८॥ इहाद्य
रजनीमेकांसुखंस्वप्स्यामहेवयं ॥ श्वःप्रभातेनरश्रेष्ठजनकंद्रष्टुमर्हसि ॥१९॥ सुमतिस्तुम
हातेजाविश्वामित्रमुपागतं ॥ श्रुत्वानरवरश्रेष्ठःप्रत्यागच्छन्महायशाः ॥२०॥ पूजांचपरा
मोकृत्वासोपाध्यायःसबांधवः ॥ प्रांजलिःकुशलंपृष्ट्वाविश्वामित्रमथाब्रवीत् ॥२१॥

नचंक्रोपमितिसूचितं १९ अतएवाहइहाद्येति १९ २० २१

मममतइत्यर्थः २२ इतिसप्तचत्वरिंसःसर्गः ४७ अथरामस्यपरमरमणीयत्वंपरपावनत्वंचदर्शयतिपृष्ट्वेत्या
दिनापरस्परेत्यविभक्तिकोनिर्देशः परस्परंकुशलंपृष्ट्वाकथांतेसुमतिविश्वामित्रेणाकथ्यमानकथांतेसुम
तिर्वाक्यंव्याजहार १ इमौकुमाराविति कौसौकुमारौभावइतिविस्मयन्दर्शितोबोमाभूदित्याहभद्रंतइति देव

धन्योस्म्यनुगृहीतोस्मियस्यमेविषयंमुने॥ संप्राप्तोदर्शनाच्चैवनास्तिधन्यतरोमम॥२२॥इत्या
र्षेरामायणेवाल्मीकियेबालकांडेसप्तचत्वारिंशःसर्गः॥४७॥ पृष्ट्वातुकुशलंतत्रपरस्परसमा
गमे कथांतेसुमतिर्वाक्यंव्याजहारमहामुनिं॥१॥इमौकुमारौभद्रंतेदेवतुल्यपराक्रमौ॥गज
सिंहगतीवीरौशार्दूलवृषभोपमौ॥२॥

तुल्यपराक्रमौ दिव्यसंस्थानदर्शनेनदेवस्यविस्मोस्तुल्यपराक्रमाविन्यमहे गजसिंहगतीत्यादिनाचतुर्ग
तित्वमुच्यते गांभीर्यगमनेनगजतुल्यौपराभिभावार्हगमनेनसिंहतुल्यौभयंकरगमनेनशार्दूलतुल्यौ
सगर्वगमनेनवृषभसदृशावित्यर्थः २

पद्मपत्रवद्विशालेअक्षिणीययोस्तौ नयनलाचाऽपपरमकाष्ठापन्नावितियावत् महावीरत्वसूचकख
ड्गतूणीधनुर्धारिणौ रूपेणासाधारणधर्मेण अश्विनाविवस्थितौ समुपस्थितयौवनौ रूपानुरूपंप्राद्
र्भवद्यौवनौ ३ यदृक्षयाकस्याचित्स्वेच्छयादेवलोकाद्भुवमवतीर्णौअमराविवस्थितौ किमर्थंकिंवा

पद्मपत्रविशालाक्षौखड्गतूणीधनुर्धरौ॥ अश्विनाविवरूपेणसमुपस्थितयौवनौ॥३॥ यदृच्छ
येवगांप्राप्तौदेवलोकादिवामरौ॥ कथंपद्भ्यामिहप्राप्तौकिमर्थंकस्यवामुने॥४॥ भूषयंतावि
मंदेशंचंद्रसूर्याविवांवरं॥ परस्परेणसदृशौप्रमाणेंगितचेष्टितैः॥५॥ किमर्थंचनरश्रेष्ठौसं
प्राप्तौदुर्गमेपथिवरायुधधरौवीरौकस्यपुत्रौमहामुने॥ कस्यपुत्रौमुनिश्रेष्ठश्रोतुमिच्छामितत्त्वतः ६

१ प्रयोजनमुद्दिश्यकथंअतिसुमाँत्यात्केनप्रकारेणपद्भ्यामिहप्राप्तौकस्यवासुतावितिशेषः ४ भूषयंतौस्व
तेजसेतिशेषः प्रमाणेनशरीरेणत्वस्यादिइंगितंअंतराशयबोधकंचेष्टितंवचनगमनादितैस्तादृशपुरुषांतरा
भावात्परस्परसदृशौ ५ आदरातिशयात्पुनःपृच्छतिकिमर्थमिति दुर्गमेपथिकांतारे ६

॥१६६९॥ पयावर्त्ते इमौ दशरथकुमारौ पथि ताटकां हत्वाऽस्मयत्तरक्षस्त्रायसिद्धाश्रमंप्राप्यतत्रविघ्नकर्तॄन
राक्षसान्हत्वाजनकमखंद्रिदृक्षयैतद्देशमागताविति निवेदयत् ८ परममत्यंतमादरणीयौप्राप्तावतिथी
तौपूजयामासेत्यन्वयः ८ उष्यउषित्वा ९ पूजाप्रकारः साधुसाध्विति शंसन १० मिथिलायाः उप

तस्यतद्वचनंश्रुत्वायथावृत्तंन्यवेदयत्॥ विश्वामित्रवचःश्रुत्वाराजापरमविस्मितः ॥७॥ अतिथी
परमौप्राप्तौपुत्रौदशरथस्यतौ ॥पूजयामासविधिवत्सत्काराहौमहाबलौ ॥८॥ ततःपरमसत्कारे
सुमतेःप्राप्यराघवौ ॥उष्यतत्रनिशामेकांजग्मतुर्मिथिलांततः ॥९॥ तांदृष्ट्वामुनयःसर्वेजनकस्यपु
रींशुभां ॥साधुसाध्वितिशंसंतोमिथिलांसमपूजयन् ॥१०॥ मिथिलोपवनेतत्रआश्रमंदृश्यराघ
वः॥पुराणंनिर्जनंरम्यंपप्रच्छमुनिपुंगवं ॥११॥ श्रीमदाश्रमसंकाशंकिंत्विदंमुनिवर्जितं॥श्रोतु
मिच्छामिभगवन्कस्यायंपूर्वआश्रमः॥१२॥

समीपेवर्त्तमानंवनंतस्मिन्पुराणंनिर्जनंरम्यमाश्रमं
दृश्यदृष्ट्वा ११ मुनिराहित्यादाश्रमवाद्दस्याशक्यमतएवाश्रमसंकाशमाश्रमवदवभासमानंश्रइदंकिं ॥१६६९॥
नुतस्यैवविवरणंकस्यायंपूर्वः पूर्वस्यभूतः १२

१२ अहिल्यानुग्रहहेतुकालस्मृतिजसंतोषेहंतेति यस्यैतदाश्रमपदंभवतिमहात्मनः कोपाच्चयाशप्तंतत्तेकथयि-
ष्यामीत्यन्वयः १४ दिव्यसंकाशः शुभ आश्रमतुल्यः १५ अनेकानिवर्षपूगानि अनेकवर्षसमूहान् १६

तच्छ्रुत्वाराघवेणोक्तं वाक्यं वाक्यविशारदः॥ प्रत्युवाचमहातेजाविश्वामित्रोमहामुनिः॥१३॥ हंततेक-
थयिष्यामिशृणुतत्वेनराघव॥ यस्यैतदाश्रमपदं शप्तंकोपान्महामुनेः॥१४॥ गौतमस्यनरश्रे-
ष्ठपूर्वमासीन्महात्मनः॥ आश्रमोदिव्यसंकाशः सुरैरपिसुपूजितः॥१५॥ सचात्रतपआतिष्ठद-
हल्यासहितःपुरा॥ वर्षपूगान्यनेकानि राजपुत्रमहायशः॥१६॥ कदाचिद्दिवसेरामततोदूरगते
मुनौ॥ तस्यांतरंविदित्वाच सहस्राक्षः शचीपतिः॥ मुनिवेशधरोभूत्वाअहल्यामिदमब्रवीत्॥१७॥ ५
ऋतुकालंप्रतीक्षंतेनार्थिनःसुसमाहिते॥ संगमंत्वहमिच्छामित्वयासहसुमध्यमे॥१८॥

तस्यआश्रमस्यअंतरंमुनिसन्निधानरहितकालंमुनिवेषधरःगौतमवेषधरः १७ ऋतुकालंषोडशरात्र्युनि-
शात्रीरात्मिरुक्तकालं अर्थिनः कामसंभोगार्थिनः न प्रतीक्षंतेहे सुसमाहिते सम्यग्ब्रह्मणानिर्मिते अंगतिसुं

॥१५०॥

सहस्राक्षंविज्ञायकदाचिदपिमुनिनैवमभ्यर्थनाभावादिंद्रस्यैवात्मनिबहुकालमभिलाषश्रवणाच्चेतिभावः
१९ कृतार्थेनसंतुष्टेनअंतरात्मनामनसाउपलक्षिता २० इतस्त्वप्रकाशगमनादितिभावः २१ प्रहसन्

मुनिवेषंसहस्राक्षंविज्ञायरघुनंदन॥रतिंचकारदुर्मेधादेवराजकुतूहलात्॥१९॥अथाब्रवीत्सुर
श्रेष्ठंकृतार्थेनांतरात्मना॥२०॥कृतार्थास्मिसुरश्रेष्ठगच्छशीघ्रमितःप्रभो॥आत्मानंमांचदेवेशस
र्वथारक्षगौतमात्॥२१॥इंद्रस्तुप्रहसन्वाक्यमहल्यामिदमब्रवीत्॥सुश्रोणिपरितुष्टोस्मिगमिष्या
मियथागतं॥२२॥एवंसंगम्यतुतयानिश्चक्रामोटजात्ततः॥ससंभ्रमात्त्वरन्रामशंकितोगौतमंप्रति
२३॥गौतमंसंददर्शाथप्रविशंतंमहामुनिं॥देवदानवदुर्धर्षंतपोबलसमन्वितं॥२४॥तीर्थोदकप
रिक्लिन्नंदीप्यमानमिवानलं॥गृहीतसमिधंतत्रसकुशंमुनिपुंगवं॥२५॥

चिराभिलषितलाभात् २२ संगम्यअहल्ययासहेतिशेषःसइंद्रःसंभ्रमाद्गौतमभयात्त्वरन्निश्चक्रामे
त्यन्वयः निर्गमनसमयेगौतमंप्रतितदागमनंप्रतिशंकितश्चासीदितिशेषः २३ २४ अथनिष्क्रमणानंतरमे
वपरिक्लिन्नंस्नात्वागतं २५

॥१५०॥

विषणावदनस्वतमुखः २६ २७ विफलः विगतवृषणा २८ २९ ३० कथं निवासमात्रस्य शापत्वमिति तद्वि
वृणोति वातभक्षेति वातमात्रभक्षा तदतिरिक्ताहाराभावाद्वाचाच्च निरातप्यंती स्वकर्मलोतिशेषः तादृ

दृष्ट्वा सुरपतिस्त्रस्तो विषसावदनोभवत् ॥२६॥ अथ दृष्ट्वा सहस्राक्षं मुनिवेषधरं मुनिः ॥ दुर्वृत्तं वृजनसं
पन्नो रोषाद्वचनमब्रवीत् ॥२७॥ मम रूपं समास्थाय कृतवानसि दुर्मते ॥ अकर्तव्यमिदं यस्माद्विफल
स्त्वं भविष्यसि ॥२८॥ गौतमेनैवमुक्तस्य सरोषेण महात्मना ॥ पेततुर्वृषणौ भूमौ सहस्राक्षस्य तत्क्षणा
त ॥२९॥ तथा शप्त्वा च वै शक्रं भार्यामपि च शप्तवान् ॥ इह वर्षसहस्राणि बहूनि निवसिष्यसि ॥३०॥
त
वातभक्षा निराहारा तप्यंती भस्मशायिनी ॥ अदृश्या सर्वभूतानामाश्रमेस्मिन्वसिष्यसि ॥३१॥ यदा त्वे
तद्वनं घोरं रामो दशरथात्मजः ॥ आगमिष्यति दुर्धर्षस्तदा पूता भविष्यसि ॥३२॥

स्यापि भस्मशायिनी न तु स्थिता स्वरूपेण सर्वभूतानामदृश्या शिलाप्रतिमारूपेण तु सर्वदृश्येत्यर्थः ३१
शापांतमाह यदेति घोरमित्यनेन मुनिराहित्यसूचनं रामो यदा वनं प्रत्यागमिष्यति तदा श्रीरामपादारविं
दरजःकणस्पर्शादेव पूता भविष्यसि ३२

॥१५१॥ ततो मत्सकाशं मत्सान्निध्यं प्राप्ता स्वं वपुः पूर्ववत्सर्वदृश्यं भस्मानावृतं धारयिष्यसि प्राप्स्यसीत्यर्थः ३३ ३४ अ
ष्टचत्वारिंशः सर्गः ४८ अफलः अपगतवृषणः त्रस्तेति त्रासेन स्वकारणं दैन्यं व्यज्यते १ सुरकार्यमि
ति अन्यथा ह्यमुनतपसा सकलदेवस्थानापहारस्तेन कृतः स्यादिति भावः २ ननु गौतमेन भवान् अफलः कृ

तस्यातिथ्येन दुर्वृत्ते लोभमोहविवर्जिता ॥ मत्सकाशं मुदा युक्ता स्वं वपुर्धारयिष्यसि ॥३३॥ एवमुक्त्वा
महातेजा गौतमो दुष्टचारिणीं इममाश्रममुत्सृज्य सिद्धचारणसेविते हिमवच्छिखरे रम्ये तपस्ते
पे महातपाः ॥३४॥ इत्यार्षे रामायणे बालकांडेऽष्टचत्वारिंशः सर्गः ॥४८॥ अफलस्तु ततः शक्रो देवा
नग्निपुरोगमान् ॥ अब्रवीत्त्रस्तनयनः सिद्धगंधर्वचारणान् ॥१॥ कुर्वता तपसो विघ्नं गौतमस्य म
हात्मनः क्रोधमुत्पाद्य हि मया सुरकार्यमिदं कृतं ॥२॥ अफलोऽस्मि कृतस्तेन क्रोधात्सा च निराकृता
शापमोक्षेण महता तपोऽस्यापहृतं मया ॥३॥ तन्मां सुरवराः सर्वे सर्षिसंघाः सचारणाः ॥ सुरकार्यकरं
सर्वे सफलं कर्तुमर्हथ ॥४॥ ततः सा अहल्या दुष्टचारित्रेति निराकृता शापपूर्वं त्यक्ता एवमपि सुरकार्य
निष्पत्तिः कथं तत्राह शापेनेति स्वस्मिन् गौतमकर्तृकशापमोक्षेण नास्य तपो मयापहृतं महता शापमोक्षेण ॥१५१॥
विना महत्तपोऽपहरणं न स्यादिति तथा कृतमित्याशयः ३ हे सर्वे सुरवराः सर्वे यूयमिति सर्वेशब्दद्वयनिर्वाहः ४

पितृदेवाःकव्यवाहनाद्यःतानुपेत्यहव्यवाहनाद्यग्निमुखेनाहुः अग्नेस्तुवचनंश्रुत्वेतिवक्ष्यमाणत्वात्
५ अयंमेषःयोभवतांहविष्षुनकल्पितोमेषः गृहंगृहीत्वाअफलस्त्विति नन्विदमयुक्तंनहिमेषाअव
षणाः इष्यंतइतिचेन्नभवदुद्देशेनकृतोहविष्षुनकल्पितोयोऽफलःशंनरोमेषः यद्वावृषणाभिन्नोयोमेषो

शतक्रतोर्वचःश्रुत्वादेवाःसाग्निपुरोगमाः॥पितृदेवानुपेत्याहुःसर्वेसहमरुद्गणाः॥५॥अयंमेषःसवृष
णःशक्रोह्यवृषणःकृतः॥मेषस्यवृषणौगृह्यशक्रायाशुप्रदीयतां॥अफलस्तुकृतोमेषःपरांतु
ष्टिंप्रदास्यति॥६॥भवतांहर्षणार्थंचयेचदास्यंतिमानवाः॥अक्षयंहिफलंतेषांप्रदास्यथपुष्क
लं॥७॥अग्नेस्तुवचनंश्रुत्वापितृदेवाःसमागताः॥उत्पाट्यमेषवृषणौसहस्राक्षेन्यवेशयन्॥८॥त
दाप्रभृतिकाकुत्स्थपितृदेवाःसमागताः॥अफलान्भुंजतेमेषान्फलैस्तेषामयोजयन्॥९॥इंद्रस्तुमे
षवृषणस्तदाप्रभृतिराघव॥गौतमस्यप्रभावेनतपसाचमहात्मनः॥१०॥

मेषावयवोभवद्धविष्षुनकल्पितःसभवतांपरांतुष्टिंदास्यतीत्यन्वयात् ६ येचअफलंमेषंभवतांहर्षणा
र्थंभवद्भ्योदास्यंतितेषामक्षयंफलंपूर्णंदास्यथेत्यन्वयः ७ समागताःमिलिताः ८ अफलान्दत्तान्तदंशर
हितान्यामेषान्भुंजतेयतस्तेषांफलैःफलाभ्यांमिंद्रमयोजयन् ९ तदाप्रभृतिततोहेतोःइंद्रोमेषवृषणः
इत्यन्वयःतपसाप्रभावेनतपकृतप्रभावेनचस्वापचारेणच १०

महातेजः हे राम एनां महाभागां अत्र त्वत्पादस्पर्शनेन मुक्तशापतया देवरूपिणीमहल्यां तारय भर्त्रे प्रत्याप
तिफलकमातिष्ठं गृहीत्वा भर्त्रे प्रापणेनैनामनुगृहाण ११ १२ रामसन्निधानमात्रेणाहल्या मुक्तशापा
स्वरूपं प्राप्येत्याह ददर्शी चेति श्लोकत्रयेण सरामो महाभागामहल्यां ददर्शी तपसा भगवद्दालोचनेन द्योतिता
पूर्वन्तोपतिशयिता प्रभा यस्यास्तां अत एव लोके मानुषैः सुरासुरैरपि समागम्य समीपमागत्य दुर्निरीक्ष्यां १३

तदागच्छ महातेज आश्रमं पुण्यकर्मणः॥ तारयैनां महाभागामहल्यां देवरूपिणीं ॥११॥ विश्वामि
त्रवचः श्रुत्वा राघवः सहलक्ष्मणः॥ विश्वामित्रं पुरस्कृत्य आश्रमं प्रविवेश ह ॥१२॥ ददर्श च म
हाभागां तपसा द्योतितप्रभां लोकैरपि समागम्य दुर्निरीक्ष्यां सुरासुरैः ॥१३॥ प्रयत्नान्निर्मितां धात्रा
दिव्यां मायामयीमिव ॥ धूमेनाभिपरीतांगीं दीप्तामग्निशिखामिव ॥१४॥ सतुषारावृतां साभ्रां पू
र्णचंद्रप्रभामिव ॥ मध्येंभसो दुराधर्षां दीप्तां सूर्यप्रभामिव ॥१५॥

धात्राप्यतिप्रयत्नेन रचितां दिव्यां अप्रतिमानुषलावण्यशालिनीं मायामयीमिव मायानिर्मितामिव विस्मयक
रीमित्यर्थः धूमेनाभिपरीतानि व्याप्तानि अंगानि यस्यास्तां दीप्तामग्निशिखामिव १४ सतुषारावृतां अभ्रा
वृतमावरणं भावे क्तः तुषार एवावरणं तेन सहितां साभ्रां पूर्णचंद्रप्रभामिव अंभसलक्षणया तज्जनकमेघस्य म
ध्यस्थां सूर्यप्रभामिवेत्युपमानत्रयोपमेयां भस्मावगुंठितदिव्यदेहामहल्यां रामो ददर्शेति पूर्वेणान्वयः दुरा

धर्मांस्वसुमहाभागम १५

तयादर्शने हेतुमाह साहीति यावद्रामस्य दर्शनं रामदर्शनमवधिं कृत्वा त्रयाणामपि लोकानां गौतमवाक्येन शापहेतुना दुर्निरीक्ष्या बभूव आसीत् १६ रामदर्शनेन शापस्यांतं शापनिवृत्तिं उपागम्य प्राप्य तेषां विश्वामित्रश्रीरामलक्ष्मणानां दर्शनविषयत्वं आगता प्राप्तेत्यर्थः शापेन शिलात्वप्राप्तिरपि पुराणे प्रसिद्धा तथा च पाद्मे गच्छतस्तस्य रामस्य पादस्पर्शान्महाशिला काचिद्योषाभवत्सोपि विस्मितो मुनिरब्रवीत् शापदग्धा पुरा भर्त्रा

साहि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह त्रयाणामपि लोकानां यावद्रामस्य दर्शनं १६ शापस्यांतमुपागम्य तेषां दर्शनमागता १७ राघवौ तु तदा तस्याः पादौ जगृहतुर्मुदा स्मरंती गौतमवचः प्रतिजग्राह सा हि तौ १८

रामशक्रापराधतः अहल्याख्या शिला जाते शतलिंगीकृतः स्वराट् त्वदंघ्रिस्पर्शनात्तस्यै शापांतं प्राह गौतमः तस्मादियं ते पादाब्जस्पर्शाच्छुद्धा भवत्सुभो इति १७ न तावत्पादस्पर्शमात्रेण शिलाहल्यतावतिस्याशि राघवौ तस्याः पादौ जगृहतुः साहि अहल्या गौतमवचः स्मरंती महाश्रमप्राप्तराघवपूजया पुनर्मत्संबंधस्तेवेतद्वचः स्मरंती तौ रामपादाजग्राह स्वघुव्रतानाम तौ राममलक्ष्मणौ प्रतिजग्राह पूज्यत्वबुद्धिमकरोदिति तु नार्थः आद्ये काकुत्स्थ इत्येकवचनप्रयोगात् १८

सुसमाहिताऽप्रमत्ता विधिदृष्टेनशास्त्रदृष्टेन १९ देवदुंदुभिनिःस्वनैःसहपुष्पवृष्टिरासीत्‌रामस्याऽऽह
ल्यायाश्चेत्यर्थः २० तपोवललब्धरामपादस्पर्शेनविशुद्धांगीऽप्रतस्यगौतमस्यवशानुगांतऊतचिंता

पाद्यमर्घ्यंतथातिथ्यंचकारसुसमाहिता॥प्रतिजग्राहकाकुत्स्थोविधिदृष्टेनकर्मणा॥१९॥पुष्पवृ
ष्टिर्महत्यासीद्देवदुंदुभिनिःस्वनैःगंधर्वाप्सरसांचैवमहानासीत्समुत्सवः॥२०॥साधुसाध्वितिदे
वास्तामहल्यांसमपूजयन्॥तपोवलाविशुद्धांगींगौतमस्यवशानुगां॥२१॥गौतमोपिमहातेजाअ
हल्यासहितःसुखी॥रामंसंपूज्यविधिवत्तपस्तेपेमहातपाः॥२२॥रामोपिपरमांपूजांगौतमस्यम
हामुनेःसकाशाद्विधिवत्प्राप्यजगाममिथिलांततः॥२३॥इत्यार्षेरामायणेवालकांडेएकोनपंचाशःसर्गः॥४९

अतएवपूर्वंपरत्रकालेचशरीरेणापितदनुगां २१ अहल्यासहितइत्यनेनयोगवलाद्रामागमनंतामस्वाहृ
टितितदाश्रममाप्तिर्गौतमस्येतिवोध्यं २२ २३ इत्येकोनपंचाशःसर्गः ४९

एवरामस्यपरमपावनत्वमुक्तं अथसीतावृत्तांतंप्रस्तौतिततःप्रागित्यादिना प्राच्याउत्तरस्यादिशोरंतरालं
ऐशानींदिशमित्यर्थः ततःतस्मादाश्रमाद्यज्ञवाटंजनकस्येतिशेषः १ यज्ञसमृद्धिःयज्ञसंभारसामग्री

ततःप्रागुत्तरांगत्वारामःसौमित्रिणासह॥विश्वामित्रंपुरस्कृत्ययज्ञवाटमुपागमत्॥१॥रामस्तुमुनि
शार्दूलमुवाचसहलक्ष्मणः॥साध्वीयज्ञसमृद्धिर्हिजनकस्यमहात्मनः॥२॥बहूनीसहस्राणिना ह
नादेशनिवासिनां॥ब्राह्मणानांमहाभागवेदाध्ययनशालिनां॥३॥ऋषिवाटाश्चदृश्यंतेशकटी
शतसंकुलाः॥देशोविधीयतांब्रह्मन्यत्रवत्स्यामहेवयं॥४॥रामस्यवचनंश्रुत्वाविश्वामित्रो
महामुनिः॥निवासमकरोद्देशेविविक्तेसलिलायुते॥५॥विश्वामित्रमनुप्राप्तंश्रुत्वानृपवरस्त
दा॥शतानंदंपुरस्कृत्यपुरोहितमनिंदितः॥६॥

२ नामवाहुबहूनीति नानादेशनिवासिनांब्राह्मणानां
बहूनिसहस्राणिइहजनकयागभूमौसंतीतिशेषः ३ किंचअग्निहोत्रसंभारवाहनभूतानांशकटीनां
शतैःसंकुलाःऋषिवाटाःमुनिवासस्थानानिदृश्यंतेअतोबहुसंकुलत्वेनदेशोनिवासस्थानंविधीयतां४
विविक्तेसलिलायुतेइत्यनेनानुष्ठानसौकार्यं ५ विश्वामित्रमित्यादिश्लोकद्वयमेकान्वयं ऋत्विजोपी
त्यत्रपुरस्कृत्येत्यनुकर्षः महात्मानइतिदीपार्थेप्रथमा ६

॥१५४॥ ६ धर्मेणाधर्मेशास्त्रमार्गेणार्घ्यमिति शेषः धर्मपुरस्कृतमित्यर्घ्यविशेषणं महाजं वा महोक्षं वा श्रोत्रियायो
पकल्पयेदिति शास्त्रोक्तेन धनेन पुरस्कृतं तत्सहितमिति यावत् ७ निरामयं निरुपप्लवम् ८ स विश्वामित्रः ता
नग्रर्घ्यदातॄन्सोपाध्यायपुरोधसः उपाध्यायाः ऋत्विजः पुरोधाः शतानंदः तत्सहितांस्तान्कुशलं पृष्ट्वा स

ऋत्विजोपि महात्मानस्त्वर्घ्यमादाय सत्वरं ॥ प्रत्युज्जगाम सहसा विनयेन समन्वितः ॥ ७ ॥ वि
श्वामित्राय धर्मेण ददौ धर्मपुरस्कृतं ॥ ८ ॥ प्रतिगृह्य तु तां पूजां जनकस्य महात्मनः ॥ पप्रच्छ कुश
नक लं राज्ञो ज्ञस्य निरामयं ॥ ९ ॥ स तांश्चाथ मुनीन्पृष्ट्वा सोपाध्यायपुरोधसः ॥ यथार्हमृषिभिः
सर्वैः समागच्छत्प्रहृष्टवत् ॥ १० ॥ अथ राजा मुनिश्रेष्ठं कृतांजलिरभाषत ॥ आसने भगवानास्तां
सहैभिर्मुनिपुंगवैः ॥ ११ ॥ जनकस्य वचः श्रुत्वा निषसाद महामुनिः ॥ पुरोधा ऋत्विजश्चैव राजा च
सह मंत्रिभिः ॥ १२ ॥

वैर्जनैर्यथार्हं यथान्यायं प्रहृष्टवत्तोषसहितं यथा भवति तथा समागच्छत्संगतो बभूवेत्यर्थः १० ११ राजा चेति ॥१५४॥
विश्वामित्रवचनादित्यर्थः १२

दृष्ट्वेतिउपविष्टान्तानित्यादि १३ यज्ञसमृद्धिरंगवैकल्यराहित्यंसाद्गुण्यंच अतएवसफलाकृताऽद्येतिविशेषः
१४ तत्राहेतुमाह यज्ञोपसदनमिति यज्ञस्थानमित्यर्थः १५ द्वादशाग्रहानिसमाहृतानिद्वादशाहंद्वादशदिनाम
वशिष्टानियज्ञस्येतिमनीषिण ऋत्विजआहुः भागार्थिनोदेवानितिद्वादशदिनांतेसुत्याहोमोभविष्यतिते

आसनेषुयथान्यायमुपविष्टाःसमंततः॥दृष्ट्वासनृपतिस्तत्रविश्वामित्रमथाब्रवीत्॥१३॥अद्ययज्ञसम
द्धिर्मेसफलादैवतैःकृता॥अद्ययज्ञफलंप्राप्तंभगवद्दर्शनान्मया॥१४॥धन्योस्म्यनुगृहीतोस्मियस्यमे
मुनिपुंगव॥यज्ञोपसदनंब्रह्मन्प्राप्तोसिमुनिभिःसह॥१५॥द्वादशाहंतुब्रह्मर्षेशेषमाहुर्मनीषिणः॥त
तोभागार्थिनोदेवान्द्रष्टुमर्हसिकौशिक॥१६॥इत्युक्त्वामुनिशार्दूलंप्रहृष्टवदनस्तदा॥पुनस्तंपरिप
प्रच्छप्रांजलिःप्रयतोनृपः॥१७॥इमौकुमारौभद्रंतेदेवतुल्यपराक्रमौ॥गजसिंहगतीवीरौशार्दूलवृष
भोपमौ॥१८॥

त्यर्थः १६ प्रहृष्टवदन इतिपरदैवतसाक्षात्कारादितिभावः १७ इमौकुमारावित्यादिगजसिंहगतीगजवद्धीरमंदग
ती सिंहवदप्रतिहतगती यद्वाप्रभुत्वाद्गजगतीरामःसिंहगतिर्लक्ष्मणः तथाशार्दूलाकृतीरामोवृषभाकृतिर्ल

१९ २० पद्भ्यांवाहनरहिताभ्यां पद्मपत्रकोमलत्वात्कथमेतावद्दूरंप्राप्तावितिविस्मयः किमर्थमितिप्रयो

पद्मपत्रविशालाक्षौखड्गतूणधनुर्धरौ॥ अश्विनाविवरूपेणसमुपस्थितयौवनौ॥१९॥ यदृच्छयेवगां
प्राप्तौदेवलोकादिवामरौ॥ पुंडरीकविशालाक्षौवरायुधधरावुभौ॥२०॥ वद्धगोधांगुलित्राणौखड्गवं
तौमहाद्युती॥ कथंपद्भ्यामिहप्राप्तौकिमर्थंकस्यवामुने॥२१॥ वरायुधधरौवीरौकस्यपुत्रौमहामुने
भूषयंताविमंदेशंचंद्रसूर्याविवांबरं॥२२॥ परस्परस्यसदृशौप्रमाणेंगितचेष्टितैः॥ काकपक्षधरौवी
रौकुमाराविवपावकी॥२३॥ रूपौदार्यगुणैःपुंसांदृष्टिचित्तापहारकौ॥ प्रकाशयकुलमस्माकंमामु
द्धर्तुमिहागतौ॥२४॥ जस्यतद्वचनंश्रुत्वाजनकस्यमहात्मनः॥ न्यवेदयदमेयात्मापुत्रौदशरथ
स्यतौ॥२५॥ सिद्धाश्रमनिवासंचराक्षसानांवधंतथा॥ तत्रागमनमव्यग्रंविशालायाश्चदर्शनं॥
२६॥

जनप्रश्नः कस्यवेतिपुत्रौइतिशेषः २१ उत्तरश्लोकोक्तस्यैवविवरणं २२ २३ २४ तौदशरथस्यपुत्रावितिन्यवे
दयदित्यर्थः २५ तत्रागमनमव्यग्रंरक्षःसमाक्रांतेपिमार्गेभयरहितमागमनं २६

जिज्ञासां सारासारपरीक्षां २७ २८ इति पंचाशः सर्गः ५० अथाचार्यवैभवस्य तेयत्वाभिप्रायेण तत्राचार्यविश्वामि
त्रचरित्रं प्रस्तौति तस्य तद्वचनमित्यादिना पंचदशभिः सर्गैः हृष्टरोमा स्वमातुः शापोद्धरश्रवणजसंतोषेण जा

अहल्यादर्शनं चैव गौतमेन समागमं ॥ महाधनुषि जिज्ञासां कर्तुमागमनं तथा ॥२७॥ एतत्सर्वं महाते
जा जनकाय महात्मने ॥ निवेद्य विररामाथ विश्वामित्रो महामुनिः ॥२८॥ इत्यार्षे रामायणे वाल्मीकी
ये बालकांडे पंचाशः सर्गः ॥५०॥ तस्य तद्वचनं श्रुत्वा विश्वामित्रस्य धीमतः ॥ हृष्टरोमा महातेजाः श
तानंदो महातपाः ॥१॥ गौतमस्य सुतो ज्येष्ठस्तपसा द्योतितप्रभः ॥ रामसंदर्शनादेव परं विस्मयमागतः ॥२॥
स तौ निषण्णौ संप्रेक्ष्य शतानंदो नृपात्मजौ ॥ सुखासीनौ मुनिश्रेष्ठं विश्वामित्रमथाब्रवीत् ॥३॥ अपि ते
मुनिशार्दूल मम माता यशस्विनी ॥ दर्शिता राजपुत्राय तपो दीर्घमुपागता ॥४॥

तरामांच १ परं विस्मयमिति अहो महिमा रामस्य यन्मे माता कृतार्थीकृतेति विस्मयं प्राप्तोऽभूदित्यर्थः २ नि
षण्णावित्यस्य विवरणं सुखासीनाविति ३ उक्तमप्यर्थमुत्कंठातिशयेन पुनः पृच्छति अपि ते इति अपि प्रश्ने ते
त्वया ४

सर्वदेहिनां पूजार्हे रामे रामविषये वन्यैः कंदमूलफलादिभिः पूजामुपाहरत् किं ५ अपि प्रश्ने हे महातेजः देवेन
इंद्रेण मम मातुर्विषये दुरनुष्ठानरूपं यद्व्रतं पुरातनं तद्रामाय कथितमित्यन्वयः ६ हे कौशिक रामसंदर्शनादि

अपि रामे महाभागा मम माता यशस्विनी ॥ वन्यैरुपाहरत्पूजां पूजार्हे सर्वदेहिनां ॥ ५ ॥ अपि रामाय कथितं
यद्व्रतं तत्पुरातनं ॥ मम मातुर्महातेजो देवेन दुरनुष्ठितं ॥ ६ ॥ अपि कौशिक भद्रं ते गुरुणा मम संगता
मम माता मुनिश्रेष्ठ रामसंदर्शनादितः ॥ ७ ॥ अपि मे गुरुणा रामः पूजितः कुशिकात्मज ॥ इहागतो
महातेजाः पूजां प्राप्य महात्मनः ॥ ८ ॥ अपि शांतेन मनसा गुरुर्मे कुशिकात्मज ॥ इहागतेन रामेण
पूजितेनाभिवादितः ॥ ९ ॥

तः रामसंदर्शनचरणस्पर्शनपूजादिभिर्गतशापेति शेषः मम माता मम गुरुणा संगता किं ७ महातेजा रामः मद्गु
रोः सकाशात्पूजां प्राप्य इह यज्ञभूमावागत इति प्रश्नस्यैवार्थस्य भंग्यंतरेण प्रश्नः ८ शांतेन मनसा उपल
क्षितो मे गुरुरिहागतेन गौतमाश्रमे आगतेन गौतमपूजितेन रामेण अभिवादितः ननु मन्मातृदोषादुपेक्षित इ
ति प्रश्नांतरे ९

यत्कर्त्तव्यंतन्नातिक्रांतंनविस्मृतंकिंतुमयाकृतमेवेत्यर्थः भार्गवोजमदग्निःतत्कोपहर्त्तारेणुकायथाजम
दग्निनासंगतनातद्वदित्यर्थः ११ १२ द्विषताभार्गवेन १३ विश्वामित्रप्रयत्नादेवेहरामागमनंततएवाचमा

तच्छ्रुत्वावचनंतस्यविश्वामित्रोमहामुनिः प्रत्युवाचशतानंदंवाक्यज्ञोवाक्यकोविदं ॥१०॥ नातिक्रांतंमु
निश्रेष्ठयत्कर्त्तव्यंकृतंमया॥ संगतामुनिनापत्नीभार्गवेणेवरेणुका॥११॥ तच्छ्रुत्वावचनंतस्यविश्वा
मित्रस्यधीमतः॥ शतानंदोमहातेजारामंवचनमब्रवीत॥१२॥ स्वागतंतेनरश्रेष्ठदिष्ट्याप्राप्तोसिराघ
व॥ विश्वामित्रंपुरस्कृत्यमहर्षिमभिपूजितं ॥१३॥ अचिंत्यकर्मातपसाब्रह्मर्षिरमितप्रभः॥ विश्वा
मित्रंमहाबाहोवेत्स्येनंपरमांगतिं ॥१५॥

तुःशापाद्भ्रादितितंस्तौतिअचिंत्येत्यादिना मनसाप्यन्येनाशक्यचिंतनसृष्ट्यादिकर्त्ता तपसाब्रह्मर्षिःत
पसाप्राप्तब्रह्मर्षिभावःपरमांगतिंतवममचप्रीतिपदंवेत्सीतिकाकुः १४

प्रजापतिसुतस्त्वासीत्कुशोनाममहीपतिः कुशासपुत्रोबलवान्कुशनाभःसुधार्मिकः १८

॥१५७॥ तदेवाह नास्तीति धन्यत्वेहेतुःगोप्त्रेति अस्त्रदानादिनेतिशेषः येनकुशिकपुत्रेण १५ बलंतपोबलंयथाया

नास्तिधन्यतरोरामत्वत्तोन्योभुविकश्चन॥गोप्ताकुशिकपुत्रस्तेयेनतप्तंमहत्तपः॥१५॥श्रूयतांचाभिधा
स्यामिकौशिकस्यमहात्मनः॥यथाबलंयथावृत्तंतन्मेनिगदतःशृणु॥१६॥राजासीदेषधर्मात्मा
दीर्घकालमरिंदमः॥धर्मज्ञःकृतविद्यश्चप्रजानांचहितेरतः॥१७॥कुशनाभसुतस्त्वासीद्गाधिरि
त्येवविश्रुतः॥गाधेःपुत्रोमहातेजाविश्वामित्रोमहामुनिः॥१९॥विश्वामित्रोमहातेजाःपालया
राजा मासमेदिनीं॥बहुवर्षसहस्राणिराज्यमकारयत्॥२०॥कदाचित्तुमहातेजायोजयित्वावरूथिनीं॥
अक्षौहिणीपरिवृतःपरिचक्राममेदिनीं॥२१॥

दृष्टांतत्वंब्रह्मर्षित्वंचतद्यथावच्छृणुइत्यर्थः १६ १७ सराजाकस्यपुत्रस्तत्राहप्रजापतीत्यादि १८ अक्षौ
रपतत्यायित्वासमुपस्थाप्यतद्रूपाक्षौहिणीसंख्यासेनापरिवृतोभूत्वामेदिनींपरिचक्राम २१ ॥१५७॥

२२ २३ तपोतिशयात्प्रशांतहरिणात्वम् २४ ज्ञानमात्राधिकृतानारण्याव्रह्मर्षयः ज्ञानकर्मोभयाधिकृता

नगराणिचराष्ट्राणिसरितश्चमहागिरीन् ॥ आश्रमान्क्रमशोराजाविचरन्नाजगामह ॥२२॥ वसिष्ठ
स्याश्रमपदंनानापुष्पलताद्रुमं ॥ नानामृगगणाकीर्णंसिद्धचारणसेवितं ॥२३॥ देवदानवगंध
र्वैःकिन्नरैरुपशोभितं ॥ प्रशांतहरिणाकीर्णंद्विजसंघनिषेवितं ॥२४॥ व्रह्मर्षिगणसंकीर्णंदेव
र्षिगणसेवितं ॥ तपश्चरणसंसिद्धैरग्निकल्पैर्महात्मभिः ॥२५॥ सततंसंकुलंश्रीमद्व्रह्मकल्पैर्महात्म
भिः ॥ अब्भक्षैर्वायुभक्षैश्चशीर्णपर्णाशनैस्तथा ॥२६॥ फलमूलाशनैर्दांतैर्जितरोषैर्जितेंद्रियैः ॥
ऋषिभिर्वालखिल्यैश्चजपहोमपरायणैः ॥ अन्यैर्वैखानसैश्चैवसमंतादुपशोभितं ॥२७॥

व्रह्मर्षयोभृगुप्रतिषाः अग्नितुल्यैर्ऋषिभिःसंकुलंव्याप्तमित्यन्वयः २५ तथाव्रह्मकल्पैश्चतुर्मुखतुल्यैः अब्भ
क्षैस्तन्मात्रभक्षैःसंकुलं २६ दांतैर्नियतमनस्कैःवालखिल्यैःव्रह्मरोमनखजावालखिल्यावैखानसाश्चये
नखास्तेवैखानसायेवालास्तेवालखिल्याइतिश्रुतेः २७

॥१५८॥ जपतांशूरराणांवशिष्ठस्याश्रमवैभववर्णनमेवंभूतेनापिमहर्षिणासंमानितोविश्वामित्रइतितस्यैववैभव
कथनार्थं २८ इत्येकपंचाशः सर्गः ५१ तमित्यादिश्लोकद्वयमेकान्वयं: तंतथाभूताश्रमनिवासिनांवशि

वसिष्ठस्याश्रमपदंब्रह्मलोकमिवापरं॥ ददर्शजयतांश्रेष्ठोविश्वामित्रोमहाबलः ॥ २८ ॥ इत्यार्षे
रामायणेबालकांडेएकपंचाशः सर्गः॥ ५१ ॥ तंदृष्ट्वापरमप्रीतोविश्वामित्रोमहाबलःप्रणतोविनया
द्वीरोवसिष्ठंजपतांवरं॥ १ ॥ स्वागतंतवचेत्युक्तोवसिष्ठेनमहात्मना॥ आसनंचास्यभगवान्वसिष्ठो
व्यादिदेशह॥ २ ॥ उपविष्टायचतदाविश्वामित्रायधीमते॥ यथान्यायंमुनिवरःफलमूलमुपाह
रत्॥ ३ ॥ प्रतिगृह्यतुतांपूजांवसिष्ठाद्राजसत्तमःतपोग्निहोत्रशिष्येषुकुशलंपर्यपृच्छत॥ ४ ॥
विश्वामित्रोमहातेजावनस्पतिगणेतदा॥ सर्वत्रकुशलंप्राहवसिष्ठोराजसत्तमं॥ ५ ॥

तंदृष्ट्वापरमेप्रीतोविश्वामित्रोविनयाद्वशिष्ठंप्रणतोवशिष्ठेनस्वागतमित्युक्तोऽभूदितिशेषः भगवान्
वशिष्ठोस्यासनंचव्यादिदेशप्रदाययदित्यर्थः १ २ फलमूलमितिजात्भिप्राणिनामित्येकवचनं ३ ॥१५८॥
४ वनस्पतिविषयेपिकुशलंपर्यपच्छत्सर्वत्रपक्षविषये ५

जपतांतपस्विनां ६ कच्चिदितिप्रश्नेहेधार्मिकधर्मेणत्वदनुष्ठानेनप्रजारंजयन् राजवृत्तेनन्यायेनार्जनम
र्थस्यवर्द्धनंपालनंतथासत्पात्रेप्रतिपत्तिश्च राजवृत्तंचतुर्विधमित्युक्तोनराजवृत्तेनपालयसेइत्यन्वयः ७

सुखोपविष्टंराजानंविश्वामित्रंमहातपाः॥ पप्रच्छजपतांश्रेष्ठोवसिष्ठोब्रह्मणःसुतः॥६॥ कच्चित्तेकु
शलंराजन्कच्चिद्धर्मेणरंजयन्॥ प्रजाःपालयसेराजन्राजवृत्तेनधार्मिक॥७॥ कच्चित्तेसंभृ
ताभृत्याःकच्चित्तिष्ठंतिशासने॥ कच्चित्तेविजितास्सर्वेरिपवोरिपुसूदन॥८॥ कच्चिद्बलेषुको
शेषुमित्रेषुचपरंतप॥ कुशलंतेनरव्याघ्रपुत्रपौत्रेतथानघ॥९॥ सर्वत्रकुशलंराजावसिष्ठंप्रत्यु
दाहरत्॥ विश्वामित्रोमहातेजावसिष्ठंविनयान्वितः॥१०॥ कृत्वातौसुचिरंकालंधर्मिष्ठौताःकथा
स्तदा॥ मुदापरमयायुक्तौप्रीयेतांतौपरस्परं॥११॥

संभृतावेतनदानादिना ८ बलेषुचतुरंगेषुकोशेषुद्रव्यसमूहेषुपुत्रपौत्रे गवाश्वप्रभृतित्वादेकत्वं ९
एकोवसिष्ठशब्दोवरिष्ठवाची १० ताःकथाःअन्योन्यकुशलप्रश्नोत्तररूपाःप्रीयेतांअडभावश्चार्षोलङि ११

प्रहसन्निवउत्तमातिथ्यलाभजहर्षेण १२ संप्रतीच्छमे मत्कृमातिथ्यमंगीकुरु १३ हेतुगर्भविशेषःत्वमतिथि
श्रेष्ठइति १४ पूजावाक्येनआतिथ्यंकरिष्यामीत्येवंरूपेणोचममपूजनंकृतमितिराजाब्रवीत् १५ विद्यते

ततोवसिष्ठोभगवान्कथांतेरघुनंदन॥विश्वामित्रमिदंवाक्यमुवाचप्रहसन्निव॥१२॥आति
थ्यंकर्तुमिच्छामिबलस्यास्यमहाबल॥तवचैवाप्रमेयस्ययथार्हंसंप्रतीच्छमे॥१३॥सत्क्रियां
हिभवानेतांप्रतीच्छतुमयाकृतां॥राजंस्त्वमतिथिश्रेष्ठःपूजनीयःप्रयत्नतः॥१४॥एवमुक्तोव
सिष्ठेनविश्वामित्रोमहामतिः॥कृतमित्यब्रवीद्राजापूजावाक्येनमेत्वया॥१५॥फलमूलेनभ
गवन्विद्यतेयत्तवाश्रमे॥पाद्येनाचमनीयेनभगवद्दर्शनेनच॥१६॥सर्वथाचमहाप्राज्ञपू
जार्हेणसुपूजितः॥गमिष्यामिनमस्तेस्तुमैत्रेणेक्षस्वचक्षुषा॥१७॥एवंब्रुवंतंराजानंवसिष्ठः
पुनरेवहि॥न्यमंत्रयतधर्मात्मापुनःपुनरुदारधीः॥१८॥

यत्तवाश्रमेफलमूलंतेनपूजितइत्यनेनराजभोज्याभावादनेनैववयंतुष्टाइतिध्वनितं १६ पूजार्हेणत्वये
तिशेषः मैत्रेणास्नेहयुक्तेन १७ पुनर्न्यमंत्रयतभोजनार्थंप्रार्थनमकरोत् १८

वाटमित्यस्यविवरणंयथाप्रियमित्यादि १९ तेनविश्वामित्रेणकल्माषीचित्रवर्णाहोमधेनु २० शवलेत
न्नामे अस्यराजर्षेर्महार्हेणभोजनेनसत्कारंकर्त्तुंव्यवसितोस्मिउद्युक्तोस्मितंमेव्यवसायंविधत्स्वसंपाद

वाढमित्येवंगाधेयोवसिष्ठंप्रत्युवाचह॥ यथाप्रियंभगवतस्तथास्तुमुनिपुंगव॥१९॥ एवमुक्त
स्तथातेनवसिष्ठोजपतांवरः॥ आजुहावततःप्रीतःकल्माषींधूतकल्मषां॥ एह्येहिशवलेक्षिप्रंश्रृ
णुचापिवचोमम॥२०॥ सवलस्यास्यराजर्षेःकर्त्तुंव्यवसितोस्म्यहं॥ भोजनेनमहार्हेणसत्कारंसंवि
२ धत्स्वमे॥२१॥ यस्ययस्ययथाकामंषड्रसेष्वभिपूजितं॥ तत्सर्वंकामधुग्दिव्येअभिवर्षकृतेमम मि
२२॥ रसेनान्नेनपेयेनलेह्यचोष्येणसंयुतं॥ अन्नानांनिचयंसर्वंसृजस्वशवलेत्वर॥२३॥ इ
त्यार्षेरामायणेवाल्मीकीयेवालकांडेद्विपंचाशःसर्गः॥५२॥

य तदुपयोगिपदार्थदानेनेतिशेषः २१ षड्रसेषुमधुरादिषुयस्ययस्ययदभिपूजितंअभिष्टंतत्सर्वंयथाका
मंममकृतेप्रवर्षस्वेत्यन्वयः २२ रसेनेतिसर्वोन्वयिरसयुतान्नेनभक्ष्येणशष्कुल्यादिना पेयेनपानक
रसादिना लेह्येनजिव्हास्वादेनसौद्रादिना चोष्येणआम्रचषपुटस्याहेलाअम्रफलादिना अन्नानाशात्यादि

दीनांनिचयंतस्मिं २३ द्विपंचाशःसर्गः ५२

॥१६०॥ यस्ययस्ययथायथेप्सितं तथातथासवान्कान्कामान्कांक्षितान्विदधेनिर्ममे १ तदेवप्रपंचयतिइक्षुनि
ति सविकाराणिक्षून् मधून्क्षौद्राणिपुंस्त्वमार्ग मैरेयंधात्रीधातकीगुडवारिभिः कृतंमद्यं भक्ष्यान्सूपा
दान् उच्चावचाननेकविधान् २ उष्णाढ्यस्यउष्णत्वगुणयुक्तस्यराशयः आसन्निति शेषः मृष्टान्यन्ना

एवमुक्तावसिष्ठेनशवलाशत्रुसूदन ॥ विदधेकामधुक्कामान्यस्ययस्येप्सितंयथा ॥१॥ इक्षून्मधूं
स्तथालाजान्मैरेयांश्चवरासवान् ॥ पानानिचमहार्हाणिभक्ष्यांश्चोच्चावचानपि ॥२॥ उष्णाढ्य
स्योदनस्यात्रराशयःपर्वतोपमाः मृष्टान्नानिसूपांश्चदधिकुल्यास्तथैवच ॥३॥ नाना
स्वादुरसानांचखांडवानांतथैवच ॥ भोजनानिसुपूर्णानिगौडानिचसहस्रशः ॥४॥ सर्वमा
सीत्सुसंतुष्टंहृष्टपुष्टजनायुतं ॥ विश्वामित्रबलंरामवसिष्ठेनसुतर्पितं ॥५॥

निपायसभेदाः दधिकुल्याइत्युपलक्षणंदुग्धादेरपि ३ खांडवानांइक्षुरसविकृतभक्ष्यविशेषाणांशेषे ॥१६०॥
षधीतैःपूर्णानिभाजनानिभोजनपात्राणिगौडानिगुडविकाराः आसन्निति शेषः ४ हर्षश्चित्तसंतो
षः पुष्टिर्देहपुष्टिस्तद्युक्तजनैरासमंताद्युक्तम् ५

हृष्टः अग्र्याहरेण पुष्टः भोजनादिना अंतःपुरश्रेष्ठैः सहितः ६ अमात्याः कर्मसहायाः मंत्रिणो मंत्रकुशला ८

विश्वामित्रोहि राजर्षिर्हृष्टः पुष्टस्तदाभवत् ॥ सांतःपुरवरो राजा सब्राह्मणपुरोहितः ॥ ६ ॥ सामात्यो मंत्रिस
हितः सभृत्यः पूजितस्तदा युक्तः परेण हर्षेण वसिष्ठमिदमब्रवीत् ॥ ७ ॥ पूजितोहं त्वयाह्मन् पूजार्हेण सु ब्र
सत्कृतः ॥ श्रूयतामभिधास्यामि वाक्यं वाक्यविशारद ॥ ८ ॥ गवां शतसहस्रेण दीयतां शबला मम ॥ रत्नं
हि भगवन्नेतद्रत्नहारी च पार्थिवः ॥ ९ ॥ तस्मान्मे शबलां देहि ममैषा धर्मतो द्विज ॥ एवमुक्तस्तु भगवान्
वसिष्ठो मुनिपुंगवः ॥ १० ॥ विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिं । नाहं शतसहस्रेण नापि को
टिशतैर्गवां ॥ ११ ॥ राजन् दास्यामि शबलां राशिभी रजतस्य वा ॥ न परित्यागमर्हेयं मत्सकाशादरिंदम ॥ १२ ॥

पूजार्हेण माहात्म्यपूजाकरणयोग्येन पूजित इत्यस्य विवरणं माहात्म्यातिशयद्योतनाय सुसत्कृत इति ८ शत
सहस्रेण निष्क्रयभूतेनेति शेषः ९ धर्मतो न्यायतः पार्थिवस्य रत्नस्वामित्वाद्रत्नहरत्वाच्च ममैषा योग्येति
शेषः १० ११ १२

॥१६१॥ कुतइयंपरित्यागंनार्हस्यत्राह शाश्वतीति ग्रात्मवतः मनस्विनः कीर्त्तिरिव शवलामह्यंमम शाश्वतीनित्यसंबद्धा
एवमाहरोवीजमाह अस्यामिति हव्यं देवं कव्यंपित्र्यं प्राणयात्रापि.त्र्यं प्राणयात्राजीवनं १२ ग्रापत्तंग्रधी
नंइत्यस्यसर्वत्रसंबंधः बलिर्भूतबलिः होमोवैश्वदेवादिः स्वाहाकारवषट्कारौ तत्साध्ययज्ञौ विद्या इति रा

शाश्वतीशवलामह्यंकीर्त्तिरात्मवतोयथा ॥ अस्यांहव्यंचकव्यंचप्राणयात्रातथैवच ॥१३॥ आयत्त
मग्निहोत्रंचबलिर्होमस्तथैवच ॥ स्वाहाकारवषट्कारौविद्याश्चविविधास्तथा ॥१४॥ आयत्तमत्र
राजर्षेसर्वमेतन्नसंशयः सर्वस्वमेतत्सत्येनममतुष्टिकरीनयाकारणैर्बहुभीराजन्नदास्येशवलांतव
१५ ॥ वसिष्ठेनैवमुक्तस्तुविश्वामित्रोऽब्रवीत्तदा ॥ संरब्धतरमत्यर्थंवाक्यंवाक्यविशारदः ॥ १६ ॥

तस्यपःप्राशनेनचित्तशुद्धेःप्राशनेनचित्तशुद्धेःप्रीणात्प्रेदेहपाटवाच्चतत्साध्यविद्यानामेतदायत्तत्वं १४
एतत्सर्वंग्रातिथ्यादि एतत्सबलारूपमेवसर्वस्वं सत्येनशपेइतिशेषः तथादर्शनादिनाममतुष्टिकरी
च कारणोरुक्तैःसाभिप्रायंचेतद्बोध्यम १५ संरब्धतरमत्याग्रहयुक्तं १६ ॥१६१॥

हैरण्याः हिरण्यविकाराः कक्षाः छंदोयेतमध्यबंधनार्थं श्रृंखलाः ग्रैवेयं ग्रीवालंकारः श्रृंखलादि येषां तान्
कुंजराणां चतुर्दशसहस्राणि ते ददामीति संबंधः १६ चतुर्युजां चतुर्भिः श्वेताश्वैर्युक्तानां किंकिणीकविभू
षितानीति षष्ठ्यार्थे द्वितीया रथानां विशेषणमेतत १९ देशः कांबोजवाल्हीकादिः कुलमुच्चैःश्रवसः प्रा

हैरण्यकक्ष्यग्रैवेयान्सुवर्णांकुशभूषितान् ॥ ददामि कुंजराणां ते सहस्राणि चतुर्दश ॥ १७ ॥ हिरण्या
नां रथानां च श्वेताश्वानां चतुर्युजां ॥ ददामि ते शतान्यष्टौ किंकिणीकविभूषितान् ॥ १८ ॥ हयानां दे
शजातानां कुलजानां महौजसां ॥ सहस्रमेकं दश च ददामि तव सुव्रत ॥ १९ ॥ नानावर्णविभक्तानां व
यस्थानां तथैव च ॥ ददाम्येकां गवां कोटिं शवला दीयतां मम ॥ २० ॥ यावदिच्छसि रत्नानि हिरण्यं वा द्वि
जोत्तम ॥ तावद्ददामि ते सर्वं दीयतां शवला मम ॥ २१ ॥ एवमुक्तस्तु भगवान् विश्वामित्रेण धीमता ॥
न दास्यामीति शवलां प्राह राजन् कथंचन ॥ २२ ॥

दीनां १९ नानावर्णैर्विभक्तानां परस्परविलक्षणानां वयस्थानां तरुणीनां एकां कोटिमित्यन्वयः २०
यद्वदिति इतोप्यधिकं यावदिच्छसीत्यर्थः २१ २२

॥१६२॥ एतच्शवलारूपंवस्तु २३ आप्तदक्षिणाइत्यनेनहव्यादियद्दक्षिणाप्येतदधीनेतिसूचितं २४ आतोमूला:
एतन्मूलाइत्यर्थः सर्वप्रदानाभावेहेतुगर्भविशेषणंकामदोहिनींइच्छाविषयदोहनशीलाम् २५ इतित्रि
पंचाशः सर्गः ५२ अथदंडोपायप्रवृत्तिमाहकामधेनुमिति नहन्नतेनात्यजत् अन्वकर्षतयत्नादितिशेषः

एतदेवहिमेरत्नमेतदेवहिमेधनं ॥ एतदेवहिसर्वस्वमेतदेवहिजीवितं ॥२३॥ दर्शश्चपौर्णमास
श्चयज्ञाश्चैवाप्तदक्षिणाः ॥ एतदेवहिमेराजन्विविधाश्चक्रियास्तथा ॥२४॥ अतोमूलाःक्रियाःस
र्वाममराजन्नसंशयः ॥ बहुनाकिंप्रलापेननदास्येकामदोहिनीं ॥२५॥ इत्यार्षेरामायणेवाल्मीकीये
वालकांडेत्रिपंचाशःसर्गः ॥५२॥ कामधेनुंवसिष्ठोपियदानत्यजतेमुनिः ॥ तदास्यशवलांरामवि
श्वामित्रोन्वकर्षत ॥१॥ नीयमानातुशवलारामराज्ञामहात्मना ॥ दुःखिताचिंतयामासरुदंतीशो
ककर्षिता ॥२॥ परित्यक्तावसिष्ठेनकिमहंसुमहात्मना ॥ याहंराजभटैर्दीनाह्रियेयंभृशदुःखिता ॥३॥

१ २ राजभटैःराजसेवकैः ह्रियेयंकर्मणिलिङ् भृशदुःखिताभृशेत्यतिशयेनदुःखिताअस्मीतिशेषः ३ ॥१६२॥

अपकृतंअपराद्धम् ४ ५ शतशोभृत्यान्स्वकर्षकान्पादमूलंपादसमीपंमहात्मनोवसिष्ठस्य ६ रोदनमश्रु

किंमयापकृतंतस्यमहर्षेर्भावितात्मनः॥यन्मामनागसंदृष्ट्वाभक्तांत्यजतिधार्मिकः॥४॥इतिसंचि
तयित्वातुनिःश्वस्यचपुनःपुनः॥जगामवेगेनतदावसिष्ठंपरमौजसं॥५॥निर्धूयतांस्तदाभृत्यांछ
तशःशत्रुसूदन॥जगामानिलवेगेनपादमूलंमहात्मनः॥६॥शवलासारुदंतीचक्रोशंतीचेदमब्र
वीत्॥वसिष्ठस्याग्रतःस्थित्वारुदंतीमेघनिस्वना॥७॥भगवन्किंपरित्यक्तात्वयाहंब्रह्मणःसुत॥
यस्माद्राजभटामांहिनयंतेत्वत्सकाशतः॥८॥एवमुक्तस्तुब्रह्मर्षिरिदंवचनमब्रवीत्॥शोकसंत
प्तहृदयांस्वसारमिवदुःखितां॥९॥नत्वांत्यजामिशवलेनापिमेपकृतंत्वया॥एषत्वांनयतेराजाबला
न्मत्तोमहाबलः॥१०॥

पातःक्रोशनमार्त्तशब्दःरुदंत्याएवाश्रमसमीपगमनेरुदंत्येववचनकथनमि
त्येतदर्थंद्विरुदंतीति ७ सकाशतःसमीपात् ८ स्वसारमिवभगिनीमिव ९ बलात्सत्त्वात् मत्तोऽविवेकी १०

श्री सरस्वती पुस्तक भण्डार
श्री हनुमान किला

महंमम नहित्वद्वलेनतुल्यमित्यर्थः तर्हितपोवलेनकिमितिनदंड्यतेतत्राहराजात्वंचेत्यादि राजातपोवलेन
नदंड्यइत्यर्थः तदुक्तंकिष्किंधायां तन्नाहिंस्यान्नचाक्रोशेदित्यादिना अत्रचविशेषतोऽवध्यइतिशे
षः अत्रचकृतातिथ्यादिने तेनातिथित्वाद्विशेषतोऽवध्यइतिभावः वलीराजेत्यनेनयुद्धजेयत्वमुक्तं पृथ्वी

नहितुल्यंवलंमह्यंराजात्वंचविशेषतः वलीराजाक्षत्रियश्चपृथिव्याःपतिरेवच ॥११॥ इयमक्षौहिणी
सेनागजवाजिरथाकुला ॥ हस्तिध्वजसमाकीर्णातेनासौवलवत्तमः ॥१२॥ एवमुक्तोवसिष्ठेनप्रत्यु
वाचविनीतवत् ॥ वचनंवचनज्ञासाव्रह्मर्षिमतुलप्रभं ॥१३॥ नवलंक्षत्रियस्याहुर्व्राह्मणावलवत्तराः ॥
व्रह्मन्व्रह्मवलंदिव्यंक्षात्राच्चवलवत्तरं ॥१४॥ अप्रमेयंवलंतुभ्यंनत्वयावलवत्तरः ॥ विश्वामित्रोमहावी
र्यस्तेजस्तवदुरासदं ॥१५॥

पतिःक्षत्रियत्वेनतद्वधस्यमहापातकसमताबोधिता ११ वलित्वमेवो
पपादयतिइयमितिहस्तिरथ्येध्वजैःसमाकीर्णा १२ विनीतवत्विनयोपेतं १३ नवलंअल्पवलंवल
वत्तराःक्षत्रियादिभ्यःक्षात्रात्क्षत्रियवलादपिवलवत्तरमधिकं १४ तुभ्यंतवतत्त्वयासदृशोपीतिशेषः
वलवत्तरइतिद्वेइतिशेषः महावीर्यःमहावीर्योपितत्रहेतुस्तेजस्तवेत्यादि १५

ननुत्वमेवतस्यबलंनाशयतत्राहनियुंक्ष्वेति कामधेनुत्वान्नियोगापेक्षा परकाम्यार्थस्वभावेवतस्याःसा

नियुंक्ष्वमांमहातेजस्त्वंब्रह्मबलसंभृतां॥तस्यदर्पंबलंयत्नन्नाशयामिदुरात्मनः॥१६॥इत्युक्तस्तुतयारा
मवसिष्ठस्तुमहायशाः॥सृजस्वेतितदोवाचबलंपरबलार्दनं॥१७॥तस्यतद्वचनंश्रुत्वासुरभिःसासृज
तदा॥तस्याहुंभारवोत्सृष्टाःपह्लवाःशतशोनृप॥१८॥नाशयंतिबलंसर्वंविश्वामित्रस्यपश्यतः॥सरा
जापरमक्रुद्धःक्रोधविस्फारितेक्षणः॥१९॥पह्लवान्नाशयामासशस्त्रैरुच्चावचैरपि॥विश्वामि
त्रार्दितान्दृष्ट्वापह्लवांच्छतशस्तदा॥२०॥भूयएवासृजद्घोरांच्छकान्यवनमिश्रितान्॥तैरासी
त्संवृताभूमिःशकैर्यवनमिश्रितैः॥२१॥

का

मर्थ्यात् ब्रह्मबलसंभृतांतादृशकार्यसमर्थत्वेनमोव्यापयेत्यर्थः १६ १७ हुंभानामगवांशब्दः पह्लवश
कयवनकांबोजबर्बराम्लेच्छजातिविशेषाः १८ पश्यतइत्यनादरेषष्ठीविस्फारितंविवृत्तं १९ अर्दितान्पीडि
तान् २० २१

॥१६४॥

प्रभाद्युर्निरीक्ष्यं तेज हेम्नः किंजल्कस्य च सदृशैः हेमवर्णां वरं पीतांवरं २२ २३ २४ इति चतुःपंचाशः सर्गः ५
४ श्रीकुलान्म्लायमानान्कामधुगिति संबोधनं योगातः योगमहिम्ना तिरश्चोपि ब्रह्मप्रसादाद्योगश

प्रभावद्भिर्महावीर्यैर्हेमकिंजल्कसन्निभैः ॥ तीक्ष्णासिपट्टिशधरैर्हेमवर्णांवरावृतैः ॥ २२ ॥ निर्द
ग्धं तद्बलं सर्वं प्रदीप्तैरिव पावकैः ततोस्त्राणि महातेजा विश्वामित्रो मुमोच ह ॥ २३ ॥ तैस्तैर्यवन।
कांबोजा बर्बराश्चाकुलीकृताः ॥ २४ ॥ इत्यार्षे रामायणे बालकांडे चतुःपंचाशः सर्गः ॥ ५४ ॥ ततस्ता।
नाकुलान्दृष्ट्वा विश्वामित्रास्त्रमोहितान् ॥ वसिष्ठश्चोदयामास कामधुक्सृज योगतः तस्या हुं
कारतो जाताः कांबोजा रविसन्निभाः ऊधसस्त्वथ संभूता बर्बराः शस्त्रपाणयः ॥ २ ॥ योनिदेशा
च्च यवनाः शकृद्देशाच्छकाः स्मृताः ॥ रोमकूपेषु म्लेच्छाश्च हारीताः सकिरातकाः ॥ ३ ॥

क्षिरस्तीति ज्ञेयं १ २ रोमकूपेभ्यः म्लेच्छहारीतकिराताजातिविशेषः ३ श्रीसियवल्लभज

॥१६४॥

विश्वामित्रस्यतत्सैन्यमित्यन्वयः ४ विश्वामित्रसुतानांशतन्नृषिर्वधेनोर्बलमत्तोऽयमेवनाशनीयइत्याश
येनवशिष्ठमन्वधावत् ५ हुंकारेणतपोबलसंभृतेन ६ मुहूर्त्तेनभस्मीकृताइत्यपवर्गेणनीयामासेनानु

नैस्तन्निषूदितंसर्वंविश्वामित्रस्यतत्क्षणात्॥ सपदातिगजंसाश्वंसरथंरघुनंदन॥४॥ दृष्ट्वानि
षूदितंसैन्यंवसिष्ठेनमहात्मना॥ विश्वामित्रसुतानांतुशतंनानाविधायुधं॥५॥ अभ्यधावत्सु
संक्रुद्धंवसिष्ठंजपतांवरं॥ हुंकारेणैवतान्सर्वान्निर्ददाहमहानृषिः॥६॥ तेसाश्वरथपादातावा
सिष्ठेनमहात्मना॥ भस्मीकृतामुहूर्त्तेनविश्वामित्रसुतास्तथा॥७॥ दृष्ट्वाविनाशितान्सर्वान्बलं
चसुमहायशाः॥ सव्रीडंचिंतयाविष्टोविश्वामित्रोभवत्तदा॥८॥ समुद्रइवनिर्वेगोभग्नदंष्ट्रइवो
रगः॥ उपरक्तइवादित्यःसद्योनिष्प्रभतांगतः॥९॥

वाक्योऽधीतइतिवत् ७ सर्वान्सुतान् सव्रीडमितिक्रियाविशेषणं ८ निर्वेगत्वेसमुद्रोपमानिष्प्रभत्वेइतरोपमेउपरक्तोराहुग्रस्तः ९

॥१६५॥

हतानिसर्वाणिबलानिशरीरवोढ्रास्त्राणितज्जन्योत्साहोयस्यसः निर्वेदंचतुरंगबलेनिष्फलत्वबुद्धिं १०

हतपुत्रबलोदीनोलूनपक्षइवद्विजः॥हतसर्वबलोत्साहोनिर्वेदंसमपद्यत॥१०॥सपुत्रमेकंराज्यायपा
लयेतिनियुज्यच॥पृथिवींक्षत्रधर्मेणवनमेवाभ्यपद्यत॥११॥सगत्वाहिमवत्पार्श्वंकिंनरोरगसेवितं
महादेवप्रसादार्थंतपस्तेपेमहातपाः॥१२॥केनचित्त्वथकालेनदेवेशोवृषभध्वजः॥दर्शयामासवरदोवि
श्वामित्रंमहामुनिं॥१३॥किमर्थंतप्यसेराजन्ब्रूहियत्तेविवक्षितं॥वरदोस्मिवरोयस्तेकांक्षितःसोभिधीय
तां॥१४॥एवमुक्तस्तुदेवेनविश्वामित्रोमहातपाः॥प्रणिपत्यमहादेवंविश्वामित्रोब्रवीदिदं॥१५॥यदि
तुष्टोमहादेवधनुर्वेदोममानघ॥सांगोपांगोपनिषदःसरहस्यःप्रदीयतां॥१६॥

एकमवशिष्टमितिशेषः राज्यायराज्यंरक्षितुंपृथिवींक्षत्रधर्मेणपालयेतिनियुज्येत्यन्वयः ११ १२ दर्शया
मासआत्मानमितिशेषः १३ १४ १५ साक्षादुपकारकाणिअंगानि आरादुपकारीणिउपांगानि मंत्राउपनि
षदः तेनसहितोधनुर्वेदइत्यर्थः रहस्यंआचार्यमुखैकगम्यविद्याजातं १६

॥१६५॥

तवप्रसादान्नुतूपदेशापेक्षेतिभावः १८ क्षत्रियत्वात्सहजस्य दर्पस्य पूर्त्तिरस्त्रलाभात् १९ २० यैरस्त्र

यानि देवेषु चास्त्राणि दानवेषु महर्षिषु ॥ गंधर्वयक्षरक्षःसु प्रतिभांतु ममानघ ॥१७॥ तवप्रसादाद्भवतु देव
देव ममेप्सितं ॥ एवमस्त्विति देवेशो वाक्यमुक्त्वा गतस्तदा ॥१८॥ प्राप्य चास्त्राणि देवेशाद्विश्वामित्रो म
हाबलः दर्पेण महता युक्तो दर्पपूर्णोऽभवत्तदा ॥१९॥ विवर्द्धमानो वीर्येण समुद्र इव पर्वणि ॥ हतंमेनेन तदा
म वसिष्ठमुनिसत्तमं ॥२०॥ ततो गत्वाश्रमपदं मुमोचास्त्राणि पार्थिवः ॥ यैस्तपोवनं नाम निर्दग्धं चास्त्रते
जसा ॥२१॥ उदीर्यमाणमस्त्रं तद्विश्वामित्रस्य धीमतः ॥ दृष्ट्वा विप्रद्रुता भीता मुनयः शतशो दिशः ॥२२
वसिष्ठस्य च ये शिष्यास्तथैव मृगपक्षिणः ॥ विद्रवंति भयाद्भीता नानादिग्भ्यः सहस्रशः ॥ २३ ॥

तेजसास्त्रीयतेजसा तपोवनं निर्दग्धं भवेत्तान्यस्त्राणि मुमोचेत्यन्वयः २१ विश्वामित्रस्येति शेषे षष्ठी तेनो
दीर्यमाणं विसृज्यमानम् २२ भयाद्भयहेतोरस्त्रजालात् नानादिग्भ्यः व्यत्ययेन द्वितीयार्थे चथी नाना
दिशः इत्यर्थः २३

॥१६६॥

शून्यंसर्वप्राणिपलायनात् अतएवनिःशब्दमिवईरिणमूषरं निर्वृक्षनिर्मानुषकांतारसदृशमितियावत्
२४ वदतोवैवदतोपीत्यर्थः तादृशस्यापिवशिष्ठस्यवचनमनादृत्यदुद्रुवुरित्यर्थः २५ एवमुक्त्वापलायमान
प्राणिजातंप्रतीतिशेषः २६वक्ष्यमाणं २६ यद्यस्मात्मेआश्रमंविनाशितवानसियद्यस्माच्चहिप्रसि

वसिष्ठस्याश्रमपदंशून्यमासीन्महात्मनः॥मुहूर्तमिवनिःशब्दमासीदीरिणसन्निभं॥२४॥वदतो
वैवसिष्ठस्यमाभैरितिमुहुर्मुहुः॥नाशयाम्यद्यगाधेयंनीहारमिवभास्करः॥२५॥एवमुक्त्वामहा
तेजावसिष्ठोजपतांवरः॥विश्वामित्रंतदावाक्यंसरोषमिदमब्रवीत्॥२६॥आश्रमंचिरसंव
र्द्धंयद्विनाशितवानसि॥दुराचारोहियन्मूढस्तस्मात्त्वंनभविष्यसि॥२७॥इत्युक्त्वापरमक्रुद्धोदं
डमुद्यम्यसत्वरः॥विधूमइवकालाग्निर्यमदंडइवापरः॥२८॥इत्यार्षेरामायणेबालकांडेपंचपंचाशःस
र्गः॥५५॥ दुराचारोमूढस्त्वंतस्मान्नभविष्यसिनशिष्यसीत्यर्थः २७ विधूमकालाग्निरिवक्रोधा
दृशिष्ठोपरंयमदंडमिवदंडमुद्यम्यतस्थाविति शेषः २८ इतिपंचपंचाशःसर्गः ५५ श्रीराम

॥१६६॥

एवमुक्तोनभविष्यसीत्युक्तः १ २ तिष्ठतिभीषयंतंप्रतितिष्ठभीत्यभावमाहस्थितोस्म्येषइति तवशास्त्रस्यद

एवमुक्तोवसिष्ठेनविश्वामित्रोमहाबलः॥आग्नेयमस्त्रमुद्दिश्यतिष्ठतिष्ठेतिचाब्रवीत॥१॥ब्रह्मदंडं
समुद्यम्यकालदंडमिवापरं॥वसिष्ठोभगवान्क्रोधादिदंवचनमब्रवीत॥२॥क्षत्रबंधोस्थितोस्म्येष
यद्बलंतद्विदर्शय॥नाशयाम्येषतेदर्पंशस्त्रस्यतवगाधिज॥३॥ क्वचतेक्षत्रियबलंक्वचब्रह्मबलंमह
त॥पश्यब्रह्मबलंदिव्यंममक्षत्रियपांसन॥४॥तस्यास्त्रंगाधिपुत्रस्यघोरमाग्नेयमुत्तमं॥ब्रह्मदंडे
नतच्छांतमग्नेर्वेगइवांभसा॥५॥ वारुणंचैवरौद्रंचऐंद्रंपाशुपतंतथा॥ऐषीकंचापिचिक्षेपकुपितो
गाधिनंदनः॥६॥

र्पंतत्पाण्डित्यंपरस्त्ररूपंशास्त्रंतत्प्राप्तिजंतेतवदर्पं २ ४ क्षत्रियपांसनेत्युक्त्वोक्तितस्यतस्यवशिष्ठस्यब्रह्म
दंडेनगाधिपुत्रस्याग्नेयशांतमासीत ५ ६

६ दयितंशिवस्येतिशेषः ८ ९ १० ११ जपतांश्रेष्ठ इत्यनेनजपवैभवमिदंग्रसनमितिद्योतितं तदस्त्रक्षेप

मानवंमोहनंचैवगांधर्वंस्वापनंतथा॥जृंभणंमोहनंचैवसंतापनविलापने॥७॥शोषणंदारुणंचैववज्र
मस्त्रंसुदुर्जयं ब्रह्मपाशंकालपाशंवारुणंपाशमेवच॥८॥पिनाकमस्त्रंदयितंशुष्कार्द्रेऽशनीतथा
दंडास्त्रमथपैशाचंक्रौंचमस्त्रंतथैवच॥९॥धर्मचक्रंकालचक्रंविष्णुचक्रंतथैवच॥वायव्यंमथनंचै
वास्त्रंहयशिरस्तथा॥१०॥शक्तिद्वयंचचिक्षेपकंकालंमुसलंतथा॥वैद्याधरंमहास्त्रंचकालास्त्र
मथदारुणं॥११॥त्रिशूलमस्त्रंघोरंचकापालमथकंकणं॥एतान्यस्त्राणिचिक्षेपसर्वाणिरघुनंद
न॥१२॥वसिष्ठेजपतांश्रेष्ठेतदद्भुतमिवाभवत्॥तानिसर्वाणिदंडेनग्रसतेब्रह्मणःसुतः॥१३॥तेषु
शांतेषुब्रह्मास्त्रंक्षिप्तवान्गाधिनंदनः॥तदस्त्रमुद्यतंदृष्ट्वादेवाःसाग्निपुरोगमाः॥१४॥

रामद्भुतमिवाभवत् १२ अत्यद्भुतमेवाहतानीतिग्रसते अग्रसत् १३ अग्निपुरोगमोवायुस्तत्सहिताः १४

समुदीरितेप्रयुक्ते १५ ब्राह्मेणतेजसाब्रह्मविद्याभ्यासजेनतेजसायुक्तेनब्रह्मदंडेनकरध ग्नस्ततेस्मेत्यन्वयः
ब्राह्मेणैवतेजसाब्राह्मतेजःशमनस्समसाध्यत्वादितिभावः १६ त्रैलोकमोहनंभायात्रिलोकीचित्तमूर्छाकरंघो

देवर्षयश्चसंभ्रांतागंधर्वाःसमहोरगाः॥ त्रैलोक्यमासीत्संत्रस्तंब्रह्मास्त्रेसमुदीरिते॥१५॥तदप्यस्त्रंमहाघो
रंब्राह्मंब्राह्मेणतेजसा॥ वसिष्ठोग्रसतेसर्वंब्रह्मदंडेनराघव॥१६॥ब्रह्मास्त्रंग्रसमानस्यवसिष्ठस्यम
हात्मनः॥त्रैलोक्यमोहनंघोरंरूपमासीत्सुदारुणं॥१७॥रोमकूपेषुसर्वेषुवसिष्ठस्यमहात्मनः॥म
रीच्यइवनिष्पेतुरग्नेर्धूमाकुलार्चिषः॥१८॥प्राज्वलद्ब्रह्मदंडश्चवसिष्ठस्यकरोद्यतः॥विधूमइ
वकालाग्निर्यमदंडइवापरः॥१९॥

रंसर्वतोपिभयंकरंसुदारुणंत्वसिंहवद्ददर्शे १७ घोरदारुणत्वेऽपपारस्यतीति रोमेत्यादि रोमकूपेभ्यः मरीच्यो
विस्फुलिंगाःअग्नेरिवनिष्पेतुःअस्येविश्वामित्रब्रह्मास्त्राकुलत्वाद्धूमाकुलार्चिष्ट्वमग्नेर्विशेषणं १८
विधूमःकालाग्निरिवब्रह्मदंडश्चप्राज्वलत तत्समर्पितब्रह्मतेजसेतिभावः १९

ततोमुनिगणाःवशिष्ठंसाधुसाध्वित्यस्तुवनहेब्रह्मंस्त्वेवलंअमोघमस्तुअग्रगतावविसर्जनेनाक्षीण
मस्तुप्रतिब्रह्मास्त्रमाप्रयुंक्ष्वेतियावत्सारवत्तेजःत्वत्तेजसासहजेनधारयविलाप्यैकीकुरु २० ननुशत्रौ
स्थितेकथमप्रतियोगोनत्वाह निगृहीतइति ब्रह्मास्त्रन्यासेननचसामर्थ्यःत्वतएवमत्प्रयोजा

ततोस्तुवन्मुनिगणावसिष्ठंजपतांवरं॥अमोघंतेवलंब्रह्मन्तेजोधारयतेजसा॥२०॥निगृहीतस्त्वया
ब्रह्मन्विश्वामित्रोमहावलः॥अमोघंतेवलंश्रेष्ठंलोकाःसंतुगतव्यथाः॥२१॥एवमुक्तोमहातेजाः
शमंचक्रेमहातपाःविश्वामित्रोविनिकृतोविनिश्वस्येदमब्रवीत॥२२॥धिग्वलंक्षत्रियवलंब्रह्मते
तेजोवलंवलं॥एकेनब्रह्मदंडेनसर्वास्त्राणिहतानिमे॥२३॥तदेतत्समभीक्ष्याहंप्रसन्नेंद्रिय
मानसः॥तपोमहत्समास्थास्येयद्वैब्रह्मत्वकारणं॥२४॥इत्यार्षेरामायणेवालकांडेषट्पंचाशःसर्गः॥५६

तइत्यर्थः २१ शमंचक्रेकोपशांतिंचकार विनिकृतःनिवृत्तसर्वशक्तिः २२ क्षत्रियवलंधिक्निंद्य
वलमित्यर्थः ब्रह्मतेजोवलंप्रशस्तंवलं २३ प्रसन्नेंद्रियमानसःपरित्यक्तक्षत्रस्वभावइतियावत् २४
इतिषट्पंचाशःसर्गः ५६

ततइत्यादिश्लोकद्वयमेकान्वये महात्मनावसिष्ठेनकृतवैरः अनेनास्यतपोनाशमूलंदर्शितं ब्रह्मवि

ततःसंतप्तहृदयःस्मरन्निग्रहमात्मनः विनिश्वस्यविनिश्वस्यकृतवैरोमहात्मना ॥१॥ सदक्षिणांदिशं
गत्वामहिष्यासहराघव ॥ ततापपरमंघोरंविश्वामित्रोमहातपाः ॥२॥ फलमूलाशनोदांतश्चचा
रपरमंतपः ॥ अथास्यजज्ञिरेपुत्राःसत्यधर्मपरायणाः ॥३॥ हविष्यंदोमधुष्यंदोदृढनेत्रोमहारथः
पूर्णेवर्षसहस्रेतुब्रह्मालोकपितामहः ॥४॥ अब्रवीन्मधुरंवाक्यंविश्वामित्रंतपोधनं ॥ जिताराज
र्षिलोकास्तेतपसाकुशिकात्मज ॥५॥ अनेनतपसात्वांहिराजर्षिरितिविद्महे ॥ एवमुक्त्वामहातेजा
जगामसहदैवतैः ॥६॥ त्रिविष्टपंब्रह्मलोकंलोकानांपरमेश्वरः ॥ विश्वामित्रोपितच्छ्रुत्वाह्रियाकिंचि
दवाङ्मुखः ॥७॥ दुःखेनमहताविष्टःसमन्युरिदमब्रवीत् ॥ तपश्चसुमहत्तप्तंराजर्षिरितिमांविदुः ॥८॥

इपचारस्यसर्वश्रेयोविनाशकत्वात् १ ततापतपश्चकार २ तपसोघोरत्वंदर्शयति फलेत्यादि सं
तोतेंद्रियः ३ ४ ५ ६ देवैःसहत्रिविष्टपंस्वर्गंगत्वातद्ब्रह्मलोकंगतःलोकानांभूरादीनां ८ समन्युः

[illegible]

अस्यतपसःफलंब्राह्मणत्वंनास्तीतिमन्ये ९ परमात्मवान्परमात्मध्यानवान् १० ११ गच्छेयंयत्
॥१६९॥ बलेनेतिशेषपरांगतिंस्वर्गं १२ अशक्यमिति अशक्यत्वंचनस्मरसामर्थ्यात्नापितादृक्कर्मविधा
नाभावात्सशरीरएवस्वर्गंलोकमेतीतिश्रुते किंतुत्रिशंकोस्तादृशस्वर्गप्राप्तिर्नास्तीतिपूर्वकल्पवृत्तता

देवाःसर्षिगणाःसर्वेनास्तिमन्येतपःफलं॥एवंनिश्चित्यमनसाभूयएवमहातपाः॥९॥तपश्चचार
धर्मात्माकाकुत्स्थपरमात्मवान्॥एतस्मिन्नेवकालेतुसत्यवादीजितेंद्रियः॥१०॥त्रिशंकुरितिवि
ख्यातइक्ष्वाकुकुलवर्द्धनः॥तस्यबुद्धिःसमुत्पन्नायजेयमितिराघव॥११॥गच्छेयंस्वशरीरेण
देवानांपरांगतिं॥वसिष्ठंससमाहूयकथयामासचिंतितं॥१२॥अशक्यमितिचाप्युक्तोवसिष्ठे
नमहात्मना॥प्रत्याख्यातोवसिष्ठेनसययौदक्षिणांदिशं॥१३॥ततस्तत्कर्मसिद्ध्यर्थंपुत्रांस्तस्यग
तोनृपः॥वासिष्ठादीर्घतपसस्तपोयत्रहितेपिरे॥१४॥त्रिशंकुस्तुमहातेजाःशतंपरमभास्वरं॥वसिष्ठ
पुत्रान्ददृशेतप्यमानान्मनस्विनः॥१५॥

नास्तीतियोग्यंउक्तःअभूदितिशेषः १२ तत्कर्मसशरीरस्वर्गप्रापकंयज्ञकर्म यत्रतेपिरतगत्वेतिशे ॥१६९॥
षः १४ शतंवशिष्ठपुत्रानितिवद्वैर्यंशतमितिनिपातनात्सामानाधिकर १५

महात्मानइतिव्यत्ययेनद्वितीयार्थेप्रथमा महात्मानइत्यर्थः ह्रियावशिष्ठेनप्रत्याख्यानकृतया १६
शरण्यान्रक्षणसमर्थान्शरणंगतः अन्यथारक्ष्याणांशरणंगतोपिशरणत्वंप्राप्तोपीत्यर्थः १७

सोभिगम्यमहात्मानःसर्वानेवगुरोःसुतान्॥अभिवाद्यानुपूर्वेणह्रियाकिंचिदवाङ्मुखः॥१६॥अब्रवी
त्समहात्मानःसर्वानेवकृतांजलिःशरणंवःप्रपन्नोहंशरण्यान्शरणंगतः॥१७॥प्रत्याख्यातोहिभ
द्रंवोवसिष्ठेनमहात्मना॥यष्टुकामोमहायज्ञंतदनुज्ञातुमर्हथ॥१८॥गुरुपुत्रानहंसर्वान्नमस्कृत्यप्र
सादये॥शिरसाप्रणतोयाचेब्राह्मणांस्तपसिस्थितान्॥१९॥तेमांभवंतःसिद्ध्यर्थंयाजयंतुसमाहिताः
सशरीरोयथाहंवैदेवलोकमवाप्नुयां॥२०॥प्रत्याख्यातोवसिष्ठेनगतिमन्यांतपोधनाःगुरुपुत्रान्ते
सर्वान्नाहंपश्यामिकंचन॥२१॥इक्ष्वाकूणांहिसर्वेषांपुरोधाःपरमागतिः॥पुरोधसस्तुविद्वांसस्तारयं
तिनृपान्सदा॥२२॥

तर्ह्याचार्यएवगंतव्यइत्यत्राहप्रत्याख्यातइति किमर्थंशरणागतिस्तत्राह यष्टु
कामइति १८ ब्राह्मणान्ब्रह्मविदः १९ सिद्ध्यर्थंसशरीरस्वर्गगमनसिद्ध्यर्थम् २० गुरुपुत्रानृतेतान्
विनाअन्यांकांचनगतिमहंनपश्यामीत्यन्वयः २१ पुरोधाःपुरोहितोवशिष्ठः २२ श्रीसीताराम

तस्मादित्यर्द्धं तस्मादिक्ष्वाकूणांपरमगतिरूपात्पुरोधसोवशिष्ठात्तदनंतरंपश्चात्त्वंतएवमेरक्षकाऽस्यर्थः
२३ इतिसप्तपंचाशःसर्गः ५७ क्रोधसमन्वितमिति ऋषिपुत्रशतविशेषणं १ दुर्मेधः दुर्बुद्धे शाखांतरया

तस्मादनंतरेसर्वेभवंतोदैवतंमम॥२३॥ इत्यार्षेरामायणेबालकांडेसप्तपंचाशःसर्गः॥५७॥ततस्त्रिशंकोर्वच
नंश्रुत्वाक्रोधसमन्वितं॥ऋषिपुत्रशतंरामराजानमिदमब्रवीत॥१॥प्रत्याख्यातोसिदुर्बुद्धेगुरुणास
त्यवादिनातंकथंसमतिक्रम्यशाखांतरमुपेयिवान॥२॥इक्ष्वाकूणांहिसर्वेषांपुरोधाःपरमागतिः
नचातिक्रमितुंशक्यंवचनंसत्यवादिनः॥३॥अशक्यमितिचोवाचवसिष्ठोभगवानृषिःतंवयंवैस
माहर्तुंक्रतुंशक्ताःकथंचतत॥४॥बालिशस्त्वंनरश्रेष्ठगम्यतांस्वपुरंपुनःयाजनेभगवान्छक्तस्त्रैलो
क्यस्यापिपार्थिव॥अवमानंकथंकर्तुंतस्यशक्ष्यामहेवयं॥५॥

जनादिनारक्षकांतरं २ नचातिक्रमितुंशक्यमिक्ष्वाकुभिरितिशेषः ३ सोवाचेतिसोचिलोपेचेदितिसा
धु तंक्रतुंयमशक्यमित्युवाचतंयष्टुमित्यर्थःकथंचकथमपिनशक्ताइत्यर्थः ४ बालिशोऽज्ञः त्रैलोक्यस्या
पिसिद्ध्यर्थंयाजनेइत्यर्थः अवमानंतेनासाध्यत्वोक्त्यातस्यासाधनरूपं ५ ॥१६०॥

एतान्यासिष्ठान् ६ अन्यां गतिं याजकांतरं ७ घोराभिसंहितं घोराभिप्रायसंयुक्तं साक्षात्कुलगुरुं ब्रह्मपु
त्रं वसिष्ठं व्यतिक्रम्य पुरोहितांतराश्रयणरूपघोराभिप्राययुक्तमित्यर्थः चंडालत्वं क्षत्रियत्वप्रहाणेन चंडाल
भावं गमिष्यसीति शेषः ८ तादृशपापिष्ठदर्शनस्य पापजनकत्वात्स्वं स्वमाश्रमं विविशुः ९ परुषो रू

तेषां तद्वचनं श्रुत्वा क्रोधपर्याकुलाक्षरं ॥ स राजा पुनरेवैतानिदं वचनमब्रवीत् ॥ ६ ॥ प्रत्याख्यातो भगव
न्गुरुपुत्रैस्तथैव हि ॥ अन्यां गतिं गमिष्यामि स्वस्ति वोस्तु तपोधनाः ॥ ७ ॥ ऋषिपुत्रास्तु तच्छ्रुत्वा वा
क्यं घोराभिसंहितं ॥ शेपुः परमसंक्रुद्धाश्चंडालत्वं गमिष्यसि ॥ ८ ॥ एवमुक्त्वा महात्मानो विविशुस्ते
स्वमाश्रमं ॥ ९ ॥ अथ रात्र्यां व्यतीतायां राजा चंडालतां गतः ॥ नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्द्धजः ॥ चित्य
माल्यांगरागश्च आयसाभरणोऽभवत् ॥ १० ॥ तं दृष्ट्वा मंत्रिणः सर्वे त्यज्य चांडालरूपिणं ॥ प्राद्रवन्सहिता
राम पौरा येस्यानुगामिनः ॥ ११ ॥

क्षांगः ध्वस्तमूर्द्धजः स्रस्तकेशः चिताश्मशानं तत्रभवपुष्पभस्मादिमाल्यां
गरागो यस्य अयोविकार आयसं तभरणः १० त्यज्य त्यक्त्वा अनुगामिनः प्राद्रवन्तं त्यक्त्वा गताः ११

॥१७१॥ परमात्मवान्धीरः दह्यमानः दुःखेनेत्यादि विश्वामित्रंजगाम १२ विफलाकृतंवशिष्ठयाशिष्ठविनाशिते
हिकामुष्मिकसाधनमित्यर्थः १३.१४ यत्त्वंशापात् चंडालतांगतस्तस्यतेइहागमनकार्यंकिमित्यन्व

एकोहिराजाकाकुत्स्थजगामपरमात्मवान्॥ दह्यमानोदिवारात्रंविश्वामित्रंतपोधनं ॥११॥ विश्वा
मित्रस्तुतंदृष्ट्वाराजानंविफलीकृतं॥ चंडालरूपिणंराममुनिःकारुण्यमागतः॥१३॥ कारुण्यात्समहा
तेजावाक्यंपरमधार्मिकः॥ इदंजगादभद्रंतेराजानंघोरदर्शनं॥१४॥ किमागमनकार्यंतेराजपु
त्रमहाबल॥ अयोध्याधिपतेवीरशापाच्चंडालतांगतः॥१५॥ अथतद्वाक्यमाकर्ण्यराजाचंडालतां
गतः॥ अब्रवीत्प्रांजलिर्वाक्यंवाक्यज्ञोवाक्यकोविदं॥१६॥ प्रत्याख्यातोस्मिगुरुणागुरुपुत्रैस्तथैव
च॥ अनवाप्यैवतंकामंमयाप्राप्तोविपर्ययः॥१७॥ सशरीरोदिवंयायामितिमेसौम्यदर्शन॥ मया
चेष्टंक्रतुशतंतच्चनावाप्यतेफलं ॥१८॥

यः १५ १६ येकाममुद्दिश्यागतस्तंकाममनवाप्य
नैतावदेवअपितुविपर्ययोजातिभ्रंशोवंवैषरूपः १७ कस्तेकामइत्यत्राहसशरीरइति इतीत्यस्यकाम ॥१७१॥
इतिशेषः हेसौम्यदर्शनतच्चफलंसशरीरस्वर्गप्राप्तिरूपंनावाप्यतइत्यन्वयः १८

कनुशातंनकृतंत्वयेतिचेत्तत्राहअनृतमिति कृच्छ्रेष्वपिगतोऽनृतंनवक्ष्येक्षत्रधर्मेणातत्साक्षितया १९ शी
लंसद्गुणाःवृत्तमाचार २० इच्छतोममेतिशेषः नगच्छंतिनगच्छंतिस्म २१ यदेवमतोदैवमेवप्रारब्धफ

अनृतंनोक्तपूर्वंमेनचवक्ष्येकदाचन॥कृच्छ्रेष्वपिगतःसौम्यक्षत्रधर्मेणतेशपे॥१९॥यज्ञैर्बहुविधैरिष्टंप्रजाध
र्मेणापालिताः॥गुरवश्चमहात्मानःशीलवृत्तेनतोषिताः॥२०॥धर्मेप्रयतमानस्ययज्ञंचाहर्तुमिच्छतःपरि
तोषंनगच्छंतिगुरवोमुनिपुंगव॥२१॥दैवमेवपरंमन्येपौरुषंतुनिरर्थकं॥दैवेनाक्रम्यतेसर्वंदैवंहिपर
मागतिः॥२२॥तस्यमेपरमार्तस्यप्रसादमभिकांक्षतः॥कर्तुमर्हसिभद्रंतेदैवोपहतकर्मणः॥२३॥नान्यां
गतिंगमिष्यामिनान्यच्छरणमस्तिमे॥दैवंपुरुषकारेणनिवर्त्तयितुमर्हसि॥२४॥इत्यार्षेरामायणे
बालकांडेऽष्टपंचाशःसर्गः॥५८॥

लमदृष्टमेवपरंश्रेष्ठहिताहितप्रापणेपौरुषंइदानींतनधर्मानु
ष्ठानंनिरर्थकंप्रारब्धतिरस्कारेदुर्बलमित्यर्थः आक्रम्यतेअभिभूयतेपरमागतिःइतरतिरस्कारेणैहि
कसुखदुःखादिप्रापकमित्यर्थः २२ प्रसादंदैवानुकूल्यसमर्पणंत्वदीयंप्रसादमिच्छतोमेप्रसादंकर्तुमर्हसि
दैवेनोपहतंतिरस्कृतमिहानुष्ठीयमानंकर्मयस्य २३ गतिःशरणं २४ इत्यष्टपंचाशःसर्गः ५८ श्रीराम

साक्षाच्चंडालरूपिणं चंडालचिन्हधारित्वान्न शास्त्रगम्यचंडालभाव इत्यर्थः १ २ यज्ञसाह्यकरान् यज्ञसा
हाय्यकरान् ३ अनेन रूपेण गुरुशापकृतेन चंडालरूपेण अविशापस्यान्यथाकर्त्तुमशक्यत्वादिति

उक्तवाक्यंतुराजानंकृपयाकुशिकात्मजः॥अब्रवीन्मधुरंवाक्यंसाक्षाच्चंडालतांगतं॥१॥इक्ष्वाकोस्वाग
तंवत्सजानामित्वांसुधार्मिकं॥शरणंतेप्रदास्यामिमाभैषीर्नृपपुंगव॥२॥अहमामंत्रयेसर्वान्महर्षी
न्पुण्यकर्मणः॥यज्ञसाह्यकरान्राजन्स्ततोयस्यसिनिर्वृतः॥२॥गुरुशापकृतंरूपंयदिदंत्वयिवर्त
ते॥अनेनसहरूपेणसशरीरोगमिष्यसि॥४॥हस्तप्राप्तमहंमन्येस्वर्गंतवनराधिप॥यस्त्वंकौशि
कमागम्यशरण्यंशरणागतः॥५॥एवमुक्त्वामहातेजाःपुत्रान्परमधार्मिकान्॥आदिदेशमहाप्रा
ज्ञान्यज्ञसंभारकारणात्॥६॥

भावः गमिष्यसि स्वर्गमिति शेषः जातिचंडालत्वाभावाद्यज्ञ
प्रवृत्तिः ४ हस्तप्राप्तं अनायासलभ्यं तत्र हेतुः यस्त्वमित्यादि ५ यज्ञसंभारकारणात् यज्ञसामग्रीसंपा
दनार्थं ६

सुहृदः स्वस्वर्त्विक्सहितान्तद्विशेषणात्सुवाहुश्रुतानिति ८ यदीति आहूतो ऽन्यो वा ऽनादृतंउ
पेक्षाहृतं चंडालयाजनरूपनिंदात्मकं वा पदार्थं ब्रूयात्तत्सर्वमुक्तमखिलेन ममाख्येयं ८ ९ १० तेत्तवस

सर्वांछिष्यान्समाहूय वाक्यमेतदुवाच ह ॥ सर्वानृषीन्सवासिष्ठानानयध्वं ममाज्ञया ॥ सशिष्यान्सुहृ
दश्चैव सर्त्विजः सुवहुश्रुतान् ॥ ७ ॥ यदन्यो वचनं ब्रूयान्मद्वाक्यवलचोदितः ॥ तत्सर्वमखिलेनोक्तं ममा
ख्येयमनादृतो ॥ ८ ॥ तस्य तद्वचनं श्रुत्वा दिशो जग्मुस्तदाज्ञया ॥ आजग्मुरथ देशेभ्यः सर्वेभ्यो ब्रह्मवादिनः
॥ ९ ॥ ते च शिष्याः समागम्य मुनिं ज्वलिततेजसं ॥ ऊचुश्च वचनं सर्वे सर्वेषां ब्रह्मवादिनां ॥ १० ॥ श्रुत्वा ते वचनं
सर्वे समायांति हि जानपदाः सर्वदेशेषु वाऽगच्छन्वर्जयित्वा महोदयं ॥ ११ ॥ वाऽसिष्ठं यच्छतं सर्वं क्रोधपर्या
कुलाक्षरं यथाह वचनं सर्वं शृणु त्वं मुनिपुंगव ॥ १२ ॥

वेदेशेषु इत्यस्य स्थिता इति शेषः आगच्छन्नित्यस्य केचिदिति शेषः महोदयं तन्नामानमृषिं वासिष्ठं य
च्छतं सर्वं तच्च वर्जयित्वेति योजना वासिष्ठशतं क्रोधपर्याकुलाक्षरं यथा येन प्रकारेणावचनमाह तत्सर्वं श्र
ण्वित्यर्थः ११ १२

क्षत्रियइति ब्राह्मणस्यैवयाजनाधिकाराच्चंडालस्यपतेऽनधिकाराच्च १३ पालिताइतिच्छंगोक्तिः १४
वचननैष्ठुर्ये प्रशंसाप्रयजंतंनैष्ठुर्यवद्वचनमित्यर्थः सहमहोदयाः महोदयेनसहिताः १५ १६ अप्रदुष्ट

क्षत्रियोयाजकोयस्यचंडालस्यविशेषतः॥कथंसदसिभोक्तारोहविस्तस्यसुरर्षयः॥१३॥ब्राह्मणावा
महात्मानोभुक्त्वाचंडालभोजनं॥कथंस्वर्गंगमिष्यंतिविश्वामित्रेणपालिताः॥१४॥एतद्वचननैष्ठुर्य
मूचुःसंरक्तलोचनाः॥वासिष्ठामुनिशार्दूलसर्वैसहमहोदयाः॥१५॥तेषांतद्वचनंश्रुत्वासर्वेषांमुनि
पुंगवः॥क्रोधसंरक्तनयनःसरोषमिदमब्रवीत्॥१६॥यद्दूषयंत्यदुष्टंमांतपउग्रंसमास्थितं॥भस्मी
भूतादुरात्मानोभविष्यंतिनसंशयः॥१७॥अद्यतेकालपाशेननीतावैवस्वतक्षयं॥सप्तजातिशता
न्येवमृतपाःसंभवंतुते॥१८॥

त्वेहेतुः तपउग्रमितितपस्तेजसाक्षत्रियस्यचंडालयाजनमभिन
दोषायेतिज्ञात्वापियद्दूषयंतितस्मात्भस्मीभूताइत्यादि १७ सप्तजातिशतानीतिसप्तजन्मशतानि मृतवस्त्रापहा
रिणः १८

मष्टिकानामइत्यानीडोमइतिप्रसिद्धाः विकृताः कृतव्यापाराः विरूपाविकृताकाराः १९ २० प्राणातिपात

श्वमांसनियताहारामुष्टिकानाम निर्घृणाः ॥ विकृताश्च विरूपाश्च लोकाननुचरंत्विमान ॥१९॥ म
होदयश्चदुर्बुद्धिर्मामदूष्यंह्यदूषयन् ॥ दूषितः सर्वलोकेषु निषादत्वंगमिष्यति ॥२०॥ प्राणातिपा
तनिरतो निरनुक्रोशतांगतः दीर्घकालंमम क्रोधाद्दुर्गतिंवर्तयिष्यति ॥२१॥ एतावदुक्त्वावचनंवि
श्वामित्रोमहातपाः विरराममहातेजा ऋषिमध्येमहामुनिः ॥२२॥ इत्यार्षेरामायणेवालकांडेएकोन
षष्टितमः सर्गः ॥५९॥ तपोवलहताञ्ज्ञात्वावासिष्ठान्समहोदयान् ॥ ऋषिमध्येमहातेजाविश्वामित्रोभ्य
भाषत ॥१॥ अयमिक्ष्वाकुदायादस्त्रिशंकुरितिविश्रुतः धर्मिष्ठश्चवदान्यश्च मांचैवशरणंगतः ॥ स्वे
नानेनशरीरेणदेवलोकजिगीषया ॥२॥

निरतः प्राणिनांप्राणनाशोद्यतः अनुक्रोशोदयावर्तयिष्यतिप्राप्स्यति २१ २२ इत्येकोनषष्टितमःसर्गः
५९ ज्ञात्वायोगवलेनेतिशेषः १ अयमितिसार्द्धश्लोकएकान्वयः इक्ष्वाकोर्दायमत्तीतिदायादः तद्वं
श्यः एवमादिगुणोयागाधिकारित्वंसूचितं २

स्वंप्रतिशरणागमनेहेतुमाह स्वेनेत्यादि प्रवर्त्यतांआरभ्यतां ३ धर्मसहितमितिक्रियाविशेषणं ऊचुरित्य
स्यअन्योन्यमितिशेषः ४ यदूचुस्तदाह अयमित्यादि ५ अग्निकल्पः अजितकामक्रोधत्वाच्छापंदा

यथायंस्वशरीरेणदेवलोकंगमिष्यति॥ तथाप्रवर्त्यतांयज्ञोभवद्भिश्चमयासह॥ ३॥ विश्वामित्रवचः
श्रुत्वासर्वएवमहर्षयः॥ ऊचुःसमेताःसहसाधर्मज्ञाधर्मसंहितं॥ ४॥ अयंकुशिकदायादोमुनिःप
रमकोपनः॥ यदाहवचनंसम्यगेतत्कार्यंनसंशयः॥ ५॥ अग्निकल्पोहिभगवाञ्छापंदास्यतिरोषितः
६॥ तस्मात्प्रवर्त्यतांयज्ञःसशरीरोयथादिवि॥ गच्छेदिक्ष्वाकुदायादोविश्वामित्रस्यतेजसा॥ ७॥ त
तःप्रवर्त्यतांयज्ञःसर्वेसमधितिष्ठत॥ एवमुक्त्वामहर्षयःसंजह्रुस्ताःक्रियास्तथा॥ ८॥ याजकश्चम
हातेजाविश्वामित्रोभवत्क्रतौ॥ ऋत्विजश्चानुपूर्व्येणमंत्रवन्मंत्रकोविदाः॥ ९॥

स्यतियतः ६ तस्मादिति ७ ततःसशरीरस्यस्वर्गगमनाययतः प्रवर्त्यतांसर्वेभवंतः स्वस्वकृत्यंसमधितिष्ठ
तआरभध्वंताःक्रियाःस्वस्वार्त्विज्यकर्मणि ८ याजकः अध्वर्युःस्रुवमुद्यम्येतिवक्ष्यमाणत्वात् ९

यथाकल्पंशास्त्रानुसारेणः यथाविधियथासंप्रदायानुष्ठानं कल्पशास्त्रे नानायज्ञोपन्यासमस्थलेऽनु
क्तेषांशेसंप्रदायस्यैवशरणत्वात् महताकालेनअधिककालसाध्ययत्नपूर्वकमंत्रपाठेन १० सर्वदेवताः
प्रतीतिशेषः तदातपापिनाभ्यागमन् अनधिकारेऽन्यायेनकृतमकृतमितिन्यायादितिभावः ११ ऽ

चक्रुःसर्वाणिकर्माणियथाकल्पंयथाविधि ॥ ततःकालेनमहताविश्वामित्रोमहातपाः ॥१०॥ चकारा
वाहनेतत्रभागार्थंसर्वदेवताः ॥ नाभ्यागमंस्तदातत्रभागार्थंसर्वदेवताः ॥११॥ ततःकोपसमाविष्टोवि
श्वामित्रोमहामुनिः ॥ स्रुवमुद्यम्यसक्रोधस्त्रिशंकुमिदमब्रवीत् ॥१२॥ पश्यमेतपसोवीर्यंस्वार्जि
तस्यनरेश्वर ॥ एषत्वांस्वशरीरेणनयामिस्वर्गमोजसा ॥१३॥ दुःप्रापंस्वशरीरेणस्वर्गंगच्छनरेश्वर
स्वार्जितेकिंचिदप्यस्तिमयाहितपसःफलं ॥ राजंस्त्वंतेजसातस्यसशरीरोदिवंव्रज ॥ १४ ॥

यम्यउद्धृक्रोधेनप्रक्षिप्य कोपस्यैवाधिकावस्थाक्रोधः १२ तपसोवीर्यंयागास्तित्वमितिभाव एषेसय
वधाने ओजसातपोवीर्येण १३ स्वशरीरेणदुःप्रापमित्यन्वयः हियदिमयास्वार्जितंयत्किंचिदपितपसः
फलंसुकृतमस्तिहेराजन्त्वंतस्यतेजसावैभवेनसशरीरोदिवंगच्छकुरुत्वात्पुनरुक्तिर्नदोषः १४ राम

॥१७५॥ मुनीनांपश्यतांमुनिषुपश्यत्सु १५ १६ स्वर्गकृतालयः स्वर्गेनिजपुण्यकर्मणा॰कृतआलयोयस्यतादृशः स्वर्गवासा
हीनासीत्यर्थः तत्रहेतुः गुरुशापेत्यादि १७ १८ आहारयत अकरोत् १९ सृजन्निति यथाउत्तरतोध्रुवः अचलतिष्ठति

उक्तवाक्येमुनौतस्मिन्सशरीरोनरेश्वरः॥दिवंजगामकाकुत्स्थमुनीनांपश्यतांतदा॥१५॥स्वर्ग
लोकंगतंदृष्ट्वात्रिशंकुंपाकशासनः सहसर्वैःसुरगणैरिदंवचनमब्रवीत्॥१६॥त्रिशंकोगच्छ
भूयस्त्वंनासिस्वर्गकृतालयः॥गुरुशापहतोमूढपतभूमिमवाक्शिराः॥१७॥एवमुक्तोमहेन्द्रे
णात्रिशंकुरपतत्पुनः॥विक्रोशमानस्त्राहीतिविश्वामित्रंतपोधनं॥१८॥तच्छ्रुत्वावचनंतस्यक्रो
शमानस्यकौशिकः रोषमाहारयत्तीव्रंतिष्ठतिष्ठेतिचाब्रवीत्ऋषिमध्येसतेजस्वीप्रजापतिरि
वापरः॥१९॥सृजन्दक्षिणमार्गस्थान्सप्तर्षीनपरान्पुनः॥नक्षत्रमालामपरामसृजत्क्रोधमूर्छितः
॥२०॥

एवंदक्षिणतःत्रिशंकुस्तिष्ठतु तस्यपरितोयथासप्तर्षिमंडलंतथाऽस्यापिभवत्वाशयःसृजन्नितिहेतौशता सृष्टिकुर्वन्त ॥१७५॥
हेतोर्दक्षिणमार्गस्थानपरान्सप्तर्षीन्सृजन्पुनःसप्तविंशतिनक्षत्रमालामसृजदित्यर्थः २०

नक्षत्रवंशं शुक्रनक्षत्रगणं २१ अन्यमिंद्रं सृज्यमानस्वर्गस्येति शेषः अथवा मया सृज्यमानस्वर्गः अनिंद्रो वास्तु त्रिशं
कुरेव तत्रेंद्रो भवत्वित्याशयः एवमिंद्रस्थानं त्रिशंकुं प्रतिष्ठाप्य तस्य परिवारभूतदैवतानि स्रष्टुमुपचक्रमे २२ ततः इंद्रादि

दक्षिणां दिशमास्थाय ऋषिमध्ये महायशाः ॥ सृष्ट्वा नक्षत्रवंशं च क्रोधेन कलुषीकृतः ॥२१॥ अन्य
मिंद्रं करिष्यामि लोको वास्यादनिंद्रकः दैवतान्यपि सक्रोधात्स्रष्टुं समुपचक्रमे ॥२२॥ ततः परम
संभ्रांताः सर्षिसंघाः सुरासुराः ॥ विश्वामित्रं महात्मानमूचुः सानुनयं वचः ॥२३॥ अयं राजा महाभाग
गुरुशापपरिक्षतः ॥ सशरीरो दिवं यातुं नार्हतीति तपोधन ॥२४॥ तेषां तद्वचनं श्रुत्वा देवानां मुनिपुंगवः ॥
अब्रवीत्सुमहद्वाक्यं कौशिकः सर्वदेवताः ॥२५॥ सशरीरस्य भद्रं वस्त्रिशंकोरस्य भूपतेः ॥ आरो
हणं प्रतिज्ञातं नानृतं कर्तुमुत्सहे ॥२६॥

सर्गोपक्रमात् संभ्रांताः पर्याकुलिताः सानुनयं ससांत्वं २३ अनुनयप्रकारमाह अयं राजेत्यादि गुरुशापेन परिक्षतः चं
डालत्वं प्राप्तः दिवं ब्रह्मसदनं त्वत्सृष्टं वा स्वर्गं २४ २५ भद्रं वा इत्यनेनानुनयः २६

॥१७६॥ स्वर्गोस्तु स्वर्गपदवाच्यसुखविशेषानुभवोस्तु २७ लोकाः भूरादिसत्यांताः यावद्भविष्यति स्थास्यंति सर्वशः सर्वप्रकारेण तत्र
योक्त अनुज्ञातुमंगीकर्तुं २८ सर्वशः सर्वाणि २९ वैश्वानरपथात् ज्योतिःशास्त्रप्रसिद्धानादिज्योतिश्चक्रमार्गाद्बहिर्दे

स्वर्गोस्तु सशरीरस्य त्रिशंकोरस्य शाश्वतः नक्षत्राणि च सर्वाणि मामकानि ध्रुवाण्यथ ॥२७॥ या
वल्लोका धरिष्यंति तिष्ठंत्वेतानि सर्वशः मत्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ ॥२८॥ एवमुक्ताः
सुराः सर्वे प्रत्यूचुर्मुनिपुंगवं ॥ एवं भवतु भद्रं ते तिष्ठंत्वेतानि सर्वशः ॥२९॥ गगने तान्यनेकानि वैश्वान
रपथाद्बहिः नक्षत्राणि मुनिश्रेष्ठ तेषु ज्योतिःषु जाज्वलन् ॥३०॥ अवाक्शिरास्त्रिशंकुश्च तिष्ठ
त्वमरसन्निभः ॥ अनुयास्यंति चैतानि ज्योतींषि नृपसत्तमं ॥३१॥ कृतार्थं कीर्तिमंतं च स्वर्गलो
कगतं यथा ॥३२॥

शे एतानि नक्षत्राणि तिष्ठंत्विति पूर्वेणान्वयः तेषु त्वदीयेषु ज्योतिःषु नक्षत्रेषु जाज्वलन् अतिशयेन प्रकाशमानः ३०
अवाक्शिराः गुर्वप्रचारफलप्रकटनायाधोमुखः अमरसन्निभस्तेजसामरतुल्यस्त्रिशंकुस्तिष्ठतु एतानि तव ॥१७६॥
ज्योतींषि तं नृपसत्तमम् अनुयास्यंति च ३१ स्वर्गलोकगतं यथा स्वर्गलोगतमिव ३२

म
देवताः प्रतिवाटमित्येवञ्चाहेतिशेषः दुराग्रहस्यानर्थहेतुतां प्रतिसंधाय देवचनमंगीचकार २२ यत्तस्यांते इत्यनेन वि
श्वामित्रेण यजमानप्रतिनिधिं कृत्वा यज्ञः समापितो देवैर्भागश्च गृहीत इति गम्यते २४ इति षष्ठितमः सर्गः ६० तान्स्वा
नयापत्तार्थमागतान्वनवासिनस्तपस्विनः प्रस्थितान्वीक्ष्य सर्वांस्तानब्रवीदित्यन्वयः १ दक्षिणांदिशिमासमंता

विश्वामित्रस्तु धर्मात्मा सर्वैर्देवैरभिष्टुतः ॥ ऋषिमध्ये महातेजा बाढमित्येव देवताः ॥२३॥ ततो दे
वा महात्मानो ऋषयश्च तपोधनाः ॥ जग्मुर्यथागतं सर्वे यज्ञस्यांते नरोत्तम ॥२४॥ इत्यार्षे रामायणे वा
ल्मीकीये बालकांडे षष्ठितमः सर्गः ॥ ६० ॥ कुशलवयोराख्यानेन तत्रोयेन्हि वर्तमान कथा समाप्ता ॥ वि
श्वामित्रो महातेजाः प्रस्थितान्वीक्ष्य तानृषीन् ॥ अब्रवीन्नरशार्दूल सर्वांस्तान्वनवासिनः ॥१॥ महान्वि
घ्नः प्रवृत्तोयं दक्षिणामास्थितो दिशं ॥ दिशमन्यां प्रपत्स्यामस्तत्र तप्स्यामहे तपः ॥२॥

व्याप्यास्थितोयं त्रिशंकुरूपो महाविघ्नोस्माकं तपोनाशकत्वात्प्रवृत्तस्तच्छायाक्रांतत्वाद्यायं देशोतः परं तपोऽयोग्य
इति भावः २

विशालायांविशालतपोवनवत्यांपश्चिमायांवर्त्तमानेषुपुष्करेषुतत्तीरतपोवनेष्वित्यर्थः महात्मानइत्यर्थेकंस्वपिसं
वीधनंदीर्घीभावश्चार्षः २ ४ ५ विप्रःपुरोहितः ६ अद्याहृतःइदानीमस्माभिरानीतःपशुस्तवेदुर्नयात् अन
वधानात्प्रनष्टः दोषाःपशुनाशोद्भवः ७ एतत्पशुनाशरूपंमहत्प्रायश्चित्तंमहतःप्रायश्चित्तस्यकारणंप्रक्रांतक
वे

पश्चिमायांविशालायांपुष्करेषुमहात्मनः॥सुखंतपश्चरिष्यामःसुखंतद्धितपोवनं॥३॥एवमुक्त्वाम
हातेजाः पुष्करेषुमहामुनिः तपउग्रंदुराधर्षंतेपेमूलफलाशनः॥४॥एतस्मिन्नेवकालेतुअयोध्या
धिपतिर्महान्॥अंबरीषइतिख्यातोयष्टुंसमुपचक्रमे॥५॥तस्यवैयजमानस्यपशुमिंद्रोजहा
रह॥प्रनष्टेतुपशौविप्रोराजानमिदमब्रवीत्॥६॥पशुरद्याहृतोराजन्प्रनष्टस्तवदुर्नयात्॥अ
रक्षितारंराजानंघ्नंतिदोषानरेश्वर॥७॥प्रायश्चित्तंमहद्ध्येतन्नरंवापुरुषर्षभ॥आनयस्वप
शुंशीघ्रंयावत्कर्मप्रवर्त्तते॥८॥

र्मयावत्प्रवर्त्ततेप्रवर्त्तिष्यतेतावत्ततःप्रागेवनष्टपशुमन्विष्यानयतत्प्रतिनिधित्वेनगोभिःक्रीत्वानरंवापशुमानयेत्य
र्थः ८

सहस्रशः सहस्रसंख्याभिर्गोभिर्मूल्यभूताभिरित्यर्थः ९ देशान्निति सर्वविशेषणा १० सोंबरीषः भृगुतुंगं पर्वतशृंगवि

उपाध्यायवचःश्रुत्वासराजापुरुषर्षभ॥अन्वियेषमहाबुद्धिःपशुंगोभिःसहस्रशः॥९॥देशान्जनप
दांस्तांस्तान्नगराणिवनानिच॥आश्रमाणिचपुण्यानिमार्गमाणोमहीपतिः॥१०॥सपुत्रसहितंतं
तानसभार्यंरघुनंदन॥भृगुतुंगेसमासीनमृचीकंसंददर्शह॥११॥तमुवाचमहातेजाप्रणम्याभिप्र
साद्यच॥ब्रह्मर्षिंतपसादीप्तंराजर्षिरमितप्रभः॥१२॥पृष्ट्वासर्वत्रकुशलमृचीकंतमिदंवचः गवां
शतसहस्रेणविक्रीणीषेसुतंयदि॥१३॥पशोरर्थेमहाभागकृतकृत्योस्मिभार्गव॥सर्वेपरिगतादे
शायज्ञियंनलभेपशुं॥१४॥दातुमर्हसिमूल्येनसुतमेकमितोमम॥एवमुक्तोमहातेजाऋचीकः
स्त्वब्रवीद्वचः॥१५॥

शेषः ११ १२ तं प्रसिद्धतपसमृचीकमिदंवक्ष्यमाणंवचोब्रवीदिति शेषः यदि विक्रीणीयात्तर्हि कृतकृत्योस्मि कृता
र्थः सांप्रतोयज्ञियंयज्ञेपूर्वंपरिकल्पितंपशुंकापिचलभ्यते १३ १४ इतः एतेषुसुतेषु सार्वविभक्तिकस्तसिः १५ राम

कथंचनवहुमल्येनपित्रोरप्रतिषेधाद्नुमतिर्गम्यते १६ ७ शुनकइतिकनिष्ठपुत्रनाम १८ पितृषुपितृणां रक्षि
ष्यामीत्यर्थेरस्येदित्यार्षं १९ रामेतिसंबुद्धिः २० मध्यमंमध्यमपुत्रंविक्रेयंमातापित्रोर्विक्रेयत्वेनसंमतंमन्येऽर्थो

नाहंज्येष्ठंनरश्रेष्ठविक्रीणीयांकथंचन॥ऋचीकस्यवचःश्रुत्वातेषांमातामहात्मनो॥१६॥उवाचनरशार्दू
लमंबरीषमिदंवचः॥अविक्रेयंसुतंज्येष्ठंभगवानाहभार्गवः॥१७॥ममापिदयितंविद्धिकनिष्ठंशुनकंप्र
भो॥तस्मात्कनीयसंपुत्रंनदास्येतवपार्थिव॥१८॥प्रायेणहिनरश्रेष्ठज्येष्ठाःपितृषुवल्लभाः॥मातृणां
चकनीयांसस्तस्माद्रक्ष्येकनीयसं॥१९॥उक्तवाक्येमुनौतस्मिन्मुनिपत्न्यांतथैवच॥शुनःशेपःस्वयंराम
मध्यमोवाक्यमब्रवीत्॥२०॥पिताज्येष्ठमविक्रेयंमाताचाहकनीयसं॥विक्रीतंमध्यमंमन्येराजपुत्र
नयस्वमां॥२१॥अथराजामहाबाहोवाक्यांतेब्रह्मवादिनः॥हिरण्यस्यसुवर्णस्यकोटिभीरत्नराशि
भिः॥२२॥गवांशतसहस्रेणशुनःशेपंनरेश्वरः॥गृहीत्वापरमप्रीतोजगामरघुनंदन॥२३॥

हितिशेषः २१ ब्रह्मवादिनःमध्यमपुत्रस्य २२ गृहीत्वाक्रीत्वायद्यप्यपत्यदानक्रयौशास्त्रनिषिद्धौतथा
पिकुलहानौधर्मार्थमपत्यदानमिवपत्ताद्यापत्यक्रयोपिननिंदितइतिभावः २३

२४ इति एकषष्टितमः सर्गः ६१ व्यश्रमत्व्यश्राम्यदिति पाठांतरम् १ विश्रममाणस्येति विश्राम्यत इत्यर्थे त्वार्षं २

अंबरीषस्तु राजर्षी रथमारोप्य सत्वरः शुनःशेपं महातेजा जगामाशु महायशाः २४ इत्यार्षे रामायणे वा
लकांडे एकषष्टितमः सर्गः ६१ शुनःशेपं नरश्रेष्ठ गृहीत्वा तु महायशाः व्यश्रमत्पुष्करे राजा मध्याह्ने
रघुनंदन १ तस्य विश्रममाणस्य शुनःशेपो महायशाः पुष्करं ज्येष्ठमागम्य विश्वामित्रं ददर्श ह
२ तप्यंतमृषिभिः सार्धं मातुलं परमातुरः विषण्णवदनो दीनस्तृष्णया च श्रमेण च ३ पपातांके मु
ने राम वाक्यं चेदमुवाच ह न मेऽस्ति माता न पिता ज्ञातयो बांधवाः कुतः ४ त्रातुमर्हसि मां सौम्य धर्मे
ण मुनिपुंगव त्राता त्वं हि नरश्रेष्ठ सर्वेषां त्वं हि भावनः ५

मतुलं ऋचीकाय कौशिकी प्रदिपादितेत्सुतत्वात् तस्य पाजिजीविषया श्रमेण चेति विषण्णवदनत्वे परमातुर
त्वे च हेतुः ३ अंके उत्संगे मातुलत्वात्तत्र पातः बांधवाः कुत इति अरक्षकत्वादसत्प्राया इत्यर्थः ४ धर्मेणाला
जितेन सर्वेषां शरणागतानां भावनः हितप्रापकः एको हि इत्यर्थे ५ श्रीराम

यथाचराजाकृतकार्यःस्यात् अहंचाव्ययोधर्मलोपाभाववान्दीर्घायुस्तपस्तप्त्वास्वर्गंप्राप्नुयांतथाकुर्विति शेषः ६ मय्ये
॥१७२॥ नप्रसन्नेनकिल्विषात्तन्मूलविपत्तेरित्यर्थःपुत्रंज्येष्ठं ७ ८ यत्कृतेयत्प्रयोजनाय तदेवप्रयोजनमाहपरलोकहिता
र्थायपरलोकहितरूपप्रयोजनायतस्यप्रयोजनस्य ९ परलोकहितंप्रयोजनमाहअयमिति शरणंरक्षणंजीवित
मात्रेणजीवितप्रदानमात्रेणाप्रियंममजीवतोवाक्यकरणात् स्वस्यपरलोकसाधनादित्यर्थः १० तत्रप्रवृत्त्यर्थंःस्तौ

राजाचकृतकार्यःस्यादहंदीर्घायुरव्ययःस्वर्गलोकमुपाश्नीयांतपस्तप्त्वाह्यनुत्तमं॥६॥समेनाथोह्यना
थस्यभवभव्येनचेतसा॥पितेवपुत्रंधर्मात्मंस्त्रातुमर्हसिकिल्विषात्॥७॥तस्यतद्वचनंश्रुत्वाविश्वा
मित्रोमहातपाः॥सांत्वयित्वाबहुविधंपुत्रानिदमुवाचह॥८॥यत्कृतेपितरःपुत्रान्जनयंतिशुभा-
र्थिनःपरलोकहितार्थायतस्यकालोयमागतः॥९॥अयंमुनिसुतोबालोमत्तःशरणमिच्छति॥अ-
स्यजीवितमात्रेणप्रियंकुरुतपुत्रकाः॥१०॥सर्वेसुकृतकर्माणःसर्वेधर्मपरायणाःपशुभूतानरेंद्र-
स्यतृप्तिमग्नेःप्रयच्छत ॥११॥

तिसर्वैरिति पशुभूताःशुनःशेपप्रतिनिधित्वेनेतिशेषः नरेंद्रस्ययज्ञेऽग्नेस्तृप्तिंप्रयच्छथेत्यर्थः ११ श्रीराम ॥१७२॥

मया रक्षितो नाथवानभवत् १२ साभिमानं साहंकारं सलीलं सपरिहासं १३ लोकतः शास्त्रतश्चानुचित्तानुष्ठानत्वेद

नाथवांश्च शुनःशेपो यज्ञपश्वाविधितो भवेत् ॥ देवतास्तर्पिताश्चस्तु मे मयापि कृतं वचः ॥१२॥ मुनेस्तु
वचनं श्रुत्वा मधुच्छंदादयः सुताः ॥ साभिमानं नरश्रेष्ठ सलीलमिदमब्रुवन् ॥१३॥ कथमात्मसुतान्हि
त्वा त्रायसेऽन्यसुतं विभो ॥ अकार्यमिव पश्यामः श्वमांसमिव भोजने ॥१४॥ तेषां तद्वचनं श्रुत्वा पुत्रा
णां मुनिपुंगवः ॥ क्रोधसंरक्तनयनो व्याहर्तुमुपचक्रमे ॥१५॥ निःसाध्वसमिदं प्रोक्तं धर्मादपि विगर्हितं
अतिक्रम्य तु मद्वाक्यं दारुणं रोमहर्षणं ॥१६॥ श्वमांसभोजिनः सर्वे वासिष्ठा इव जातिषु ॥ पूर्णां वर्षसह
स्रं तु पथिव्यामनुवत्स्यथ ॥१७॥

षांतः श्वमांसमिवेति भोजने प्राप्ते तत्परित्यागेन श्वमांसभक्षणमिवाकार्यमित्यर्थः इवशब्दो वाक्यालंकारे १४ १५
निःसाध्वसं पितृप्रतिवचनरूपभयरहितं जीवतो वाक्करणरूपाद्धर्मादपि विगर्हितं भ्रष्टं एवं मद्वाक्यमतिक्रम्य
यतो दारुणं परुषं रोमहर्षणं रोमांचरूपविकारजनकमुक्तं तस्मादिति शेषः १६ जातिषु मुष्टिकजातिषु १७ श्रीराम

निरामयंसर्वदुखनाशिकांरक्षांकृत्वाशुनःशेफमुवाच १८ वाक्यमाहपवित्रेति पवित्रपाशैर्दर्भरशनाभि १९
वैस्नवविस्नुदेवताकंवैस्नवोवैदेवतयायूपइतिश्रुतेः वाग्भिर्वक्ष्यमाणगाथाद्वयरूपाभिः अग्निंप्रत्युदाहरअग्ने

कृत्वाशापसमायुक्तान्पुत्रान्मुनिवरस्तदा॥१७॥शुनःशेपमुवाचार्नैकृत्वारक्षांनिरामयां॥१८॥इदमाहमुनि
श्रेष्ठोचिष्यामित्वांमहातपाः॥पवित्रपाशैराबद्धोरक्तमाल्यानुलेपनः॥१९॥वैस्नवंयूपमासाद्यवाग्भि
हाधो रग्निमुदाहर॥इंद्राविस्नूसुरश्रेष्ठौनोहित्वंमुनिपुंगव॥२०॥इमेचगाथेद्वेदिव्येगायेथामुनिपुत्रक
अंबरीषस्ययज्ञेस्मिन्ततःसिद्धिमवाप्स्यसि॥२१॥शुनःशेपोगृहीत्वातेद्वेगाथेसुसमाहितः॥
त्वरयाराजसिंहेनमंबरीषमुवाचह॥२२॥राजसिंहमहाबुद्धेशीघ्रंगच्छामहेवयं॥निर्वर्त्तयस्वराजेंद्र
त्वंचसमुपाहर॥२३॥

ग्न्यभिमुखोभूत्वाइंद्रमिंद्रानुजंचस्तुहीत्यर्थः २० गाथेद्वेदर्शयतिइमे स्व
इति मायंमयोपदिष्टपरक्षोपेंदैवत्ये सिद्धिंजीवितसिद्धिं २१ २२ निवर्त्तयस्वयज्ञमितिशेषः समुपाहरकुरु २३

२४ पवित्रैर्दर्भरज्जुभिःकृतपशुत्वज्ञापनं पशुंकृत्वापहृतपपशुत्वेनसंपाद्यसमवंधयत् राजेतिशेषः २५ इंद्र[illegible]नुजौ

तद्वाक्यमृषिपुत्रस्यश्रुत्वाहर्षसमन्वितः ॥ जगामनृपतिःशीघ्रंयज्ञवाटमतंद्रितः ॥ २४ ॥ सदस्यानुमतेरा
जापवित्रकृतलक्षणां ॥ पशुंरक्तांवरंकृत्वायूपेतंसमवंधयत् ॥ २५ ॥ सवद्धोवाग्भिरग्र्याभिरभितुष्टाव
वैसुरौ ॥ इंद्रमिंद्रानुजंचैवयथावन्मुनिपुंगवः ॥ २६ ॥ ततःप्रीतःसहस्राक्षोरहस्यस्तुतितोषितः ॥ दीर्घ
मायुस्तदाप्रादाच्छुनःशेफायवासवः ॥ २७ ॥ सचराजानरश्रेष्ठयज्ञस्यचसमाप्तवान् ॥ फलंवहुगुणंरा
मसहस्राक्षप्रसादजं ॥ २८ ॥ विश्वामित्रोहिधर्मात्माभूयस्तेपेमहातपाः ॥ पुष्करेषुनरश्रेष्ठदशा
वर्षशतानिच ॥ २९ ॥ इत्यार्षेरामायणेवाल्मीकियेवालकांडेद्विषष्टितमःसर्गः ॥ ६२ ॥ पूर्णेवर्षसहस्रे
तुव्रतस्नातंमहामुनिं ॥ अभ्यागच्छन्सुराःसर्वेतपःफलचिकीर्षवः ॥ १ ॥

विसुर्युपदेवः २६ सहस्राक्षइत्युपलक्षणं विष्णोरपिरहस्यस्तुतिर्विश्वामित्रोपदिष्टा २७ समाप्तवान्फलंसम्यगाप्तवा
न २८ २९ इतिद्विषष्टितमःसर्गः ६२ पुत्रविषयकशापदानेनक्रोधनिर्जयाभावान्नब्रह्मत्वसिद्धिरित्याह पूर्णेइ
त्यादिना व्रतस्नातंव्रतांतेस्नातंसमाप्तपुरश्चरणमितियावत् तपःफलचिकीर्षवः तपःफलंदातुकामाः १

॥१८१॥ ऋषिस्त्वमसिपूर्वंतपसाराजर्षिरसिइदानींस्वत्वमातिविश्लेषकादृषिरेवासीतिभावः २३ अप्रधान्यजितेंद्रियत्वाभाव
ख्यापनायकथंतरंप्रस्तौतिततःकालनेत्यादि परमारूपादिभिःसर्वोत्तमा अप्सराइत्यर्थः ४ तत्रसरसिजलदेवि

अब्रवीत्सुमहातेजाब्रह्मासुरुचिरंवचः॥ ऋषिस्त्वमसिभद्रंतेस्वार्जितैःकर्मभिःशुभैः॥१॥ तमेवमुक्त्वा
देवेशस्त्रिदिवंपुनरभ्यगात॥ विश्वामित्रोमहातेजाभूयस्तेपेमहत्तपः॥२॥ ततःकालेनमहतामेन-
कापरमाप्सरांपुष्करेषुनरश्रेष्ठस्नातुंसमुपचक्रमे॥३॥ तांददर्शमहातेजामेनकांकुशिकात्मजः
रूपेणाप्रतिमांतत्रविद्युतंजलदेयथा॥५॥ कंदर्पदर्पवशगोमुनिस्तामिदमब्रवीत्॥६॥ अप्सरः-
स्वागतंतेस्तुवसचेहममाश्रमे॥ अनुगृह्णीष्वभद्रंतेमदनेनविमोहितं॥७॥ इत्युक्तासावरारोहात
त्रावासमथाकरोत्॥ तपसोहिमहाविघ्नोविश्वामित्रमुपागमत्॥८॥ तस्यांवसंत्यांवर्षाणिपंच
पंचवराघव॥ विश्वामित्राश्रमेसौम्यसुखेनव्यतिचक्रमुः॥९॥
द्युतमिव ५ कंदर्पकृतोदर्पोमदः ६ अनुगृह्णीष्वमत्कामतांपरामवेत्यर्थः ७ वरारोहाश्रेष्ठजघना ८ पंचपंचदशे ॥१८१॥
त्यर्थः ९

१० सामर्षो देवेषु विघ्नस्य तत्कृतत्वज्ञानात्तत आह सर्वमिति ११ अहोरात्रापदेशेन एकाहोरात्रतुल्यतया १२ वेपंतींवे
पमानां मधुरैः मत्प्रार्थनयास्थितासीतितवनकश्चनदोषइत्यादिवाक्यैः क्रोधस्यसंकल्पपूर्वंत्यक्तत्वाद्त्रशापा

अथकालेगतेतस्मिन्विश्वामित्रोमहामुनिः॥सव्रीडइवसंवृत्तश्चिंताशोकपरायणः॥१०॥बुद्धिर्मुनेः
समुत्पन्नासामर्षारघुनंदन॥सर्वंसुराणांकर्मैतत्तपो~~नत्वो~~पहरणंमहत्॥११॥अहोरात्रापदेशेनग
ताःसंवत्सरादश॥काममोहाभिभूतस्यविघ्नोयंप्रत्युपस्थितः॥१२॥सनिश्वसन्मुनिवरःपश्चात्तापेन
दुःखितः॥भीतामप्सरसंदृष्ट्वावेपंतींप्रांजलिंस्थितां॥मेनकांमधुरैर्वाक्यैर्विसृज्यकुशिकात्मजः
१३॥उत्तरंपर्वतंरामविश्वामित्रोजगामह॥१४॥सकृत्वानैष्ठिकींबुद्धिंजेतुकामोमहायशाः॥कौ
शिकीतीरमासाद्यतपस्तेपेदुरासदं॥१५॥तस्यवर्षसहस्राणिघोरंतपउपासतः॥उत्तरेपर्वतेरामदे
वतानामभूद्भयं॥१६॥ पे

दानंते नास्य क्रोधजपो जात इत्युक्तम् १३ ततस्तत्र बहुविघ्नदर्शनादुत्त
रगवनं नैष्ठिकीं अत्युत्कटब्रह्मचर्यविषयां बुद्धिनिश्चयं जेतुकामः काममिति शेषः १५ १६

समागम्यब्रह्मरोतिशेषः सभंभोभगवन्नितिशेषः १७ देवप्रार्थनयामहर्षिशब्देनैवसंबोधयतिमहर्षेइति मह
त्वस्यविवर्णऋषिमुख्यत्वमिति १९ २० अतुलंसर्वोत्तमंब्रह्मशब्दमरमीषंस्वार्जितैःकर्मभिःप्राप्यपरिभ

आमंत्रयन्समागम्यसर्वेसर्षिगणाः॥सुराःमहर्षिशब्दंलभतांसाध्वयंकुशिकात्मजः॥१७॥देवता
नांवचःश्रुत्वासर्वलोकपितामहः॥अब्रवीन्मधुरंवाक्यंविश्वामित्रंतपोधनं॥१८॥महर्षेस्वागतंव
त्सतपसोग्रेणतोषितः॥महत्वमृषिमुख्यत्वंददामितवकौशिक॥१९॥ब्रह्मणस्तुवचःश्रुत्वावि
श्वामित्रस्तपोधनः॥प्रांजलिःप्रणतोभूत्वाप्रत्युवाचपितामहं॥२०॥ब्रह्मर्षिशब्दमतुलंस्वार्जि
तैःकर्मभिःशुभैः॥यदिमेभगवानाहततोहंविजितेंद्रियः॥२१॥तमुवाचततोब्रह्मानतावत्त्वंजितेंद्रि
यः॥यतस्वमुनिशार्दूलइत्युक्त्वात्रिदिवंगतः॥२२॥विप्रस्थितेषुदेवेषुविश्वामित्रोमहामुनिः॥ऊ
र्ध्ववाहुर्निरालंबोवायुभक्षस्तपश्चरन्॥२३॥घर्मेपंचतपाभूत्वावर्षास्वाकाशसंश्रयः॥शिशिरेस
लिलेशायीरात्र्यहानितपोधनः॥एवंवर्षसहस्रंहितपोघोरमुपागमत्॥२४॥

गवानाहततोहंविजितेंद्रियइत्यर्थः २१ नतावत्त्वंजितेंद्रियःविकारहेतुसन्निधानेयावन्नविकरोषितावत्तं
कालंतवजितेंद्रियत्वंनास्तीभावः २२ २३ घर्मेग्रीष्मे आकाशंनिरावरणोदेशः २४

२५ २६ इतित्रिषष्टितमःसर्गः ६३ लोभनंप्रतारणं काममोहेनकामज्वलितचित्तवैवश्येनसमन्वितमयुक्तम्

तस्मिन्संतप्यमानेतुविश्वामित्रेमहामुनौ॥संतापःसुमहानासीत्सुराणांवासवस्यच॥२५॥रंभामप्सरसंश
क्रैःसर्वैःसहमरुद्गणैः॥उवाचात्महितंवाक्यमहितंकौशिकस्यच॥२६॥इत्यार्षेरामायणेवाल्मीकीयेबा
लकांडेत्रिषष्टितमःसर्गः॥६३॥सुरकार्यमिदंरंभेकर्तव्यंसुमहत्वया॥लोभनंकौशिकस्येहकाममो
हसमन्वितं॥१॥तथोक्तासाप्सराराम सहस्राक्षेणधीमता॥व्रीडिताप्रांजलिर्वाक्यंप्रत्युवाचसुरेश्वरं
२॥अयंसुरपतेघोरोविश्वामित्रोमहामुनिः॥क्रोधमुत्स्रजनेक्रूरंमयिदेवनसंशयः॥३॥ततोहिमेभयं
देवप्रसादंकर्तुमर्हसि॥एवमुक्तस्तयारामसभयंभीतयाप्सराः॥४॥तामुवाचसहस्राक्षोवेपमानांकृतां
जलिं॥माभैषीरंभेभद्रंतेकुरुष्वममशासनं॥५॥कोकिलोहृदयग्राहीमाधवेरुचिरद्रुमे॥अहंकंदर्प
सहितःस्थास्यामितवपार्श्वतः॥६॥

१ व्रीडिताऽशक्यार्थवचनमित्तलज्जावती २ उत्स
जतेउत्स्रक्ष्यतेइत्यर्थः ३ ततस्तस्मात् प्रसादंनियोगाभावेहरूपं ४ ५ माधवेवसंतेकोकिलोभूत्वाहमित्यन्वयः ६

॥१८२॥ बहुगुणांहावभावविभ्रमोपेतंरूपंरूपपरिस्कारं भेदयस्वकाममोत्पादनंतपसश्चालय ८ साललितासुंद
री ८ वल्गुमनोहरंकमनीयविषयलाभाच्चेतसोहर्षः ९ तस्यकोकिलस्यशब्देनगीतेनरंभायाइतिशेषः
संदेहः स्यात एवास्यापदस्यागमनंउत्तंद्रप्रेरितायामत्तपोभंगार्थमित्येवंरूपं १० तत्सर्वंरंभागमनंतत्र

त्वंहिरूपेणबहुगुणांकन्चापरमभास्वरं ॥ तमृषिंकौशिकंरंभे भेदयस्वतपस्विनं ॥८॥ साश्रुत्वावचनंत
स्यकृत्वारूपमनुत्तमं ॥ लोभयामासललिताविश्वामित्रंशुचिस्मिता ॥प॥ कोकिलस्यतुशुश्रावववल्गुव्या
हरतःस्वनं ॥ संप्रहृष्टेनमनसासचैनामन्ववैक्षत ॥९॥ अथतस्यचशब्देनगीतेनाप्रतिमेनच ॥ दर्शनेन
चरंभायामुनिःसंदेहमागतः ॥१०॥ सहसातस्यतत्सर्वंविज्ञायमुनिपुंगवः ॥ रंभाक्रोधसमाविष्टःशशा
पकुशिकात्मजः ॥११॥ यन्मांलोभयसेरंभेकामक्रोधजयैषिणं ॥ दशवर्षसहस्राणिशैलीस्थास्यसिदु
र्भगे ॥१२॥

कृतप्रलोभनेचसहसास्वप्रेरणामूलमितियुक्तयाध्यानेनचविज्ञायनिश्चित्यरंभांशशापेत्यन्वयः ११ शैली
शिलाप्रतिमारूपा १२ ॥१८२॥

यद्यपिस्वामिनियोगात्स्वयत्तायारंभायाशापदानंमनुचितंइंद्रेरावतद्दानमुचितंतथापिक्रोधावेशवशाद्विवेकाभा
वः अतएवपश्चाद्विवेकंलब्ध्वातामनुग्रह्णातिब्राह्मणताइति एतेनकामादपिक्रोधोदुर्जयइतिसूचितं १३ आत्म

ब्राह्मणः सुमहातेजास्तपोबलसमन्वितः ॥ उद्धरिष्यतिरंभेत्वांमत्क्रोधकलुषीकृतां ॥१३॥ एवमुक्त्वामहा
तेजाविश्वामित्रोमहामुनिः ॥ अशक्नुवन्धारयितुंकोपंसंतापमात्मनः ॥१४॥ तस्यशापेनमहतारंभाशै
लीतदाभवत् ॥ वचःश्रुत्वाचकंदर्पोमहर्षेःसचनिर्गतः ॥१५॥ कोपेनचमहातेजास्तपोपहरणेकृते ॥ इं
द्रियैरजितैरामनलेभेशांतिमात्मनः ॥१६॥ बभूवास्यमनश्चिंतातपोपहरणेकृते ॥ नैवक्रोधंगमिष्यामि
नचवक्ष्येकथंचन ॥१७॥ अथवानोच्छ्वसिष्यामिसंवत्सरशतान्यपि ॥ अहंहिशोषयिष्याम्यात्मा
नंविजितेंद्रियः ॥१८॥

नः कोपंधारयितुमशक्नुवानस्तांशप्त्वातपोव्ययजन्यदुःखेनसंतापंपश्चात्तापमुपागतइतिशेषः १४ महर्षे
र्वचःश्रुत्वाकंदर्पःसचइंद्रश्चनिर्गतइत्यन्वयः १५ कोपेनचात्कामेनतपोहरणेकृतेसतिकामक्रोधहतत्वा
द्देयाजितैरिंद्रियैरात्मनोमनसःशांतिंदुःखोपशमंनलेभे १६ नवक्ष्येशापादिवचनमितिशेषः १७ नोच्छ्वसिष्यामि
केवलकुंभकंकरिष्यामीत्यर्थः आत्मानंशरीरं १८

॥१८४॥ यावत्यावताकालेनब्राह्मण्यंप्राप्तंभवत्तावत् शाश्वतीःसमाःबहून्संवत्सरान् १९ मूर्त्तयःशरीरावयवाःक्षयं
नयास्यंतिस्पंदंति तपःप्रभावादितिभावः २० वर्षसहस्रस्यदीक्षांवर्षसहस्रानुपायिनींदीक्षां अनुभूसाभो
जनेउद्दिश्यअप्रतितांसर्वथैवंकरिष्येइत्यध्यवसायंचकारः २१ इतिचतुःषष्टितमःसर्गः ६४ अथप्रतिज्ञो

तावद्यावद्धिमेप्राप्तंब्राह्मण्यंतपसोर्जितं॥अनुच्छ्वसन्नभुंजानस्तिष्ठेयंशाश्वतीःसमाः॥१९॥नहिमेत
प्यमानस्यक्षयंयास्यंतिमूर्त्तयः॥२०॥एवंवर्षसहस्रस्यदीक्षांसमुनिपुंगवः॥चकाराप्रतिमांलोकेप्र
तिज्ञांरघुनंदन॥२१॥इत्यार्षेरामायणेवाल्मीकीयेबालकांडेचतुःषष्टितमःसर्गः॥६४॥अथहैमव
तींरामदिशंत्यक्त्वामहामुनिः॥पूर्वांदिशमनुप्राप्यतपस्तेसुदारुणां॥१॥मौनंवर्षसहस्रस्यकृत्वाव्र
तमनुत्तमं॥चकाराप्रतिमंरामतपःपरमदुष्करं॥२॥पूर्णेवर्षसहस्रेतुकाष्ठभूतंमहामुनिं॥वि
घ्नैर्बहुभिराधूतंक्रोधोनांतरमाविशत्॥३॥ पे

तरेहैमवतींउत्तरां १ मौनंव्रतंमौनरूपंव्रतंकृत्वासंकल्प्येत्यर्थः मौनंचात्रकाष्ठमौनं २ काष्ठभूतंकाष्ठ ॥१८४॥
वदवस्थितं आधूतमाकुलीकृतमपि अंतरमंतःकरणम् ३

निश्चयं क्रोधाकरणविषयकं वर्षसहस्रसंवंधि निवृत्ते पूर्णे सति ४ तस्मिन्काले व्रतपारणकाले ५ वि
हुंपकं निःशेषितोद्दत्ते ऽप्रभुक्त्वैव पुनः पाकारणारभूत्कै ६ मौनं कृत्वाऽस्मासीदित्यन्वयः ७ नोच्छ्स

सकृत्वानिश्चयंरामतपश्चातिष्ठताव्ययं॥तस्यवर्षसहस्रस्यव्रतेपूर्णेमहाव्रतः॥४॥भोक्तुमारब्धवा
नन्नंतस्मिन्कालेरघूत्तम॥इंद्रोद्विजातिर्भूत्वातंसिद्धमन्नमयाचत॥५॥तस्मैदत्वातदासिद्धंसर्वं
विप्रायनिश्चितः॥निःशेषितेन्नेभगवानभुक्त्वैवमहातपाः॥६॥नकिंचिदवदद्विप्रंमौनव्रतमुपास्थि
तः॥तथैवासीत्पुनर्मौनमनुच्छ्वासंचकारह॥७॥अथवर्षसहस्रंचनोच्छ्वसन्मुनिपुंगवः॥तस्यानुच्छ्वस
मानस्यमूर्ध्निधूमोव्यजायत॥८॥त्रैलोक्यंयेनसंभ्रांतमादीपितमिवाभवत्॥ततोदेवर्षिगंधर्वाःपन्नगो
रगराक्षसाः॥९॥मोहितास्तपसातस्यतेजसामंदरश्मयः॥कश्मलोपहताःसर्वेपितामहमथाब्रुवन्
१०॥

नश्वासोच्छ्वासरहिताः धूमइति धूमकेतुरित्यर्थः अग्निरितियावत् अतएवाग्नेरातापित
मिवेतिवक्ष्यति ८ येनवह्निनायथातापितःपुमान्संभ्रांतोव्याकुलोभवतितद्वत्त्रैलोक्यंसंभ्रांतमभूदित्य
र्थः ९ तपसातेजसातपोरूपेणतेजसामोहिताःमूर्छिताःमंदरश्मयःक्षीणतेजसःकश्मलंदुःखं १० राम

तत्तद्विपयैर्लोभितक्रोधितोपिनिर्विघ्नमेवतोत्यक्तोतपसाभिवर्द्धते ११ सूक्ष्ममपिवृजिनंसूक्ष्ममपिपापंकाक्रोध
लक्षणं यदभीप्सितंवृजिनमर्षितंच १२ अन्यथालोकनाशइत्याहविनाशयतीति नाशप्रकारमाहव्याकुलाइति १३

बहुभिःकारणैर्देवविश्वामित्रोमहामुनिः॥ लोभितःक्रोधितःश्चैवतपसाचाभिवर्द्धते॥११॥ नह्यस्यव
जिनंकिंचिद्दृश्यतेसूक्ष्ममप्यथ॥ नदीयतेयदिह्यस्यमनसायदभीप्सितं॥१२॥ विनाशयतित्रैलो
क्यंतपसासचराचरं॥ व्याकुलाश्चदिशःसर्वानचकिंचित्प्रकाशते॥१३॥ सागराःक्षुभिताःसर्वेवि
शीर्यंतेचपर्वताः॥ प्रकंपतेचपृथिवीवायुर्वातीहसंकुलः॥१४॥ ब्रह्मन्नप्रतिजानीमोनास्तिको
जायतेजनः॥ संमूढमिवत्रैलोक्यंसंप्रक्षुभितमानसं॥१५॥ भास्करोनिष्प्रभश्चैवमहर्षेस्तस्यते
जसा॥ बुद्धिंनकुरुतेयावन्नाशेदेवमहामुनिः॥१६॥

१४ नप्रतिजानीमःतत्प्रतीकारंनजानीमः नास्तिकोजायतेक्षोभवशान्नास्तिकइवकर्मानुष्ठानशून्यइत्यर्थः त
दाहसंमूढमिति संप्रक्षुभितमानःसंव्याकुलचित्तम् १५ नाशेजगन्नाशे १६

पूर्वयुगांतकाले १६ प्रघस्य॰प्रभीष्टंनदीयतेतदासौदेव राज्यंचिकीर्षेत१७अतोऽस्ययन्मनस्तत्स्वयंब्रह्मर्षित्वंतदीयतामित्यर्थः

तावत्प्रसाद्योभगवन्नग्निरूपोमहाद्युतिः॥ कालाग्निनायथापूर्वंत्रैलोक्यंदह्यतेखिलं॥१७॥ देव
राज्यंचिकीर्षेतदीयतामस्ययन्मतं॥ततःसुरगणाःसर्वेपितामहपुरोगमाः ॥१८॥ विश्वामित्रंम
हात्मानंवाक्यंमधुरमब्रुवन्॥ब्रह्मर्षेस्वागतंतेस्तुतपसास्मसुतोषिताः॥१९॥ ब्राह्मण्यंतपसो
ग्रेणप्राप्तवानसिकौशिक॥दीर्घमायुश्चतेब्रह्मन्ददामिसमरुद्गणाः ॥२०॥ स्वस्तिप्राप्नुहिभद्रंते
गच्छसौम्ययथासुखं॥पितामहवचःश्रुत्वासर्वेषांत्रिदिवौकसां ॥२१॥कृत्वाप्रणामंमुदितोव्याज
हारमहामुनिः॥ ब्राह्मण्यंयदिमेप्राप्तंदीर्घमायुस्तथैवच ॥२२॥

१८ स्वागतंतेभद्रंस्मेतिविसर्गलोपश्चार्षः १९ दीर्घायुर्दानंदर्शनफलं २० स्वस्तिसुखं यथासुखंतपसउपरतेइतिशेषः २१
यदिइत्यसंदिग्धेसंदिग्धवचनंवेदाःप्रमाणंचेदितिवत् २२

ओमिति ब्रह्मज्ञानसानं वषडिति यज्ञसाधनं वेदाश्च तदपेक्षितांगोपांगप्रतिपादकाः वरयन्तु वरां चाध्यापनयाजन
योरनुमतिः ब्रह्माद्यनुग्रहेपि जातिब्राह्मण्याभावाद्वसिष्ठेनानंगीकारे व्यर्थमेव सर्वमतस्तं प्राह क्षत्रेत्यादि २२ एवं हे ब्र
ह्मर्षे इति वदन्तु हे देवताः एवं वसिष्ठमुखेन ब्रह्मर्षित्ववादरूपो मम परमः कामः मनोरथो यदि कृतस्तदा मदिष्टे

ॐकारोथ वषट्कारो वेदाश्च वरयंतु मां ॥ क्षत्रवेदविदां श्रेष्ठो ब्रह्मवेदविदामपि ॥२३॥ ब्रह्मपुत्रो वसिष्ठो
मामेवं वदतु देवताः ॥ यद्येवं परमः कामः कृतो यांतु सुरर्षभाः ॥२४॥ ततः प्रसादितो देवैर्वसिष्ठो जपतां वरः सख्यं
चकार ब्रह्मर्षिरेवमस्त्विति चाब्रवीत् ॥२५॥ ब्रह्मर्षिस्त्वं न संदेहः सर्वं संपद्यते तव ॥ इत्युक्त्वा देवताश्चापि
सर्वा जग्मुर्यथागतं ॥२६॥ विश्वामित्रोपि धर्मात्मा लब्ध्वा ब्राह्मण्यमुत्तमं ॥ पूजयामास ब्रह्मर्षिं वसिष्ठं जप
तां वरं ॥२७॥

कृत्वा सुरर्षभा यांतु गच्छन्तु यद्यापुनस्तपश्चरिष्यामीति तात्पर्यं २४ ततो विश्वामित्रोत्थानन्तरं विश्वामित्रस्य ब्रह्मर्षित्वा
नुमतये देवैः प्रसादितो ब्रह्मर्षिर्वसिष्ठस्तेन सख्यं चकार एवं ब्रह्मर्षित्वं चास्त्विति अब्रवीदिति संबंधः २५ सर्वब्राह्म
ण्यप्रयोजकं ब्राह्मणाज्जन्म ततः संस्कारादि संपद्यते संपन्नं इति वसिष्ठोक्तं देवताश्चापृच्छ्य जग्मुरित्यन्वयः २६ २७

चचारेतिविश्वामित्रइतिशेषः २८ नित्यमिदानीमपि वीर्यस्यतपोवीर्यस्य २९ ३० ३१ पावितःपवित्रःकृतः ३२ गुणाःकृ

कृतकामोमहींसर्वांचचारतपसिस्थितः ॥ एवंत्वनेनब्राह्मण्यंप्राप्तंराममहात्मना ॥ २८ ॥ एषराममुनिश्रेष्ठएष
विग्रहवांस्तपः ॥ एषधर्मपरोनित्यंवीर्यस्यैषपरायणं ॥ २९ ॥ एवमुक्त्वामहातेजाविररामद्विजोत्तमः ॥ शता
नंदवचःश्रुत्वारामलक्ष्मणसंनिधौ ॥ ३० ॥ जनकःप्रांजलिर्वाक्यमुवाचकुशिकात्मजं ॥ धन्योस्म्यनुगृहीतो
स्मियस्यमेमुनिपुंगव ॥ ३१ ॥ यज्ञंकाकुत्स्थसहितःप्राप्तवानसिकौशिक ॥ पावितोहंत्वयाब्रह्मन्दर्शनेनमहा
मुने ॥ ३२ ॥ गुणाबहुविधाःप्राप्तास्तवसंदर्शनान्मया ॥ विस्तरेणचवैब्रह्मन्कीर्त्यमानंमहत्तपः ॥ ३३ ॥ श्रुतंमयाम
हातेजोरामेणचमहात्मना ॥ सदस्यैःप्राप्यचसदःश्रुतास्तेबहवोगुणाः ॥ ३४ ॥ अप्रमेयंतपस्तुभ्यमप्रमेयंचतेब
लं ॥ अप्रमेयागुणाश्चैवनित्यंतेकुशिकात्मज ॥ ३५ ॥

मच्छ्रेयःप्राप्तानितिश्रेयस्त्वलक्षणाः ३३ महातेजइतिसंबुद्धिः मयारामेणचसदःप्राप्यस्थितैःसदस्यैश्चतेगुणाःश्रुताः तु
अप्रमितितिवेत्यर्थःअप्रमेयंइयत्तानाविषयं ३५

॥१८७॥ कथानामितिस्रवतइतिशेषः तृप्तिरलंवुद्धिः कर्मकालइतिज्ञप्रतिवर्ततइतिशेषः तद्देवालंवतइति ३६ स्वागतंभद्रंअ
नुज्ञातुंकर्मणाइतिशेषः ३७ ३८ ३९ स्ववाटंस्वनिवेशं ४० इतिपंचषष्टितमःसर्गः ६५ कृतकर्माकृतनित्यक्रियः १

नतृप्तिराश्चर्यभूतानांकथानांनास्तिमेविभो॥ कर्मकालोमुनिश्रेष्ठलंवतेरविमंडलं॥३६॥ स्वःप्रभातेम
हातेजोद्रष्टुमर्हसिमांपुनः स्वागतंजपतांश्रेष्ठमामनुज्ञातुमर्हसि॥३७॥ एवमुक्तोमुनिवरःप्रशस्यपुरुष
र्षभं विससर्जाशुजनकंप्रीतंप्रीतमनास्तदा॥३८॥ एवमुक्त्वामुनिश्रेष्ठंवैदेहोमिथिलाधिपः प्रदक्षिणं
चकाराशुसोपाध्यायःसबांधवः॥३९॥ विश्वामित्रोपिधर्मात्मासहरामःसलक्ष्मणः॥ स्ववाटमभिच
क्रामपूज्यमानोमहात्मभिः॥४०॥ इत्यार्षेरामायणेवालकांडेपंचषष्टितमःसर्गः॥६५॥ ततःप्रभातेविमले
कृतकर्मानराधिपः॥ विश्वामित्रंमहात्मानमाजुहावसराघवं॥१॥ तमर्चयित्वाधर्मात्माशास्त्रदृष्टेन
कर्मणा॥ राघवौचमहात्मानौतदावाक्यमुवाचह॥२॥

कर्मणाऽर्घ्यपाद्यादिरूपेणतंविश्वामित्रंराघवौचपूज्यवाक्यमुवाच विश्वामित्रंप्रतीतिशेषः २ श्रीसीतारामराम ॥१८७॥

आज्ञाप्यः आज्ञापयितुं योग्यः भवतेति कृत्यानां कर्त्तरि षष्ठी विकल्पात्तृतीया आगमनप्रयोजनं बोधनीयमिति तात्प
र्यं २ ४ द्रष्टुकामौ आगताविति शेषः ५ अस्य दर्शनाद्देवकृतकामो भूत्वा प्रतियास्यत इत्यन्वयः ६ ततो धनु

भगवन्स्वागतं तेऽस्तु किं करोमि तवानघ ॥ भवानाज्ञापयनु मामाज्ञाप्यो भवताह्यहं ॥ ३ ॥ एवमुक्तः स ध
र्मात्मा जनकेन महात्मना ॥ प्रत्युवाच मुनिश्रेष्ठो वाक्यं वाक्यविशारदः ॥ ४ ॥ पुत्रौ दशरथस्येमौ क्षत्रियौ ।
लोकविश्रुतौ ॥ द्रष्टुकामौ धनुःश्रेष्ठं यदेतत्त्वयि तिष्ठति ॥ ५ ॥ एतद्दर्शय भद्रं ते कृतकामो नृपात्मजौ
दर्शनादस्य धनुषो यथेष्टं प्रतियास्यतः ॥ ६ ॥ एवमुक्तस्तु जनकः प्रत्युवाच महामुनिं ॥ श्रूयतामस्य ध
नुषो यदर्थमिह तिष्ठति ॥ ७ ॥ देवरात इति ख्यातो निमेः ज्येष्ठो महीपतिः ॥ न्यासोऽयं तस्य भगवन्हस्ते द
त्तो महात्मनः ॥ ८ ॥

र्वृत्तांतमाह जनकः एवमिति यस्य दिदृक्षितस्य धनुषः श्रूयतामागमनादिवृत्तांत इ
ति शेषः यदर्थं यत्प्रयोजनाय इस्मद्गृहे तिष्ठति तच्च श्रूयतां ७ निमिः कूटस्थः तस्य ज्येष्ठः पुत्रो देवरातस्तस्य
हस्तेऽयं धनुरूपः न्यासो नितरामास्ते देवतायंत्रेति श्रुत्यस्यान्यासो देवपूजास्थानं तत्पूजार्थं शत्रुवधार्थं च दत्त इ
त्यर्थः न्यासस्य निक्षेपपर्यायाख्यानेन तु निक्षेपस्य शुल्कीकरणमनुचितं स्या ८ रामराम

॥१८५॥ कैर्दैतत्तत्राह दक्षस्येत्यादि दक्षयज्ञवधे दक्षयज्ञौतवधनिमित्तं सलीलं धनुरायम्य नमनसज्जीकरणपूर्वकमाकृष्य
रोषात्रिदशान्विधुयेदमब्रवीत् ९ भागार्थिन इत्यिष्टकृदाहवियज्ञभागार्थिनो मम भागं यतो नाकल्पयंस्तसु-
राः अतो वो वरांगानि शिरांसि धनुषा शातयामि छिनद्मि अकल्पयत इत्येकवचनमार्षं महार्हाणि महापूजा-

स्तयज्ञवधे पूर्वं धनुरायम्य वीर्यवान् ॥ विध्वस्य त्रिदशान्रोषात्सलीलमिदमब्रवीत् ॥ ९ ॥ यस्माद्भागा-
र्थिनो भागान्नाकल्पयत मे सुराः ॥ वरांगानि महार्हाणि धनुषा शातयामि वः ॥ १० ॥ ततो विमनसः सर्वे दे-
वा वै मुनिपुंगव ॥ प्रसादयंतो देवेशं तेषां प्रीतोभवद्भवः ॥ ११ ॥ प्रीतियुक्तस्तु सर्वेषां ददौ तेषां महात्मनो
१२ ॥ तद्देवदेवदेवस्य धनूरत्नं महात्मनः ॥ न्यासभूतं तदान्यस्तमस्माकं पूर्वके विभो ॥ १३ ॥

पीतानि १० विमनसो दीनाः भयोत्कटः ११ प्रीतियुक्तस्तु हरस्तेभ्यो महात्मभ्यः सर्वेभ्यो देवेभ्यो दक्षो संहारार्थं गृ-
हीतं धनुरिति शेषः १२ महात्मनः शीघ्रतोषस्य देवस्य हरस्य देवैर्लब्धं तदेतद्धनूरत्नमस्माकं पूर्वके वरा-
तैः शिवसहितैर्देवैर्न्यासभूतं देवपूजास्थानभूतं न्यस्तं दत्तं तदुक्तं कौर्मे प्रीतश्च भगवानीशस्त्रिशूली नी- ॥१८८॥
ली ललोहितः प्रददौ शत्रुनाशार्थं जनकायभुक्तं धनुरिति १३

अथेति यत्तोत्तरारंभे क्षेत्रं यागभूमिं मम कृषतः मयि कृषति अग्निचयनार्थमिति शेषः ऋषभेराकृषतीत्यादिशास्त्रात
लांगलात् उत्थिता आविर्भूता यतः क्षेत्रं शोधयता सीताया लांगलपद्धतेर्मया लब्धा ततो नाम्ना सीतेति प्रसिद्धा यत
इयमयोनिजा मे कन्या अतो वीर्यशुल्केति स्थापिता न कस्मैचिद् दत्तेति भावः पाद्मोपि अपलोके स्वरीलक्ष्मी

अथ मे कृषतः क्षेत्रं लांगलादुत्थिता ततः ॥ क्षेत्रं शोधयता लब्ध्वा नाम्ना सीतेति विश्रुता ॥ वीर्यशुल्केति मे
कन्या स्थापितेयमयोनिजा ॥ १४ ॥ भूतलादुत्थितां तां तु वर्धमानां ममात्मजां ॥ वरयामासुरागम्य राजानो
मुनिपुंगव ॥ १५ ॥ तेषां वरयतां कन्यां सर्वेषां पृथिवीक्षितां ॥ वीर्यशुल्केति भगवन्न ददामि सुतामहं ॥
१६ ॥ ततः सर्वे नृपतयः समेत्य मुनिपुंगव ॥ मिथिलामभ्युपागम्य वीर्यं जिज्ञासवस्तदा ॥ १७ ॥ तेषां जि
ज्ञासमानानां शैवं धनुरुपाहृतं ॥ न शेकुर्ग्रहणे तस्य धनुषस्तोलनेपि वा ॥ १८ ॥

जनकः पुरेत्वतः शुभक्षेत्रे हलोत्खाते तारे चोत्तरफाल्गुने अयोनिजा पद्मकरा बालार्कशतसन्निभा सीता
मुखे समुत्पन्ना बालभावेन सुंदरी सीतामुखोद्भवात्सीता इत्यस्यै नाम चाकरोत् ततोभूत्सोदरी तस्य उर्मिला मा
कन्यकेति १४ १५ न ददामि न प्राहं १६ वीर्यं धनुषः सारं जिज्ञासवः अभूवन्निति शेषः १७ उपाहृतं आनीय
दर्शितं ग्रहणे धारणे तोलने[illegible]ने भारपरीक्षार्थं हस्तेन चालने १८

॥१८८॥ प्रत्याख्याताकन्यानदत्तेतियावत् तदिस्पष्टंततोनेतरंप्रवृत्तंतन्निबोधजानीहि १९ व्यूहंधनुरुपहर्तुंततः
वीर्यसंदेहधनुरारोपणालक्षणावीर्यविषयेअन्येषांसंदेहविषयत्वमागता अतोबलेनैवकन्यांग्रहीष्यामइत्थं
रुंधन्नित्यर्थः २० मिथिलारोधोनिमित्तंतदाहआत्मानमिति तेचसर्वेनृपाः आत्मानमयाअवधूतंवीर्य
शुल्ककरणेनतिरस्कृतंविज्ञायमिथिलांपीडयन् अपीडयन्नित्यर्थः २१ साधनानिदुर्गरक्षणसाधना

तेषांवीर्यवतांवीर्यमल्पंज्ञात्वामहामुने। प्रत्याख्यातानृपतयस्तन्निबोधतपो धन॥१९॥ततःपरमकोपे
नराजानोमुनिपुंगव। अरुंधन्मिथिलांसर्वेवीर्यसंदेहमागताः॥२०॥आत्मानमवधूतंतेविज्ञायनृपपुं
गवाः॥ रोषेणमहताविष्टाःपीडयन्मिथिलांपुरीं॥२१॥ततःसंवत्सरेपूर्णेक्षयंयातानिसर्वशःसाधना
निमुनिश्रेष्ठततोहंभृशदुःखितः॥२२॥ततोदेवगणान्सर्वांस्तपसाहंप्रसादये। ददुश्चपरमप्रीता
श्चतुरंगबलंसुराः॥२३॥ततोभग्नानृपतयोहन्यमानादिशोययुः॥अवीर्यावीर्यसंदिग्धाःसामात्याःपाप
कारिणः॥२४॥

नि क्षयंप्राप्तानिपुरुषशादितिशेषः २२ प्रसादयंप्रसादितवान्लङ्डभावआर्षः
सुराददुःजगन्मातृरक्षणार्थंस्वकार्यसिद्ध्यर्थंचदेवबलदानं २३ दिशोययुःसमूहंविसृज्येतिशेषः अ ॥१८८॥
वीर्याः अल्पवीर्यावीर्यसंदिग्धाःसंदिग्धवीर्याः २४

तदेतत्उक्तवृत्तांतकं २५ २६ इतिषट्षष्ठितमः सर्गः ६६ रामायइतिहेत्यसंधिरैच्छिकः सचिवान समीपेविद्यमानात् २
याविशन्पुरंयत्नयाटादितिशेषः ३ शतानिपंचाशात् पंचसहस्राणीत्यर्थः आयता दीर्घाः महात्मानो दृढपुष्टशरीराः अ
ष्टचक्रां अष्टचक्रवच्छकटारोपितामित्यर्थः मंजूषां धनुःवेष्टिकां समूहुः आचकर्षुः यद्वा अष्टचक्रां अष्टायश्चक्ररक्षा

तदेतन्मुनिशार्दूल धनुःपरमभास्वरं ॥ रामलक्ष्मणयोश्चापि दर्शयिष्यामि सुव्रत ॥२५॥ यद्यस्य धनुषो
रामः कुर्याद्दारोपणंमुने ॥ सुतामयोनिजां सीतां दद्यां दाशरथेरहं ॥२६॥ इत्यार्षे रामायणे बालकांडे षट्ष
ष्ठितमः सर्गः ॥६६॥ जनकस्य वचः श्रुत्वा विश्वामित्रो महामुनिः ॥ धनुर्दर्शय रामाय इति होवाच पार्थिवं ॥१
ततः स राजा जनकः सचिवान्व्यादिदेश ह ॥ धनुरानीयतां दिव्यं गंधमाल्यानुलेपनं ॥२॥ जनकेन समादि
ष्टाः सचिवाः प्राविशन्पुरं ॥ तद्धनुः पुरतः कृत्वा निर्जग्मुरमितौजसः ॥३॥ नृणां शतानि पंचाशद्व्यायता
नां महात्मनां ॥ मंजूषामष्टचक्रां तां समूहुस्ते कथंचन ॥४॥

वेष्टितां समूहुः हस्तैरितिशेषः ते पंचसहस्रसंख्याविशिष्टा अपि कथंचन महताप्रयत्नेन समूहुरित्यनेन धनुषोगुरुत्वा
दिदर्शितं ४

॥१९०॥

~~नयवतद्धनु~~
यत्रतद्धनुरस्तितांग्रायसींग्रयस्लोहनिर्मितांमंजूषांधनुर्वेटिकामाहायसुरोपमंजनकंनृपमंत्रिणाऊचुरित्यन्वयः ५ परि
दर्शनीयमितीच्छसितदादर्शय ६ उभौरामलक्ष्मणौतदाश्रयंधनुःप्रदर्शनमुद्दिश्यविश्वामित्रमभाषतेतियोजना ७

तामादायसुमंजूषामायसींयत्रतद्धनुः॥सुरोपमंतेजनकमूचुर्नृपतिमंत्रिणः॥ ५॥इदंधनुर्वरंराजन्पूजितं
सर्वराजभिः मिथिलाधिपराजेंद्र दर्शनीयंयदीच्छसि॥६॥तेषांनृपोवचःश्रुत्वा कृतांजलिरभाषत॥वि
श्वामित्रंमहात्मानंतावुभौरामलक्ष्मणौ॥ ७॥इदंधनुर्वरंब्रह्मन्जनकैरभिपूजितं॥राजभिश्चमहावी
र्यैरशक्तैःपूरितुंतदा॥८॥नैतत्सुरगणाःसर्वेनासुरानचराक्षसाः॥गंधर्वयक्षप्रवराःसकिंनरमहोरगाः
९॥क्वगतिर्मानुषाणांचधनुषोस्यप्रपूरणे॥आरोपणेसमायोगेवेपनेतोलनेतथा॥१०॥

मवीर्यैरपीय पूरितुमशक्तैस्तोलनेनोद्दिवस्यमानाम्वयाताशक्तैःराजभिस्तुजनकैर्देवतानातिरिक्तैःपूजितंऐश्वर्यत्वादीश्वरव
देवकेवलंपूजितमित्यर्थः ८ नैतदित्यादि अत्रश्लोकेउत्तरश्लोकोक्तानारोपणादीन्शब्दान्मुनेतान्कृत्वानैतदित्य
नेनसंबध्यंतेनतद्धनुः आरोपयितुंमौर्व्यासंयोजयितुंशरेणायोजयितुंमुष्टिनाकंपयितुंतोलयितुंभारपरीक्षार्थंहस्तेन
चालयितुंपूरयितुंकर्णांतमाक्रष्टुंचदेवाद्यस्योनशक्ताइतियोजनीयंक्वगतिर्मानुषाणांतुगतिः आरोपणादिशक्तिनैवेत्यर्थः ९ ॥१९०॥

॰आनीतमिति अथापित्वसतयेत्यादि ११ १२ यत्रधनुस्तिष्ठतितांमंजूषांअपावृत्यअपगतावरणांकृत्वाधनुर्दृष्ट्वाअथा
ब्रवीत् विश्वामित्रंप्रतीतिशेषः १३ स्पृशामीति दर्शनोत्सुकस्यनिवृत्तेःयाशब्दस्यार्थे यत्नवान्भविष्यामिकिमित्यब्रवीत्
अपृच्छदित्यर्थः १४ तंराजामुनिश्चबाढमित्येवाब्रवीत्समभाषतेतिप्रत्येकमन्वयः मध्येमध्यदेशेलीलयाअनाया

तदेतद्धनुषांश्रेष्ठमानीतंमुनिपुंगव ॥ दर्शयैतन्महाभागअनयोराजपुत्रयोः ॥११॥ विश्वामित्रःसधर्मात्मा ।
श्रुत्वाजनकभाषितं ॥ वत्सरामधनुःपश्यइतिराघवमब्रवीत् ॥१२॥ महर्षेर्वचनाद्रामोयत्रतिष्ठतितद्ध
नुः ॥ मंजूषांतामपावृत्यदृष्ट्वाधनुरथाब्रवीत् ॥१३॥ इदंधनुर्वरंदिव्यंसंस्पृशामीहपाणिना ॥ यत्नवांश्चभवि
ष्यामितोलनेपूरणेपिवा ॥१४॥ बाढमित्यब्रवीद्राजामुनिश्चसमभाषत ॥ लीलयासधनुर्मध्येजग्राहवच
नान्मुनेः ॥१५॥ पश्यतांनृसहस्राणांबहूनांरघुनंदनः ॥ आरोपयत्सधर्मात्मासलीलमिवतद्धनुः ॥१६॥
आरोपयित्वामौर्वींचपूरयामासतद्धनुः ॥ तद्बभंजधनुर्मध्येनरश्रेष्ठोमहायशाः ॥१७॥

सेनजग्राह पादांगुलेनोन्नतंकृत्वाकरेणजग्राह तदुक्तंपद्ये रामोपितद्धनुःकोटिंस्पृष्ट्वापादांगुलात्ततः उन्नतंचापमा
रोप्यबभंजेमोहिताजनाइति अनेनमधुरकिशोरमूर्तेर्महाबलत्वंसूचितं १५ पश्यतामित्यनादरेषष्ठी १६ पूरयामासाक
र्षेत

॥१२१॥ निर्घातोऽशनिध्वनिस्तन्निःस्वनसमः शब्दश्चासीत् दीर्यतः पर्वतःस्य समीपेदेशेयथाभूकंपस्तथाभूकंपश्चासीत् १८ १९
विगतसाध्वसः रामेणाधनुरनारोपणतोऽस्याः परिणयोदुर्घट इतियाभीः स्थितासागतेत्यर्थः २० भगवंनित्यर्द्धमेकंवाक्यं

तस्यशब्दोमहानासीन्निर्घातसमनिःस्वनः ॥ भूमिकंपश्चसुमहान्पर्वतस्येवदीर्यतः ॥१८॥ निपेतुश्चन
राःसर्वेतेनशब्देनमोहिताः ॥ वर्जयित्वामुनिवरंराजानंतौचराघवौ ॥१९॥ प्रत्याश्वस्तेजनेतस्मिन्राजा
विगतसाध्वसः ॥ उवाचप्रांजलिर्वाक्यंवाक्यज्ञोमुनिपुंगवं ॥२०॥ भगवन्दृष्टवीर्योमेरामोदशरथात्मजः
अत्यद्भुतमचिंत्यंचअतर्कितमिदंमया ॥२१॥ जनकानांकुलेकीर्तिमाहरिष्यतिमेसुता ॥ सीताभर्तारमा
साद्यरामंदशरथात्मजं ॥२२॥ ममसत्याप्रतिज्ञाचवीर्यशुल्केतिकौशिक सीताप्राणैर्बहुमतादेयारा
मायमेसुता ॥२३॥ भवतोनुमतेब्रह्मन्शीघ्रंगच्छंतुमंत्रिणः ॥ ममकौशिकभद्रंतेअयोध्यांत्वरितारथैः
॥२४॥

सत्या

अतर्कितमिदंमयातत्तदारोपणमित्यपरं अचिंत्यंअन्यत्रादर्शनात् अतर्कितंमनुष्येष्वसंभवात् अत्यद्भुतंबालेनकृ
तत्वात् इदंधनुरारोपणं २१ आहरिष्यतिसंपादयिष्यति २२ ममप्रतिज्ञांजातेतिशेषः प्राणैः प्राणेभ्यः २३ भवतोनु ॥१२१॥
मतेभवतोनुमत्याममंत्रिणा इत्यन्वयः २४

प्रश्रितैर्विनयसहितैः सर्वशः सर्वमप्यत्रान्येवृत्तांतमित्यर्थः २५ गुप्तौरक्षितौ प्रीतियुक्तमितिक्रियाविशेषणं २६ आ
भाष्याहूयकृतशासनात्दत्तकल्याणसंदेशपत्रान् २७ २८ इतिसप्तषष्टितमः सर्गः ६७ क्लांतावाहनायेषांतेतिथो

राजानं प्रश्रितैर्वाक्यैरानयंतु त्वरं मम ॥ प्रदानं वीर्यशुल्कायाः कथयंतु च सर्वशः ॥२४॥ मुनिगुप्तौ च काकु
त्स्थौ कथयंतु नृपाय वै ॥ प्रीतियुक्तं तु राजानमानयंतु सुशीघ्रगाः ॥२६॥ कौशिकस्तु तथेत्याह राजा चा
भाष्य मंत्रिणः ॥ अयोध्यां प्रेषयामास धर्मात्मा कृतशासनान् ॥२७॥ यथावृत्तं समाख्यातुमानेतुं च नृपं त
था ॥२८॥ इत्यार्षे रामायणे बालकांडे सप्तषष्टितमः सर्गः ॥६७॥ जनकेन समादिष्टा दूतास्ते क्लांतवाह
नाः ॥ त्रिरात्रमुषिता मार्गे तेऽयोध्यां प्राविशन्पुरीं ॥१॥ ते राजवचनाद्गत्वा राजवेश्म प्रवेशिताः ॥द
दृशुर्देवसंकाशं वृद्धं दशरथं नृपं ॥२॥ बद्धांजलिपुटाः सर्वे दूता विगतसाध्वसाः ॥ राजानं प्रश्रितं वा
क्यमब्रुवन्मधुराक्षरं ॥३॥

रात्रयस्त्रिरात्रं रात्रित्रयं १ राजवचनाज्जनकोऽस्मानिह प्रेषितवानिति स्वराजनामसंकीर्तनात् राजवेश्म प्रवेशिताः
तहिये द्वारपालैरिति शेषः २ विगतसाध्वसाः महाराजदूतत्वेन तस्य तत्सन्निधौ भयरहिताः ३

सग्निहोत्रपुरस्कृतः पुरस्क्रियंते इति पुरस्कृता मंत्रादयः अग्निहोत्रपदेन तत्साधनऋत्विजस्तैः सहित इत्यर्थः ४ कुश
लं सेमं अव्ययम् अनामयं हे महाराज सपुरःसरं त्वां जनकः पच्छते आङि नुप्रच्छोरित्यात्मनेपदं ५ एवमव्ययं कुश

मैथिलो जनको राजा साग्निहोत्रपुरस्कृतः ॥ मुहुर्मुहुर्मधुरया स्नेहसंरक्तया गिरा ॥ ४ ॥ कुशलं चाव्य
यं चैव सोपाध्यायपुरोहितं ॥ जनकस्त्वां महाराज पृच्छते सपुरःसरं ॥ ५ ॥ पृष्ट्वा कुशलमव्यग्रं वै
देहो मिथिलाधिपः ॥ कौशिकानुमते वाक्यं भवंतमिदमब्रवीत् ॥ ६ ॥ पूर्वं प्रतिज्ञा विदिता वीर्य
शुल्का ममात्मजा ॥ राजानश्च कृतामर्षा निर्वीर्या विमुखीकृताः ॥ ७ ॥ सेयं मम सुता राजन्विश्वा
मित्रपुरस्कृतैः ॥ यदृच्छयागतै राजन्निर्जिता तव पुत्रकैः ॥ ८ ॥

लं पृष्ट्वा कौशिकानुमते कौशिकानमतकृतसाधननिमित्तमिदं वाक्यं भवंतमब्रवीत् ६ वीर्यशुल्केति प्रतिज्ञा पूर्वं
युष्माकं विदितेत्यन्वयः विमुखीकृता इत्यपि विदितं ७ यदृच्छया दैवात् आगतैः तव पुत्रकैः काकपक्षधरेणैकेन
तव पुत्रेण श्रीरामचंद्रेणेत्यर्थः कप्रत्ययेनाल्पार्थकेन बाल्यद्योतनेन निर्जितत्वैकस्मिन्नाममद्रे बहुवचनप्रयोगा
सुदृढतरनरपतिदुरारोपशंकरशरासनभंगाद्यमानुषतदीयपौरुषविशेषजनितबहुमानादि

मषर्ह

तद्धपूर्वं दक्षाध्वरध्वंससमये रुद्रेण येन साधनेन पुरंदरपुरःसुरसुरनिकरजयः कृतस्तद्दिव्यं धनूरत्नं महात्मना रामेणाम
ध्ये भग्नं हे महाबाहो मत्यां जनसंसदि नेयं यस्य पाते तिरिरिभावः ९ प्रतिज्ञां सीतादान प्रतिज्ञां तां तर्तुं पूरयितुं १० ११ उभ

तद्भग्नं धनुर्दिव्यं मध्ये भग्नं महात्मना ॥ रामेणाहि महाबाहो महत्यां जनसंसदि ॥९॥ अस्मै देया मया सीता वी
र्यशुल्का महात्मने ॥ प्रतिज्ञां तर्तुमिच्छामि तदनुज्ञातुमर्हसि ॥१०॥ सोपाध्यायो महाराज पुरोहितपुरस्कृ
तः ॥ शीघ्रमागच्छ भद्रं ते द्रष्टुमर्हसि राघवौ ॥११॥ प्रतिज्ञां मम राजेंद्र निर्वर्तयितुमर्हसि ॥ पुत्रयोरुभ
योरेव प्रीतिं त्वमुपलप्स्यसे ॥१२॥ एवं विदेहाधिपतिर्मधुरं वाक्यमब्रवीत् ॥ विश्वामित्राभ्यनुज्ञातः शा
तानंदमते स्थितः ॥१३॥ दूतवाक्यं तु तच्छ्रुत्वा राजा परमहर्षितः ॥ वसिष्ठं वामदेवं च मंत्रिणश्चैवमब्रवी
त् ॥१४॥ गुप्तः कुशिकपुत्रेण कौसल्यानंदवर्द्धनः ॥ लक्ष्मणेन सह भ्रात्रा विदेहेषु वसत्यसौ ॥१५॥

योरेव उभयोरपि पुत्रयोः प्रीतिं विवाहजां रातेन लक्ष्मणयोर्मिलाप्रदानं सूचितं १२ अनुज्ञातः अभ्यनुज्ञातः कन्याप्र
दानं कृत्वा १३ एवं वक्ष्यमाणं १४ विदेहेषु विदेहनाम्नां निवासभूते जनपदे १५

१६ यद्दिवोरोचतेवृत्तंयोनसंबंध्ययोऽपमित्यर्थः पर्ययोऽतिक्रमः १७ अयोध्यायात्रेतिमंत्रिणोऽब्रवीदित्यन्वयः तदर्थऽध्यमः

दृष्टवीर्यस्तुकाकुत्स्थोजनकेनमहात्मना॥संप्रदानंसुतायास्तुराघवेकर्तुमिच्छति॥१६॥यदिवो
रोचतेवृत्तंजनकस्यमहात्मनः॥पुरींगच्छामहेशीघ्रंमाभूत्कालस्यपर्ययः॥१७॥मंत्रिणोवाढ
मित्याहुःसहसर्वैर्महर्षिभिः॥सुप्रीतश्चाब्रवीद्राजाश्वोयात्रेतिचमंत्रिणः॥१८॥मंत्रिणस्तुनरेंद्रस्यरा
त्रिंपरमसत्कृताः॥ऊषुःप्रमुदिताःसर्वैर्गुणैःसर्वैःसमन्विताः॥१९॥इत्यार्षेरामायणेवालकांडेऽष्टषष्टि
तमःसर्गः॥६८॥ततोरात्र्यांव्यतीतायांसोपाध्यायःसबांधवः॥राजादशरथोहृष्टःसुमंत्रमिदमब्रवी
त्॥१॥अद्यसर्वेधनाध्यक्षाधनमादायपुष्कलं॥व्रजंत्वग्रेसुविहितानानारत्नसमन्विता॥२॥

ए

क्रियभामितिशेषः १८ नरेंद्रस्यजनकस्यमंत्रिणःपरमसत्कृताःप्रमुदिताःरात्रिमूषुःगुणैःसत्कारातिशयैः १९ इत्यष्ट
षष्टितमःसर्गः ६८ अथदशरथस्यमिथिलागमनमाहततइति १ धनाध्यक्षाःकोशरक्षाधिकारिणः पुष्कलंब
हु अग्रेषंच श्रेयानस्याग्रएवअत्रपुष्कलइत्यमरः सुविहिताःसुरक्षिताः २

यांत्यनेनेति यानं शिबिकादि युज्यतेऽननेनेति युग्यमश्वादि सेनांगत्वादेकवद्भावः अनुत्तमानि श्रेष्ठानि यानानि युग्यानि
च यानं तु वसिष्ठाद्यर्थमिति शेषः ३ ४ कल्याणायाग्र्यां तु उत्तमयानयुग्यैरिति शेषः दूता जनकदूताः ५ चद्वंपाद

चतुरंगबलं चापि शीघ्रं निर्यातु सर्वशः ॥ ममाज्ञासमकाले च यानयुग्यमनुत्तमं ॥ ३ ॥ वसिष्ठो वामदेवश्च
जाबालिरथ काश्यपः मार्कंडेयः सुदीर्घायुरृषिः कात्यायनस्तथा ॥ ४ ॥ एते द्विजाः प्रयांत्वग्रे स्यंदनं यो
जयस्व मे ॥ यथा कालात्ययो न स्याद् दूता हि त्वरयंति मां ॥ ५ ॥ वचनाच्च नरेंद्रस्य सेना च चतुरंगिणी ॥ राजा
नमृषिभिः सार्धं व्रजंतं पृष्ठतोन्वगात् ॥ ६ ॥ गत्वा चतुरहं मार्गं विदेहानभ्युपेयिवान् ॥ राजा च जनकः
श्रीमान् श्रुत्वा पूजामकल्पयत् ॥ ७ ॥ ततो राजानमासाद्य वृद्धं दशरथं नृपं ॥ मुदितो जनको राजा प्रह
र्षं परमं ययौ ॥ ८ ॥ उवाच च वचनं श्रेष्ठो नरश्रेष्ठं मुदान्वितं ॥ ९ ॥

पूर्णार्थं ६ दूतानां त्रिदिनगम्योपि मार्गश्चतुरंगबलोपेतप्रयाणात्वाच्चतुरहं चतुर्भिरहः सुसु मार्गं गत्वा च विदेहान्
विदेहानां निवासानभ्युपेयिवान् राजा जनकश्च श्रुत्वा दशरथागमनमिति शेषः ७ राजानमासाद्य मुदितः प्रहर्षं
ययौ मोदस्यैवाधिकावस्था हर्ष इति भेदः ८ ९

॥१२४॥ वीर्यसौर्यं १० वसिष्ठेइंद्रसादृश्यंपूर्णोधमवत्वेन ११ विघ्नाःकन्यादानप्रतिबंधाःयद्दातादत्तातितद्दाप्रतिग्राहं

स्वागतंतेनरश्रेष्ठदिष्ट्याप्राप्तोसिराघव॥ पुत्रयोरुभयोःप्रीतिंलप्स्यसेवीर्यनिर्जितां॥१०॥दिष्ट्याप्राप्तो
महातेजावसिष्ठोभगवानृषिः॥ सहसर्वैर्द्विजश्रेष्ठैर्देवैरिवशतक्रतुः॥११॥दिष्ट्यामेनिर्जिताविघ्नाःदि
ष्ट्यामेपूजितंकुलं॥ राघवैःसहसंबंधाद्वीर्यश्रेष्ठैर्महाबलैः॥१२॥श्वःप्रभातेनरेंद्रत्वंसंवर्तयितुमर्हसि
यज्ञस्यांतेनरश्रेष्ठविवाहमृषिसत्तमैः॥१३॥तस्यतद्वचनंश्रुत्वाऋषिमध्येनराधिपः॥ वाक्यंवाक्य
विदांश्रेष्ठःप्रत्युवाचमहीपतिं॥१४॥प्रतिग्रहोदातृवशःश्रुतमेतन्मयापुरा॥ यथावक्ष्यसिधर्मज्ञत
त्करिष्यामहेवयं॥१५॥तद्धर्मिष्ठंयशस्यंचवचनंसत्यवादिनः श्रुत्वाविदेहाधिपतिःपरंविस्मयमागतः
१६॥

प्रतिगृहीत्रेतिदातृवाक्यंपुरास्मृतं श्रुतोय[illegible]थावक्ष्यसितद्वयंकरिष्यामहे १५ विस्मयंकन्यायावीर्यशुल्केनजित ॥१२४॥
त्वेपिराज्ञोविनयातिशयेनविस्मयः १६

६ निशाम्य दृष्ट्वा १८ यत्तस्यावशिष्टाः क्रियाः सुताभ्यां दुहित्रोः कन्यादानेनैव वश्यतयापत्यकर्त्तव्यमंकुरार्पणादिलौकि-
कालौकिकं तत्सर्वं कृत्वोवास १९ तत्सर्वं कृत्वोवास १९ एकोनसप्ततितमः सर्गः ६९ कृतकर्मा ऋषिभिः कृत

ततः सर्वे मुनिगणाः परस्परसमागमे॥ हर्षेण महता युक्तास्तां रात्रिमवसन्सुखं॥१७॥ राजा च राघवौ पु-
त्रौ निशाम्य परिहर्षितः॥ उवास परमप्रीतो जनके नाभिपूजितः॥१८॥ जनकोपि महातेजाः क्रियाध-
र्मेण तत्त्ववित्॥ यज्ञस्य च सुताभ्यां च कृत्वा रात्रिमुवास ह॥१९॥ इत्यार्षे रामायणे बालकांडे एकोनस-
प्ततितमः सर्गः॥६९॥ ततः प्रभाते जनकः कृतकर्मा महर्षिभिः॥ उवाच वाक्यं वाक्यज्ञः शतानंदं पुरोहि-
तं॥१॥ भ्राता मम महातेजा वीर्यवानतिधार्मिकः॥ कुशध्वज इति ख्यातः पुरीमध्यवसच्छुभां॥२॥ वा-
र्योफलकपर्यंतां पिबन्निक्षुमतीं नदीं॥ सांकाश्यां पुण्यसंकाशां विमानमिव पुष्पकं॥३॥ ॥॥॥ ॥

प्रातःसवनाद्यनुष्ठानः १ पुरीं सांकाश्यां अध्यवसत् अधिवसति उपान्वध्याङ्वस इति कर्मत्वं २ कीदृशीं वार्याफलक-
पर्यंतां परबलं वारयितुं महो वार्यः प्राकारः तस्याः अग्रफलकाः यंत्रफलकाः तद्युक्तः पर्यंतः परिसरो यस्यां तां
इक्षुमतीं नदीं पिबन् तज्जलं पिबन् सांकाश्यां तदाख्यां नगरीं पुण्यसंकाशां पुण्यशब्देन तत्फलं स्वर्गः तदुपमा-
मित्यर्थः पुष्पकं विमानं तत्सदृशीं ३

॥१२५॥ तंसांकाश्याख्यपुरवासिनंयज्ञगोगोक्तामिथिलायांक्रियमाणायज्ञस्यसांकाश्यायामेवस्थित्वासमग्रतांपेक्षितसा

तमहंद्रष्टुमिच्छामियज्ञगोप्तासमेमतः ॥ प्रीतिंसोपिमहातेजाइमांभोक्तामयासह ॥४॥ एवमुक्तेतुवचनेशता
नंदस्यसन्निधौ ॥ आगताःकेचिदव्यग्राजनकस्तान्समादिशत् ॥५॥ शासनात्तुनरेंद्रस्यप्रययुःशीघ्रवा
जिभिः ॥ समानेतुंनरव्याघ्रंविष्णुमिंद्राज्ञयायथा ॥६॥ सांकाश्यांतेसमागम्यददृशुश्चकुशध्वजं ॥ न्य
वेदयन्यथावृत्तंजनकस्यचचिंतितं ॥७॥ तद्वृत्तंनृपतिःश्रुत्वादूतश्रेष्ठैर्महाजवैः ॥ आज्ञयातुनरेंद्र
स्याजगामकुशध्वजः ॥८॥ सददर्शमहात्मानंजनकंधर्मवत्सलं ॥ सोभिवाद्यशतानंदंजनकंचा
तिधार्मिकं ॥ राजार्हंपरमंदिव्यमासनंसोध्यरोहत ॥९॥ उपविष्टावुभौतौतुभ्रातरावमितद्युती ॥ प्रेष
यामासतुर्वीरौमंत्रिश्रेष्ठंसुदामनं ॥१०॥

मग्रीसंपादकत्वेनरक्षिता इमांप्रीतिंजानकीपरिणयजां ४
अव्यग्राःसमर्थाःसमादिशत्तान्नरेन्द्रेणगंतुंप्रेरत् ५ नरेन्द्रस्यशासनात्शतानंदद्वारकादित्यर्थः विष्णुमुपेंद्रं ६ ७ ॥१२५॥
नृपतिःकुशध्वजः ८ पूर्वंशतानंदमभिवाद्यततोजनकंजाभिवाद्येत्यर्थः अध्यरोहितपुरोहितजनकयोरनुम
त्येतिशेषः ९ सुदामनंसुदामननामानं १०

११ औपकार्यां उपकार्याशब्दात्स्वार्थेष्यञ् दशरथशिविरसन्निवेशमित्यर्थः ११ १३ १४ इदं वाक्यं वक्ष्यमा

गच्छमंत्रिपते शीघ्रमिक्ष्वाकुममितप्रभं ॥ आत्मजैः सहदुर्धर्षमानयस्वसमंत्रिणं ॥११॥ औपकार्यांसगत्वा
तुरघूणांकुलवर्द्धनं ॥ ददर्शशिरसाचैनमभिवाद्येदमब्रवीत् ॥१२॥ अयोध्याधिपतेवीरवैदेहोमिथिला
धिपः ॥ सत्वांद्रष्टुंव्यवसितः सोपाध्यायपुरोहितं ॥१३॥ मंत्रिश्रेष्ठवचः श्रुत्वाराजासर्षिगणस्तदा ॥ स
बंधुरगमत्तत्रजनकोयत्रवर्त्तते ॥१४॥ राजाचमंत्रिसहितः सोपाध्यायः सबांधवः ॥ वाक्यंवाक्यविदांश्रे
ष्ठोवैदेहमिदमब्रवीत् ॥१५॥ विदितंतेमहाराज इक्ष्वाकुकुलदैवतं ॥ वक्तासर्वेषुकृत्येषुवसिष्ठोभगवान्
ऋषिः ॥१६॥ विश्वामित्राभ्यनुज्ञातः सहसर्वैर्महर्षिभिः ॥ एषवक्ष्यतिधर्मात्मान्याय्यंधर्मंयथाक्रमं ॥१७
॥ तूष्णींभूतेदशरथेवसिष्ठोभगवान्ऋषिः ॥ उवाचवाक्यंवाक्यज्ञोवैदेहंसपुरोधसं ॥१८॥

टी० १५ इक्ष्वाकुलदैवतंभगवान्वसिष्ठः इक्ष्वाकूणांसर्वेषुकृत्येषुवक्तेतितेविदितमित्यन्वयः अतोविश्वामित्रा
भ्यनुज्ञया ऋषिभिःसहकुलप्रभवधर्मक्रममनतिक्रम्यक्रमंज्येष्ठानुक्रमंचानतिक्रम्यदशपुरुषविख्यातादि
तिन्यायेनयोनसंबंधापेक्षितवंशपारंपर्यमेषवक्ष्यति १६ १७ १८

अव्यक्तप्रभवस्याप्यगोचरं परमं वस्तु प्रभवः कारणं यस्य सोऽव्यक्तप्रभवश्चतुर्मुखो ब्रह्मा किमव्यक्तमितिचेदुच्यतेऽयोध्या
कांडे आकाशप्रभवो ब्रह्मेति अथ कोऽयमाकाशो विवक्ष्यस्तूत्तरकांडे संक्षिप्य हि पुरा लोकान्मायया स्वयमेव हि
महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः पद्मे दिव्येऽर्कसंकाशे नाभ्यामुत्पाद्य मामपि प्राजापत्यं त्वया कर्म मयि
सर्वं निवेशितमित्यादिना स च शाश्वतः बहुकालस्थायी नित्यः द्विपरार्द्धकालं विनाशरहितः अव्ययः प्रत्याहार

अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः॥ तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपः सुतः॥१९॥ विवस्वा
न्कश्यपाज्जज्ञे मनुर्वैवस्वतः स्मृतः॥ मनुः प्रजापतिः पूर्वमिक्ष्वाकुश्च मनोः सुतः॥२०॥ तमिक्ष्वाकुमयो
ध्यायां राजानं विद्धि पूर्वकं॥ इक्ष्वाकोस्तु सुतः श्रीमान्कुक्षिरित्येव विश्रुतः॥२१॥ कुक्षेरप्यात्मजः श्री
मान्विकुक्षिरुदपद्यत विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान्॥२२॥ बाणस्य तु महातेजा अन
रण्यः प्रतापवान्॥ अनरण्यात्पृथुर्जज्ञे त्रिशंकुस्तु पृथोरपि॥२३॥ त्रिशंकोरभवत्पुत्रो धुंधुमारो म
हायशाः॥ धुंधुमारान्महातेजा युवनाश्वो महारथः॥२४॥

वेराप्रतिकल्पवस्थायी अस्तीति शेषः तस्मान्मरीचिः प्रजापतिर्जातः १९ मनोः प्रजापतित्वं प्रजासर्गाधिका
रित्वेन २० पूर्वकं आद्यं २१ २२ २३ २४

२५ २६ २७ यस्याश्रितितस्यप्रतिराज्यतःशत्रुभूताराजानः २८ सोऽसितःप्रतियुध्यन्प्रतिपक्षस्तयायुध्यन्प्रवा

युवनाश्वसुतश्चासीन्मांधातापृथिवीपतिः॥ मांधातुस्तुसुतःश्रीमान्सुसंधिरुदपद्यत ॥२५॥ सुसंधे
रपिपुत्रौद्वौध्रुवसंधिःप्रसेनजित् ॥ यशस्वीध्रुवसंधेस्तुभरतोनामनामतः॥ भरतात्तुमहातेजाअ
सितोनामजायत॥२७॥ प्रसेनेप्रतिराजानउदपद्यंतशत्रवः॥ हैहयास्तालजंघाश्चशूराश्चशशविं
दवः॥२८॥ तांश्चसंप्रतियुध्यन्वैयुद्धेराजाप्रवासितः॥ हिमवंतमुपागम्यभार्याभ्यांसहितस्तदा॥२९॥
असितोल्पबलोराजाकालधर्ममुपेयिवान्॥ द्वेचास्यभार्येगर्भिण्यौबभूवतुरितिश्रुतं॥३०॥ एकाग
र्भविनाशार्थंसपत्न्यैसगरंददौ॥ ततःशैलवरेरम्येबभूवाभिरतोमुनिः॥२१॥ भार्गवश्च्यवनोनामहिमवंत
मुपाश्रितः॥ तत्रचैकामहाभागाभार्गवंदेववर्चसं॥२१॥

सितःराज्यान्निःसारितः २९ इतिश्रुतंपुराणकथानकमित्यर्थः ३० सगरंगरसहितंभक्ष्यंशैलवरेहिमवतिअभि
रतःप्रीतोभूदित्यर्थः ३१ तत्रहिमवतिएकाप्राशितगरा ३२

॥१२७॥ कालिंदीतितस्यानाम अभ्युपागम्य शरणंगत्वा ३३ पुत्रजन्मवितद्विषये अभ्यवदद्उक्तवान् ३४ गरेणसहितो
जनीष्यतीत्यन्वयः माशुचः मरणाजंगरस्यतनंजंचशोकंत्यजपुत्रेणोचसुखिनीभविष्यसीतिभावः ३५ तस्मात्भा
र्गवप्रसादात् प्रजातप्रसूता ३६ यतोगरेणसहजातोऽतःसगरेणनाम्नाभवत् ३७ ३८ प्रवृद्धःप्रवृद्धाख्यः व

क्वंदेपत्नपत्न्यासीकांक्षंतीसुतमुत्तमं ॥ नमर्षिंसाभ्युपागम्य कालिंदीचाभ्यवादयत् ॥३३॥ सतामभ्य
वदद्विप्रःपुत्रेप्सुंपुत्रजन्मनि ॥ नवक्रुद्धौ महाभागेसुपुत्रःसुमहाबलः ॥३४॥ महावीर्योमहातेजा
श्चाचिरात्संजनिष्यति ॥ गरेणसहितःश्रीमान्माशुचःकमलेक्षणे ॥३५॥ च्यवनंचनमस्कृत्यसराज
पुत्रीपतिव्रता ॥ पतिशोकातुरातस्मात्पुत्रंदेवीव्यजायत ॥३६॥ सपत्न्यानुगरस्तस्यैदत्तोगर्भजिघां
सया ॥ सहतेनगरेणैवजातःससगरोभवत् ॥३७॥ सगरस्यासमंजस्तुअसमंजादंशुमान् ॥ दि
लीपोंशुमतःपुत्रोदिलीपस्यभगीरथः ॥३८॥ भगीरथात्ककुत्स्थस्ककुत्स्थाच्चरघुस्तथा ॥ र
घोस्तुपुत्रस्तेजस्वीप्रवृद्धःपुरुषादकः ॥३९॥

सिष्ठशापात्पुरुषादकःराक्षसः ततोवसिष्ठस्यप्रतिशापप्रदानार्थंस्वधृतशापजलस्यस्वपत्न्यामदयंत्याःप्रवे ॥१२७॥
नयेस्वपादयोरेवविसर्जनात्कल्माषपादश्चाभवत् ३९

यद्यपिवंशपरंपरापुराणादिष्वन्यथादृश्यतेतथापितत्रकल्पभेदेनविरोधपरिहारःएकस्यानेकनामकत्वाद्वा
४० ४१ ४२ ४३ आदितिआदितोब्रह्मणारामान्त्यवंशेनशुद्धानांवीराणांसत्यवादिनांसंबंधिनोरामलक्ष्मणा

कल्माषपादोह्यभवत्तस्माज्जातस्तुशंखणः॥सुदर्शनःशंखणस्यअग्निवर्णःसुदर्शनात्॥४०॥शीघ्र
गस्त्वग्निवर्णस्यशीघ्रगस्यमरुःसुतः॥मरोःप्रशुश्रुकस्त्वासीदंबरीषःप्रशुश्रुकात्॥४१॥अंबरीष
स्यपुत्रोभून्नहुषश्चमहीपतिः॥नहुषस्यययातिस्तुनाभागस्तुययातिजः॥४२॥नाभागस्यबभूवा
जःअजाद्दशरथोभवत्॥अस्माद्दशरथाज्जातौभ्रातरौरामलक्ष्मणौ॥४३॥आदिवंशविशुद्धानांरा
ज्ञांपरमधर्मिणां॥इक्ष्वाकुकुलजातानांवीराणांसत्यवादिनां॥४४॥रामलक्ष्मणयोरर्थेत्वत्सुतेव
रयेनृप॥सदृशाभ्यांनरश्रेष्ठसदृशेदातुमर्हसि॥४५॥इत्यार्षेरामायणेबालकांडेसप्ततितमःसर्गः॥
७०॥एवंब्रुवाणंजनकःप्रत्युवाचकृतांजलिः॥श्रोतुमर्हसिभद्रंतेकुलंनःपरिकीर्तितं ॥१॥

योरित्यर्थः ४४ ४५ इतिसप्ततितमःसर्गः ७० अथजनकःकन्यापितृत्वाज्जामातृवर्गेप्रभुतापादनौचित्येनत्व
वंशंस्वयमेवाहएवमिति ब्रुवाणंवसिष्ठंप्रतिअस्माभिःपरिकीर्तितंनोस्माकंकुलंश्रोतुमर्हसीत्युवाचेत्यर्थः १

॥१२८॥ कुलज्ञातेनसत्कुलप्रसूतेनप्रदानेकन्यादानविषयेकुलंवक्तव्यमित्यन्वयः २ सत्यवतोबलवतो ३ प्रथमो

प्रदानेहिमुनिश्रेष्ठकुलेनिरवशेषतः॥वक्तव्यंकुलजातेनतन्निबोधमहामते॥१॥राजाभूत्त्रिषुलोके
षुविश्रुतःस्वेनकर्मणानिमिःपरमधर्मात्मासर्वसत्ववतांवरः॥२॥तस्यपुत्रोमिथिर्नामजनकोमि
थिपुत्रकः।प्रथमोजनकोराजाजनकादप्युदावसुः॥४॥उदावसोस्तुधर्मात्माजातोवैनंदिवर्द्धनः
नंदिवर्द्धसुतःशूरःसुकेतुर्नामनामतः॥५॥सुकेतोरपिधर्मात्मादेवरातोमहाबलः॥देवरातस्यराजर्षे
र्वृहद्रथइतिस्मृतः॥६॥वृहद्रथस्यशूरोभून्महावीरःप्रतापवान्॥महावीरस्यधृतिमान्सुधृतिः
सत्यविक्रमः॥७॥सुधृतेरपिधर्मात्माधृष्टकेतुःसुधार्मिकः॥धृष्टकेतोश्चराजर्षेर्हर्यश्वइतिवि
श्रुतः॥८॥हर्यश्वस्यमरुःपुत्रोमरोःपुत्रःप्रतीन्धकः।प्रतीन्धकस्यधर्मात्माराजाकीर्तिरथःसुतः॥९॥
पुत्रःकीर्तिरथस्यापिदेवमीढइतिस्मृतः॥देवमीढस्यविबुधोविबुधस्यमहीध्रकः॥१०॥

जनकःसर्वेषामस्माकंजनकशब्दव्यवहार्यत्वेमूलभूतः ४ तस्यप्रसिद्धंनामतःसुकेतुरित्यर्थः ५ ६ ७ ८ ९ १० ॥१२८॥

११ १२ तस्यह्रस्वरोम्णःज्येष्ठोहंममानुजःकुशध्वजः १३ सममपितामांज्येष्ठंराज्येभिषिच्यकुशध्वज
भारंराज्यभारंचमयिसमावेश्यस्थापयित्वावनंगतइत्यन्वयः १४ धुरंराज्यभारं स्नेहात्स्वस्यपालयन् १५

महीध्रकसुतोराजाकीर्तिरातोमहाबलः॥कीर्तिरातस्यराजर्षिर्महारोमाव्यजायत॥११॥महारोम्णस्तुध
र्मात्मास्वर्णरोमाव्यजायत॥स्वर्णरोम्णस्तुराजर्षेर्ह्रस्वरोमाव्यजायत॥१२॥तस्यपुत्रद्वयंराज्ञोध
र्मज्ञस्यमहात्मनः॥ज्येष्ठोहमनुजोभ्राताममवीरःकुशध्वजः॥१३॥मांतुज्येष्ठंपिताराज्येसोभिषिच्य
सतोमतः॥कुशध्वजंसमावेश्यभारंमयिवनंगतः॥१४॥वृद्धेपितरिस्वर्यातेधर्मेणधुरमावहे॥
भ्रातरंदेवसंकाशंस्नेहात्पश्यन्कुशध्वजं॥१५॥कस्यचित्त्वथकालस्यसांकाश्यादागतःपुरात्॥सु
धन्वावीर्यवान्राजामिथिलामवरोधकः॥१६॥सचमेप्रेषयामासशैवंधनुरनुत्तमं॥सीताचक
न्यापद्माक्षीमह्यंवैदीयतामिति॥१७॥

सांकाश्यांमितिसुधन्वनगरनाम अवरोधकःआगमत्अवरोद्धुमागतवानित्यर्थः १६ शैवंधनुःसीताचकन्या
मह्यंदीयतामितिदूतान्मेप्रेषयामासेत्यन्वयः १७

तस्यउक्तवत्सुहृदयस्य विमुखोपद्रुविमुखः १८ सांकाश्येसुधन्वनगरे १९ २० ऊर्मिलांयोनिजपुत्री २१ त्रिवदा

तस्याप्रदानान्महर्षेयुद्धमासीन्मयासह॥सहतोविमुखोराजासुधन्वातुमयारणे॥१८॥निहत्यतंमु
निश्रेष्ठसुधन्वानंनराधिपं॥सांकाश्येभ्रातरंशूरमभ्यषिंचंकुशध्वजं॥१९॥कनीयानेषमेभ्राता
अहंज्येष्ठोमहामुने॥ददामिपरमप्रीतोवध्वौतेमुनिपुंगव॥२०॥सीतांरामायभद्रंतेऊर्मिलांलक्ष्मणा
यवै॥वीर्यशुल्कांममसुतांसीतांसुरसुतोपमां॥२१॥द्वितीयामूर्मिलांचैवत्रिर्वदामिनसंशयः॥
ददामिपरमप्रीतोवध्वौतेमुनिपुंगव॥२२॥रामलक्ष्मणयोराजन्गोदानंकारयस्वह॥पितृकार्यं
चभद्रंतेततोवैवाहिकंकुरु॥२३॥मघाह्यद्यमहाबाहोतृतीयेदिवसेप्रभो॥फल्गुन्यामुत्तरेराजंस्त
स्मिन्वैवाहिकंकुरु॥२४॥

मिउक्तमपिदार्ढ्यायेत्याशयः २२ वैवाहिकंविवाहात्प्राक्कर्तव्यंपितृकार्यंनान्दीमुखश्राद्धं २३ अद्यमघानक्षत्रंप्राग
मिनितृतीयदिवसेउत्तराफल्गुन्यांवैवाहिकंविवाहंकुरुसुखोदयंसुखोदर्कं २४

इत्येकसप्ततितमः सर्गः ७१ वीरं जनकं १ अचिंत्यानि आश्चर्यभूतानि अप्रमेयानि अपरिच्छेद्यमहिमानि एषां
तुल्यः परस्परव्यतिरेकेणापरो नास्ति २ सीता च ऊर्मिलया सह रामलक्ष्मणयोर्दीयतां इति यत् अयं धर्मसं

रामलक्ष्मणयोरर्थे दानं कार्यं सुखोदये॥ इत्यार्षे रामायणे वाल्मीकीये बालकांडे एकसप्ततितमः सर्गः॥
७१॥ तमुक्तवंतं वैदेहं विश्वामित्रो महामुनिः॥ उवाच वचनं वीरं वसिष्ठसहितो नृपं॥ १॥ अचिंत्यान्यप्रमे
याणि कुलानि रघुनंदन॥ इक्ष्वाकूणां विदेहानां नैषां तुल्योऽस्ति कश्चन॥ २॥ सदृशो धर्मसंबंधः सदृ
शो रूपसंपदा॥ रामलक्ष्मणयो राजन् सीता चोर्मिलया सह॥ ३॥ वक्तव्यं च नरश्रेष्ठ श्रूयतां वचनं मम॥ भ्राता
यवीयान् धर्मज्ञ एष राजा कुशध्वजः॥ ४॥ अस्य धर्मात्मनो राजन् रूपेणाप्रतिमं भुवि॥ सुताद्वयं नरश्रे
ष्ठ पत्न्यर्थं वरयामहे॥ ५॥ भरतस्य कुमारस्य शत्रुघ्नस्य च धीमतः॥ वरयेमे सुते राजंस्तयोरर्थे महात्मनोः ६

बंधः सदृशः रूपसंपदा च सदृशः ३ किंचिदस्य वक्तव्यमस्ति तच्छ्रूयतामित्यन्वयः ४ ५ कयोः पत्नीत्वा
र्थं तत्राह भरतस्येत्यादि भरतस्य शत्रुघ्नस्य च तयोर्द्वयोरर्थे इत्यन्वयः ६

दशरथपुत्रेषुनकश्चिदपिवीरगुणैन्यूनइत्याहपुत्राइति ६ उभयोर्भ्रात्रोःसंबंधेनइक्ष्वाकुकुलंसंबध्यतां तत्रसंबंधे
पुण्यकर्मणोभवतोऽव्यग्रंचित्तंभवत्विति शेषः कथमीदृशेनमहाराजेनयुगपन्मयासंबंधचतुष्टयंकार्यमितिव्यग्रं

पुत्रादशरथस्येमेरूपयौवनशालिनः॥लोकपालसमाःसर्वेदेवतुल्यपराक्रमाः॥७॥उभयोरपिराजेंद्र
संबंधेनानुबध्यतां॥इक्ष्वाकुकुलमव्यग्रंभवतःपुण्यकर्मणः॥८॥विश्वामित्रवचःश्रुत्वावसिष्ठ
स्यमतेतदा॥जनकःप्रांजलिर्वाक्यमुवाचमुनिपुंगवौ॥९॥कुलंधन्यमिदंमन्येयेषांनोमुनिपुंगवौ
सदृशंकुलसंबंधंयदाज्ञापयतःस्वयं॥१०॥एवंभवतुभद्रंवःकुशध्वजसुतेइमे॥पत्न्यौभजेतांसहितौ
शत्रुघ्नभरतावुभौ॥११॥एकाह्नाराजपुत्रीणांचतसृणांमहामुने॥पाणीन्गृह्णंतुचत्वारोराजपु
त्रामहाबलाः॥१२॥

मास्त्वित्यर्थः ८ ९ येषांनोस्माकंसदृशंकुलसंबंधंमुनिपुंगवौभगवंतौस्वयंनतुशिष्या
दिमुखतोयदस्माराज्ञापयतस्तस्मादिदंकुलंधन्यंमन्ये १० सहितौसदासहचरौ ११ एकाह्नेतिसप्तम्यर्थेतृतीयाराज
भावःसमासांतानामनित्यत्वात् एकदिवसेइत्यर्थः चतसृणामितिदीर्घत्वमार्षं १२

उत्तरेदिवसेइतिफल्गुनीभ्यांफल्गुन्योः वैवाहिकंप्रशंसंति यत्रफल्गुनीनक्षत्रंभगःप्रजापतिर्देवता १३ १४ परोधर्मःक
न्यादानरूपः आसनशब्देनदशरथजनककुशध्वजानांराज्यानिलक्ष्यंते भवतोआस्यतामित्यार्थे आस्यितांपाल

उत्तरेदिवसेब्रह्मन्फल्गुनीभ्यांमनीषिणः ॥ वैवाहिकंप्रशंसंतिभगोयत्रप्रजापतिः ॥१३॥ एवमुक्त्वाव
चःसौम्यंप्रत्युत्थायकृतांजलिः ॥ उभौमुनिवरौराजाजनकोवाक्यमब्रवीत् ॥१४॥ परोधर्मःकृतोमह्यंशि
ष्योस्मिभवतोःसदा ॥ इमान्यासनमुख्यानिआस्यतांमुनिपुंगवौ ॥१५॥ यथादशरथस्येयंतथायोध्या
पुरीमम ॥ प्रभुत्वेनास्तिसंदेहोयथार्हंकर्तुमर्हथ ॥१६॥ तथाब्रुवतिवैदेहेजनकेरघुनंदनः ॥ राजा
दशरथोहृष्टःप्रत्युवाचमहीपतिः ॥१७॥

पेतांराज्यत्रयमपिभवदधीनमितिभावः १५ दशरथराज्यंत्वया
कथंविनियुज्यतइत्यतआह यथेति यथेयंमिथिलादशरथस्ययथेष्टविनियोज्याचममतथाचयुवयोःप्रभुत्वेसंदेहो
नास्तिअतोयथार्हंयथोचितंप्रभुत्वंकर्तुमर्हथेत्यर्थःपूज्यायांबहुवचनंवयंसर्वेभवदधीनाइत्याशयः १६ हृष्टःएवमेवप्र
वादेनेतिशेषः १७

१८ क्षत्रियत्वेविप्रप्रतिग्रहीतृत्वेनदातरिजनकेआशीःस्वस्तीत्यादि १९ आपृच्छ्यआपृच्छ्य २० प्रभातेउत्थायकालेप्रातः
कालकर्तव्यंगोदानाख्यंकर्मचक्रे २१ तदंगत्वेनप्रसिद्धंगोदानमाहगवामित्यादि एकैकशइत्यर्थं २२ संपन्ना

युवामसंख्येयगुणौभ्रातरौमिथिलेश्वरौ ॥ ऋषयोराजसंघाश्चभवद्भ्यामभिपूजिताः ॥१८॥ स्वस्ति
प्राप्नुहिभद्रंतेगमिष्यामःस्वमालयं ॥ श्राद्धकर्माणिविधिवद्विधास्यइतिचाब्रवीत् ॥१९॥ त
मापृष्ट्वानरपतिंराजादशरथस्तदा ॥ मुनींद्रौतौपुरस्कृत्यजगामाशुमहायशाः ॥२०॥ सगत्वानि
लयंराजाश्राद्धंकृत्वाविधानतः ॥ प्रभातेकाल्यउत्थायचक्रेगोदानमुत्तमं ॥२१॥ गवांशतसहस्रं
चब्राह्मणेभ्योनराधिपः ॥ एकैकशोददौराजापुत्रानुद्दिश्यधर्मतः ॥२२॥ सुवर्णशृंगाःसंप
न्नाःसवत्साःकांस्यदोहनाः ॥ गवांशतसहस्राणिचत्वारिपुरुषर्षभः ॥२३॥

वेहुदुग्धाःईदृश्योयागावस्तासांगवांचत्वारिलक्षाणिददावित्युत्तरेणान्वयः २३ श्रीसीतारामश्रीसीताराम

गोदानं गोदानाख्यकर्मविशेषः तथाचाश्वलायनः गोदानंचौलवत्कार्यंषोडशेऽब्दे तदुच्यते अर्कोपवेशनंना
स्तिश्मश्रूणांमुडनंभवेत् स्नात्वाचवाग्यतस्तिष्ठन्नहःशेषंनयेदथआदित्येचास्तमितेवाचंविसृजेतांतिकेगु

वित्तमन्यच्चसुबहुद्विजेभ्योरघुनंदनः ॥ ददौगोदानमुद्दिश्यपुत्राणांपुत्रवत्सलः ॥२४॥ ससुतैःकृत
गोदानैर्वृतःसन्नृपतिस्तदा ॥ लोकपालैरिवाभातिवृतःसौम्यःप्रजापतिः ॥२५॥ इत्यार्षेरामायणेवाल्मी
कीयेबालकांडेद्विसप्ततितमःसर्गः ॥७२॥ यस्मिंस्तुदिवसेराजाचक्रेगोदानमुत्तमं ॥ तस्मिंस्तुदि
वसेवीरोयुधाजित्समुपेयिवान् ॥१॥ पुत्रःकेकयराजस्यसाक्षाद्भरतमातुलः ॥ दृष्ट्वापृष्ट्वाचकुश
लंराजानमिदमब्रवीत् ॥२॥

रोः अहंवरंददामीतिदद्याद्गोमिथुनंततइति इदंगोदानाख्यंकर्मसमावर्त्तनपूर्वांगं वेदंव्रतानिवापारंनीत्वाहु
भयमेववागुरवेतुवरंदत्वास्नायीततदनुज्ञयेतियाज्ञवल्क्यात् २४ सौम्यःसोमडयासौम्यएवसौम्यः २५ इतिद्विसप्तति
तमःसर्गः ७२ समुपेयिवान्दशरथमितिशेषः १ २

केकयाधिपतिर्युधाजितपिताकुशलमब्रवीदितियुष्मान्प्रतीतिशेषः येषामस्माकंत्वंकुशलकामोसितेषामस्माकं
संप्रत्यनामयमितिचाब्रवीत् ३ आगमनप्रयोजनमाहस्वस्रीयमिति स्वसुरपत्यंभरतमित्यर्थः ४ ५ अयोध्या

केकयाधिपतीराजास्नेहात्कुशलमब्रवीत्॥येषांकुशलकामोसितेषांसंप्रत्यनामयं॥३॥स्वस्रीयंम
मराजेंद्रद्रष्टुकामोमहीपतिः॥तदर्थमुपयातोहमयोध्यांरघुनंदन॥४॥श्रुत्वात्वहमयोध्यायां
विवाहार्थंतवात्मजान्॥मिथिलामुपयातांस्तुत्वयासहमहीपते॥५॥त्वरयाभ्युपयातोहंद्रष्टुकाम
स्वसुःसुतं॥अथराजादशरथःप्रियातिथिमुपस्थितं॥६॥दृष्ट्वापरमसत्कारैःपूजनार्हमपूजय
त्॥ततस्तामुषितोरात्रिंसहपुत्रैर्महात्मभिः॥७॥प्रभातेपुनरुत्थायकृत्वाकर्माणितत्त्ववित्॥ऋ
षींस्तदापुरस्कृत्ययज्ञवाटमुपागमत्॥८॥

यामदृष्ट्वाभरतंद्रष्टुकामइहाभ्युपयातइत्यन्वयः ६ यज्ञवाटंयज्ञशालाद्वारं ७ ८

युक्तइत्यादिसार्द्धश्लोकस्यउपमगमदितिपूर्वेणान्वयःयुक्तेशुभलग्नादियुक्तेविजयेतदाख्ये ९ दात्ययत्तवांतवर्त्तिनं
वैदेहं १० दातारंदातृत्तस्तयात्तां प्रवेष्टुमाकांक्षते ११ दातृप्रतिग्रहीतृभ्यांयोगेइतिशेषःसर्वार्थादानधर्माःहियतोऽतःउ

पुन्येमुहूर्त्तेविजयेसर्वाभरणभूषितैः॥ भ्रातृभिःसहितोरामःकृतकौतुकमंगलः॥९॥ वसिष्ठंतुपुरस्कृ-
त्वामहर्षीनपरानपि॥ वसिष्ठोभगवानेत्यवैदेहमिदमब्रवीत॥१०॥ राजादशरथोराजन्कृतकौतुक-
मंगलैः॥ पुत्रैर्नरवरश्रेष्ठोदातारमभिकांक्षते॥११॥ दातृप्रतिग्रहीतृभ्यांसर्वार्थाःप्रभवंतिहि॥ स्वध-
र्मेप्रतिपद्यस्वकृत्वावैवाह्यमुत्तमं॥१२॥ इत्युक्तःपरमोदारोवसिष्ठेनमहात्मना॥ प्रत्युवाचमहातेजा
वाक्यंपरमधर्मवित॥१३॥ कःस्थितःप्रतिहारोमेकस्याज्ञासंप्रतीक्षते॥ स्वगृहेकोविचारोस्तिय-
थाराज्यमिदंतव॥१४॥

त्तमंवैवाह्यंक्रियाहोपयोगिलौकिकालौकिकंकर्मकृत्वाततःस्वधर्मंप्रवेशात्तादानलक्षणंपतिपद्यस्वतावद्द्वार्येवतिष्ठामइतिभावः
परमोदारःपरमदाता १३ प्रतिहारोद्वारपालःयथेदंमेराज्यंतथातवतत्रस्वगृहवेशेकोविचारइत्यर्थः १४ श्रीरामायनमः

अपिचकृतस्वकर्त्तव्येनमयैववधुष्वाप्रतीक्षाक्रियतइत्याह कृतेतिकृतंकौतुकसर्वंस्वंवैवाहिककृत्यमंगलानुष्ठानंया
स्ताः वेदिमूलंवेदिसमीपं १५ सवः अस्मिन्कालेत्वांप्रतीक्ष्यतइतित्वत्प्रतीक्षः अविघ्नमविलंबंयथातथासर्वंविवाह
कर्मक्रियतांकिमर्थंद्वार्यवस्थानेननविलंब्यतेभवतेतिशेषः १६ श्रुत्वावशिष्ठमुखात् १७ सर्वांवैवाहिकीमित्युत्तरे

कृतकौतुकसर्वस्वावेदिमूलमुपागताः ॥ ममकन्यामुनिश्रेष्ठदीप्तावन्हेरिवार्चिषः ॥१५॥ सज्जोहं
त्वत्प्रतीक्षोस्मिवेद्यामस्यांप्रतिष्ठितः ॥ अविघ्नंक्रियतांसर्वंकिमर्थंहिविलंब्यते ॥१६॥ तद्वाक्यं
जनकेनोक्तंश्रुत्वादशरथस्तदा ॥ प्रवेशयामाससुतान्सर्वानृषिगणानपि ॥१७॥ ततोराजाविदे
हानांवसिष्ठमिदमब्रवीत् ॥ कारयस्वऋषेसर्वामृषिभिःसहधार्मिक ॥१८॥ रामस्यलोकरामस्य
क्रियांवैवाहिकींप्रभो ॥ तथेत्युक्त्वातुजनकंवसिष्ठोभगवानृषिः ॥१९॥ विश्वामित्रंपुरस्कृत्य
शतानंदंचधार्मिकं ॥ प्रपामध्येतुविधिवद्वेदिंकृत्वामहातपाः ॥२०॥

णान्वयः १८ लोकरामस्यसर्वलोकप्रियस्येतियावत् १९ प्रपामध्येमंडपमध्येवेदिंविवाहवेदिं इयंवेदिरित्यर्थः २०

सुवर्णपालिकाभिः मंगलार्थं सुवर्णरचिताभिः पालिकाभिः छिद्रकुंभैः करकैः २१ शंखइवपात्राणि तैः अर्घ्याद्यर्हरिपूजि
तैः तद्युक्तैः २२ संस्कृतैर्हरिद्रालेपादिसंस्कारवद्भिः समैः समप्रमाणैः समास्तीर्य वेदिमितिशेषः २३ पुरस्कृतं हवि

अलंचकार तां वेदिं गंधपुष्पैः समंततः ॥ सुवर्णपालिकाभिश्च छिद्रकुंभैश्च सांकुरैः ॥२१॥ अंकु
राद्यैः शरावैश्च धूपपात्रैः सधूपकैः ॥ शंखपात्रैः स्रुवैः स्रुग्भिः पात्रैरर्घ्यादिपूजितैः ॥२२॥ ला
जपूर्णैश्च पात्रीभिरक्षतैरपि संस्कृतैः ॥ दर्भैः समैः समास्तीर्य विधिवन्मंत्रपूर्वकं ॥२३॥ अग्निमा
धाय वेद्यां तु विधिमंत्रपुरस्कृतं ॥ जुहावाग्नौ महातेजा वसिष्ठो मुनिसत्तमः ॥२४॥ ततः सीतां समा
नीय सर्वाभरणभूषितां ॥ समक्षमग्नेः संस्थाप्य राघवाभिमुखं तदा ॥२५॥ अब्रवीज्जनको राजा
कौसल्यानंदवर्द्धनं ॥ इयं सीता मम सुता सहधर्मचरी तव ॥२६॥

रितिशेषः विवाहहोमादीनां वरकृत्यत्वा
त्तत्पुरोहितो वसिष्ठो जुहाव २४ अग्नेः समक्षं राघवाभिमुखे देशे संस्थाप्येत्यन्वयः २५ इयं मम परिच्छेद्या सा कुमार्य्यं लावण्या
दिगुणनिधित्वस्तुतवलनिर्जिता मम सुतेत्याभिजात्यकथनं सहधर्मं चरीति यत्त्वयानुष्ठेयो धर्मः स अनया सह कर्तव्य
इत्यर्थः स्यादिति २६

एनांप्रतीछ प्रतिगृहाण तदुपयोगित्वेन पाणिंगृह्ण स्वपाणिनेति गृह्णामिते सुभगात्वयाति मंत्रपूर्वकंपाणिंगृ

प्रतीछ चैनांभद्रंते पाणिंगृह्णीष्व पाणिना ॥ पतिव्रतामहाभागा छायेवानुगतासदा ॥२७॥ इत्युक्त्वाप्रा
क्षिपद्राजामंत्रपूतंजलंतदा ॥ साधुसाध्विति देवानामृषीणांवदतांतदा ॥२८॥ देवदुंदुभिनिर्घोषःपुष्प
वर्षोमहानभूत् ॥ एवंदत्वासुतांसीतांमंत्रोदकपुरस्कृतां ॥२९॥ अब्रवीज्जनकोराजाहर्षेणाभिपरिप्लुतः
लक्ष्मणागच्छभद्रंते ऊर्मिलामुद्यतांमया ॥ प्रतीछपाणिंगृह्णीष्वमाभूत्कालस्यपर्ययः ॥३०॥ तमे
वमुक्त्वाजनकोभरतंचाभ्यभाषत ॥ गृहाणपाणिंमांडव्याःपाणिनारघुनंदन ॥३१॥ शत्रुघ्नंचापिधर्मा
त्माअब्रवीन्मिथिलेश्वरः ॥ श्रुतकीर्त्तेर्महाबाहोपाणिंगृह्णीष्वपाणिना ॥३२॥

हारीत्यर्थः छायेवानुगतानित्यसंवद्धाभवत्विति शेषः २७ प्राक्षिपद्रामहस्ते इति शेषः २८ दानीयमंत्रोदकाभ्यांपुरस्कृतं २९
उद्यतांदातुंकृतनिश्चयां ३० प्रतीछेत्यादिप्राग्वद्व्याख्यातं ज्येष्ठानुसरणात्पूर्वंलक्ष्मणविवाहकथनंभिन्नोदरत्वान्नविरुध्य
ते ३१ ३२

सुचरितं व्रतं ब्रह्मचर्यादि यैः पत्नीभिः सहिताः संतु भवंतु ३३ जनकस्येति ज्येष्ठत्वाज्जनकेनानुज्ञामात्रे कृतेऽस्कत्र
स्येपरां तु मांडवीश्रुतकीर्त्योः कुशध्वजेनैव कृतं तदाह याज्ञवल्क्यः पिता पितामहो भ्राता सकुल्यो जननी तथा क
न्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः इति ३४ एकस्यां वेदिकायामेकस्मिन्नेवाग्नौ वसिष्ठो जुहाव तमेवाग्निं सर्वे

सर्वैर्भवंतः सौम्याश्च सर्वे सुचरितव्रताः पत्नीभिः ॥ संतु काकुत्स्था माभूत्कालस्य पर्ययः ॥३३॥ जनक
स्य वचः श्रुत्वा पाणीन् पाणिभिरस्पृशन् ॥ चत्वारस्ते चतसृणां वसिष्ठस्य मते स्थिताः ॥३४॥ अग्निं प्र
दक्षिणं कृत्वा वेदिं राजानमेव च ॥ ऋषींश्चापि महात्मानः सह भार्या रघूद्वहाः ॥३५॥ यथोक्तेन ततश्च
क्रुर्विवाहं विधिपूर्वकं ॥३६॥ पुष्पवृष्टिर्महत्यासीदंतरिक्षात्सुभास्वरा ॥ दिव्यदुंदुभिनिर्घोषैर्गीत
वादित्रनिस्वनै ॥३७॥ ननृतुश्चाप्सरःसंघा गंधर्वाश्च जगुः कलं ॥ विवाहे रघुमुख्यानां तदद्भुतमदृश्यत ॥३८

स्वस्वभार्यापाणीन् गृहीत्वा प्रदक्षिणीकृत्य विवाहं चक्रुरित्याह अग्निमिति वेदिं विवाहवेदिं राजानं जनकं ऋषींश्चापि
प्रदक्षिणां कृत्वेति शेषः ३५ यथोक्तेन शास्त्रोक्तेन प्रकारेण विवाहं तत्कृत्यशेषं होमादि ३६ अथ विवाहकर्मकालि
कशुभनिमित्तानि दर्शयति पुष्पवृष्टिरिति ३७ तदद्भुतं दुंदुभिनिर्घोषादिसहितपुष्पवर्षादि ३८

ईदृशे पूर्वोक्तरूपे तूर्याणां नृत्यगीतवाद्यानां यद्बहुत्वं घोषस्तस्मिन्निनादिते प्रतिध्वनिरूपे वर्त्तमाने तेन महौजसा रघुराजकु
माराऽग्निं त्रिः परिक्रम्य भार्या ऊढा विवाहं निवर्त्तयामासुरिति सूपसंहारितो पुनर्वादः ३९ उपकार्यं शिविरं पटमन्वधू

ईदृशे वर्तमाने तु तूर्योद्घुष्टनिनादिते ॥ त्रिरग्निं ते परिक्रम्य ऊहुर्भार्या महौजसः ॥३९॥ अथोपकार्यं ज
ग्मुस्ते सभार्या रघुनंदनाः ॥ राजाप्यनुययौ पश्यन्सर्षिसंघः सबांधवः ॥४०॥ इत्यार्षे रामाय
णे बालकांडे त्रिसप्ततितमः सर्गः ॥७३॥ अथ रात्र्यां व्यतीतायां विश्वामित्रो महामुनिः ॥ आपृष्ट्वा तौ च
राजानौ जगामोत्तरपर्वतं ॥१॥ विश्वामित्रे गते राजा वैदेहं मिथिलाधिपं ॥ आपृष्ट्वैव जगामाशु राजा
दशरथः पुरीं ॥२॥ अथ राजा विदेहानां ददौ कन्याधनं बहु ॥ गवां शतसहस्राणि बहूनि मिथिले
श्वरः ॥३॥ कंबलानां च मुख्यानां ददौ कोट्यंबराणि च ॥ हस्त्यश्वरथपादातं दिव्यरूपं स्वलंकृतं ॥४॥

वरसंबंधकल्याणं ४० इति त्रिसप्ततितमः सर्गः ७३ उत्तरपर्वतं कौशिकीतटाच्छिन्नं हिमवंतं १ जगाम गंतुमुद्यतो
ऽभूत् २ कन्याधनं विवाहकाले कन्यायै देयं धनं पोतकाख्यं तस्यैव प्रपंचो गवामित्यादि ३ मुख्यानां नेपालभवा
नां कंबलानां बहूनिति संबंधः क्षौमान्च हूनिति विपरिणामः कोट्यंबराणि कोटिसंख्यानि सामान्यवासांसि ४ राम

कन्याशतंसखीत्वेनतासांराजकुमारीणांप्रत्येकमितिशेषः दासीदासमितिगवाश्वादित्वादेकत्वं हिरण्यंरजतंसुवर्णंहेम
षष्ठतानांकोटिपदस्याहारेणान्वयः ५ पार्थिवंदशरथं ६ ७ बलैश्चातुरंगैःकिंकरैश्चसहितः तथागच्छंतंद

ददौकन्याशतंतासांदासीदासमनुत्तमं हिरण्यस्यसुवर्णस्यमुक्तानांविद्रुमस्यच ॥५॥ ददौराजासुसंहृ
ष्टःकन्याधनमनुत्तमं ॥ दत्वाबहुविधंराजासमनुज्ञाप्यपार्थिवं ॥६॥ प्रविवेशस्वनिलयंमिथिलांमि
थिलेश्वरः ॥ राजाप्ययोध्याधिपतिःसहपुत्रैर्महात्मभिः ॥७॥ ऋषीन्सर्वान्पुरस्कृत्यजगामसबलानु
गः ॥ गच्छंतंतुनरव्याघ्रंसर्षिसंघंसराघवं ॥८॥ घोराःस्मपक्षिणोवाचोव्याहरंतिसमंततः ॥ भौमाश्चै
वमृगाःसर्वेगच्छंतिस्मप्रदक्षिणं ॥९॥ तान्दृष्ट्वाराजशार्दूलोवसिष्ठंपर्यपृच्छत ॥१०॥ असौम्याःप
क्षिणोघोरामृगाश्चापिप्रदक्षिणाः ॥ किमिदंहृदयोत्कंपिमनोममविषीदति ॥११॥ राज्ञोदशर
थस्यैतच्छ्रुत्वावाक्यंमहानृषिः ॥ उवाचमधुरांवाणींश्रूयतामस्ययत्फलं ॥१२॥

शरथमितिशेषः ८ पक्षिणोवायसादयः तत्रपक्षिणांघोरव्याहरणमाशेदुर्निमित्तंततोमृगाप्रदक्षिणागमनंसुनिमित्तं
९ तान्शुभाशुभसूचकोत्पातान् १० असौम्याःपक्षिणोघोराःघोरशब्दाइत्यर्थः हृदयकंपजनकंकिमिदंदुःखो
दर्कंचेतिप्रश्नः अनिश्चयान्मेमनोविषीदति ११ १२

॥२०६॥ द्विविधे भये दिव्यं पक्षिमुखाच्च्युतं वचनं घोरं भयमुपस्थितं प्राप्तमावेदयतीति शेषः मृगाः प्रशमयंति प्रशमं सूचयंतीत्यर्थः १३
तेषां संवदतामित्यस्य पुइति शेषः १४ तमो भस्म चोभयमप्युत्पातजं १५ ससंज्ञा ईव ईषत्संज्ञा इत्यर्थः अन्यत्तु बलं निःसंज्ञ
मेव भस्मच्छन्नेवाभूदिति शेषः १६ भीमसंकाशं भयंकरदर्शनं जामदग्न्येयमितिरक् कैलाशमिवेत्यनेन महाकारत्व

उपस्थितं भयं घोरं दिव्यं पक्षिमुखाच्च्युतं ॥ मृगाः प्रशमयंत्येते संतापस्त्यज्यतामयं ॥१३॥ तेषां संवद
तां तत्र वायुः प्रादुर्बभूव ह ॥ कंपयन्मेदिनीं सर्वां पातयंश्च महाद्रुमान् ॥१४॥ तमसा संवृतः सूर्यः
सर्वै नावेदिषुर्दिशः ॥ भस्मना चावृतं सर्वं संमूढमिव तद्बलं ॥१५॥ वसिष्ठो ऋषयश्चान्ये राजा च ससु
तस्तदा ॥ ससंज्ञा ईव तत्रासन्सर्वमन्यद्विचेतनं ॥ तस्मिंस्तमसि घोरे तु भस्मच्छन्नेव सा चमूः ॥१६॥
ददर्श भीमसंकाशं जटामंडलधारिणं ॥ भार्गवं जामदग्न्यं तं राजा राजविमर्दनं ॥१७॥ कैलासमि
व दुर्द्धर्षं कालाग्निमिव दुःसहं ॥ ज्वलंतमिव तेजोभिर्दुर्निरीक्ष्यं पृथग्जनैः ॥१८॥ स्कंधे चासज्य प
रशुं धनुर्विद्युद्गणोपमं ॥ प्रगृह्य शरमुग्रं च त्रिपुरघ्नं यथा शिवं ॥१९॥

दुर्द्धर्षमशक्यातिक्रमं पृथग्जनैः पामरजनैः १८ प्रभातिशयेन विद्युद्गणोपमं धनुः उग्रं नृशंसं च प्रगृह्य त्रिपुरघ्नं यथा शि ॥२०६॥
वं शिवमवस्थितम् १९

जपहोमपरायणाऽग्नीन्निति शेषः होमो मानसः २० ऋषी तं परस्परजल्पमाह कच्चिदित्यादि श्लोकद्वयेपि नशब्देन
नुशब्दैकदेशो नन्वित्यर्थको वितर्के २१ २२ २३ जामदग्न्या इति अनंतरापत्ये गोत्रत्यारोपावस २४ इति चतुःसप्त

तंदृष्ट्वाभीमसंकाशंज्वलंतमिव पावकं ॥ वसिष्ठप्रमुखाविप्राजपहोमपरायणाः ॥२०॥ संगतामुन
यः सर्वे संजजल्पुरथोमिथः ॥ कच्चित्पितृवधामर्षी क्षत्रंनोत्सादयिष्यति ॥२१॥ पूर्वंक्षत्रवधंकृ
त्वागतमन्युर्गतज्वरः ॥ क्षत्रस्योत्सादनंभूयोनखल्वस्यचिकीर्षितं ॥२२॥ एवमुक्त्वार्घ्यमादा
यभार्गवंभीमदर्शनं ॥ ऋषयोरामरामेतिमधुरंवाक्यमब्रुवन् ॥२३॥ प्रतिगृह्यतुतांपूजामृषि
दत्तांप्रतापवान् ॥ रामंदाशरथिंरामोजामदग्न्योऽभ्यभाषत ॥२४॥ इत्यार्षेरामायणेबालकांडे
चतुःसप्ततितमः सर्गः ॥७४॥ रामदाशरथेवीरवीर्यंतेश्रूयतेऽद्भुतं ॥ धनुषोभेदनंचैवनिखिले
नमयाश्रुतं ॥१॥ तदद्भुतमचिंत्यंचभेदनंधनुषस्तथा ॥ तच्छ्रुत्वाहमनुप्राप्तोधनुर्गृह्यापरंशुभं
२॥

तितमः सर्गः ७४ किमभाषतेत्यत्राह रामेति निखिलेन कार्त्स्न्येन चेन ताटकावधादिसमुच्चीयते १ यत्त्वयाऽभ्रनाया
तेनधनुषोभेदनंकृतं तदद्भुतमचिंत्यंच अन्येनमनसाप्यशक्यं अतस्तच्छ्रुत्वेत्यादि गृह्य गृहीत्वा २ श्रीसीताराम

॥२०७॥ यत्त्वयाऽनायासेन धनुषो भेदनं कृतं तदद्भुतमचिंत्यं च अनेन मनसाप्यशक्यं अतस्तच्छ्रुत्वेत्यादि १ प्रगृह्य गृहीत्वा २
जामदग्न्यः स्वपितुरागतम् अत्रार्थे च आर्थः शरेणायुक्तं पूरयस्वैव आकर्षयस्व ३ अस्यापि धनुषः पूरणे स
तिवीर्यश्लाघ्यं वीर्यं तात तद्दत्तपाश्लाघ्यम् ४ तद्वचनं दशरथवचनं ५ क्षत्ररोषात् रोषजनक्षत्रवधात् ६ सह

तदिदंघोरसंकाशंजामदग्न्यंमहद्धनुः॥पूरयस्वशरेणैवस्वबलंदर्शयस्वच॥३॥तदहंतेब
लंदृष्ट्वाधनुषोप्यस्यपूरणे॥द्वंद्वयुद्धंप्रदास्यामिवीर्यश्लाघ्यमहंतव॥४॥तस्यतद्वचनंश्रु
त्वाराजादशरथस्तदा॥विषण्णवदनोदीनःप्रांजलिर्वाक्यमब्रवीत्॥५॥क्षत्ररोषात्प्रशांतस्त्वं
ब्राह्मणश्चमहातपाः॥बालानांममपुत्राणामभयंदातुमर्हसि॥६॥भार्गवाणांकुलेजातःस्वाध्या
यव्रतशालिनां॥सहस्राक्षेप्रतिज्ञायशस्त्रंप्रक्षिप्तवानसि॥७॥सत्वंधर्मपरोभूत्वाकश्यपायवसुंधरां
दत्वावनमुपागम्यमहेंद्रकृतकेतनः॥८॥ममसर्वविनाशायसंप्राप्तस्त्वंमहामुने॥नचैकस्मिन्हते ०
रामेसर्वेजीवामहेवयं॥९॥ब्रुवत्येवंदशरथेजामदग्न्यःप्रतापवान्॥अनादृत्यतुतद्वाक्यंराममेवाभ्यभाषत

ताक्षे तत्सन्निधौ प्रतिज्ञाय अतः परं शस्त्रं न ग्रहीष्यामीत्येवं प्रक्षेपस्त्यागः ७ महेंद्रकृतकेतनः तपश्चरणार्थं महें ॥२०७॥
द्रादिकृतनिवास ८ त्वं तयात्यक्तशस्त्रादि मम सर्वविविनाशाय कुतः संप्राप्त इत्यन्वयः सर्वनाशमेवोपपादयति नचेत्यादि
९।१०

इमेद्वेइतियत्त्वयाभग्नंयच्चमपावृतंतेद्वेइत्यर्थः वलवतीवलवन्नम्ये सुरुतेयत्नेननिर्मित ११ विश्वकर्मनिर्मि
तयोरेकंसुरैरनुसृष्टंत्रिपुरंहंतुकामायदत्तमित्यर्थः त्रिपुरघ्नमिति यत्त्वयाभग्नंतत्त्रिपुरघ्नंतद्धननसाधनमित्य

इमेद्वेधनुषीश्रेष्ठेदिव्येलोकाभिपूजिते॥दृढेवलवतीमुख्येसुकृतेविश्वकर्मणा॥११॥अनुसृ
ष्टंसुरैरेकंत्र्यंवकाययुयुत्सवे॥त्रिपुरघ्नंनरश्रेष्ठभग्नंकाकुत्स्थयत्त्वया॥१२॥इदंद्वितीयंदुर्धर्षं
विष्णोर्दत्तंसुरोत्तमैः॥१३॥तदिदंवैष्णवंरामधनुःपरपुरंजयं॥समानसारंकाकुत्स्थरौद्रेणध
नुषात्विदं॥१४॥तदातुदेवताःसर्वाःपृच्छंतिस्मपितामहं॥शितिकंठस्यविष्णोश्च वलावल
निरीक्षया॥१५॥

र्थः १२ १३ तदिदंवैष्णवत्वेनप्रसिद्धमिदंरौद्रेणधनुषासमानसारमित्यपरंवाक्यं १४ रौद्रस्येदानीमल्पसारत्वमा
हतत्वात्त्विति दृढकरत्रिपुरदाहनानंतरं विष्णुशितिकंठयोर्वलावलज्ञानाय देवताः पितामहंतारतम्यंपृच्छंतिस्म
२५

॥२०८॥ अभिप्रायंतुविज्ञायेति पूर्वंविविष्णुरेवबलवानितिश्रुतं इदानींरौद्रेणधनुषात्रिपुरदहनमयेतुविष्णोपकरणंशरणंशर
मात्रमभूत् अतःकिमुभोतुल्यबलोऽतन्यूनाधिकबलौ इत्येवंरूपमभिप्रायंविज्ञापकेनापिनिमित्तेनविरोधंजनया
मास १६ १७ तदेति एकेनैवहुंकारेणशैवंधनुर्जृंभितंशिथिलीकृतंमहादेवश्चस्तंभितः १८ तदागतशंसयैर्देवै

अभिप्रायंतुविज्ञायदेवतानांपितामहः॥ विरोधंजनयामासतयोःसत्वपरीक्षया॥१६॥विरोधेतु
महद्युद्धमभवद्रोमहर्षणं॥शितिकंठस्यविष्णोश्चपरस्परजयैषिणोः॥१७॥तदातुजृंभितं
शैवंधनुर्भीमपराक्रमं॥हुंकारेणमहादेवःस्तंभितोथत्रिलोचनः॥१८॥देवैस्तदासमागम्यस
र्षिसंघैःसचारणैः॥याचितौप्रशमंतत्रजग्मतुस्तौसुरोत्तमौ॥१९॥जृंभितंतद्धनुर्दृष्ट्वाशैवंवि
ष्णुपराक्रमैः॥अधिकंमेनिरेविष्णुंदेवाःसर्षिगणास्तथा॥२०॥

युद्धादुपरतिंयाचितौदेवतानु
ग्रहायप्रशमंजग्मतुः १९ जृंभितंविष्णुपराक्रमैर्जडीकृतंधनुःशितिकंठंचदृष्ट्वासकलगत्रापकंविष्णुंशितिकंठात्परा
क्रमैस्तौनशक्त्यादिभिश्चअधिकंसर्वोत्तमंमेनिरे शितिकंठधनुषोवैष्णवधनुश्चाधिकंमेनिरेइत्यर्थः २० श्रीराम ॥२०८॥

एवंपुत्रदशायांक्रुद्धःपश्चाद्देवप्रार्थनयाप्रसन्नःशिवोदेवेभ्योदत्त्वाततःसर्वैःसहपुत्र्यर्थंधनुरिच्छतोदेवरातस्य
दत्तो अतएववह्णानदत्तमितिवक्ष्यमाणेनरुद्रेणदेवांदत्तमित्युक्तग्रंथेनचनविरोधः २० अथास्यधनुषश्चा

धनूरुद्रस्तुसंक्रुद्धोविदेहेषुमहायशाः॥देवरातस्यराजर्षेर्ददौहस्तेससायकं॥२१॥इदंच
वैष्णवंरामधनुःपरपुरंजयं॥ऋचीकेभार्गवेप्रादाद्विष्णुःसन्यासमुत्तमे॥२२॥ऋचीकस्तुम
हातेजाःपुत्रस्याप्रतिकर्मणः॥पितुर्ममददौदिव्यंजमदग्नेर्महात्मनः॥२३॥न्यस्तशस्त्रेपितरि
मेतपोबलसमन्विते॥अर्जुनोविदधेतत्रप्राकृतांबुद्धिमास्थितः॥२४॥वधमप्रतिरूपंतुपि
तुःश्रुत्वासुदारुणं॥क्षत्रमुत्सादयंरोषाज्जातंजातमनेकशः॥२५॥

न
गमंमाहइदंचेत्यादि २२ भार्गवेभृगुपुत्रे अप्रतिकर्मणःस्वहंतर्पपिशाचादिप्रतिक्रियारहितस्य २३ न्यस्तशस्त्रे
न्यस्तंत्यक्तंविस्मृ चनत्पंशस्त्रंयेनतथाभूतेतपोबलयुतेपितरिप्राकृतांबुद्धिमास्थितोर्जुनःकार्त्तवीर्यःमत्पितुर्वधंविद
धे २४ तमप्रतिरूपमयोग्यंपितुर्वधंश्रुत्वाहंरोषात्क्षत्रमुत्सादयंउत्सादितवान् २५

प्राप्यस्वबलेनेतिशेषःपुण्यकर्मणोयज्ञरूपपुण्यकर्मसाकृतार्थः २६ तत्वाभूमितिशेषःमहेंद्रोमहेंद्रपर्वततःधनुषःशैवस्य २७ पितृषेतिशेषः तावतापिनमुंचामिःप्रविनुततोनंतरंतेद्वंद्वयुद्धंदास्यामीतिसंबंधः २९ इतिपंच

पृथिवींचाखिलांप्राप्यकश्यपायमहात्मने॥यज्ञस्यांतेतदारामदक्षिणांपुण्यकर्मणो॥२६॥दत्वामहेंद्रनिलयस्तपोबलसमन्वितः॥श्रुत्वातुधनुषोभेदंततोहंद्रुतमागतः॥२७॥तदेवंवैसवंरामपितृपैतामहंमहत्॥क्षत्रधर्मंपुरस्कृत्यगृहीष्वधनुरुत्तमं॥२८॥योजयस्वधनुश्रेष्ठेशरंपरपुरंजयं॥यदिशक्तोसिकाकुत्स्थद्वंद्वंदास्यामितेततः॥२९॥इत्यार्षेरामायणेवालकांडेपंचसप्ततितमःसर्गः॥७५॥श्रुत्वातुजामदग्न्यस्यवाक्यंदाशरथिस्तदा॥गौरवाद्यंत्रितकथःपितूरामं राममथाब्रवीत्॥१॥

सप्ततितमःसर्गः ७५ पितुर्गौरवाद्यंत्रितकथःपितृसन्निधानाद्यंत्रितानियमिताकथायाडुद्दैःकथनंयेनसतथामितभाषीत्यर्थः १

पितुरानृण्यपितरंतत्क्षत्रवधेनपितृवैरशुद्धिमास्थितःसन् यत्कर्मत्रिसप्तकृत्वःक्षत्रियवधरूपंकृतवानसितदनुरुध्या
महेऽङ्गीकुर्मःशूरेणावश्यंवैरशुद्धिःकर्तव्यत्वात् २ यन्मांसमर्थेणाप्युक्तंवीर्यहीनमशक्तमिवमन्यमानोऽवजाना
सिक्षत्रधर्मेबुद्धस्वेत्यादिनावमानंकृतवानसितन्नावरुध्यामहे अतोयमेतेजःपराभिभवासहनंतन्मूलंमेपरा
क्रमंत्वशक्तापराभिभवंचपश्य ३ क्रुद्धःप्रागुक्तावमानवचनेनक्रोधाविष्टस्तद्धस्तात्स्वयमेवधनुःशरंचाग्राही

श्रुतवानस्मियत्कर्मकृतवानसिभार्गव ॥ अनुरुध्यामहेब्रह्मन्पितुरानृण्यमास्थितं ॥ २ ॥ वी
र्यहीनमिवाशक्तंक्षत्रधर्मेणभार्गव ॥ अवजानासिमेतेजःपश्यमेद्यपराक्रमं ॥ ३ ॥ इत्युक्त्वारा
घवःक्रुद्धोभार्गवस्यवरायुधं ॥ शरंचप्रतिसंगृह्यहस्ताल्लघुपराक्रमः ॥ ४ ॥ आरोप्यसधनू
रामःशरंसज्यंचकारह ॥ जामदग्न्यंततोरामंरामःक्रुद्धोब्रवीदिदं ॥ ५ ॥

वनिष्ठांवैष्णवींशक्तिंचजग्राह तदुक्तंपाद्मे इत्युक्त्वादिव्यवैष्णव्याशक्त्यातद्गतयासह जग्राहवैष्णवंचापंविनयेन
चलीलयेति अत्रापिवक्ष्यतिनिर्वीर्योजामदग्न्योसाविति लघुशीघ्रःपराक्रमोयस्यसः ४ आरोप्यज्यारोपंकृत्वा
शरंसज्यंज्यासंयुक्तंचकारः ५

जमदग्निपुत्रत्वेनब्राह्मणोसीतिविश्वामित्रभगिन्याःपौत्रोसीतिचमेपूज्योसिवधानर्होसित्वंनस्तेप्राणहरंशरं
मोक्तुंनशक्तोस्मीतिशेषः ६ इमांवात्वद्गतिंगमनसाधनपादशक्तिमाकाशगमनादिरूपांलोकान्लोकप्रा

ब्राह्मणोसीतिपूज्योमेविश्वामित्रकृतेनच ॥ तस्माच्छक्तोनतेराममोक्तुंप्राणहरंशरं ॥ ६ ॥ इ
मांवात्वद्गतिंरामतपोबलसमार्जिताम् ॥ लोकानप्रतिमान्वापिहनिष्यामीतिमेमतिः ॥ ७ ॥ न
ह्ययंवैष्णवोदिव्यःशरःपरपुरंजयःमोघः ॥ पततिवीर्येणबलदर्पविनाशनः ॥ ८ ॥ वरायुधध
रंरामंद्रष्टुंसर्षिगणाःसुराः ॥ पितामहंपुरस्कृत्यसमेतास्तत्रसर्वशः ॥ ९ ॥ गंधर्वाप्सरसश्चैवसिद्धचार
णकिन्नराः ॥ यक्षराक्षसनागाश्चतद्द्रष्टुंमहदद्भुतं ॥ १० ॥

प्तिसाधनंधर्मंवाउभयोर्मध्येयदिच्छसितद्वदेत्यर्थः ७ कुतएवमतआहनहीति वीर्येणस्ववशात्माशत्रूणांबलदर्पवि
नाशनःमोघोव्यर्थोनपततिलक्ष्यमभित्वाननिवर्त्तते ८ वरायुधधरंवैष्णवायुधधरं समेतामिलिताः ९
तद्द्रष्टुंसमागताइतिशेषः १०

वरधनुर्द्धरेरामेग्रधिकरोतीतस्यभार्गवस्यग्रालोकेतजसिसमकंतेसतीतिशेषः तदुक्तंनारसिंहे ततःपरशुरामस्यदेहा
न्निर्गत्यवैष्णवं पश्यतांसर्वदेवानांतेजोराममुपागमदिति ग्रतएवभार्गवेजडीकृतेसतिनिर्वीर्यःसरामोराममु
दैक्षतःऽद्भूतविष्णुतेजस्कमपश्यत् ११ वद्देवविवरणोतितेजोभिरिति रामसंक्रांतैजोभिर्हेतुभिः गतवीर्यतया

म
जडीकृतेनतदालोकेरामेवरधनुर्धरे॥निर्वीर्योजामदग्न्योसौरामोसमुदैक्षत॥११॥तेजोभिर्गतवीर्यत्वा-
ज्जामदग्न्योजडीकृतः॥रामंकमलपत्राक्षंमंदमंदमुवाचह॥१२॥कश्यपायमयादत्तापूर्वैववसुंधरा
विषयेमेनवस्तव्यमितिमांकश्यपोब्रवीत्॥१३॥सोहंगुरुवचःकुर्वन्नपिम्यांनवसेनिशां॥तदाप्रभृ
तिकाकुत्स्थकृतामेकश्यपस्यह॥१४॥नहिमांमहतीरामहंतुंनार्हसिराघव॥मनोजवेगमिष्यामिम
हेंद्रंपर्वतोत्तमे॥१५॥

जडीकृतःपरशुरामउवाचशरयच्छप्रश्नोत्तरमितिशेषः १२ विषयेदेशे १३ गुरुवचःक
श्यपवचःनिशांरात्रिंनवसेत्यर्थः यताकश्यपस्यग्रग्रेप्रतिज्ञाकृतातदाप्रभृतीतिशेषः हप्रसिद्धम् १४ यदेवमतःता
मिमांमहतिंग्राकाशगमनचेन्नहनिष्यसितर्हिमनोजवमास्थायकश्यपेनसमुद्रेणसचतंमहेंद्रंगमिष्यामिग्र
न्यथाप्रतिज्ञामान्यामहत्संकटंस्यादितिभावः॥

तपसायत्नादिरूपेणनिर्जिताः अर्जितालोकास्तान्शरमुख्येनजहि तदुक्तंपाद्मे शतयज्ञकृतंपुण्यंपतनशास्त्रावन्वे
स्यदिति १५ अक्षय्यमिति अस्येतरदुरारोपस्यधनुषःपरामर्शादारोपणाद्धेतोस्त्वामक्षय्यंकेनापिक्षयंपराज

लोकास्त्वद्भक्तिमाराम निर्जितास्तपसामया॥ जहितांछरमुख्येनमाभूत्कालस्यपर्ययः॥१६॥ अत
यंमधुहंतारंजानामित्वांसुरेश्वरं॥ धनुषोस्यपरामर्शात्स्वस्तितेस्तुपरंतप॥१७॥ एतेसुरगणाः
सर्वेनिरीक्षंतेसमागताः॥ त्वामप्रतिमकर्माणमप्रतिद्वंद्वमाहवे॥१८॥ नचेयंममकाकुत्स्थव्री
डाभवितुमर्हति॥ त्वयात्रैलोक्यनाथेनयदहंविमुखीकृतः॥१९॥ शरमप्रतिमंराममोक्तुमर्हसि
सुव्रत॥ शरमोक्षेगमिष्यामिमहेंद्रपर्वतोत्तमं॥२०॥

यंनेतुमशक्यंमधुहंतारंपुरुषोत्तमंदेवंजानामिनिश्चि
नोमि १८ एतेसुरगणाइत्यादिनापिलोकोत्तरत्वमेवसूच्यते अप्रतिद्वंद्वंप्रतिभटरहितं १८ यदाहंपूर्वंतादृशेत्रैलोक्य
नाथेनत्वयाविमुखीकृतःपरिभूतः इयंविमुखीकरणोत्पन्नालज्जाममभवितुंनर्हतिस्वामिनः सकाशात्पराजयोव्रीडामाव
हतीत्यर्थः १९ शरमोक्षेगमिष्यामियस्यतपसार्जितत्वात्परापस्यचशरार्पितत्वाज्जीवन्मुक्तोगमिष्यामीत्यर्थः २०

२१ ह्रस्यरघुलोकान्हताल्लोकप्राप्तिहेतुकर्माणिविफलीकृतानीत्यर्थः २२ २३ दाशरथिंप्रदक्षिणंकृत्वात्रंतर्धामि
त्वेनतानात्प्रणामकरणंचकायेनक्षत्रियत्वाद्दोषं आत्मगतिंस्वस्थानंजगामेत्यर्थः प्रभुर्ब्राह्मणत्वात् १७ इ

तथाब्रुवतिरामेतुजामदग्न्येप्रतापवान्॥रामोदाशरथिःश्रीमांश्चिक्षेपशरमुत्तमं॥२१॥सहतान्दृश्य
रामेणस्वाँल्लोकांस्तपसार्जितान्॥जामदग्न्योजगामाशुमहेंद्रंपर्वतोत्तमं॥२२॥ततोवितिमिराःसर्वा
दिशश्चोपदिशस्तथा॥सुराःसर्षिगणारामंप्रशशंसुरुदायुधं॥२३॥रामंदाशरथिंरामोजामदग्न्यः
प्रशस्यह॥ततःप्रदक्षिणीकृत्वाजगामात्मगतिंप्रभुः॥२४॥इत्यार्षेरामायणेवालकांडेषट्सप्ततित
मःसर्गः॥७६॥गतेरामेप्रशांतात्मारामोदाशरथिर्धनुः॥वरुणायाप्रमेयायप्रददौहस्तेमहायशाः १

तिषट्सप्ततितमःसर्गः ७६ रामेपरशुरामे प्रशांतेगतक्रोधेआत्माविजयस्यसः हस्तेस्वहस्तेस्थितंधनुर्वरुणायदेवैःस
हकौतुकदर्शनार्थमंतरिक्षेस्थितायददौन्यासात्मनेतिशेषः वरुणस्याप्रमेयत्वंभगवत्साक्षाद्दृष्टविग्रहत्वात् १

॥२१२॥

विह्वलंपरशुरामभयेन अनेनपरशुरामकृतांकृतांपरत्वबोधिकांस्तुतिंवहन्नाप धनुर्दानंचनत्तातवानितिग
म्यते २३ रामस्येत्यादिश्लोकद्वयमेकान्वयं ४ हर्षस्यवाधिकावस्थःप्रमोदः ५ तांप्रथमंसुमितांपश्चा

अभिवाद्यततोरामोवसिष्ठप्रमुखानृषीन॥पितरंविक्ललंदृष्ट्वाप्रोवाचरघुनंदनः॥१॥जामद
ग्न्योगतोरामःप्रयातुचतुरंगिणी॥अयोध्याभिमुखीसेनात्वयानाथेनपालिता॥३॥रामस्यव
चनंश्रुत्वाराजादशरथःसुतं॥बाहुभ्यांसंपरिष्वज्यमूर्ध्न्युपाघ्रायराघवः॥४॥गतोरामइ
तिश्रुत्वाहृष्टःप्रमुदितोनृपः॥पुनर्जातंतदामेनेपुत्रमात्मानमेवच॥५॥चोदयामासतांसेनांज
गामाशुततःपुरीं।पताकाध्वजिनींरम्यांतूर्योद्घुष्टनिनादितां॥६॥

त्प्राश्वासात्सेनांचोदयामासप्रेरयतिस्म ततःपुरींजगामासेनेतिशेषः पताकेत्यादिश्लोकद्वयमेकान्वयंपता
काःक्षुद्रध्वजामहान्तःसंत्यस्यांतां तूर्याणामुद्घुष्टेनउद्घोषेणसंजातनिनादमित्यर्थः ६

॥२१२॥

सिक्तेनुराजपथेनश्चसमंताद्स्याप्रकीर्णाविक्षिप्ताःकुसुमानामुत्कराःसमूहायस्यां राजप्रवेशेनसमुत्सवैःमंगलद्रव्य
पाणिभिःपौरैःसंपूर्णांपुरींराजाप्राविशदितिसंबंधः ७ ततःपौरैःपुरवासिभिर्द्विजैश्चदूरंप्रत्युद्गतःश्रीमान्राजाश्री

सिक्तराजपथारम्यांप्रकीर्णकुसुमोत्करां॥राजप्रवेशसुमुखैःपौरैर्मंगलपाणिभिः॥७॥संपूर्णांप्रावि
शद्राजाजनौघैःसमलंकृतां पौरैः प्रत्युद्गतोदूरंद्विजैश्चपुरवासिभिः॥८॥पुत्रैरनुगतैःश्रीमान्श्री
मद्भिश्चमहायशाः॥प्रविवेशगृहंराजाहिमवत्सदृशंप्रियं॥९॥ननंदस्वजनैराजागृहेकामैःसुपू
जितः॥१०॥कौसल्याचसुमित्राचकैकेयीचसुमध्यमा॥वधूप्रतिग्रहेयुक्तायाश्चान्याराजयोषितः
॥११॥ततःसीतांमहाभागामूर्मिलांचयशस्विनीं॥कुशध्वजसुतेचोभेजगृहुर्नृपयोषितः॥१२॥

मद्भिरृद्धिपरिग्रहादधिकलक्ष्मीवद्भिरनुगतैःपुत्रैःसहहिमवत्सदृशंगृहंप्रविवेश सुधालेपजधावल्यादौन्नत्याच्च
हिमवत्सादृश्यंगृहे ९ कामैःविषयभोगपरिकरस्रक्चंदनादिभिःसुपूजितोननंद १० वधूनांप्रतिग्रहेमंगलाचरण
पूर्वकादर्शनेयुक्ताःआसन्नितिशेषः ११ जगृहुःअंतःपुरंप्रवेशायन १२

मंगलालंबनैः मंगलालंकरणैः होमैः गृहप्रवेशनीयहोमैः शोभिताः प्राज्ञशोभाः देवतायतनानि गृहदेवताप्रतिमाः
ताः सर्वराजसुताः स्नुषाः सर्वाराजपत्न्याः प्रत्यपूजयन् प्रणामयंतिस्म १३ सर्वाराजसुताः अभिवाद्यानभिवाद्यर्हान्

मंगलालंबनैर्होमैः शोभिताः क्षौमवाससः ॥ देवतायतनान्याशु सर्वास्ताः प्रत्यपूजयन् ॥१३॥ अभिवा-
द्याभिवाद्यांश्च सर्वा राजसुतास्तदा ॥ रेमिरे मुदिताः सर्वा भर्तृभिः सहिता रहः ॥१४॥ कृतदाराः कृ-
तास्त्राश्च सधनाः ससुहृज्जनाः ॥ शुश्रूषमाणाः पितरं वर्तयंति नरर्षभाः ॥१५॥ कस्यचित्त्वथ
कालस्य राजा दशरथः सुतं ॥ भरतं कैकयीपुत्रमब्रवीद्रघुनंदनः ॥१६॥ अयं केकयराजस्य पु-
त्रो वसति पुत्रक ॥ त्वां नेतुमागतो वीर युधाजिन्मातुलस्तव ॥१७॥

भिवाद्यर्हानभिवाद्य मुदिताः सर्वा भर्तृसहिता रहो रेमिरे इत्यन्वयः १४ वर्तयंति पितृभक्तिं कुर्वंति १५ कस्यचित्त्वथ
कालस्य कस्मिंश्चित्काले गते सति मातुलस्तवेति अतो गच्छति वयं जयत्वोकं पुत्रविरहकातयोत १६ १७

१८ अक्लिष्टकारिणं अक्लिष्टं कस्यापि दुःखं न भवति तथा कर्तुं शीलमस्य तं रामं १९ २० प्रियाणि इष्टप्राप्तिरूपाणि हि-
तानिष्टनिवर्त्तकानि २२ मातृभ्यः परमं अत्यंतं यंत्रितो मर्यादायुक्तः सन्मातृकार्याणि कृत्वा गुरूणां तद्विषये परम

श्रुत्वा दशरथस्यैतत्स्मरतः कैकयीसुतः॥ गमनायाभिचक्राम शत्रुघ्नसहितस्तदा ॥१८॥ आपृच्छ्य पित-
रं शूरो रामं चाक्लिष्टकारिणं॥ मातॄश्चापि नरश्रेष्ठः शत्रुघ्नसहितो ययौ॥१९॥ युधाजित्प्राप्य भरतं स-
शत्रुघ्नं प्रहर्षितः॥ स्वपुरं प्राविशद्वीरः पिता तस्य तुतोष ह॥२०॥ गते च भरते रामो लक्ष्मणश्च महा-
बलः॥ पितरं देवसंकाशं पूजयामासतुस्तदा॥२१॥ पितुराज्ञां पुरस्कृत्य पौरकार्याणि सर्वशः॥ चकार रा-
मः सर्वाणि प्रियाणि च हितानि च॥२१॥ मातृभ्यो मातृकार्याणि कृत्वा परमयंत्रितः॥ गुरूणां गुरुका-
र्याणि काले कालेन्ववैक्षत॥२३॥

यंत्रितः श्रुतिस्मृतिमर्यादानतिलंघी गुरुकार्याणि गुरुचित्तशुश्रूषादिकार्याणि काले तत्तदवसरे अन्ववैक्षत परिपाल-
यति स्मेत्यर्थः २३

एवमेतादृशेनरामस्यशीलवृत्तेनपितादशरथःप्रीतोतितुष्टःसर्वेब्राह्मणानैगमावणिजश्चग्रामेविषयवासि

रावेदशरथःप्रीतोब्राह्मणानैगमास्तथा ॥ रामस्यशीलवृत्तेनसर्वेविषयवासिनः ॥२४॥ ते
षामनियशालोकेरामःसत्यपराक्रमः ॥ स्वयंभूरिवभूतानांबभूवगुणवत्तरः ॥२५॥ ॥

नश्चप्रीताइतिशेषः २४ तेषांचतुर्णांपुत्राणांमध्येसत्यपराक्रमोरामएवातियशाः भूतानांमध्येस्वयंभूरिवत
गुणवत्तरोबभूव २५

एवंधर्मपरतांरामस्योक्त्वाधर्माविरुद्धकामाभिरतिंदर्शयतिरामस्त्वित्यादिश्लोकचतुष्टयेन मनस्वीअनुकूलमनस्कः
अतएवतद्गतमनाःनित्यंसीतागतमनास्तस्याहृदिसमर्पितःसंबंधसामान्येषष्ठी तयाहृदिसम्यङ्निहितइत्यर्थः
अनेनपरस्परानुरागोदर्शितः २६ नित्यंतद्गतमनाइत्यत्रहेतुमाहप्रियात्वितिसीतारामस्यपितृकृतादाराइति

रामस्तुसीतयासार्द्धंविजहारबहूनृतून्मनस्वीतद्गतमनास्तस्याहृदिसमर्पितः ॥२६॥ प्रियातुसी
तारामस्यदाराःपितृकृताइति॥ गुणाद्रूपगुणाच्चापिप्रीतिर्भूयोविवर्द्धते ॥२७॥

विवाहसदृशविवाहेनपितृदत्ताइतिहेतोरामस्यसीताप्रियतमाबभूवनैतावदेवकिंतुगुणात्छंदोनुवर्त्तनाद्रूप
गुणात्सौंदर्यातिशयाच्चभूयोऽधिकंरामस्यप्रीतिस्तत्रवर्द्धतेस्म २७ श्रीसीताराम

अथरामस्येवसीतायाअपिरामेनिरंतरानुरागंदर्शयन्तस्या।हृदिनित्यंसमर्पिततत इत्युक्तंविवृणोतितस्याश्चेतिश्लोकद्वे
नभर्त्तारामस्वःतस्याहृदयेद्विगुणंयथाभवतितथापरिवर्त्तते रामाद्विगुणाप्रीतिःसीतायारामेऽभूदित्यर्थः रामस्य
सीताहृदयेपरिवर्त्तमानत्वाद्रामः सीतायाअंतर्गतमपिहृदयाभिप्रायंहृदामनसाव्यक्तमाख्यातिजानाति २८

तस्याश्चभर्त्ताद्विगुणंहृदयेपरिवर्त्तते ॥ अंतर्गतमपिव्यक्तमाख्यातिहृदयंहृदा ॥ २८ ॥ तस्यभूयोवि
शेषेणमैथिलीजनकात्मजा ॥ देवताभिःसमारूपेसीताश्रीरिवरूपिणी ॥ २९ ॥

तस्यहृदयंमैथिलीभूयोऽधिकंविशेषेणाऽऽख्यातिजानाति रामस्याप्यतिशयेनसीतायाःकांतेंगितपरिज्ञानेहेतुचतु
ष्टयमाह मैथिलीति देशस्वभावात्सूक्ष्मज्ञा देवताभिःसमेतिप्रागल्भ्यंरूपेविषयेरूपिणीप्रशस्तरूपवतीति श्रीरिव
स्थितेतिसमष्टिविशेषोदर्शितः २९

एवमनवधिकमन्योन्यानुरागमुपपाद्य तदनुरूपं विहारं दर्शयति तयेति अभिकामयाऽत्यनुरक्तया
उत्तमराजकन्यया तया समेयिवान्संगतः स राजर्षिसुतो मुदान्वितो विभू रामः अतीव शुशुभे कंक ॥११६॥

ए
तया स राजर्षिसुतोऽभिकामया समेयिवानुत्तमराजकन्यया ॥ अतीव रामः शुशुभे मुदान्वितो विभुः
श्रिया विष्णुरिवामरेश्वरः ॥३०॥ इत्यार्षे रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशत्सहस्रि
कायां संहितायां श्रीमद्बालकांडे अभिरामाय रामाय क्रीडारम्भानेनाम सप्तसप्ततितमः सर्गः ॥
७७ ॥ संवत ॥ १९१९ ॥

येव अमरेश्वरो विष्णुः श्रियेव उपमानोत्तरभावान्मूर्तिभेदेनोपमामात्रं बोध्यं ३० इति श्रीमज्जानकी
रमणपदपंकजपरिचरणपरायणशिवलालपाठकपादानुध्यायिमहादेवरामसंगृहीते श्रीमद्रामायणती ॥११६॥
यविषमपदव्याख्याने बालकांडं समाप्तिमगमत्

सं० ४२ बालकांड

श्रीवाल्मीकी स्थानकोपत्रा

ग्रं० सं० ९४८७